वंशपल्लीश्रीनिवासतीर्थविरचितः

ऋगर्थोद्धारः

सम्पादकौ
वि. रङ्गनाथ कट्टिः
वि. शङ्करनारायण अडिगः
उपनिदेशकौ, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु-२८

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

वंशपल्लीश्रीनिवासतीर्थविरचितः

ऋगर्थोद्धारः

सम्पादकौ

वि. रङ्गनाथ कट्टिः　　　　वि. शङ्करनारायण अडिगः

उपनिदेशकौ, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु - २८

२००६

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला - ३३

वंशपल्लीश्रीनिवासतीर्थविरचितः
ऋगर्थोद्धारः

सम्पादकौ- वि. रङ्गनाथ कट्टि तथा वि. शङ्करनारायण अडिगः

प्रकाशकः -
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्रोड्,
बेङ्गलूरु - २८

प्रथममुद्रणम् - २००६

पृ.सं. - ३२६ + ४८

मुद्रितपुस्तकसङ्ख्या - १०००

मूल्यम् - १२० रूप्यकाणि

अक्षरसंयोजनम् - रम्या क्रियेशन्स्, बेङ्गलूरु

वागर्थमुद्रणद्वारा मुद्रितम् ।

POORNAPRAJNA SAMSHODHANA MANDIRAM
Recognised by Rashtriya Sanskrit Samsthan, Deemed University,
Ministry of H.R.D., Govt. of India, New Delhi

ṚGARTHODDHĀRAḤ

of Vaṁśapalli Śrī Śrīnivāsatīrtha

Editors

Vidwan Ranganatha Katti **Vidwan K. Shankaranarayana Adiga**
Deputy Directors,
Poornaprajna Samshodhana Mandiram, Bangalore

Publisher :
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha,
Bangalore - 560 028

2006

Poornaprajna Samshodhana Mandiram Series No. 33

ṚGARTHODDHĀRAḤ of Vaṁśapalli Śrī Śrīnivāsatīrtha

Editors : **Vidwan Ranganatha Katti**
&
Vidwan K. Shankaranarayana Adiga

Published by :.
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Bangalore - 560 028.

This publication is brought out by the generous financial help of
Rashtriya Sanskrit Samsthan, (Deemed University), New Delhi

First Edition : 2006

Pages : 48 + 376

Copies : 1000

Price : Rs. 120/-

Type setting :
Ramya Creations, Bangalore

Printed : **VAGARTHA**
149, 8th Cross, N.R. Colony
Bangalore - 560 019
Phone : 2242 7677

श्री श्री विश्वेशतीर्थश्रीपादाः
श्रीपेजावराधोक्षज मठः
जगद्गुरु श्रीमध्वाचार्यमहासंस्थानम्
उडुपि - ५७६ १०१, कर्णाटक

दिनाङ्कः २०-१०-०६

अनुग्रहाशंसनम्

'सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या....तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावबोधधिषणं मुदमाप देवः ॥' इति श्रीमद्भागवतोक्तदिशा नृजन्मनः सार्थक्यं तदैव हि भवति यदा परतत्त्वज्ञानं सम्पाद्यते। तच्च ज्ञानम् अर्थज्ञान-पर्यवसायिवेदाध्ययनमन्तरा न जायते। वेदार्थावगमश्च व्युत्पन्नानामपि क्लेश-दायक इति नातीव प्रतिपादनीयम्। एवं परस्वरूपावेदकत्वेन परविद्या-शब्दाभिधेये, परापरतत्त्वान्वेषणपराणां सुजनानाम् अरण्य इव दुर्गमे वेदे जिगमिषूणां सुजनपान्थानामनुग्रहार्थं भगवता मध्वदेवेन ऋग्भाष्यं प्रदत्तम्। तस्याप्यगतिगहनत्वेन तदीयभावाविष्करणाय श्रीमट्टीकाकृतां च व्याख्या-सारग्राहिप्रबन्धप्रवरः ऋगर्थोद्धाराभिधः निरमायि वंशपल्लीश्रीनिवासतीर्थाभिधैः परःशतप्रबन्धप्रणयनेन विद्वज्जनसमादरणपात्रभूतैः।

द्वैतवेदान्ताध्ययनपरम्परायां श्रीनिवासतीर्थाः सरलया सर्वग्राहिण्या च शैल्या टिप्पणीग्रन्थप्रणयनेन अक्षरधियां विद्यार्थिनां च महान्तम् उपकारम् अकार्षुः। श्रीमद्व्यासतीर्थगुरुसार्वभौमप्रणीतस्य श्रीमन्न्यायामृतस्य विष्णुतत्त्वविनिर्णयटीकायाश्च विश्रुता टिप्पणी एभिः प्रणीता सर्वमान्या

चकास्ति । अस्मिन् ऋगर्थोद्धारे भगवत्पादीयं हार्दमाविष्कृतम् । विशदीकृतं प्रमेयजातम् । गहनवेदार्थविविदिषायामप्यप्रतिपत्त्या विप्रतिपत्त्या च इति-कर्तव्यताविमूढानां खण्डितमज्ञानम् । प्रज्वालितं च ज्ञानदीपम् । तस्यास्य ग्रन्थप्रवरस्याध्ययनेन सर्वे सुधियः छात्राश्च चक्षुष्मन्तः वेदार्थविज्ञानेन 'अभारवाहाः' भविष्यन्तीति निश्चप्रचम् । संशोधनकर्मणि बद्धादरौ महता प्रयत्नेन सश्रद्धं ग्रन्थरत्नमिदं शोधितवन्तौ रङ्गनाथ कट्टिः तथा शङ्करनारायण अडिग इत्युपाह्वौ शिष्यप्रवरौ । उत्साहिनौ कृतिनौ च इमौ सहर्षमभि-नन्दामः । अस्मदाराध्यः श्रीकृष्णः एतादृशाप्रकाशित-अपूर्वग्रन्थसंशोधन-कर्मणि आदरं प्रज्ञां च प्रदाय समनुगृह्णात्वेताविति सम्प्रार्थयामहे ।

श्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावरमठाधीशाः

उडुपि

Director's Note

The Vedic literature is like a huge, thick, dense forest. Though with a great effort and regular practice it is possible to reach some level of perfection and proficiency in the recitation of Vedic hymns, to comprehend the inner most meaning and to experience the hidden knowledge of Vedas is indeed an uphill task, because it demands a thorough knowledge of Vedic grammar - Nirukta and the special knowledge of interpreting Purāṇas, to interpret certain words and passages of Vedas.

Even the experts get baffled to understand Vedas at many places. Most of the times Vedas do not look like expressing clearly and openly. More dangerous is that they are likely to be misread to give a totally contradictory meaning and views, unless read very carefully.

There are instances where one cannot logically and reasonably connect what is said earlier to what is said later, looking like out of context and like disjoints. Then one gets a feeling, as if one is totally lost in a dense forest, praying for a guiding light - a torch to lead, giving a helping hand.

When one is in such a situation, and genuinely needs the right and proper guidance - Sri Madhvāchārya's Ṛg Bhāṣya shows the correct path with the bright torch of divine knowledge.

He has shown us the right and bright royal path as to how to study and interpret Vedic passages, basing on the rich heritage of scriptures and commentary proceedures of the vast Vedic studies. He has given us the most scientific methodology.

Those who study in depth the commentary on 40 Sūktas of Ṛg veda will be able to understand easily the entire Vedas and Vedic literature, if the methodology and principles laid down are followed.

Of those who have studied Ṛg Bhāṣya in its true spirit, and have

contributed their glosses on it are Sri Rāghavendratīrtha and Sri Srīnivāsatīrtha. They are very prominent.

Sri Srīnivāsatīrtha's beautiful gloss gives not only a great delight to erudite scholars it also helps the new entrants and beginners giving the hidden treasure of very delicate meanings of the original, making the studies very useful and satisfactory.

This unpublished work which should have been edited and published long back, is being ably edited, using four manuscripts, by young and enthusiastic scholars Vidwan Ranganatha Katti and Vidwan Shankaranarayana Adiga.

I offer my Sāṣṭānga Praṇāmas with devotion to H.H. Śri Viśveśatīrtha Swāmiji of Śri Pejāvara Matha, Udupi for blessing us to proceed with confidence in publishing of this work.

I highly indebted to Prof. Kutumba Śāstry, Vice-chancellor, Rashtriya Sanskrit Samsthan, New Delhi, for financing this publication and encouraging us every step.

I also offer my thanks to Sri V. Giri, the Registrar, Rashtriya Sanskrit Samsthan for his valuable co-operation. I express my gratitude to Sri C.S. Kaniyal, Finance Officer, Rashtriya Sanskrit Samsthan for his continuous support in our academic activities.

I owe my gratitude to Smt. Rajalakshmi Srinivasan, Chairperson, Poornaprajna Samshodhana Mandiram, Bangalore, for her guidance and encouragement for all our research and publication ventures.

We are presenting this volume in all humility to the scholars and to the students as well. We sincerely thank the team of Vāgartha Printers for good printing and neat get up at a short notice.

Dr. A.V. Nagasampige
Director

Preface

To uphold the righteousness of the world, Vedas are the basic sources. They are also the primary root of culture. Bṛhadāraṇya Upaniṣad declares that the entire Vedic literature is the exhale of the Lord Sri Hayagrīva.

'अस्य भूतस्य महतो निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः'

(Br.U. 2.4.10)

Bhāgavata Purāṇa clarifies that Yajnapuruṣa Nārāyaṇa in the form of Hayagrīva exhaled the entire Vedic literature when Chaturmukha Brahmā performed the Jnāna-satra.

'वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः'

(Bhag. 2.7.11)

Again Talavakāra Upaniṣad says :

Four Vedas- Ṛg-Yajus-Sāma-Atharva, Mūla Rāmāyaṇa, Vaiṣṇava Purāṇas, Vaiṣṇava Śrutis - the six branches of Vedas- Śikṣā, Vyākarana (grammar), Chandas (prosody), Nirukta (Vedic grammar), Jyotisha (astrology), Kalpa - These are the essential branches for higher learning. So says Talavakāra Upaniṣad.

'वेदाः सर्वाङ्गानि सत्यमायतनम्' *(तल.खं. ४)*

Defining Vedas

The Supreme is that which cannot be known by perception (**प्रत्यक्ष**) or by inference (**अनुमान**) and can be known only through the scriptures, and the scriptures alone,

is called Vedas. That's how it is defined in the preamble of Ṛg Bhāṣya as :

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥'

(ऋग्वेदादिभाष्यभूमिका, पृ.२०)

But Manusmṛti and other works also have the similar definitions. Therefore, to make the definition of Vedas, more precise, more opt, more exclusive, it is also defined as that which are visualised and heard, experienced but not authored, by ancient seers, and well accepted in the world from time immemorial as Mantra, Brāhmaṇa, Āraṇyaka and Upaniṣad can be called Vedas.

Vedas are not made, authored by any person, according to Indian belief; because they are learnt from one to another orally, by hearing, over generation to the next without any change. They are Apouruṣeya.

But in the world, we find all sentences are made by one or other person.

So there could be a possible doubt and hence a question. How can there be one text like without an author ? In the beginning of the creation of the world, there could be an author or many authors. How does this stand credibility ?

This doubt and question can be solved thus : We find in the world two kinds of objects. One- man made and well known like cloth, pot etc. The other one is that they are not

made by any person, like time, space, life etc., which are forever for which there is no maker.

Now what harm is there in accepting the Vedic sentences also belong to the class for which there is no maker and which are eternal like time, space, life etc.

Even the great seers like Vasiṣta, Vāmadeva etc., are not the authors but are only seers who have heard, experienced the truth of Vedas.

ऋषयो मन्त्रद्रष्टारः ।

Study of Vedas is an essential and primary mandate for all the trivarṇikas - the three groups of men. All Śrutis and Smṛtis declare that the study of Vedas in a systematic and traditional way by men belonging to the three groups after the initiation of Upanayana. Only then he is called a Dvija (twice-born).

'अष्टवर्षं ब्राह्मणम् उपनयीत, तमध्यापयीत'
'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना'

The study of Vedas including the meaning and purport is mandatory for all. Śruti categorically condemns those who merely study mechanically without understanding the meaning of the Vedas and compares those who have not understood the intrinsic meaning of Vedas to a donkey which carries heavy weight not knowing the contents.

'स्थाणुरयं भारहारः किलाभूदधीत्य वेदान् न विजानाति योऽर्थम्'

But it is indeed practically impossible for any person to

understand Veda thoroughly which is far above the sense perception with his limited capacity.

Vedas themselves declare that only Chaturmukha Brahmā understands the meanings of words and passages of Vedas from all angles, all aspects, thoroughly.

'कश्छन्दसां योगमावेद धीरः को धिष्ण्यां प्रतिवाचं पपाद'

Vedavyāsa knows all and by his grace Āchārya Madhva knows all the intrinsic meaning of Vedas. No other is blessed with this much of knowledge.

The sacred Śrutis and Smṛtis have rightly said : The inner-most meaning of Vedas cannot be known by any one totally. But even to understand the principles that Vedas convey are indeed very difficult, but possible only for Brahmā, Vāyu.

When it is so difficult to understand the inner-most meaning of Vedas, it is needless to say, to write an authentic commentary only an all-knowing seer undertakes the task.

In this path the genius of the seers Yāska and others have made attempts, the best they could, to help people go in the path. The attempts are indeed praiseworthy and appreciable.

To some extent they guide, but are inadequate. Basing on such works Sāyaṇa Mādhava and others have made attempts to comment on Vedas. They are guides for those aspirants and inquirers who venture to understand Vedas.

But all these have not been the means of understanding

of Vedas totally and perfectly. Time and again, Sri Vedavyāsa, the one who divided the Vedas for our convenience has said in all Purāṇas that there are three interpretations for Vedas.

1. The main purpose of all Vedas is the knowledge of the supremacy of Lord Viṣṇu, which is the primary meaning of Vedas.

2. Indra, Agni and other deities are the secondary meaning of vedas.

3. Vedas also have the metaphysical interpretation.

'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते ।
विष्णोः सहस्रनामापि निरन्तरशतार्थकम् ॥'

(Skāndapurāṇa)

Thus Sri Vedavyāsa has said that there are three interpretations for Vedas. To guide us Sri Āchārya Madhva has given these three interpretations in Ṛg Bhāṣya.

Ṛg Bhāṣya of Sri Madhvāchārya

For the first time in the world it was Sri Madhvāchārya who showed the method of metaphysical interpretation for the entire Vedas by defining the methodology in his Ṛg Bhāṣya. Other interpreters limited their interpretations to Vedas with the superficial meanings giving only Ādidaivika point of view.

Ṛg veda has in all 1001 Sūktas, spread over in ten Mandalas. Of these Sri Madhvāchārya wrote commentary

on only 40 Sūktas which are found in the first three Mandalas of Ṛg veda. This is well-known as Ṛg Bhāṣya. In it he has interpreted in three ways basing on the works of Vedavyāsa, Nirukta and others.

Three interpretations of Sri Āchārya Madhva for Vedas

All Vedas primarily declare the perfect attributes of Lord Viṣṇu. This is the main purpose in support of the Supremacy of Viṣṇu.

Next Vedas tell us about the deities like Agni and others. This is the secondary interpretation which is Ādidaivika.

The third interpretation of Āchārya Madhva as clearly directed in Vedas is for the spiritual inquirer as to how he should perform the sacrifice in mind with the sole purpose of pleasing the Lord Viṣṇu and how he should proceed. This is the ādhyātma (आध्यात्म) meaning which only Āchārya Madhva has given in Ṛg Bhāṣya which is his exclusive contribution.

Āchārya Madhva's Ṛg Bhāṣya is not incomplete

Though Āchārya Madhva has interpreted the meaning for 40 Sūktas found in the first three Mandalas of Ṛgveda, it is not incomplete. The methodology he has defined is such, it is as good as interpreting the entire 489 Sūktas of the entire three Mandalas. Following this well defined methodology outlined, any genuine and open minded, devoted, spiritual inquirer can get the ability to interpret the entire Vedas. Being an all-knower, knowing fully the

limitations of abilities of the spiritual inquirers in this Kaliyuga he has written the commentary for 40 Sūktas only. We cannot confidently claim that we are able to digest the interpretations of the 40 Sūktas of the three Mandalas of Ṛg Bhāṣya.

Tīkā and Tippani (gloss and notes) on Ṛg Bhāṣya

The eminent Tīkāchārya who came in the lineage of Sri Madhvāchārya has helped us immensely by explaining the profound meanings for words and passages which Sri Madhvāchārya has given in his Ṛg Bhāṣya. To help us study Ṛg Bhāṣya and Tīkā thereon by Tīkāchārya, Sri Rāghavendratīrtha (1623-1671) has given us Mantrārtha-manjarī. This work makes the spiritual inquirers to understand Ṛg Bhāṣya and Tīka, easily as they are explained in a simple and lucid style. But for this help, they would have been very difficult for learners, not even to scholars to understand.

The present work - Ṛgarthoddhāra of Sri Bidarahalli Srīnivasatīrtha

Basing on the well-defined methodology of Sri Madhvāchārya shown in his Ṛg Bhāṣya on 40 Sūktas of Ṛgveda and excellent gloss thereon by Sri Jayatīrtha, Sri Bidarahalli Srīnivasatīrtha has given very convincing and wonderful interpretations of all 489 Mantras of Ṛg veda in his independent work Ṛgarthoddhāra (Ṛgarthmanjarī). Till today it was unpublished.

He has contributed another work, a notes on Ṛg

Bhāṣyatīkā - Srīnivāsatīrthīya - which has been published by Sri Uttarādi Matha.

In this work special attention has been focussed on Tīkās on Ṛg Bhāṣya . But he has not independently interpreted step by step. He has followed the guidelines to interpret only 40 Sūktas.

To interpret all the Mantras and to establish firmly that all 489 Sūktas could be convincignly explained following the methodology of Sri Āchārya Madhva, Srīnivāsatīrtha has given us Ṛgarthoddhāra - a seperate one, other than Srīnivāsatīrthīya. He has clafiried the same in the following Śloka -

'ऋगर्थो भाष्यटीकोक्तः सङ्गृह्याभ्युदितो मया।
गुरुप्रसादमाश्रित्य व्यासस्तेनास्त्वभीष्टदः॥' (ऋगर्थोद्धारः, अ. ३)

The speciality of Ṛgarthoddhāra

Making the meanings of Ṛg Bhāṣya and Tīkā, simple, easily undestandable, and creating more interest in further studies of the works, Sri Srīnivāsatīrtha has helped us. Here **ऋगर्थो.. मया** has to be explained. We can see the gems of principles spread throughout. He picks up rare meanings hidden. Here are a few examples, picked up from innumerable gems.

The 35th Sūkta of the third Mandala,

'ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव॥'

This is the 11th Mantra. He explains in a simple way the meaning given in Ṛg Bhāṣya and Tīkā which only great scholars can understand, making it understandable to all genuine inquirers also. This approach leaves an everlasting imprint on the readers.

The last line of the Mantra says,

'रक्षा च नो अधि च ब्रूहि देव'

(Oh, Viṣṇu, save us from life and death)

You are great.

For this Āchārya Madhva says in Ṛg Bhāṣya,

'रक्षाधिकान् ब्रूहि नोऽथो समेभ्यः'

Sri Jayatīrtha picks up and comments,

'अद्य नोऽस्मान् रक्ष च संसारात्। अथो अन्यच्च नः। अस्मान् अधिकांश्च ब्रूहि। त्वद्वचनमात्रेण अधिका भविष्यामः। हीनेभ्योऽधि-कत्वस्य सिद्धत्वाद् अधिकेभ्यस्त्वप्राप्यत्वात् समेभ्य इत्युक्तम्।'

To be one-up above the lower one is quite natural and understandable. True. It is not possible to be greater than the superior even if an attempt is made. But in Bhāṣya it is said : **'समेभ्यः अधिकान् ब्रूहि'** It only means that the one can be superior in the class of equals. One more question crops up. As it is not possible to be better than the superior, similarly it is not possible to be better than the equals. When such is the case, how to find the convincing logic to solve this riddle.

Here Sri Srīnivāsatīrtha takes up this question, analyses in a convincing way. For the soul it is not only the Lingaśarīra cover, the desire of which acts like another cover. By acquiring knowledge of the Lingaśarīra Avidyā can be routed out -, along with other drawbacks. Then most of the intrinsic bliss is expressed, but not all. The reason is that there is another cover for the soul call 'Īśvara'.

Though souls that are equal in insintric status, some souls put in great effort even after acquiring the divine vision. Then only such souls get the expression of all the bliss, without any reservation. Then, though these souls are in equal status, eligible for equal bliss, only those who will have put in great effort even after the divine vision in the liberated state will express all the bliss. Thus they score over the equals. Such possibilities are not against the principle in the liberated state. Thus he defends and shows the beauty of the expression समेभ्यः. Sri Srīnivāsatīrtha makes it clear that such increase or decrease in liberated state refers only to the Mānuṣottama Chakravartis - and not to the deities in whose bliss there has neither an increase nor decrease in the liberated state because the intrinsic bliss is fixed.

Sri Srīnivāsatīrtha refers to authentic words of Āchārya Madhva in Aṇu Bhāṣya.

'सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम् ।'
'वृद्धिह्रासौ विमुक्तिगौ नृणाम् ।'

Expressing the total bliss is the increase of bliss. Not expressing the total bliss is the decrease of bliss. This is how the words increase and decrease have to be understood.

Āchārya Madhva has made it very clear in his Īśāvāsyopaniṣad Bhāṣya,

'कृष्णोपास्तिमकुर्वतः । ज्ञानिनोऽपि यतो ह्रास आनन्दस्य भवेद् ध्रुवम् ।'

By performing the ordained duties, such as studies, Pooja etc., there will be an increase in bliss. Not performing the ordained duties, and involving in forbidden acts will result in decrease in bliss, even if one is highly knowlegeble.

For the deities, for engaging in forbidden acts, they will not be able to get the extra expression of bliss which they would have acquired, had they avoided the forbidden acts. But there is lapse in their intrinsic bliss. That is the reason why though Chandra-Sugrīva had contact with Tāra who was superior to them, they lost the extra good merits they had earned, but never lost thier intrinsic bliss.

'चन्द्रसुग्रीवयोश्चैव स्वोच्चदारपरिग्रहात् ।
प्राप्तहानिरभून्नैव क्लृप्तहानिः कथञ्चन ॥'

(अ.व्या., अ.३, पा.४, श्लो.६)

One who is eligible for the position of Brahma gets it only when he performs Rājasūya Yāga. If one who is not eligible to perform Rājasūya Yāga performs the same he becomes superior in the group of his equals.

'अयोग्यकं महापदे विधातुरेष हि क्रतुः ।
समानयोग्यतागणात् करोति मुक्तिगं वरम् ॥'

(म.भा.ता.नि., अ.२१, श्लो.८३)

So says Āchārya Madhva in his Mahābhārata Tātparya Nirṇaya, keeping in view only of men who are emperors. He further gives an example,

'अतस्त्रिशङ्कुपुत्रको नृपानतीत्य वर्तते ।'

(म.भा.ता.नि., अ.२१, श्लो.८४)

(Therefore King Hariśchandra could excel other Kings).

So it is the opinion of all great traditional scholars to uphold the prayer

'समेभ्यो अधि च ब्रूहि'

Keeping in view of men who are emperors Āchārya Madhva has rightly said for which there should not be any objection.

Even at this stage there could be a doubt lingering in the mind about this. If there is equality among the eligibles in the category there cannot be any superiority. How to overcome and prove the consistency.

A convincing answer is given by Sri Tāmraparṇī Āchārya in his gloss on Mahābhārata Tātparya Nirṇaya. Yes, there is equality in the divine vision of Lord Viṣṇu. By performing good acts even after the divine vision in the liberated state, the divine grace of Lord Viṣṇu will result in excess of bliss.

Thus it is possible to prove superiority of some souls over the eligible equals even in the state of liberation.

'ननु साम्ये आधिक्यायोगः । सति चाऽधिक्ये न साम्यम् । तथा च कथं समानयोग्यतागणाद् आधिक्यमुच्यत इति चेद् उच्यते । अपरोक्ष-ज्ञानव्यङ्ग्यप्रचुरानन्देन साम्यम् । तदुत्तरभाविराजसूयादिप्रयत्नाधिक्येन आनन्दातिशय इत्युत्तभयोरुपपत्तेः ॥'

(M.B.T.N., 21-83, Tāmraparṇīya)

In the doctrine of Madhva, in addition to the equal eligibility in the particular class, कक्ष्या, considering some special acts, some special features, some plus points, are also considered rightly, to claim superiority among equals.

Sri Vādirājatīrtha gives a very practical, down-to-earth example in his gloss on Mahābhārata Tātparya Nirṇaya with his usual humour. While taking food in a row of scholars of almost equal in stature, an age-old scholar, of the same merit is honoured to take the first place. Age plays an extra point here for consideration and honour.

'समानषड्रसान्नभोजिनां पङ्क्तौ यथा कश्चिद् वृद्धमग्रे स्थापयन्ति तथेत्यर्थः । *(M.B.T.N., Bhāvaprakāśikā, 21-23)*

One more example in the 24th Sūkta of second Mandala,

'न हि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्नये वातस्य प्रमिनन्त्यभ्वम् ॥'

Here is a beautiful explanation of hidden treasure of meaning which is appealing.

Oh Viṣṇu, even the liberated souls have not been to get your power of vanquishing, your strength, your profound knowledge. Thus the supremacy and glory of Viṣṇu is highlighted.

Here the word 'Manyu' is equated with knowledge. But one might raise an objection : when we have a meaning, well-known Krodha (anger) for 'Manyu' why it is not considered. There is a convincing and suitable answer to the question in the gloss.

यद्यपि मन्युशब्दः क्रोधरूपगुणार्थतयाऽपि शक्यते व्याख्यातुम् । भगवति ज्ञानानन्दात्मकक्रोधस्य 'क्रोधमयोऽक्रोधमयः' इत्यत्र 'क्रोधः क्षमात्मको यस्य चिदानन्दात्मकस्तथा' इति बृहदारण्यकभाष्येऽभिहितत्वात् । तथाऽपि तमोगुणकार्यक्रोधस्य गुणत्वाभावेन भगवत्यभावात् तत्प्रसक्तिपरिहाराय इत्थं व्याख्यातम् । यथोक्तं तत्रैव- 'अन्यक्रोधसमक्रोधः तस्य विष्णोः कथं भवेत्' इति ।

अत एवोक्तं टीकाकारैः - 'क्रोधस्य गुणत्वाभावात्' इति । ज्ञानानन्दात्मकक्रोधाभिप्रायतया व्याख्यानं त्वनुमतमेव । 'अप्रतिषिद्धम् अनुमतं भवति' इति न्यायादिति द्रष्टव्यम् ।

Though it is possible to interpret the passage keeping the meaning as anger for the word 'Manyu', there is anger with knowledge. Āchārya has clarified it in Bṛhadāraṇyaka Bhāṣya, for 'क्रोधमयोऽक्रोधमयः' he says 'क्रोधः क्षमात्मको यस्य चिदानन्दात्मकस्तथा'. Still anger has a negative approach, and is a sign of Tamoguṇa. In case of Lord, anger with knowledge is included in the virtue. Tamoguṇa anger is not

in Viṣṇu. Anger is a sign of weakness and ignorance. In Viṣṇu there is knowledgeble anger. That is why the word knowledge is taken for the meaning fo the word 'Manyu'.

'अन्यक्रोधसमः क्रोधः तस्य विष्णोः कथं भवेत्'

(Br.up.Bhāṣya)

Saying this the word Krodha is rejected.

Sri Jayatīrtha in his Tīka has said,

'क्रोधस्य गुणत्वाभावात्'

If Krodha (anger) is taken along with knowledge and bliss, then the word anger for Krodha is welcome. That which is flawless is always acceptable.

Now let us take up the eighth Mantra in the fourth Sūkta of first chapter.

'अस्य पीत्वा घनो वृत्राणामभवः ।
प्रावो वाजेषु वाजिनम् ।'

Oh Viṣṇu all knower of all knowledge, omniscient. Having accepted Somarasa (सोमरस), ignorance can never come anywhere near you. You are untouched by any flaw.

There could be a doubt. If he has accepted Somarasa and thereby acquired the strength to keep away ignorance, untouched by ignorance, then it contrdicts the principle that Viṣṇu by his very nature keeps all ignorance and flaws away. Is there not a discrepency of a glaring inconsistency here ?

Guessing this possible question and objection, Sri Srinivāsatirtha answers convincingly.

'येषां सोमः परमेश्वरेण पीतः तेषु यज्ञोदितभगवत्प्रसादान्मुक्तेषु सत्सु तेषु परमेश्वरोऽज्ञानं न सहतेऽतः सोमं पीत्वा तेषामज्ञानाभेद्यताकार्यत्वात् त्वं वृत्राणां घनोऽभव इत्युच्यते 'तदधीनत्वात्' इति न्यायादिति द्रष्टव्यम् ।

The Lord drinks Somarasa from devotees who have acquired it to please them and blesses them to be away from ignorance and the like flaws. God does not tolerate any ignorance to touch his devotees. Thus the readers get the correct picture by clearing the shadows of doubt. Like Mantrārtha-manjarī, this work Ṛgarthoddhāra gives at every step simplified interpretations making the progress clear and smooth, giving an insight into Bhāṣya and Tīkā thereon.

About this work - Ṛgarthoddhāra

For the first time four manuscripts have been used and consulted for editing. They were not used so far. In the commencement only one manuscript was used. It was given kindly by Sri A.B. Jahagirdar of Bellary. It was too old and brittle to handle. At many places letters and words were worn out, making the progress very slow. Then we were lucky to get two manuscripts from Dr. V. Prabhanjanacharya which he kindly gave readily. But both these manuscripts had only chapter one, hence incomplete. However, these helped our research work progress to complete first chapter, yet incomplete. 13 Mantras pertaining to third chapter were missing. We were so much disheartened that we felt completing this great work was almost impossible.

To our luck, then came in Dr. Veeranarayana Pandurangi who got from his brother Vidwan Madhava Pandurangi a rare manuscript. Now to make our job perfect, to the best of our capacity, we made a thorough study of all four manuscripts. From our research we could confidently fix the correct texts, avoiding any doubt and disjoint.

We offer this work to euridite scholars in all humility, with enough pride, to accept it and encourage us. We will be highly thankful to those who appreciate and show us our errors, if any, where we have erred inadvertantly. We promise to acknowledge and incorporate suggestions and corrections in our next edition.

We dare not claim it is free from errors, though we wish it to be free from errors. Errors have their own ways of escaping attention.

Our gratitude

We offer our Sāṣṭānga Praṇāmas with devotion to the founding chairman of Poornaprajna Samshodhana Mandiram H.H. Śri Viśveśatīrtha Swāmiji of Śri Pejāvara Matha, Udupi for blessing us to proceed with confidence in editing this work.

We owe our gratitude to Smt. Rajalakshmi Srinivasan, Chairperson, Poornaprajna Samshodhana Mandiram, Bangalore, for her guidance and encouragement for all our research and publication ventures.

Dr. A.V. Nagasampige, Director, Poornaprajna Samshodhana Mandiram has helped us in our research to make our editing this work more meaningful and useful. We are grateful to him.

We heartily thank respected scholars Rashtraprashasti winner Prof. K.T. Pandurangi, Upakulapati, Poornaprajna Vidyapeetha, Bangalore and Rashtrapati Prashasti winner Prof. D. Prahlda Char, Former Vice-chancellor, Rashtriya Sanskrit Vidyapeetha, Tirupati and look forward for their continued guidance and inspiration.

Again we sincerly thank Dr. V. Prabhanjanacharya, winner of Rashtrapati Prashsti, Dr. Veeranarayana Pandurangi, Vidwan Madhav Pandurangi and Sri A.B. Jahagirdar, Bellary for giving valuable manuscripts.

Finally, last but not least, we offer our gratitude to the team of scholars of our Poornaprajna Samshodhana Mandiram. We pray Lord Sri Hari to bless all of us for presenting this work at his feet.

In all humility,

Vidwan Shankaranarayana Adiga

Vidwan Ranganatha Katti

ಶ್ರೀಃ

ಪ್ರಾಸ್ತಾವಿಕ

ಜಗದ್ಧಾರಕವಾದ ಧರ್ಮಕ್ಕೆ ವೇದಗಳೆ ಮೂಲಾಧಾರಗಳು[1]. ಪ್ರಾಚೀನ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯ ಮೂಲನೆಲೆಯೂ ವೇದಗಳೆ. ಇಂಥ ಸಮಗ್ರ ವೈದಿಕ ಸಾಹಿತ್ಯ ಶ್ರೀ ಹಯಗ್ರೀವ ರೂಪಿ ಭಗವಂತನ ನಿಶ್ವಾಸರೂಪವಾದುದೆಂದು ಬೃಹದಾರಣ್ಯಕೋಪನಿಷತ್ ಬಣ್ಣಿಸಿದೆ.

'ಅಸ್ಯ ಭೂತಸ್ಯ ಮಹತೋ ನಿಶ್ವಸಿತಮೇತದ್ ಯದ್ ಋಗ್ವೇದೋ ಯಜುರ್ವೇದಃ ಸಾಮವೇದೋಽಥರ್ವಾಂಗಿರಸಃ' (ಬೃ. ಉಪ. 2.4.10) ಎಂದು.

ಚತುರ್ಮುಖ ಬ್ರಹ್ಮದೇವರು ನೆಡೆಸಿದ ಸತ್ರಯಾಗದಲ್ಲಿ ಯಜ್ಞಪುರುಷನಾದ ನಾರಾಯಣ, ಹಯಗ್ರೀವ ರೂಪದಿಂದ ಅವತರಿಸಿದ. ಸಮಸ್ತವೇದಗಳಿಗೂ, ಯಜ್ಞಗಳಿಗೂ, ಹಾಗೂ ಸಕಲದೇವತೆಗಳಿಗೂ ಆಧಾರನಾದ ಅವನು ಉಸಿರುಬಿಟ್ಟಾಗ ಮೂಗಿನಿಂದ ಸಕಲ ವೇದಗಳೂ ಆವಿರ್ಭವಿಸಿದವು- ಎಂದು ಭಾಗವತ ಪುರಾಣ ಈ ವಿಷಯವನ್ನು ಸ್ಪಷ್ಟೀಕರಿಸಿದೆ[2].

'ವಾಚೋ ಬಭೂವುರುಶತೀಃ ಶ್ವಸತೋಽಸ್ಯ ನಸ್ತಃ' (ಭಾಗ.2-7-11).

ಋಗ್, ಯಜುಸ್, ಸಾಮ, ಅಥರ್ವಗಳೆಂಬ ನಾಲ್ಕು ವೇದಗಳು, ಪಂಚರಾತ್ರ, ಭಾರತ, ಮೂಲರಾಮಾಯಣ, ವೈಷ್ಣವ ಪುರಾಣ, ವೈಷ್ಣವಸ್ಮೃತಿಗಳು, ಹಾಗೂ ಶಿಕ್ಷಾ, ವ್ಯಾಕರಣ, ಛಂದಸ್ಸು, ನಿರುಕ್ತ, ಜ್ಯೌತಿಷ, ಕಲ್ಪಗಳೆಂಬ ಆರು ವೇದಾಂಗಗಳು ಮತ್ತು ಮೀಮಾಂಸಾ ಇವುಗಳನ್ನು ವಿದ್ಯಾಸ್ಥಾನಗಳೆಂದು ತಲವಕಾರ ಉಪನಿಷತ್ತು ಉಲ್ಲೇಖಿಸಿದೆ–

'ವೇದಾಃ ಸರ್ವಾಂಗಾನಿ ಸತ್ಯಮಾಯತನಂ'[3] (ತಲವಕಾರೋಪನಿಷದ್ –ಖಂಡ-4)

---

1. 'ವೇದೋಽಖಿಲೋ ಧರ್ಮ ಮೂಲಂ' (ಮನುಸ್ಮೃತಿ - 2-6)
2. ಈ ವಿಷಯದಲ್ಲಿ ಬ್ರಹ್ಮಾಂಡ ಪುರಾಣದ ಸಂವಾದವೂ ಇದೆ –
   'ಹಯಗ್ರೀವಾದಿಮಾಃ ವಿದ್ಯಾಃ ಶ್ವಸಿತತ್ವೇನ ನಿಸ್ಸೃತಾಃ'
   (ಋಗ್ಭಾಷ್ಯ ಉದಾಹೃತ ಬ್ರಹ್ಮಾಂಡ ಪುರಾಣವಚನಂ – ಋ.ಭಾ-1)
3. 'ಋಗ್ಯಜುಃ ಸಾಮಾಥರ್ವಾಖ್ಯಾಃ ಪಂಚರಾತ್ರಂ ಚ ಭಾರತಂ।
   ಮೂಲರಾಮಾಯಣಂ ಚೈವ ಪುರಾಣಂ ಭಗವತ್ಪರಂ॥
   ವೇದಾ ಇತ್ಯುಚ್ಯತೇ ಸದ್ಭಿಃ ಶಿಕ್ಷಾದ್ಯಾಃ ಸ್ಮೃತಯಸ್ತಥಾ ।
   ಅಂಗಾನಿ ಸತ್ಯಂ ಮೀಮಾಂಸಾ ತದ್ವಿದ್ಯಾಯತನಂ ತ್ರಯಂ॥' (ತಲವಕಾರ ಭಾಷ್ಯ-ಖಂಡ-4)
   'ಅಂಗಾನಿ ವೇದಾಶ್ಚತ್ವಾರೋ ಮೀಮಾಂಸಾ ನ್ಯಾಯ ವಿಸ್ತರಃ।
   ಧರ್ಮಶಾಸ್ತ್ರಂ ಪುರಾಣಂ ಚ ವಿದ್ಯಾ ಹ್ಯೇತಾಶ್ಚತುರ್ದಶ'॥ (ವಿಷ್ಣುಪುರಾಣ)

ಹೀಗೆ ಅಧ್ಯಾತ್ಮಜ್ಞಾನಸಾಧನಗಳಲ್ಲಿ ವೇದಗಳೆ ಮೊದಲಿನವು.

ವೇದದ ಲಕ್ಷಣ -

ಪ್ರತ್ಯಕ್ಷ - ಅನುಮಾನಗಳಿಂದ ತಿಳಿಸಲಾಗದ ಪರಮಪುರುಷಾರ್ಥಸಾಧನವನ್ನು ತಿಳಿಸಿಕೊಡುವ ಪವಿತ್ರಗಂಥರಾಶಿಯೇ ವೇದವೆಂದು ಋಗ್ವೇದಾದಿಭಾಷ್ಯ ಭೂಮಿಕೆಯಲ್ಲಿ ವೇದದ ಲಕ್ಷಣವನ್ನು ನಿರೂಪಿಸಲಾಗಿದೆ-

'ಪ್ರತ್ಯಕ್ಷೇಣಾನುಮಿತ್ಯಾ ವಾ ಯಸ್ತೂಪಾಯೋ ನ ಬುಧ್ಯತೇ ।
ಏತಂ ವಿದಂತಿ ವೇದೇನ ತಸ್ಮಾದ್ ವೇದಸ್ಯ ವೇದತಾ ॥'

(ಋಗ್ವೇದಾದಿಭಾಷ್ಯಭೂಮಿಕಾ- ಪುಟ-20)

ಆದರೆ ಈ ಲಕ್ಷಣ ಮನುಸ್ಮೃತ್ಯಾದಿಗಳಲ್ಲಿಯೂ ಬರುವುದು. ಆದ್ದರಿಂದ ಪ್ರಾಚೀನ ಮಹರ್ಷಿಗಳು ತಮ್ಮ ಧ್ಯಾನದೃಷ್ಟಿಯಿಂದ ಯಾವ ಅಪೌರುಷೇಯ ವಾಕ್ಯಗಳನ್ನು ಕಂಡುಹಿಡಿದರೊ, ಯಾವ ವಾಕ್ಯಗಳು ಜಗತ್ತಿನಲ್ಲಿ ಮಂತ್ರ, ಬ್ರಾಹ್ಮಣ-ಆರಣ್ಯಕ-ಉಪನಿಷತ್ತುಗಳೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿವೆಯೋ ಅವೇ ವೇದಗಳೆಂದು ಹೇಳಬಹುದು.

ವೇದಗಳು ಪುರುಷಕರ್ತೃಕಗಳಲ್ಲ; ಅಪೌರುಷೇಯವಾದವುಗಳೆಂದು ಭಾರತೀಯರ ನಂಬಿಕೆ. ಆದರೆ ಲೋಕದಲ್ಲಿ ಪ್ರಚಲಿತಗಳಾದ ವಾಕ್ಯಗಳು ಪೌರುಷೇಯವೆಂದೇ ಪ್ರಸಿದ್ಧಗಳಾಗಿವೆ. ಹಾಗೆಯೇ ಸೃಷ್ಟಿಯ ಆದಿಯಲ್ಲಿ ಒಬ್ಬ ಅಥವಾ ಅನೇಕ ಕರ್ತೃಗಳಿಂದ ವೇದಗಳು ರಚಿತಗಳಾಗಿರಲಾರವೆಂಬ ವಿಷಯ ಹೇಗೆ ವಿಶ್ವಾಸಾರ್ಹವಾಗಬಲ್ಲದು? ಎಂಬ ಸಂದೇಹ ಸಹಜವಾಗಿ ಇಲ್ಲಿ ಉಂಟಾಗಬಹುದು.

ಈ ಸಂಶಯವನ್ನು ಹೀಗೆ ಪರಿಹರಿಸಬಹುದು. ಲೋಕದಲ್ಲಿ ಎರಡು ರೀತಿಯ ವಸ್ತುಗಳನ್ನು ನಾವು ಕಾಣುತ್ತೇವೆ. ಕರ್ತೃ ಪ್ರಸಿದ್ಧಿ ಇರುವ ಬಟ್ಟೆ, ಮಡಿಕೆ ಮುಂತಾದ ಜನ್ಯ ಪದಾರ್ಥಗಳು. ಕರ್ತೃಪ್ರಸಿದ್ಧಿಯಿಲ್ಲದ ಕಾಲ, ಆಕಾಶ, ಆತ್ಮ ಮುಂತಾದ ಅಪೌರುಷೇಯ-ಗಳಾದ ನಿತ್ಯ ಪದಾರ್ಥಗಳು. ಕಾಲ, ಆಕಾಶಾದಿಗಳಂತೆ ವೇದಗಳಿಗೆ ಕರ್ತೃಪ್ರಸಿದ್ಧಿ ಇಲ್ಲದಿರುವುದರಿಂದ ಅವುಗಳನ್ನು ನಿತ್ಯವಾಕ್ಯಗಳೆಂದು ಅಪೌರುಷೇಯವೆಂದು ಒಪ್ಪಬೇಕಾಗುತ್ತದೆ. ವಸಿಷ್ಠ ವಾಮದೇವ ಮುಂತಾದ ಋಷಿಗಳು ವೇದಕರ್ತೃಗಳಲ್ಲ. ವೇದಗಳನ್ನು ಕಂಡುಹಿಡಿದವರು- 'ಋಷಯೋ ಮಂತ್ರದ್ರಷ್ಟಾರಃ'.

ತ್ರೈವರ್ಣಿಕರಿಗೆ ವೇದಾಧ್ಯಯನ ಅವಶ್ಯಕರ್ತವ್ಯ :-

ಇಂಥ ವೇದದ ಅಧ್ಯಯನವನ್ನು ಪ್ರಾಚೀನ ಭಾರತೀಯ ಪರಂಪರೆಯಲ್ಲಿ ಉಪನಯನ ಸಂಸ್ಕಾರ ಹೊಂದಿ ದ್ವಿಜನೆನಿಸಿದ ಪ್ರತಿಯೊಬ್ಬನೂ ಮಾಡಲೇಬೇಕೆಂದು ಶ್ರುತಿ - ಸ್ಮೃತಿಗಳು

ವಿಧಾನ ಮಾಡುತ್ತಿವೆ -

'ಅಷ್ಟವರ್ಷಂ ಬ್ರಾಹ್ಮಣಂ ಉಪನಯೀತ, ತಮಧ್ಯಾಪಯೀತ'.

'ವೇದಃ ಕೃತ್ಸ್ನೋಽಧಿಗಂತವ್ಯಃ ಸರಹಸ್ಯೋ ದ್ವಿಜನ್ಮನಾ'.

ಈ ಅಧ್ಯಯನ ಅರ್ಥಜ್ಞಾನ ಪುರಸ್ಸರವಾಗಿಯೇ ವಿಹಿತವಾಗಿದೆ -

'ಯಾರು ವೇದಾಧ್ಯಯನ ಮಾಡಿಯೂ ಅರ್ಥಜ್ಞಾನ ಸಂಪಾದಿಸುವುದಿಲ್ಲವೋ ಅವನು ಭಾರ ಹೊತ್ತ ಮೋಟು ಮರದಂತೆ' - ಎಂದು ಶ್ರುತಿಯೇ ನಿರರ್ಥಕ ಪಾಠವನ್ನು ನಿಂದಿಸಿದೆ-

'ಸ್ಥಾಣುರಯಂ ಭಾರಹಾರಃ ಕಿಲಾಭೂದ್ ಅಧೀತ್ಯ ವೇದಾನ್ ನ ವಿಜಾನಾತಿ ಯೋಽರ್ಥಂ'.

ಆದರೆ ಇಂದ್ರಿಯಾತೀತ ವಿಷಯಗಳನ್ನು ತಿಳಿಸಿಕೊಡುವ ಸರ್ವಜ್ಞಕಲ್ಪವಾದ ವೇದವನ್ನು ಮನುಷ್ಯನಾದವನು ತನ್ನ ಅಲ್ಪಬುದ್ಧಿಯಿಂದ ಅರ್ಥಮಾಡಿಕೊಳ್ಳುವುದು ಸಾಹಸದ ಮಾತೇ ಆಗಿದೆ.

'ಯಾರು (ಚತುರ್ಮುಖ ಬ್ರಹ್ಮದೇವರು) ವೇದಗಳಲ್ಲಿರುವ ಪದಗಳ ಅವಯವಾರ್ಥವನ್ನು ಚೆನ್ನಾಗಿ ತಿಳಿದಿದ್ದಾರೆ (?) ಹಾಗೂ ಪ್ರತಿವಾಕ್ಯದಲ್ಲಿರುವ ಅರ್ಥಜ್ಞಾನಜನಕ ಸಾಮರ್ಥ್ಯವನ್ನು ಪ್ರತಿಪಾದಿಸಲು ಸಮರ್ಥರಾಗಿದ್ದಾರೆ (?)' - ಎಂದು ವೇದವೇ ಹೇಳುತ್ತಿದೆ -

'ಕಚ್ಛಂದಸಾಂ ಯೋಗಮಾವೇದ ಧೀರಃ ಕೋ ಧಿಷ್ಣ್ಯಾಂ ಪ್ರತಿವಾಚಂ ಪಪಾದ'.

ವೇದವ್ಯಾಸರು ಹಾಗೂ ಆಚಾರ್ಯಮಧ್ವರು ಮಾತ್ರ ವೇದಾರ್ಥಗಳನ್ನು ಚೆನ್ನಾಗಿ ಬಲ್ಲರು-

ಪೂಜ್ಯ ಶ್ರುತಿಯು ಸತ್ಯವಾಗಿಯೇ ಹೇಳಿದೆ. ವೇದಗಳ ರಹಸ್ಯಾರ್ಥಗಳನ್ನು ಯಾರಿಂದಲೂ ತಿಳಿಯಲು ಸಾಧ್ಯವಿಲ್ಲ. ಅವುಗಳು ಉಪದೇಶಿಸುವ ತತ್ತ್ವಗಳನ್ನು ಅರಿಯುವುದೂ ಕಷ್ಟಸಾಧ್ಯ.

ಹೀಗೆ ಸಕಲಾರ್ಥ ಪ್ರಕಾಶಕವೂ, ಅತಿಗೂಢರಹಸ್ಯ ತತ್ತ್ವೋಪೇತವೂ ಆದ ಸಮಗ್ರ ವೈದಿಕ ಸಾಹಿತ್ಯವನ್ನು ಯಥಾರ್ಥವಾಗಿ ಅರ್ಥಮಾಡಿಕೊಳ್ಳುವುದೆಂದರೆ ಸುಲಭದ ಕೆಲಸವಲ್ಲ. ಇನ್ನು ಇಂಥ ವೇದಕ್ಕೆ ಭಾಷ್ಯ ಬರೆಯುವವರೂ ಸರ್ವಜ್ಞಕಲ್ಪರೇ ಆಗಿರಬೇಕು. ಈ ನಿಟ್ಟಿನಲ್ಲಿ

---

1. 'ಬ್ರಾಹ್ಮಣೇನ ನಿಷ್ಕಾರಣೋ ಧರ್ಮಃ ಷಡಂಗೋ ವೇದೋಽಧ್ಯೇಯೋ ಜ್ಞೇಯಃ'
(ವ್ಯಾಕರಣ ಮಹಾಭಾಷ್ಯ ಉದಾಹೃತಶ್ರುತಿಃ --ಪಸ್ಪಶಾಹ್ನಿಕಂ-1-1. ಪುಟ.23)

ಯಾಸ್ಕ ಮುಂತಾದ ಮೇಧಾವಿಗಳು ವೇದಾರ್ಥನಿರ್ಣಯಕ್ಕಾಗಿ ನಿರುಕ್ತ ಮುಂತಾದ ವೇದಾಂಗಗಳನ್ನು ರಚಿಸಿ ಮಹೋಪಕಾರವನ್ನೆ ಮಾಡಿದ್ದಾರೆ. ಅವರ ಈ ಪ್ರಯತ್ನ ಪ್ರಶಂಸಾರ್ಹವೇ ಆಗಿದೆ. ಆದಕ್ಕಾಗಿ ಅವರು ತಮ್ಮ ಸಮಗ್ರ ಜೀವನವನ್ನೇ ಮುಡುಪಾಗಿಟ್ಟು ಮಹಾತ್ಯಾಗವನ್ನೆ ಮಾಡಿದ್ದರು. ಅವರು ನಿರೂಪಿಸಿದ ವೇದಾಂಗಗಳನ್ನು ಅವಲಂಬಿಸಿ ಸಾಯಣ–ಮಾಧವ ಮುಂತಾದವರು ವೇದಭಾಷ್ಯವನ್ನು ರಚನೆ ಮಾಡಿದರು. ಆವೆಲ್ಲವೂ ವೇದಾರ್ಥವನ್ನು ತಿಳಿಯುವವರಿಗೆ ಮಾರ್ಗದರ್ಶಕಗಳೇ ಆಗಿವೆ.

ಆದರೂ ಅವೆಲ್ಲವೂ ವೇದಾರ್ಥಜ್ಞಾನಕ್ಕೆ ಪರಿಪೂರ್ಣ ಸಾಧನಗಳಾಗಿಲ್ಲ. ವೇದ ವಿಭಾಗ ಮಾಡಿದ ವೇದವ್ಯಾಸರೇ ವೇದಗಳಿಗೆ, ಮೂರು ಅರ್ಥಗಳಿವೆ ಎಂದು ತಾವು ರಚಿಸಿದ ಪುರಾಣಾದಿಗಳಲ್ಲಿ ಸಾರಿ ಹೇಳಿದ್ದರು:–

1. ವಿಷ್ಣುವು ಸಕಲ ವೇದಗಳಿಂದ ಮುಖ್ಯ ಪ್ರತಿಪಾದ್ಯ.

2. ಇಂದ್ರ– ಅಗ್ನ್ಯಾದಿ ತತ್ತದ್ದೇವತೆಗಳು ಎರಡನೆಯ ಹಂತದಲ್ಲಿ ಪ್ರತಿಪಾದ್ಯರು.

3. ಮೂರನೇ ಹಂತದಲ್ಲಿ ಆಧ್ಯಾತ್ಮಪರವಾದ ಅರ್ಥವೂ ವೇದಕ್ಕೆ ಇದೆ.

‘ತ್ರಯೋಽರ್ಥಾಃ ಸರ್ವವೇದೇಷು ದಶಾರ್ಥಾಃ ಸರ್ವಭಾರತೇ ।
ವಿಷ್ಣೋಃ ಸಹಸ್ರನಾಮಾಪಿ ನಿರಂತರ ಶತಾರ್ಥಕಂ ॥’ – (ಸ್ಕಾಂದಪುರಾಣ)

ಹೀಗೆ ವೇದಾರ್ಥಗಳಿಗೆ ಇರುವ ಮೂರು ಮಜಲುಗಳನ್ನು ವೇದವ್ಯಾಸರು ನೀಡಿದ್ದರು.

ಆಚಾರ್ಯ ಮಧ್ವರು (ಕ್ರಿ.ಶ.1238–1317) ವೇದವ್ಯಾಸರಿಗೆ ಸಮ್ಮತವಾದ ಈ ಮೂರು ಅರ್ಥಗಳನ್ನು ತಮ್ಮ ಋಗ್ಭಾಷ್ಯ ಗ್ರಂಥದ ಮೂಲಕ ತಿಳಿಸಿಕೊಟ್ಟರು.

ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರ ಋಗ್ಭಾಷ್ಯ :-

ಸಮಗ್ರವೇದದ ಆಧ್ಯಾತ್ಮಿಕ ಮುಖವನ್ನು ತಮ್ಮ ವೇದ ಭಾಷ್ಯದ ಮೂಲಕ (ಋಗ್ಭಾಷ್ಯ) ಜಗತ್ತಿಗೆ ಮೊಟ್ಟಮೊದಲು ಪರಿಚಯಮಾಡಿಕೊಟ್ಟವರು ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು. ಉಳಿದವರು ಮೇಲ್ನೋಟಕ್ಕೆ ಕಾಣುವ ಆಧಿದೈವಿಕಾರ್ಥವನ್ನು ಹೇಳುವುದರಲ್ಲಿಯೇ ತಮ್ಮ ಸಾಮರ್ಥ್ಯವನ್ನು ಸೀಮಿತ ಗೊಳಿಸಿಕೊಂಡರು.

ಋಕ್ ಶಾಖೆಯಲ್ಲಿ10 ಮಂಡಲಗಳ ವ್ಯಾಪ್ತಿಯಲ್ಲಿ ಒಟ್ಟು 1001 ಸೂಕ್ತಗಳು ಬಂದಿವೆ. ಅವುಗಳ ಮಧ್ಯದಲ್ಲಿ ಶ್ರೀಮಧ್ವಾಚ್ಯಾರರು ಪ್ರಥಮ ಮಂಡಲದ 3 ಅಧ್ಯಾಯಗಳಲ್ಲಿ ಬರುವ ಒಟ್ಟು 40 ಸೂಕ್ತಗಳಿಗೆ ಭಾಷ್ಯ ಬರೆದರು. ಇದೇ **‘ಋಗ್ ಭಾಷ್ಯ’** ವೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇಲ್ಲಿ ಆಚಾರ್ಯರು ವ್ಯಾಸ ನಿರುಕ್ತ ಮುಂತಾದ ಗ್ರಂಥಗಳ ಆಧಾರದಿಂದ ವೇದಗಳಿಗೆ ಮೂರು ಅರ್ಥಗಳನ್ನು ಹೇಳಿದ್ದನ್ನು ಕಾಣಬಹುದು.

ವೇದಗಳಿಗೆ ಆಚಾರ್ಯರು ಹೇಳಿದ ಮೂರು ಅರ್ಥಗಳು-

ಸಕಲ ವೇದಗಳು ಪರಮ ಮುಖ್ಯ ವೃತ್ತಿಯಿಂದ ವಿಷ್ಣುವಿನ ಗುಣೋತ್ಕರ್ಷ ಪ್ರತಿಪಾದನೆ ಮಾಡುವ ಮೂಲಕ ಅವನನ್ನೆ ಮುಖ್ಯವಾಗಿ ಪ್ರತಿಪಾದಿಸುತ್ತವೆ. ಇದು ವೇದಗಳಿಗೆ ಮೊದಲನೆ ವಿಷ್ಣುಪರವಾದ ಅರ್ಥ.

ಅನಂತರ ಮುಖ್ಯ ವೃತ್ತಿಯಿಂದ ಅಗ್ನಿ ಮುಂತಾದ ದೇವತೆಗಳನ್ನೂ ವೇದಗಳು ತಿಳಿಸುತ್ತಿವೆ. ಇದು ಎರಡನೆಯ ಆಧಿ ದೈವಿಕಾರ್ಥ.

ಮೂರನೆಯದಾಗಿ ಅಧಿಕಾರಿಯಾದ ಸಾಧಕ ಮುಮುಕ್ಷುವು ಶರೀರ ನಿಯಾಮಕನಾದ ಭಗವಂತನ ಉದ್ದೇಶದಿಂದ ಮಾನಸಯಜ್ಞವನ್ನು ಹೇಗೆ ನಡೆಸಬೇಕು? ತನ್ಮೂಲಕವಾಗಿ ಭಗವಂತನ ಉಪಾಸನೆಯನ್ನು ಹೇಗೆ ಮಾಡಬೇಕೆಂದು ತಿಳಿಸುತ್ತಿದೆ. ಇದು ಆಚಾರ್ಯ ಮಧ್ವರು ತಮ್ಮ ಋಗ್ಭಾಷ್ಯದಲ್ಲಿ ತಿಳಿಸಿದ ವೇದಗಳ ಅಧ್ಯಾತ್ಮಪರವಾದ ಅರ್ಥ. ಹೀಗೆ ಮೂರು ಅರ್ಥಗಳನ್ನು ವೇದಗಳು ಪ್ರತಿಪಾದಿಸುತ್ತಿವೆ.

ಆಚಾರ್ಯ ಮಧ್ವರ ಋಗ್ಭಾಷ್ಯ ಅಪೂರ್ಣವಲ್ಲ -

ಆಚಾರ್ಯರು ಋಗ್ವೇದದ ಪ್ರಥಮಮಂಡಲದಲ್ಲಿ ಬರುವ ಮೊದಲ 40 ಸೂಕ್ತಗಳಿಗೆ ಮಾತ್ರ ಭಾಷ್ಯ ಬರೆದರೂ ಸಂಪೂರ್ಣ ವೇದಗಳಿಗೆ ಭಾಷ್ಯ ಬರೆದಿಲ್ಲ ಎಂಬ ನ್ಯೂನತೆಯಿಲ್ಲ. ಆಚಾರ್ಯರ ಭಾಷ್ಯದಲ್ಲಿ ಅಪೂರ್ಣತೆ ಇಲ್ಲ. ಋಗ್ವೇದದ ಮೊದಲನೆ ಮಂಡಲದ 3 ಅಧ್ಯಾಯಗಳಲ್ಲಿ ಬರುವ 489 ಮಂತ್ರಗಳಿಗೆ (ಒಟ್ಟು 40 ಸೂಕ್ತಗಳು) ಭಾಷ್ಯ ಬರೆದರೂ ಅವರು ರಚಿಸಿದ ಭಾಷ್ಯದ ಆಧಾರದಿಂದ ಜಿಜ್ಞಾಸುವಾದವನು ಸಮಗ್ರ ವೇದವನ್ನೇ ಅರ್ಥ ಮಾಡಿಕೊಳ್ಳಬಹುದಾಗಿದೆ. ಅಥವಾ ಕಲಿಕಾಲ ಪ್ರಭಾವದಿಂದಾಗಿ ಮುಂದಿನ ಜನಾಂಗದ ಜ್ಞಾನಮಾರ್ಗದತ್ತ ಪ್ರವೃತ್ತಿ ಇಳಿಮುಖವಾಗುವುದೆಂದು ಮೊದಲೆ ಮನಗೊಂಡ ಆಚಾರ್ಯರು ತಮ್ಮ ಋಗ್ ಭಾಷ್ಯ ಸಾಕೆಂದು ಅಲ್ಲಿಗೇ ನಿಲ್ಲಿಸಿರಬಹುದು. ಆಚಾರ್ಯರು ಬರೆದ ಈ 3 ಅಧ್ಯಾಯದ ಋಗ್ಭಾಷ್ಯವನ್ನು ಮನನ ಮಾಡುವ ಸಾಮರ್ಥ್ಯವೇ ಇಂದು ನಮ್ಮಲ್ಲಿ ಇಲ್ಲವಾಗಿದೆ.

ಋಗ್ಭಾಷ್ಯ ಟೀಕಾ - ಟಿಪ್ಪಣಿ -

ಮುಂದೆ ಆಚಾರ್ಯರ ಪರಂಪರೆಯಲ್ಲಿ ಬಂದ ಶ್ರೀಜಯತೀರ್ಥರು (ಕ್ರಿ.ಶ.1388) ಆಚಾರ್ಯರ ಅತಿಗಹನ–ಗಂಭೀರವಾದ ಭಾಷ್ಯಕ್ಕೆ ಟೀಕೆಯನ್ನು (ಋಗ್ಭಾಷ್ಯ ಟೀಕಾ) ಬರೆದು ಬಹಳ ಉಪಕಾರ ಮಾಡಿದರು. ಈ ಎರಡೂ ಗ್ರಂಥಗಳ ಅಧ್ಯಯನ ಮಾಡಲು ಅಶಕ್ತರಾದವರಿಗೆ ಶ್ರೀರಾಘವೇಂದ್ರತೀರ್ಥರು,(ಕ್ರಿ.ಶ.1623–1671) ‘ಮಂತ್ರಾರ್ಥ ಮಂಜರಿ’ ಎಂಬ ಕೃತಿ ರಚಿಸಿ ಸರಳವಾಗಿ ಹಾಗೂ ಸಂಕ್ಷೇಪವಾಗಿ ಈ 40 ಸೂಕ್ತಗಳ ಮಂತ್ರಗಳಿಗೆ ನೇರವಾಗಿ ವ್ಯಾಖ್ಯಾನ ಮಾಡಿದರು.

ಪ್ರಕೃತ ಕೃತಿ - ಬಿದರಳ್ಳಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರ ಋಗರ್ಥೋದ್ಧಾರ -

ಶ್ರೀಬಿದರಳ್ಳಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರು (ಕ್ರಿ.ಶ.1600–1660) ಈ 40 ಸೂಕ್ತಗಳಲ್ಲಿ ಬರುವ 489 ಮಂತ್ರಗಳಿಗೆ ಶ್ರೀಮಧ್ವಾಚಾರ್ಯರು ಭಾಷ್ಯದಲ್ಲಿ ಹೇಳಿದ ಹಾಗೂ ಶ್ರೀಜಯತೀರ್ಥರು ತಮ್ಮ '**ಋಗ್ಭಾಷ್ಯ ಟೀಕೆ**' ಯಲ್ಲಿ ವಿಶದ ಪಡಿಸಿದ ಅರ್ಥಗಳನ್ನೆಲ್ಲ ಸಂಗ್ರಹಿಸಿ ವಿಸ್ತಾರವಾಗಿ '**ಋಗರ್ಥೋದ್ಧಾರ**' (ಋಗರ್ಥಮಂಜರಿ) ಎಂಬ ಸ್ವತಂತ್ರ ಕೃತಿಯನ್ನು ರಚಿಸಿದರು. ಇದು ಈವರೆಗೆ ಅಪ್ರಕಟಿತವಾಗಿ ಪಾಂಡುಲಿಪಿಯಲ್ಲೆ ಇತ್ತು. ಯದ್ಯಪಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರು ಋಗ್ಭಾಷ್ಯಟೀಕೆಗೆ '**ಶ್ರೀನಿವಾಸತೀರ್ಥೀಯ**' ಎಂಬ ಬೇರೆ ಟಿಪ್ಪಣಿಯನ್ನು ರಚಿಸಿದ್ದು ಅದು ಉತ್ತರಾದಿಮಠದ ವತಿಯಿಂದ ಪ್ರಕಾಶನ ಗೊಂಡಿದೆ. ಆದರೆ ಅದು ಭಾಷ್ಯಟೀಕೆಗಳ ಅಭಿಪ್ರಾಯವನ್ನು ವಿಶದೀಕರಿಸಲು ಹೊರಟಿದೆ ಹೊರತು ನೇರವಾಗಿ ಭಾಷ್ಯಟೀಕಾನುಗುಣವಾದ ಋಗರ್ಥಗಳನ್ನು ಸ್ವತಂತ್ರವಾಗಿ ಪ್ರತಿಪಾದಿಸುವ ಉದ್ದೇಶ ಅದಕ್ಕಿಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಶ್ರೀಬಿದರಳ್ಳಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರು ಋಗ್ಭಾಷ್ಯ ಟೀಕಾ ಟಿಪ್ಪಣಿಗಿಂತ ಬೇರೆಯಾದ '**ಋಗರ್ಥೋದ್ಧಾರ**' ಎಂಬ ಸ್ವತಂತ್ರ ಗ್ರಂಥವನ್ನು ರಚಿಸಿದರು. ಇದನ್ನು ಅವರೇ ಸ್ಪಷ್ಟಪಡಿಸಿದ್ದಾರೆ–

ಋಗರ್ಥೋ ಭಾಷ್ಯಟೀಕೋಕ್ತಃ ಸಂಗೃಹ್ಯಾಭ್ಯುದಿತೋ ಮಯಾ ।
ಗುರುಪ್ರಸಾದಮಾಶ್ರಿತ್ಯ ವ್ಯಾಸಸ್ತೇನಾಸ್ತ್ವಭೀಷ್ಟದಃ ॥

(ಋಗರ್ಥೋದ್ಧಾರ - ಅಧ್ಯಾಯ-3)

ಋಗರ್ಥೋದ್ಧಾರದ ವೈಶಿಷ್ಟ್ಯ

ಈ ಗ್ರಂಥದಲ್ಲಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರು ಆಚಾರ್ಯರ ಋಗ್ಭಾಷ್ಯ ಹಾಗೂ ಅದಕ್ಕೆ ಶ್ರೀಜಯತೀರ್ಥ ಶ್ರೀಮಚ್ಚರಣರು ಬರೆದಿರುವ ಟೀಕೆಯ ಅರ್ಥಗಳನ್ನು ಉದ್ಧರಿಸಿ ನಮ್ಮಂಥ ಪಾಮರರಿಗೆ ಉಪಕರಿಸಿದ್ದಾರೆ. 'ಋಗರ್ಥೋ ಭಾಷ್ಯಟೀಕೋಕ್ತಃ ಸಂಗೃಹ್ಯೋದ್ಧ್ರಿಯತೇ ಮಯಾ' ಎಂದು ಪ್ರಾರಂಭದಲ್ಲಿ ನುಡಿದಂತೆ ಅಕ್ಷರಶಃ ನಡೆದಿದ್ದಾರೆ. ಭಾಷ್ಯಟೀಕೆಗಳಲ್ಲಿ ಹುದುಗಿರುವ ಅಪೂರ್ವ ಪ್ರಮೇಯರತ್ನಗಳ ದರ್ಶನವಾಗುವುದೆ ಇವರ ವ್ಯಾಖ್ಯಾನಾಂಜನದಿಂದ. ಇದಕ್ಕೆ ಸಂಬಂಧಪಟ್ಟಂತೆ ಅನೇಕ ಉದಾಹರಣೆಗಳನ್ನು ಈ ಗ್ರಂಥದ ಉದ್ದಗಲಕ್ಕೂ ಕಾಣಬಹುದಾಗಿದೆ. ಸ್ಥಾಲೀಪುಲಾಕನ್ಯಾಯದಂತೆ ಒಂದೆರಡು ಉದಾಹರಣೆಗಳನ್ನು ಗಮನಿಸೋಣ.

1. ಈ ಗ್ರಂಥದ ಮೂರನೇ ಅಧ್ಯಾಯದ 35ನೇ ಸೂಕ್ತದಲ್ಲಿ ಬರುವ

'ಯೇ ತೇ ಪಂಥಾಃ ಸವಿತಃ ಪೂರ್ವ್ಯಾಸೋಽರೇಣವಃ ಸುಕೃತಾ ಅಂತರಿಕ್ಷೇ ।
ತೇಭಿರ್ನೋ ಅದ್ಯ ಪಥಿಭಿಃ ಸುಗೇಭೀ ರಕ್ಷಾ ಚ ನೋ ಅಧಿ ಚ ಬ್ರೂಹಿ ದೇವ ॥

ಎಂಬ 11ನೇ ಮಂತ್ರಕ್ಕೆ ವ್ಯಾಖ್ಯಾನ ಮಾಡುವಾಗ ಭಾಷ್ಯಟೀಕಾಗಳ ಅಭಿಪ್ರಾಯವನ್ನು ತಮ್ಮ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಸೊಗಸಾಗಿ ಸೆರೆಹಿಡಿದು ಅಲ್ಲಿ ಬಂದಿರುವ ಪ್ರಮೇಯಗಳು ಓದುಗರ ಅಂತರಾಳದಲ್ಲಿ ಬೇರೂರುವಂತೆ ಮಾಡಿದ್ದಾರೆ. ಈ ಮಂತ್ರದ ಕೊನೆಯ ಚರಣವಾದ

'ರಕ್ಷಾ ಚ ನೋ ಅಧಿ ಚ ಬ್ರೂಹಿ ದೇವ' (ಹೇ ವಿಷ್ಣುವೇ ! ನಮ್ಮನ್ನು ಸಂಸಾರದಿಂದ ರಕ್ಷಿಸು ಮತ್ತು 'ನೀವು ಅಧಿಕರು' (ದೊಡ್ಡವರು) ಎಂಬುದಾಗಿ ಹೇಳು) ಎಂಬುದಕ್ಕೆ ಋಗ್ಭಾಷ್ಯದಲ್ಲಿ ಆಚಾರ್ಯರು '**ರಕ್ಷಾಧಿಕಾನ್ ಬ್ರೂಹಿ ನೋಽಥೋ ಸಮೇಭ್ಯಃ**' ಎಂದೂ, ಶ್ರೀ ಜಯತೀರ್ಥರು

'ಅದ್ಯ ನೋಽಸ್ಮಾನ್ ರಕ್ಷ ಚ ಸಂಸಾರಾತ್ । ಅಥೋ ಅನ್ಯಚ್ಚ ನಃ । ಅಸ್ಮಾನ್ ಅಧಿಕಾಂಶ್ಚ ಬ್ರೂಹಿ । ತ್ವದ್ವಚನಮಾತ್ರೇಣ ಅಧಿಕಾ ಭವಿಷ್ಯಾಮಃ । ಹೀನೇಭ್ಯೋಽಧಿಕತ್ವಸ್ಯ ಸಿದ್ಧತ್ವಾತ್ ಅಧಿಕೇಭ್ಯಸ್ತ್ವಪ್ರಾಪ್ಯತ್ವಾತ್ ಸಮೇಭ್ಯ ಇತ್ಯುಕ್ತಮ್'

ಎಂದೂ ವ್ಯಾಖ್ಯಾನಿಸಿದ್ದಾರೆ. (ಹೀನರಿಗಿಂತ (ಕೆಳಗಿನವರಿಗಿಂತ) ಆಧಿಕ್ಯವು ಸಿದ್ಧವೇ ಆಗಿರುವುದರಿಂದ ಅಧಿಕರ (ಉತ್ತಮರ) ಆಧಿಕ್ಯವನ್ನು ಹೊಂದುವದು ಅಸಾಧ್ಯವಾದುದರಿಂದ ಭಾಷ್ಯದಲ್ಲಿ 'ಸಮೇಭ್ಯಃ' ಎಂದು ಹೇಳಲಾಗಿದೆ. ಸಮಾನರಾದವರಲ್ಲಿಯೇ ನಮ್ಮನ್ನು ಅಧಿಕರನ್ನಾಗಿಸು ಎಂದು ತಾತ್ಪರ್ಯ.

ಇದರ ಮೇಲೆ ಬರುವ ಪ್ರಶ್ನೆ, ನಮಗಿಂತ ಉತ್ತಮರಾದವರ ಆಧಿಕ್ಯವನ್ನು ಹೊಂದುವದು ಹೇಗೆ ಅಸಾಧ್ಯವೋ ಹಾಗೇ ಯೋಗ್ಯತೆಯಲ್ಲಿ ನಮಗೆ ಸಮಾನರಾದವರ ಆಧಿಕ್ಯವನ್ನು ಹೊಂದುವುದು ಅಸಾಧ್ಯವೇ. ಹೀಗಿರುವಾಗ '**ಸಮೇಭ್ಯ ಅಧಿಕಾನ್ ಬ್ರೂಹಿ**'

(ಯೋಗ್ಯತೆಯಲ್ಲಿ ನಮಗೆ ಸಮಾನರಾಗಿರುವವರಿಗಿಂತ ಉತ್ತಮರನ್ನಾಗಿಸು) ಎಂದು ಪ್ರಾರ್ಥಿಸುವದು ಎಷ್ಟರಮಟ್ಟಿಗೆ ಸರಿ? ಎಂದು.

ಈ ಪ್ರಶ್ನೆಗೆ ಶ್ರೀನಿವಾಸತೀರ್ಥರು ತಮ್ಮ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಸೂಕ್ತ ಉತ್ತರವನ್ನಿತ್ತಿದ್ದಾರೆ. 'ಸಮೇಭ್ಯೋಽಧಿಕಾನ್ ಬ್ರೂಹಿ' ಎಂಬ ಪ್ರಾರ್ಥನೆ ಚಕ್ರವರ್ತಿಗಳಾದ ಮನುಷ್ಯರಿಗೆ ಸಂಬಂಧಿಸಿದ್ದೇ ಹೊರತು ದೇವತೆಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ್ದಲ್ಲ. ಭಗವಂತನ ಅಪರೋಕ್ಷಜ್ಞಾನಾನಂತರ ಒಬ್ಬನು ಬಹಳಷ್ಟು ಸತ್ಕರ್ಮಗಳನ್ನು ಮಾಡುತ್ತಾನೆ. ಮತ್ತೊಬ್ಬನು ಮಾಡುವದಿಲ್ಲ. ಇವರಿಬ್ಬರಿಗೂ ಯೋಗ್ಯತೆಯಲ್ಲಿ ಸಮಾನತೆಯಿದ್ದರೂ ಸತ್ಕರ್ಮಗಳನ್ನು ಮಾಡದೇ ಇರುವವನಿಗಿಂತ ಸತ್ಕರ್ಮಗಳನ್ನು ಮಾಡುವವನಿಗೆ ಮುಕ್ತಿಯಲ್ಲಿ ಆನಂದವೈಚಿತ್ರ್ಯ– ವಿರುವದರಿಂದ ಯಾವುದೇ ಅನುಪಪತ್ತಿಗೆ ಅವಕಾಶವಿಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಆಚಾರ್ಯರು ಬೃಹದ್‌ಭಾಷ್ಯದಲ್ಲಿ, ಮನುಷ್ಯರು ಹೆಚ್ಚು ಪ್ರಯತ್ನಮಾಡಿ, ಯೋಗ್ಯತೆಯಲ್ಲಿ ತಮಗೆ ಸಮಾನರಾದವರಿಗಿಂತ ಮುಕ್ತಿಯಲ್ಲಿ ಆಧಿಕ್ಯವನ್ನು ಹೊಂದಲು ಸಾಧ್ಯವಿದೆ ಎಂದು ಹೇಳಿದ್ದಾರೆ. '**ಮನುಷ್ಯಾಣಾಂ ಯೋಗ್ಯತಯಾ ಸಮೇಭ್ಯಃ ಪ್ರಯತ್ನಾದ್ ಆಧಿಕ್ಯಂ ಮುಕ್ತೌ**

ಪ್ರಾಪ್ತುಂ ಶಕ್ಯತೇ' ಎಂದು.

ಇದರ ಮೇಲೆ ಬರುವ ಪ್ರಶ್ನೆ, ಜ್ಞಾನೋತ್ತರದಲ್ಲಿ ಮಾಡುವ ಅಧಿಕ ಪ್ರಯತ್ನದಿಂದ ಮುಕ್ತಿಯಲ್ಲಿ ದೊರೆಯುವ ಆಧಿಕ್ಯವೆಂದರೇನು ? 'ಸ್ವರೂಪಸುಖದಲ್ಲಿ ಆಧಿಕ್ಯ' ಎನ್ನುವಂತಿಲ್ಲ. ಏಕೆಂದರೆ ಸ್ವರೂಪಸುಖವು ಇಂತಿಷ್ಟೇ ಎಂದು ಕ್ಲೃಪ್ತವಾಗಿರುವರಿಂದ ಅದರಲ್ಲಿ ಆಧಿಕ್ಯ ಉಂಟಾಗಲು ಸಾಧ್ಯವಿಲ್ಲ. ಕ್ಲೃಪ್ತಸುಖದ ಅಭಿವ್ಯಕ್ತಿಯೇ ಆಧಿಕ್ಯ ಎನ್ನುವಂತೆಯೂ ಇಲ್ಲ. ಏಕೆಂದರೆ ಜ್ಞಾನದಿಂದ ಆವರಣವೆನಿಸಿದ ಲಿಂಗಶರೀರವೆಂಬ ಅವಿದ್ಯೆಯು ಹೊರಟುಹೋಗಲು ಸ್ವರೂಪಸುಖದ ಅಭಿವ್ಯಕ್ತಿ ಸರ್ವಸಾಧಾರಣವಾಗಿದೆ. ಅಂದರೆ ಎಲ್ಲರಿಗೂ ಆಗಿಯೇ ತೀರುವುದು. ಪ್ರತ್ಯೇಕವಾಗೇ ಸುಖವು ಹುಟ್ಟುವದು ಎನ್ನುವಂತೆಯೂ ಇಲ್ಲ. ಏಕೆಂದರೆ ಪ್ರತ್ಯೇಕ ಸುಖವನ್ನು ಅಂಗೀಕರಿಸಿರುವದಿಲ್ಲ. ಆದ್ದರಿಂದ ಜ್ಞಾನೋತ್ತರದಲ್ಲಿ ಮಾಡುವ ಅಧಿಕಪ್ರಯತ್ನದಿಂದ ಮುಕ್ತಿಯಲ್ಲಿ ಆಧಿಕ್ಯವು ಉಂಟಾಗುವುದು ಎಂದು ಹೇಳಿರುವುದು ಉಚಿತವಾಗಲಾರದು ಎಂದು.

ಶ್ರೀನಿವಾಸತೀರ್ಥರು ಈ ಪ್ರಶ್ನೆಯನ್ನೆತ್ತಿಕೊಂಡು ಸೊಗಸಾಗಿ ಸಮಾಧಾನಿಸಿದ್ದಾರೆ. ನಾವು ಆತ್ಮಸ್ವರೂಪಕ್ಕೆ ಬರೀ ಲಿಂಗಶರೀರವೆಂಬ ಅವಿದ್ಯೆಯು ಆವರಣ ಎಂದು ಹೇಳುವದಿಲ್ಲ. ಮತ್ತೇನೆಂದರೆ ಈಶ್ವರೇಚ್ಛೆಯೂ ಆವರಣ ಎಂದು ಹೇಳುತ್ತೇವೆ. ಜ್ಞಾನದಿಂದ ಆತ್ಮಸ್ವರೂಪಕ್ಕೆ ಆವರಣವಾದ ಲಿಂಗಶರೀರವೆಂಬ ಅವಿದ್ಯೆಯು ಹೊರಟುಹೋಗಲು ಸಮಸ್ತ ಅನಿಷ್ಟಗಳು ತೊಲಗುತ್ತವೆ . ಬಹಳಷ್ಟು ಸ್ವರೂಪಸುಖ ಅಭಿವ್ಯಕ್ತವಾಗುತ್ತದೆ. ಆದರೆ ಎಲ್ಲವೂ ಅಲ್ಲ. ಅದಕ್ಕೆ ಕಾರಣ. ಈಶ್ವರೇಚ್ಛಾ ಎಂಬ ಇನ್ನೊಂದು ಆವರಣವು ಇನ್ನೂ ಜೀವಂತವಾಗಿರುವದು. ಸ್ವರೂಪಯೋಗ್ಯತೆಯಲ್ಲಿ ಸಮಾನರಾಗಿದ್ದರೂ, ಯಾರು ಜ್ಞಾನೋತ್ತರದಲ್ಲಿ ನಿವೃತ್ತಕರ್ಮವನ್ನಾಚರಿಸುವ ಮೂಲಕ ಅಧಿಕಪ್ರಯತ್ನ ಮಾಡುವರೋ ಅವರು ಅದರಿಂದ ಭಗವಂತನ ಅನುಗ್ರಹವನ್ನೇ ಪಡೆದು ಯಾವತ್ಸ್ವರೂಪಸುಖಾಭಿವ್ಯಕ್ತಿಯನ್ನು (ಸ್ವರೂಪದಲ್ಲಿ ಎಷ್ಟುಸುಖ ಇದೆಯೋ ಅಷ್ಟನ್ನೂ) ಪಡೆಯುತ್ತಾರೆ. ಅಂದರೆ ಭಗವಂತ ಅಂಥಹ ಭಕ್ತರ ಇಚ್ಛಾರೂಪ ಆವರಣವನ್ನು ತೆಗೆದು ಅವರಿಗೆ ಸಂಪೂರ್ಣಸುಖ ನೀಡುತ್ತಾನೆ. ಇದೇ ಅವರಿಗೆ ಮುಕ್ತಿಯಲ್ಲಿಸಿಗುವ ಆಧಿಕ್ಯ. ಯಾರು ಜ್ಞಾನೋತ್ತರದಲ್ಲಿ ನಿವೃತ್ತಕರ್ಮವನ್ನು ಆಚರಿಸುವದಿಲ್ಲವೂ ಅವರ ಸ್ವರೂಪಸುಖವನ್ನು ಸಂಪೂರ್ಣವಾಗಿ ಅಭಿವ್ಯಕ್ತ ಮಾಡುವದಿಲ್ಲ.

ಕೆಲವರಿಗೆ ಯಾವತ್‌ಸ್ವರೂಪಸುಖಾಭಿವ್ಯಕ್ತಿ ಉಂಟು. ಕೆಲವರಿಗೆ ಇಲ್ಲ. ಈ ಅಭಿಪ್ರಾಯ ದಿಂದಲೇ ಆನಂದದಲ್ಲಿ ವೃದ್ಧಿಹ್ರಾಸಗಳನ್ನು ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ. ಇದು ದೇವತೆಗಳಿಗೆ ಕೂಡುವದಿಲ್ಲ. ಏಕೆಂದರೆ ದೇವತೆಗಳಿಗೆ ಯಾವತ್‌ಸ್ವರೂಪಾನಂದಾಭಿವ್ಯಕ್ತಿಯು ಕ್ಲೃಪ್ತವಾಗಿರುವದರಿಂದ ಅಲ್ಲಿ ವೃದ್ಧಿಹ್ರಾಸಗಳಿಗೆ ಅವಕಾಶವೇ ಇಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಆಚಾರ್ಯರು ಅಣುಭಾಷ್ಯದಲ್ಲಿ –

'ಸುರಾಣಾಂ ಮುಕ್ತೌ ತು ಸುಖಂ ಕ್ಲೃಪ್ತಂ ಯಥಾಕ್ರಮಂ'

ಎಂದು ಹೇಳಿದ್ದಾರೆ. ಆದ್ದರಿಂದ ಆನಂದದ ವೃದ್ಧಿಹ್ರಾಸಗಳು ಮನುಷ್ಯರಿಗೆ ಮಾತ್ರ ಸಂಬಂಧಿಸಿವೆ. ಇದನ್ನು ಆಚಾರ್ಯರು ಅಣುಭಾಷ್ಯದಲ್ಲಿ '**ವೃದ್ಧಿಹ್ರಾಸೌ ವಿಮುಕ್ತೌ ನೃಣಾಂ**' ಎಂದು ಹೇಳಿದ್ದಾರೆ.

ಯಾವತ್ಸ್ವರೂಪಾನಂದಾಭಿವ್ಯಕ್ತಿಯೇ ಆನಂದದ ವೃದ್ಧಿ. ಯಾವತ್ಸ್ವರೂಪಾನಂದದ ಅನಭಿವ್ಯಕ್ತಿಯೇ ಆನಂದಹ್ರಾಸ. ಆನಂದಹ್ರಾಸಕ್ಕೆ ವಿಕರ್ಮ (ನಿಷಿದ್ಧಕರ್ಮವು) ಹೇಗೆ ಕಾರಣವೋ ಹಾಗೆ ಭಗವಂತನ ಪೂಜಾರೂಪವಾಗಿ ಕರ್ಮವನ್ನು ಮಾಡದಿರುವದೂ ಕಾರಣವಾಗಿದೆ. ಇದನ್ನು ಆಚಾರ್ಯರು 'ಈಶಾವಾಸ್ಯೋಪನಿಷದ್ಭಾಷ್ಯ' ದಲ್ಲಿ **'ಕೃಷ್ಣೋಪಾಸ್ತಿಮಕುರ್ವತಃ । ಜ್ಞಾನಿನೋಽಪಿ ಯತೋ ಹ್ರಾಸ ಆನಂದಸ್ಯ ಭವೇದ್ ಧ್ರುವಂ'** (ಭಗವತ್ಪೂಜಾರೂಪವಾಗಿ ಕರ್ಮವನ್ನು ಮಾಡದಿರುವ ಜ್ಞಾನಿಗೂ ಆನಂದಹ್ರಾಸವಾಗುವದು) ಎಂದು ಸ್ಪಷ್ಟಪಡಿಸಿದ್ದಾರೆ.

ದೇವತೆಗಳಿಗೆ ನಿಷಿದ್ಧಕರ್ಮಾಚರಣೆಯಿಂದ ಯೋಗ್ಯತೆಯನ್ನು ಮೀರಿ ಗಳಿಸಿದ ಪುಣ್ಯಕ್ಕೆ ಹಾನಿಯೇ ಹೊರತು. ಕ್ಲೃಪ್ತವಾದ ಸ್ವರೂಪಸುಖಕ್ಕಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಚಂದ್ರಸುಗ್ರೀವರು ತಮಗಿಂತ ಉಚ್ಚಳಾದ ಸ್ತ್ರೀ(ತಾರೆ)ಯನ್ನು ಪರಿಗ್ರಹಿಸಿದರೂ ಅದರಿಂದ ಯೋಗ್ಯತೆಗೆ ಮೀರಿಗಳಿಸಿದ ಪುಣ್ಯಹ್ರಾಸವಾಯಿತೇ ವಿನಹ ಕ್ಲೃಪ್ತಸುಖಕ್ಕೆ ಧಕ್ಕೆಯುಂಟಾಗಲಿಲ್ಲ.

'ಚಂದ್ರಸುಗ್ರೀವಯೋಶ್ಚೈವ ಸ್ವೋಚ್ಚದಾರಪರಿಗ್ರಹಾತ್।
ಪ್ರಾಪ್ತಹಾನಿರಭೂನ್ನೈವ ಕ್ಲೃಪ್ತಹಾನಿಃ ಕಥಂಚನ ॥

(ಅನುವ್ಯಾಖ್ಯಾನ - ಅ.3,ಪಾ-4, ಅಧಿ-3, ಶ್ಲೋಕ- 6)

ಬ್ರಹ್ಮಪದವಿಗೆ ಅರ್ಹನಾದವನು ರಾಜಸೂಯಯಾಗ ಮಾಡಿದರೆ ಬ್ರಹ್ಮಪದವಿಯನ್ನು ಪಡೆಯುತ್ತಾನೆ. ಅನರ್ಹನಾದವನು ರಾಜಸೂಯ ಯಾಗ ಮಾಡಿದರೆ ಯೋಗ್ಯತೆಯಲ್ಲಿ ತನಗೆ ಸಮಾನರಾದವರಿಗಿಂತ ಮಿಗಿಲೆನಿಸುತ್ತಾನೆ.

'ಅಯೋಗ್ಯಕಂ ಮಹಾಪದೇ ವಿಧಾತುರೇಷ ಹಿ ಕ್ರತುಃ ।
ಸಮಾನಯೋಗ್ಯತಾಗಣಾತ್ ಕರೋತಿ ಮುಕ್ತಿಗಂ ವರಂ ॥

(ಮ.ಭಾ.ತಾ. ಅ– 21, ಶ್ಲೋಕ -83)

ಎಂದು ಆಚಾರ್ಯರು ಮಹಾಭಾರತತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ಹೇಳಿರುವದೂ ಚಕ್ರವರ್ತಿಗಳಾದ ಮನುಷ್ಯರನ್ನು ಇಟ್ಟುಕೊಂಡೇ. ಆದ್ದರಿಂದ ಅಲ್ಲಿಯೇ ಮುಂದೆ

'ಅತಸ್ತ್ರಿಶಂಕುಪುತ್ರಕೊ ನೃಪಾನತೀತ್ಯ ವರ್ತತೇ' (ಮ.ಭಾ.ತಾ. ಅ– 21, ಶ್ಲೋಕ -84)

(ಆದ್ದರಿಂದ ತ್ರಿಶಂಕುವಿನ ಮಗ ಹರಿಶ್ಚಂದ್ರಮಹಾರಾಜ ಉಳಿದರಾಜರನ್ನು ಮೀರಿಸಿದ್ದಾನೆ) ಎಂದ ಹೇಳಿರುವರು. ಆದ್ದರಿಂದ '**ಸಮೇಭ್ಯೋ ಅಧಿ ಚ ಬ್ರೂಹಿ**' ಎಂಬ

ಪ್ರಾರ್ಥನೆಯನ್ನು ಚಕ್ರವರ್ತಿಗಳಾದ ಮನುಷ್ಯರನ್ನಿಟ್ಟುಕೊಂಡು ಕೂಡಿಸಲು ಬರುವದರಿಂದ ಯಾವುದೇ ದೋಷಕ್ಕೆ ಅವಕಾಶವಿಲ್ಲ ಎಂದು ಸಂಪ್ರದಾಯಜ್ಞರ ಅಭಿಪ್ರಾಯ.

ಇಲ್ಲಿ ಸಹಜವಾಗಿ ಎಲ್ಲರಿಗೂ ಒಂದು ಪ್ರಶ್ನೆ ಮೂಡುವದು. ಯೋಗ್ಯತೆಯಲ್ಲಿ ಸಮಾನತೆಯಿದ್ದರೆ ಆಧಿಕ್ಯವು ಕೂಡುವುದಿಲ್ಲ. ಆಧಿಕ್ಯವನ್ನು ಒಪ್ಪಿದರೆ ಸಮಾನತೆ ಹೇಗೆ ? ಎಂದು. ಇದಕ್ಕೆ ಸಮರ್ಪಕ ಸಮಾಧಾನವನ್ನು ಮಹಾಭಾರತತಾತ್ಪರ್ಯನಿರ್ಣಯದ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ತಾಮ್ರಪರ್ಣಿ ಆಚಾರ್ಯರು ನೀಡಿದ್ದಾರೆ. ಭಗವಂತನ ಸಾಕ್ಷಾತ್ಕಾರದ ಮೂಲಕ ಪ್ರಕಟವಾಗುವ ಪ್ರಚುರಾನಂದದಲ್ಲಿ ಸಮಾನತೆಯೇ ಇದೆ. ಆದರೆ ಸಾಕ್ಷಾತ್ಕಾರದ ಬಳಿಕ ಆಚರಿಸುವ ಸತ್ಕರ್ಮಗಳಿಂದ ಮೋಕ್ಷದಲ್ಲಿ ಆನಂದಾತಿಶಯ ಇರುವದರಿಂದ ಯೋಗ್ಯತೆಯಲ್ಲಿ ಸಮಾನರಾದವರಲ್ಲಿಯೂ ಆಧಿಕ್ಯವು ಕೂಡಬಹುದು.

(ನನು ಸಾಮ್ಯೇ ಆಧಿಕ್ಯಾಯೋಗಃ। ಸತಿ ಚಾಽಧಿಕ್ಯೇ ನ ಸಾಮ್ಯಂ । ತಥಾ ಚ ಕಥಂ ಸಮಾನಯೋಗ್ಯತಾಗಣಾದಾಧಿಕ್ಯಮುಚ್ಯತೇ ಇತಿ ಚೇದುಚ್ಯತೇ । ಅಪರೋಕ್ಷ ಜ್ಞಾನವ್ಯಂಗ್ಯ ಪ್ರಚುರಾನಂದೇನ ಸಾಮ್ಯಂ । ತದುತ್ತರಭಾವಿರಾಜಸೂಯಾದಿಪ್ರಯತ್ನಾಧಿಕ್ಯೇನ ಆನಂದಾತಿಶಯ ಇತ್ಯುಭಯೋರುಪಪತ್ತೇಃ)

(ಮ.ಭಾ.ತಾ.ನಿ. ಅ–21, ಶ್ಲೋಕ– 83– ತಾಮ್ರಪರ್ಣೀಯ)

ಸಮಾನವಾಗಿ ಷಡ್ರಸಾನ್ನಭೋಜನಕ್ಕೆ ಕುಳಿತವರ ಸಾಲಿನಲ್ಲಿ ವಯಸ್ಸಾದ ಒಬ್ಬ ವೃದ್ಧನನ್ನು ಮೊದಲಿಗೆ ಕೂಡಿಸುವಂತೆ ವಯೋನಿಮಿತ್ತದಿಂದ ಸಮಾನಯೋಗ್ಯತೆ ಇರುವವರಲ್ಲಿಯೂ ಆಧಿಕ್ಯವು ಬರಲಡ್ಡಿಯಿಲ್ಲ ಎಂದು ವಾದಿರಾಜಗುರುಸಾರ್ವಭೌಮರ ಅಭಿಪ್ರಾಯವಾಗಿದೆ.

ಸಮಾನಷಡ್ರಸಾನ್ನಭೋಜಿನಾಂ ಪಂಕ್ತೌ ಯಥಾ ಕಂಚಿದ್ ವೃದ್ಧಮಗ್ರೇ ಸ್ಥಾಪಯಂತಿ ತಥೇತ್ಯರ್ಥಃ (ಮ.ಭಾ.ತಾ.ನಿ – ಅ–21, ಶ್ಲೋಕ – 83– ವಾದಿರಾಜೀಯ)

ಮಧ್ವ ಸಿದ್ಧಾಂತದಲ್ಲಿ ಸಮಾನಕಕ್ಷ್ಯರಾದ ದೇವತೆಗಳಲ್ಲಿ ಯೋಗ್ಯತೆಯ ಸಾಮ್ಯವನ್ನು ಒಪ್ಪುವುದರ ಜೊತೆಗೆ ಕೆಲವು ಉಪಾಧಿಗಳಿಂದ ಕಿಂಚಿತ್ ಆಧಿಕ್ಯವನ್ನು ಅಂಗೀಕರಿಸಲಾಗಿದೆ. ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಸಮಾನಯೋಗ್ಯತೆ ಒಪ್ಪಿ ಕರ್ಮದ ನ್ಯೂನಾತಿರೇಕಗಳಿಂದ ಮುಕ್ತಿಯಲ್ಲಿ ಆನಂದವೃದ್ಧಿ- ಹ್ರಾಸಗಳನ್ನು ಒಪ್ಪುವುದು ತರ್ಕಬದ್ಧವಾಗಿದೆ.

2. ಹೀಗೆಯೇ ಎರಡನೇ ಅಧ್ಯಾಯದ 24ನೇ ಸೂಕ್ತದಲ್ಲಿ ಬರುವ

'ನ ಹಿ ತೇ ಕ್ಷತ್ರಂ ನ ಸಹೋ ನ ಮನ್ಯುಂ ವಯಶ್ಚನಾಮೀ ಪತಯಂತ ಆಪುಃ ।
ನೇಮಾ ಆಪೋ ಅನಿಮಿಷಂ ಚರಂತೀರ್ನಯೇ ವಾತಸ್ಯ ಪ್ರಮಿನಂತ್ಯಭ್ವಮ್ ॥

ಎಂಬ ಆರನೇ ಮಂತ್ರಕ್ಕೆ ಇವರು ಮಾಡಿರುವ ವ್ಯಾಖ್ಯಾನ ಭಾಷ್ಯಟೀಕೆಗಳಲ್ಲಿ ಹುದುಗಿರುವ ಹೃದಯಂಗಮಾರ್ಥದ ಬಗ್ಗೆ ಕ್ಷಕಿರಣ ಬೀರಿದೆ.

'ಹೇ ವಿಷ್ಣುವೇ' ! ನಿನ್ನ ಕ್ಷತ್ರ (ನಾಶದಿಂದ ರಕ್ಷಿಸುವದು)ವನ್ನಾಗಲಿ ಬಲವನ್ನಾಗಲೀ, ಮನ್ಯು (ಜ್ಞಾನ)ವನ್ನಾಗಲೀ ಮುಕ್ತರೂ ಹೊಂದಲಿಲ್ಲವಷ್ಟೇ' ಎಂದು ಈ ಮಂತ್ರದಲ್ಲಿ ವಿಷ್ಣುವಿನ ಮಹಿಮೆಯನ್ನು ಕೊಂಡಾಡಲಾಗಿದೆ. ಇಲ್ಲಿ ಮನ್ಯುಶಬ್ದಕ್ಕೆ ಜ್ಞಾನ ಎಂಬ ಅರ್ಥವಿಟ್ಟುಕೊಂಡು ವ್ಯಾಖ್ಯಾನಮಾಡಿದ್ದಾರೆ. ಆದರೆ ಮನ್ಯುಶಬ್ದಕ್ಕೆ ಕ್ರೋಧ ಎಂಬ ಅರ್ಥವೂ ಇರುವದರಿಂದ ಆ ಅರ್ಥವನ್ನು ಇಲ್ಲಿ ಏಕೆ ಇಟ್ಟುಕೊಂಡಿಲ್ಲ ಎಂಬ ಪ್ರಶ್ನೆ ಮೂಡುವದು ಸಹಜ. ಇದಕ್ಕೆ ಸಮರ್ಪಕ ಸಮಾಧಾನ ಅವರ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿದೆ.

'ಯದ್ಯಪಿ ಮನ್ಯುಶಬ್ದಃ ಕ್ರೋಧರೂಪಗುಣಾರ್ಥತಯಾಽಪಿ ಶಕ್ಯತೆ ವ್ಯಾಖ್ಯಾತುಂ। ಭಗವತಿ ಜ್ಞಾನಾನಂದಾತ್ಮಕಕ್ರೋಧಸ್ಯ 'ಕ್ರೋಧಮಯೋಽಕ್ರೋಧಮಯಃ' ಇತ್ಯತ್ರ 'ಕ್ರೋಧಃ ಕ್ಷಮಾತ್ಮಕೋ ಯಸ್ಯ ಚಿದಾನಂದಾತ್ಮಕಸ್ತಥಾ' ಇತಿ ಬೃಹದಾರಣ್ಯಕ ಭಾಷ್ಯೇಽಭಿಹಿತತ್ವಾತ್। ತಥಾಽಪಿ ತಮೋಗುಣಕಾರ್ಯಕ್ರೋಧಸ್ಯ ಗುಣತ್ವಾಭಾವೇನ ಭಗವತ್ಯಭಾವಾತ್ ತತ್ಪ್ರಸಕ್ತಿಪರಿಹಾರಾಯ ಇತ್ಥಂ ವ್ಯಾಖ್ಯಾತಂ । ಯಥೋಕ್ತಂ ತತ್ರೈವ 'ಅನ್ಯಕ್ರೋಧಸಮಕ್ರೋಧಃ ತಸ್ಯ ವಿಷ್ಣೋಃ ಕಥಂ ಭವೇತ್ । ಇತಿ.

ಅತ ಏವೋಕ್ತಂ ಟೀಕಾಕಾರೈಃ – 'ಕ್ರೋಧಸ್ಯ ಗುಣತ್ವಾಭಾವಾತ್' ಇತಿ. ಜ್ಞಾನಾನಂದಾತ್ಮಕಕ್ರೋಧಾಭಿಪ್ರಾಯತಯಾ ವ್ಯಾಖ್ಯಾನಂ ತ್ವನುಮತಮೇವ। 'ಅಪ್ರತಿಷಿದ್ಧಂ ಅನುಮತಂ ಭವತಿ' ಇತಿ ನ್ಯಾಯಾದಿತಿ ದ್ರಷ್ಟವ್ಯಮ್ ॥

ಯದ್ಯಪಿ ಮನ್ಯುಶಬ್ದಕ್ಕೆ ಕ್ರೋಧವೆಂಬ ಅರ್ಥವಿಟ್ಟುಕೊಂಡೂ ವ್ಯಾಖ್ಯಾನ ಮಾಡಲು ಶಕ್ಯವಿದೆ. ಏಕೆಂದರೆ ಭಗವಂತನಲ್ಲಿ ಜ್ಞಾನಾನಂದಾತ್ಮಕವಾದ ಕ್ರೋಧ ಉಂಟೆಂದು **'ಕ್ರೋಧಮಯೋಽಕ್ರೋಧಮಯಃ** ಎಂಬಲ್ಲಿ **'ಕ್ರೋಧಃ ಕ್ಷಮಾತ್ಮಕೋ ಯಸ್ಯ ಚಿದಾನಂದಾತ್ಮಕಸ್ತಥಾ'** ಎಂದು ಬೃಹದಾರಣ್ಯಭಾಷ್ಯದಲ್ಲಿ ಶ್ರೀಮದಾಚಾರ್ಯರು ಸ್ಪಷ್ಟಪಡಿಸಿದ್ದಾರೆ. ಹಾಗಿದ್ದರೂ ತಮೋಗುಣದ ಕಾರ್ಯವಾದ ಕ್ರೋಧವು ಗುಣ ವೆನಿಸದಿರುವದರಿಂದ ಅದು ಭಗವಂತನಲ್ಲಿರಲು ಸಾಧ್ಯವಿಲ್ಲ. ಆದ್ದರಿಂದಲೇ ಮನ್ಯುಶಬ್ದಕ್ಕೆ ಜ್ಞಾನ ಎಂಬ ಅರ್ಥವನ್ನು ಇಲ್ಲಿ ಗ್ರಹಿಸಲಾಗಿದೆ. **'ಅನ್ಯಕ್ರೋಧಸಮಃ ಕ್ರೋಧಃ ತಸ್ಯವಿಷ್ಣೋಃ ಕಥಂ ಭವೇತ್'** ಎಂದು ಬೃಹದಾರಣ್ಯಕಭಾಷ್ಯದಲ್ಲಿಯೇ ಭಗವಂತನಲ್ಲಿ ಕ್ರೋಧರೂಪ ಗುಣವನ್ನು ನಿರಾಕರಿಸಲಾಗಿದೆ. ಆದ್ದರಿಂದ ಜಯತೀರ್ಥರು ತಮ್ಮ ಟೀಕೆಯಲ್ಲಿ **'ಕ್ರೋಧಸ್ಯ ಗುಣತ್ವಾಭಾವಾತ್'** ಎಂದಿದ್ದಾರೆ. ಜ್ಞಾನಾನಂದಾತ್ಮಕವಾದ ಕ್ರೋಧದ ವಿವಕ್ಷೆ ಇದ್ದರೆ ಆಗ ಮನ್ಯುಶಬ್ದಕ್ಕೆ ಕ್ರೋಧ ಎಂಬ ವ್ಯಾಖ್ಯಾನವೂ ನಮಗೆ ಸಮ್ಮತವೇ. ಏಕೆಂದರೆ ಅಪ್ರತಿಷಿದ್ಧ ವಾದುದು ಅನುಮತವಾಗುವದು ತಾನೆ.

3. ಇದೇ ರೀತಿ 1ನೇ ಅಧ್ಯಾಯದ 4ನೇ ಸೂಕ್ತದಲ್ಲಿ ಬರುವ

'ಅಸ್ಯ ಪೀತ್ವಾ ಶತಕ್ರತೋ ಘನೋ ವೃತ್ರಾಣಾಮಭವಃ ।

ಪ್ರಾವೋ ವಾಜೇಷು ವಾಜಿನಂ ॥'

ಎಂಬ 8ನೇ ಮಂತ್ರಕ್ಕೆ ವ್ಯಾಖ್ಯಾನ ಮಾಡುವ ಸಮಯದಲ್ಲಿ ಓದುಗರಿಗೆ ಬರಬಹುದಾದ ಸಂಶಯವನ್ನು ಪರಿಹರಿಸಿದ್ದಾರೆ.

ಹೇ ಪೂರ್ಣಜ್ಞಾನವುಳ್ಳ ವಿಷ್ಣುವೇ! ನೀನು ಈ ಸೋಮರಸವನ್ನು ಪಾನಮಾಡಿ ಅಜ್ಞಾನಕ್ಕೆ ಅಭೇದ್ಯನೆನಿಸಿರುವಿ. ಅಂದರೆ ಅಜ್ಞಾನದಿಂದ ಆವೃತನಾಗಿರುವದಿಲ್ಲ ಎಂದು ತಾತ್ಪರ್ಯ.

ಇದರ ಮೇಲೆ ಬರುವ ಪ್ರಶ್ನೆ ಪರಮೇಶ್ವರನು ಸೋಮರಸವನ್ನು ಪಾನ ಮಾಡಿ ಆದರಿಂದ ಉಂಟಾದ ಶಕ್ತಿಯಿಂದ ಅಜ್ಞಾನಕ್ಕೆ ಅಭೇದ್ಯವೆನಿಸುವದು ಅಂದರೆ ಅಜ್ಞಾನದಿಂದ ಆವೃತನಾಗದಿರುವದು ಹೇಗೆ ? ಏಕೆಂದರೆ ಭಗವಂತ ಸಹಜಶಕ್ತಿಯಿಂದಲೇ ಅಜ್ಞಾನಕ್ಕೆ ಅಭೇದ್ಯವಾಗಿರುವದರಿಂದ ಸೋಮಪಾನದಿಂದುಂಟಾದ ಶಕ್ತಿಯಿಂದ ಅಜ್ಞಾನಕ್ಕೆ ಅಭೇದ್ಯ ಎಂದು ಹೇಳಿದರೆ ಪ್ರಮಾಣವಿರೋಧ ಬರುವದಿಲ್ಲವೇ ಎಂದು.

ಈ ಪ್ರಶ್ನೆಯನ್ನೆತ್ತಿಕೊಂಡು ತಮ್ಮ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಶ್ರೀನಿವಾಸತೀರ್ಥರು ಹೀಗೆ ಸಮಾಧಾನಿಸಿದ್ದಾರೆ.

'ಯೇಷಾಂ ಸೋಮಃ ಪರಮೇಶ್ವರೇಣ ಪೀತಃ ತೇಷು ಯಜ್ಞೋದಿತ-ಭಗವತ್ಪ್ರಸಾದಾನ್ಮುಕ್ತೇಷು ಸತ್ಸುತೇಷು ಪರಮೇಶ್ವರೋಽಜ್ಞಾನಂ ನ ಸಹತೇಽತಃ ಸೋಮಂ ಪೀತ್ವಾತೇಷಾಮಜ್ಞಾನಾಭೇದ್ಯತಾಕಾರಿತ್ವಾತ್ ತ್ವಂ ವೃತ್ರಾಣಾಂ ಘನೋಽಭವ ಇತ್ಯುಚ್ಯತೇ 'ತದಧೀನತ್ವಾತ್' ಇತಿ ನ್ಯಾಯಾದಿತಿ ದ್ರಷ್ಟವ್ಯಮ್ । ಎಂದು.

ಯಾರ ಸೋಮರಸವನ್ನು ಪರಮೇಶ್ವರನು ಪಾನ ಮಾಡುವನೋ ಅವರು ಯಜ್ಞದಿಂದುಂಟಾದ ಭಗವದನುಗ್ರಹದಿಂದ ಮುಕ್ತರಾಗುತ್ತಾರೆ. ಅಂಥವರ ಅಜ್ಞಾನವನ್ನು ಭಗವಂತ ಸಹಿಸುವದಿಲ್ಲ, ಆದ್ದರಿಂದ, ಸೋಮರಸಪಾನ ಮಾಡಿದ ಭಗವಂತ ಅಂತಹ ಭಕ್ತರು ಅಜ್ಞಾನಕ್ಕೆ ಅಭೇದ್ಯರಾಗುವಂತೆ ನೋಡಿಕೊಳ್ಳುತ್ತಾನೆ. ಅಂದರೆ ಅಜ್ಞಾನಕ್ಕೆ ಆಸರೆಯಾಗದಂತೆ ಮಾಡುತ್ತಾನೆ.

ಹೀಗೆ ಓದುಗರಿಗೆ ಉಪಯುಕ್ತವಾದ ಅನೇಕ ವಿಷಯಗಳ ಬಗ್ಗೆ ಇವರ ವ್ಯಾಖ್ಯಾನ ಬೆಳಕು ಚೆಲ್ಲುತ್ತದೆ. ಶ್ರೀರಾಘವೇಂದ್ರಗುರುಸಾರ್ವಭೌಮರ ಮಂತ್ರಾರ್ಥಮಂಜರಿಯಂತೆ ಸರಳವಾಗಿ ಋಙ್ಮಂತ್ರಗಳಿಗೆ ಭಾಷ್ಯಟೀಕೆಗಳಿಗೆ ಅನುಗುಣವಾದ ಅರ್ಥವನ್ನು ವಿವರಿಸುವ ಈ ಕೃತಿ ಪಾಮರರಿಂದ ಹಿಡಿದು ಪಂಡಿತರವರೆಗೆ ಎಲ್ಲರಿಗೂ ಉಪಕಾರಿಯಾಗಿದೆ.

ಪ್ರಕೃತ ಗ್ರಂಥದ ಮುದ್ರಣದ ಬಗೆಗೆ -

1. ಇದನ್ನು 'ಕ' ಎಂದು ಮುಂದೆ ಗುರುತಿಸಲಾಗಿದೆ.

ಪ್ರಕೃತ ನಾಲ್ಕು ಹಸ್ತಪತ್ರಿಗಳ ಸಹಾಯದಿಂದ ಇಷ್ಟರವರೆಗೆ ಮಾತೃಕೆಗಳಲ್ಲೇ ಅಡಗಿ ಪ್ರಕಾಶನಗೊಳ್ಳದ ಈ ಕೃತಿಯ ಮುದ್ರಣವನ್ನು ಇದೇ ಮೊದಲು ಮಾಡಲಾಗಿದೆ. ಪ್ರಾರಂಭದಲ್ಲಿ ಶ್ರೀಯುತ ಜಹಾಗೀರ್‌ದಾರ್ ಅವರು ನೀಡಿದ ಹಸ್ತಪ್ರತಿ[1] ಮಾತ್ರ ಇದ್ದಿತು. ಅದು ಹಲವು ಕಡೆ ತ್ರುಟಿತವಾಗಿದ್ದು ಪ್ರತಿಹಂತದಲ್ಲಿಯೂ ಅಸ್ಪಷ್ಟವಾಗಿಯೇ ಇತ್ತು. ಮುಂದೆ ಶ್ರೀಯುತ. ಡಾ॥ ವಿ. ಪ್ರಭಂಜನಾಚಾರ್ಯರು ತಮ್ಮ ಬಳಿ ಇದ್ದ ಎರಡು ಹಸ್ತಪ್ರತಿಗಳನ್ನು[1] ನೀಡಿ ಬಹಳ ಉಪಕಾರ ಮಾಡಿದರು. ಆದರೆ ಆ ಎರಡು ಹಸ್ತಪ್ರತಿಗಳು 1ನೇ ಅಧ್ಯಾಯದ ವರೆಗೆ ಮಾತ್ರ ಸೀಮಿತವಾಗಿದ್ದು ಅಪೂರ್ಣವಾಗಿದ್ದವು. ಅವುಗಳ ಸಹಾಯದಿಂದ ಸ್ವಲ್ಪ ಮಟ್ಟಿಗೆ, 1ನೇ ಅಧ್ಯಾಯದ ಸಂಶೋಧನಕಾರ್ಯ ಮುಂದುವರಿದರೂ ಸಮಗ್ರ ಸಂಶೋಧನ ಕಾರ್ಯ ಅಪೂರ್ಣವಾಗಿಯೇ ಸಾಗಿತ್ತು. ಈ ಮೂರು ಹಸ್ತಪ್ರತಿಗಳ ಆಧಾರದಿಂದ ಈ ಗ್ರಂಥದ 1,2,3 ಕರುಡು ಪ್ರತಿಗಳ ತಿದ್ದುಪಡಿಕಾರ್ಯವನ್ನು ಪೂರ್ಣಗೊಳಿಸಲಾಯಿತಾದರೂ ಈ ಕಾರ್ಯದಲ್ಲಿ ಆಂತರಿಕವಾಗಿ ತೃಪ್ತಿ ಉಂಟಾಗಲಿಲ್ಲ. ಅಲ್ಲದೆ 'ಕ' ಹಸ್ತಪ್ರತಿಯಲ್ಲಿ ಮೂರನೇ ಅಧ್ಯಾಯದಲ್ಲಿ 38 ಹಾಗೂ 39 ಸೂಕ್ತದ ಒಟ್ಟು 13 ಮಂತ್ರಗಳ ಋಗರ್ಥಭಾಗ ಪೂರ್ಣವಾಗಿ ಲುಪ್ತವಾಗಿದ್ದರಿಂದ ಸಮಗ್ರಕೃತಿಯ ಪ್ರಕಟನೆ ಅಸಾಧ್ಯವೆಂದೇ ಭಾವಿಸಲಾಗಿತ್ತು. ಆಗ ಶ್ರೀಯುತ ಡಾ॥ ವೀರನಾರಾಯಣ ಪಾಂಡುರಂಗಿಯವರು ತಮ್ಮಸಹೋದರ ವಿ॥ ಮಾಧವ ಪಾಂಡುರಂಗಿಯವರ ಬಳಿಯಿದ್ದ ಹಸ್ತಪ್ರತಿಯೊಂದನ್ನು[2] ನೀಡಿ ಮಹೋಪಕಾರವನ್ನು ಮಾಡಿದರು. ಈ ಹಸ್ತಪ್ರತಿಯ ಸಹಾಯದಿಂದ ಮತ್ತೆ ಆ ಮೂಲಾಗ್ರವಾಗಿ ಮೊದಲಿನಿಂದ ಕೊನೆಯವರೆಗೆ ಶುದ್ಧಪಾಠವನ್ನು ಸಂಶೋಧಿಸಿ ಹಲವಾರು ಕಡೆಗಳಲ್ಲಿ ಲುಪ್ತಗಳಾದ ಪದ, ವಾಕ್ಯ, ಪಾಠ ಭಾಗಗಳನ್ನು ಮತ್ತೆ ಮರುಜೋಡಿಸಲಾಯಿತು. ಈ ಪ್ರಯತ್ನವನ್ನು ಸಹೃದಯ ವಿದ್ವಾಂಸರು ಕರುಣಾಪೂರ್ಣ ದೃಷ್ಟಿಯಿಂದ ಕಾಣಬೇಕೆಂದು ಸವಿನಯ ಪ್ರಾರ್ಥನೆ. ಹೀಗೆ 4 ಹಸ್ತಪ್ರತಿಗಳ ಸಹಾಯದಿಂದ ಈ ಗ್ರಂಥವನ್ನು ಪ್ರಕಾಶನ ಗೊಳಿಸಲಾಗಿದ್ದರೂ ಕಣ್ತಪ್ಪಿನಿಂದ ಅಥವಾ ಲೇಖಕ ಪ್ರಮಾದವಶದಿಂದಾಗಿ ಕೆಲವೊಂದು ದೋಷಗಳು ಉಳಿದಿರುವ ಸಾಧ್ಯತೆಯನ್ನು ಅಲ್ಲಗಳೆಯಲಾಗದು. ಅದನ್ನು ಹಂಸಕ್ಷೀರ ನ್ಯಾಯದಂತೆ ಸುಜನರು ಪರಿಗಣಿಸಬೇಕೆಂದು ಪ್ರಾರ್ಥನೆ.

ಡಾ ॥ ವೀರನಾರಾಯಣ ಪಾಂಡುರಂಗಿಯವರು ಕೊಟ್ಟ ಶುದ್ಧ ಹಸ್ತಪ್ರತಿಯ ಸಹಾಯದಿಂದ ಉಳಿದೆರಡು ಹಸ್ತಪ್ರತಿಗಳಲ್ಲಿ ಲುಪ್ತವಾಗಿದ್ದ ಅನೇಕ ಪಂಕ್ತಿಗಳನ್ನು ಸೇರಿಸಿ ಅಶುದ್ಧಪಾಠಗಳನ್ನು ಸಂಸ್ಕರಿಸಿ ಈ ಗ್ರಂಥವನ್ನು ಸಂಪಾದಿಸಲಾಗಿದೆ. ಓದುಗರ

1. ಮುಂದೆ ಈ ಎರಡು ಹಸ್ತಪ್ರತಿಗಳನ್ನು 'ಖ' ಮತ್ತು 'ಗ' ಎಂದು ಗುರುತಿಸಲಾಗಿದೆ.
2. ಇದನ್ನು ಮುಂದೆ 'ಘ' ಎಂಬ ಹೆಸರಿನಿಂದ ಗುರುತಿಸಲಾಗಿದೆ.

ಅವಗಾಹನೆಗಾಗಿ ಸ್ಥಾಲೀಪುಲಾಕನ್ಯಾಯದಂತೆ ಕೆಲವೊಂದು ಲುಪ್ತವಾದ ಪಂಕ್ತಿಗಳ ಪಟ್ಟಿಯನ್ನು ಹಾಗೂ ಶುದ್ಧಾಶುದ್ಧಪಾಠಗಳನ್ನು ಇದರೊಂದಿಗೆ ಕೊಡಲಾಗಿದೆ.

ಕೃತಜ್ಞತಾಸಮರ್ಪಣೆ :

ಪರಮಪೂಜ್ಯವಿದ್ಯಾಗುರುಗಳೂ, ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಸ್ಥಾಪಕಾಧ್ಯಕ್ಷರು ಆದ ಶ್ರೀಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರ ಅಡಿದಾವರೆಗಳಲ್ಲಿ ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುವೆವು.

ಈ ಪುಸ್ತಕದ ಮುದ್ರಣ ವೆಚ್ಚವನ್ನು ಭರಿಸಿ ನಮ್ಮ ಎಲ್ಲಾ ಶೈಕ್ಷಣಿಕ ಕಾರ್ಯಕ್ರಮಗಳಿಗೆ ನಿರಂತರ ಪ್ರೋತ್ಸಾಹ ನೀಡುತ್ತಿರುವ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ಸಂಸ್ಥಾನದ ಕುಲಪತಿಗಳಾದ ಪ್ರೊ.ಕುಟುಂಬಶಾಸ್ತ್ರಿಗಳಿಗೆ ನಮ್ಮ ವಂದನೆಗಳು.

ನಮ್ಮ ಶೈಕ್ಷಣಿಕ ಕಾರ್ಯಗಳಿಗೆ ಎಲ್ಲಾ ರೀತಿಯ ಪ್ರೋತ್ಸಾಹ ನೀಡಿ ನಮ್ಮನ್ನು ಹುರಿದುಂಬಿಸುತ್ತಿರುವ ಸಂಶೋಧನ ಮಂದಿರದ ಅಧ್ಯಕ್ಷರಾದ ಶ್ರೀಮತಿ ರಾಜಲಕ್ಷ್ಮೀ ಶ್ರೀನಿವಾಸನ್ ಅವರಿಗೆ ನಮ್ಮ ಕೃತಜ್ಞತೆಗಳು.

ಈ ಗ್ರಂಥದ ಸಂಪಾದನೆಯಲ್ಲಿ ಉಪಯುಕ್ತ ಸಲಹೆಗಳನ್ನು ನೀಡಿ ನಮಗೆ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ನಿದೇಶಕರಾದ ಶ್ರೀಯುತ ಡಾ.ಎ.ವಿ. ನಾಗಸಂಪಿಗೆಯವರಿಗೆ ನಮ್ಮ ಹೃತ್ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಗಳನ್ನು ಸಲ್ಲಿಸುವೆವು.

ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ಸಂಸ್ಥಾನದ ವಿತ್ತಾಧಿಕಾರಿಗಳಾದ ಶ್ರೀಯುತ ಸಿ.ಎಸ್. ಕನಿಯಾಲ್ ಅವರ ಪ್ರೋತ್ಸಾಹವನ್ನು ಆದರದಿಂದ ಸ್ಮರಿಸಿ ಅವರಿಗೆ ಕೃತಜ್ಞತೆಗಳನ್ನು ಸಲ್ಲಿಸುವೆವು.

ವಿದ್ಯಾಪೀಠದ ಉಪಕುಲಪತಿಗಳೂ, ರಾಷ್ಟ್ರಪತಿ ಪ್ರಶಸ್ತಿ ಭಾಜನರೂ ಆದ ಶ್ರೀಯುತ ಪ್ರೊ.ಕೆ.ಟಿ.ಪಾಂಡುರಂಗಿಯವರು, ಹಾಗೂ ತಿರುಪತಿಯ ರಾಷ್ಟ್ರಿಯ ಸಂಸ್ಕೃತ ವಿದ್ಯಾಪೀಠದ ನಿವೃತ್ತ ಕುಲಪತಿಗಳು, ರಾಷ್ಟ್ರಪತಿಪ್ರಶಸ್ತಿ ಪುರಸ್ಕೃತರೂ ಆದ ಶ್ರೀಯುತ ಪ್ರೊ. ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರು- ಈ ಈರ್ವರ ಮಾರ್ಗದರ್ಶನವನ್ನು ಆದರ ಪೂರ್ವಕವಾಗಿ ನೆನೆಯುತ್ತಾ ಈ ಇಬ್ಬರು ಹಿರಿಯ ವಿದ್ವಾಂಸರಿಗೆ ನಮ್ಮ ಹಾರ್ದಿಕ ಕೃತಜ್ಞತೆಗಳನ್ನು ಅರ್ಪಿಸುವೆವು.

ಈ ಗ್ರಂಥದ ಸಂಶೋಧನ ಕಾರ್ಯಕ್ಕೆ ಅಗತ್ಯವಿರುವ 2 ಅಮೂಲ್ಯ ಹಸ್ತಪ್ರತಿಗಳನ್ನು ತಮ್ಮ ಗ್ರಂಥ ಭಂಡಾರದಿಂದ ತೆಗೆದು ನೀಡಿ ಮಹೋಪಕಾರ ಮಾಡಿದ, ರಾಷ್ಟ್ರಪತಿ ಪ್ರಶಸ್ತಿ ವಿಜೇತರು, ವಿದ್ಯಾವಾಚಸ್ಪತಿ ಇತ್ಯಾದಿ ಬಿರುದಾಂಕಿತರೂ ಆದ ಶ್ರೀ.ಡಾ.ವಿ.ಪ್ರಭಂಜನಾಚಾರ್ಯರಿಗೆ ನಾವು ಚಿರಋಣಿಗಳು.

ಹಾಗೂ ಸಂಶೋಧನ ಕಾರ್ಯಕ್ಕೆ ಆವಶ್ಯಕವಾದ ಹಸ್ತ ಪ್ರತಿ ನೀಡಿ ಸಹಕರಿಸಿದ ಡಾ. ವೀರನಾರಾಯಣ ಪಾಂಡುರಂಗಿ, ವಿದ್ವಾನ್ ಮಾಧವ ಪಾಂಡುರಂಗಿ, ಮತ್ತು ಶ್ರೀಯುತ ಎ.ಬಿ. ಜಹಾಗೀರ್‌ದಾರ್ ಇವರೆಲ್ಲರಿಗೂ ನಮ್ಮ ಆದರ ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಗಳು.

ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಸಿಬ್ಬಂದಿ ವರ್ಗಕ್ಕೂ ನಮ್ಮ ಕೃತಜ್ಞತೆಗಳನ್ನು ಸಲ್ಲಿಸಿ ಈ ಗ್ರಂಥ-ಸಂಪಾದನ ಸಂಶೋಧನ ಕಾರ್ಯವನ್ನು ಅಸ್ಮದ್ಗುರ್ವಂತರ್ಗತ ಭಾರತೀಪತ್ಯಂತರ್ಗತನಾದ ಶ್ರೀಪತಿಯ ಪಾದ ಕಮಲಗಳಲ್ಲಿ ಭಕ್ತಿ ಪೂರ್ವಕವಾಗಿ ಸಮರ್ಪಿಸುವೆವು.

ಇತಿ ಸುಜನ ವಿಧೇಯ
ವಿ॥ ಶಂಕರನಾರಾಯಣ ಅಡಿಗ,
ವಿ॥ ರಂಗನಾಥ ಕಟ್ಟಿ

ದಿನಾಂಕ: 30-10-2006

अ.	सू.	म.	शुद्धपाठः	अशुद्धपाठः
१	१	१	अग्न्यादिरूपः	अग्न्यादिपरः
१	१	३	तान् को विलङ्घ्य भगवन् व्रजतात् पदं ते ।	तान् को विलङ्घ्य व्रजतात् पदं ते ।
१	१	९	सम्यक् सत्वाय सद्भावाय वा ।	सम्यक् सत्वाय वा ।
१	२	१	तद्दृष्टेस्ततत्वम् ।	दृष्टेस्ततत्वम् ।
१	२	७	उपयाम शरणं व्रजेम ।	उपयाम व्रजाम् ।
१	२	३	उरूचीत्यधिको वर्णः प्रयुज्यते ।	उरूचीत्यधिको वर्णः ।
१	२	६	नरशब्दव्याख्यानं ।	नरव्याख्यानं ।
१	२	७	यथायोग्यमेव फलमधिकारिणां ।	यथायोग्यमेव फलादिकारिणां ।
१	३	७	यज्ञं कुर्वाणा इत्यपि व्याख्येयम् ।	यज्ञं कुर्वाण इति व्याख्येयम् ।
१	३	१०	समस्तभक्तपापशोधकाः ।	समस्तभक्त्याशोधकाः ।
१	४	१	दशार्चमिदमैन्द्रं ।	दशार्चमैन्द्रं ।
१	४	५	ये निदः ।	नो निदः ।
१	४	५	निर्गत्यैव ।	निर्गत्य ।
१	४	७	क्षिप्रकारिसामर्थ्य ।	क्षिप्रकार्यसामर्थ्य ।
१	८	३	जातत्वात् ।	ज्ञातत्वात् ।
१	८	३	अकारादेशस्य ।	आकारादेशस्य ।
१	८	२	निमित्तेन ।	नियतेन ।

१	९	८	न दोषायेति मन्तव्यम् ।	न दोषायेति ।
१	११	४	पुरां शम्बरासुराख्यपुराणां ।	परां शम्बराख्यासुराणां ।
१	१२	६	होमाधिकरणीभूतास्यः ।	होमाधिकरणीभूतः ।
१	१२	१०	उपावहेति ।	उपवहेति ।
१	१२	११	भावप्रधानो निर्देशः ।	भावो निर्देशः ।
१	१३	४	आवह विशेषतः ।	आवहतु इति शेषः ।
१	१४	२	कविर्विप्रेति पाठात् ।	कविर्विप्रेति यावत् ।
१	१४	२	आ अहूषत ।	आहूषत ।
१	१४	८	षष्ठी द्वितीयार्थे ।	षष्ठी द्विवचनार्थे ।

ಲುಪ್ತ ಪಂಕ್ತಿಗಳ ಯಾದಿ

अ.	सू.	म.		
१	२	१	१.	व्येति लीयते जगदत्रेति वा वायुः ।
१	२	१	२.	मनोवृत्तीनां पानं नाम ।
१	२	६	३.	प्रवर्तकः ‘निषुसीद’ इति श्रुतेः, स्वातन्त्र्येणापि ।
१	२	७	४.	प्राणिनामभीष्टेति तदर्थो द्रष्टव्यः । केवलं भक्त्यतिशय-वशाच्छरणमुपयामीति भावः ।
१	२	६	५.	यद्वा, ‘रीङ् क्षये’ इति धातोर्न रीयेते क्षयं न प्राप्नुत इति नरौ । अथवा ‘रीङ् हिंसायां’ इति धातोर्न रिषतो हिंसां न प्राप्नुत इति नरौ ।
१	२	७	६.	वरमुत्तमजीवमुन्नयति, ऊर्ध्वं नयतीति वा वरुणः ।
१	२	७	७.	रमणं सुखं रीत्युच्यते ।
१	३	२	८.	‘नरौ तावविनाशित्वाद् उपचारः क्वचिद् भवेत्’ इति पूर्वोक्तरीत्या नरशब्दार्थो द्रष्टव्यः ।
१	३	७	९.	स्वीकृता माः प्रमा यैस्ते ओमासः, सर्वविषयकज्ञानवन्त इति यावत् । इदं च परमेश्वरे मुख्यम् ।
१	३	१०	१०.	अन्नं तद्वती वा इनाः स्वामीति वर्णागमादिना वाजिनीः। अथवा वाजिनामश्वानां ।
१	४	४	११.	चतुर्विधनाशशून्यं, विपश्चितं ।
१	४	१०	१२.	अवनिराश्रयः । अशेषेति कम्पार्थः । यद्वाऽवनिरैश्वर्यार्थः प्राप्त्यर्थश्च । तथा च अशेषद्रविणस्यावनिः ।
१	४	८	१३.	अन्नवन्तमन्नदातारं, नान्नदानमात्रेणेश्वरो रक्षतीत्यतो भक्तं ज्ञानिनं चेति शेषः कार्यः ।
१	५	१	१४.	स्तोमाः सामविशेषाः तान् वहन्ति गानार्थं धारयन्तीति स्तोमवाहसः ।

१	५	४	१५.	यस्येन्द्रस्य संस्थे सम्यक्स्थितौ सत्यां, यस्मिन्निन्द्रे रथे स्थिते सतीति यावत् । समत्सु ज्ञानयुद्धेषु शत्रवो हरी = अश्वौ, अश्वाग्रमिति यावत् । न वृण्वते । न प्राप्नुवन्ति । अश्वाग्रभागमपि स्प्रष्टुं न समर्था भवन्तीति यावत् । तस्मा इन्द्राय रथे स्वावस्थानेन हर्यग्रस्य शत्रप्राप्यतापादकाय गायतेत्यर्थः । अध्यात्मं तु-
१	५	३	१६.	अभवत् । तत्प्रसादो भवेदित्यर्थः । स एव च राये वित्ताय, अध्यात्मं ज्ञानाख्यवित्ताय भुवत् ।
१	५	१०	१७.	अस्मत्तो लभताम् । अथवाऽऽत्मपूजार्थं वाजं सनेत् सनयेत् लम्भयेत् ।
१	६	१	१८.	पौंस्येत्युक्तानि वासुदेवस्य ।
१	६	७	१९.	कर्तरि उप्रत्ययः ।
१	६	७	२०.	मन्दू मन्दं सुखं तद्धेतुना द्यावापृथिव्यौ मन्दूँमधु द्यौरस्तु नः पिता इति प्रयोगात् ।
१	७	२	२१.	इत्यत्र मकारलोपे इकारस्य यकाररूपे वर्णविकारे च सति हिरण्यय इति ।
१	७	७	२२.	यद्वा धातूनामनेकार्थत्वात् तुञ्जतिः प्रेरणे वर्तते । तत्र तुञ्जे तुञ्जे इति वीप्सा ।
१	७	७	२३.	तुञ्जे क्रियाया इति शेषः । लोकानां गमनेतरसमस्त-क्रियायाश्च दाने त्वया क्रियमाणे सति ।
१	८	२	२४.	अध्यात्मं येन ज्ञानवित्तेन दत्तेन निमित्तेन वृत्राणि तमांसि,ज्ञानयुद्धतं इति शेषः । निरुणधामहे । किञ्च ।
१	८	५	२५.	यद्वा, शशब्दः सुखवाची । वशब्दो बलवाची । तथा च शः नित्याभिव्यक्तसुखात्मकः वः तादृशबलात्मक-श्चेत्यर्थः ।

१	८	६	२६.	भगवञ्ज्ञानिन इति यावत् । ते के ? त एव विप्रासः= विप्राः । तदन्ये तु ये मूर्खाः ।
१	९	२	२७.	विश्वानि = समस्तानि कार्याणि, चक्रये = कृतवते, सर्वकर्त्रे इति यावत् । इन्द्राय
१	१०	२	२८.	गिरिशिखराद् गिरिशिखरमारुहदिति मुख्यार्थस्य बाधाद् गिरिशब्दात् ।
१	१०	१	२९.	गायत्रं सामविशेषः। तद्वन्तः सामगा इत्यर्थः। गायन्ति। अर्किणः
१	१०	६	३०.	शक्तः 'शक्लृ शक्तौ' 'रमु क्रीडायां'शक्तिरतिस्वरूपत्वाच्छक्रशब्दवाच्यः, उत तस्मात् ।
१	११	५	३१.	प्रत्यागत्य दैत्यैर्गा अपहृता इत्युवाच । तच्छ्रुत्वेन्द्रः
१	१२	११	३२.	वेदद्रष्ट्रा मया ।
१	१३	३	३३.	विष्णुस्तु शरीरस्य नप्ता पौत्रः । नपाच्छब्दस्य पौत्रपर्यायत्वात् ।
१	१३	१२	३४.	षष्ठ्यर्थे, इन्द्रस्य सम्बन्धिनो यज्वनो ।
१	१४	८	३५.	ते = तव, जिह्वया, त्वदीयया जिह्वयेति यावत् ।
१	१४	१०	३६.	विश्वेभिरित्यनेनैव गृहीतयोरपीन्द्रवाय्वोः पृथग्ग्रहणं प्राधान्यादिति ज्ञातव्यम् ।
१	१५	१	३७.	अश्विनेत्येता ऋतुदेवताः सर्वत्रेति । हे इन्द्र ऋतुता 'ऋ गतौ' गमनसाधनेनाऽदित्यस्य
१	१५	२	३८.	पावनात् पोता देवतात्वाच्च ।
१	१५	५	३८.	अत्रेन्द्रशब्देन भगवद्विवक्षापक्षे तदन्यदेवतापक्षे च ।
१	१५	१०	३९.	तुर् ईय तुरीयेति रूपम् । तथा चतुर् शब्दात् यत्प्रत्यये चकारलोपे ।

१	१६	१	४०.	चक्षांसि चक्षूंषि येषां ते सूरचक्षसः । त्वा द्वितीया षाष्ठ्यर्थे । तव ।

ಇದೇ ರೀತಿ ಎರಡು ಹಾಗೂ ಮೂರನೇ ಅಧ್ಯಾಯಗಳಲ್ಲಿ ಸಹ ಅಶುದ್ಧಪಾಠಗಳು ಮತ್ತು ಲುಪ್ತವಾಗಿರುವ ಪಂಕ್ತಿಗಳು ಬಹಳಷ್ಟಿವೆ. ಅವೆಲ್ಲವನ್ನೂ ಪುಟಗಳು ಹೆಚ್ಚಾಗುವ ಭಯದಿಂದ ಉದಾಸಹರಿಸಲಾಗಿರುವುದಿಲ್ಲ. ಸ್ಥಾಲೀಪುಲಾಕನ್ಯಾಯದಂತೆ ಕೇವಲ ಒಂದನೇ ಅಧ್ಯಾಯದ ಉದಾಹರಣೆಗಳನ್ನು ಮಾತ್ರ ಕೊಡಲಾಗಿದೆ.

श्रीरामकृष्णवेदव्यासनरसिंहहयग्रीवात्मकश्रीलक्ष्मीनारायणाय नमः ।

अथ श्रीवंशपल्लीश्रीनिवासतीर्थविरचिते

ऋगर्थोद्धारे

प्रथमोऽध्यायः

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

अग्निसूक्तम्

मधुच्छन्दा वैश्वामित्रः ऋषिः । अग्निः देवता । गायत्री छन्दः ।

(ऋ.म.-१)

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ १ ॥

प्रणम्य यादवाचार्यगुरूणां पादपङ्कजे ।
ऋगर्थो भाष्यटीकोक्तः सङ्गृह्योद्ध्रियते मया ॥

(ऋगर्थोद्धारः) - सर्ववेदानां मुख्यतो भगवानेव ऋषिः । अनन्तरं लक्ष्मीः चतुर्मुखादयो देवाः । मधुच्छन्दःप्रभृतयो मुनयश्चर्षय इति ज्ञातव्यम् । तत्राऽदौ 'अग्निमीळे' इत्यादिऋक्शतेन मधुच्छन्दा ऋषिरग्न्यादिगतमग्निनामानं विष्णुमग्न्यादिदेवतां च स्तौति । तत्र 'अग्निमीळे' इत्यादिनवर्चमाग्नेयं सूक्तम् । ऋगर्थस्त्रिविधः । एकस्तावत् प्रसिद्धाग्न्यादिरूपः । अपरस्त-दन्तर्गतेश्वरलक्षणः। अन्योऽध्यात्मरूप इति द्रष्टव्यम् । **अग्निमीळ इति** ॥ अग्निं बाह्ययज्ञे, अध्यात्मं - ज्ञानयज्ञे अशेषपूज्येभ्यो ब्रह्मादिभ्योऽग्र एव मुख्यतयाऽभिपूज्यम् । तथाऽग्रे भवत्वादुत्तमत्वादिति यावत् । अग्निशब्दवाच्यम् । अग्रनेतृत्वात् प्रथमप्रवर्तकत्वाच्चाग्निं, बाह्ये [१]संहर्तृत्वाद्धविषोऽत्तृत्वाच्च [२]अध्यात्मम्- श्रोत्रादिषु स्थित्वा

१. 'बाह्यसंहर्तृत्वात्' इति 'घ' पाठः। २.'अध्यात्म्यम्' इति मातृकायाम्।

[1]विषयाणामत्तृत्वाच्चाग्निम् । अङ्गानां सर्वशरीराणां प्रवर्तकत्वाच्चाग्निम् । स्वतो न गच्छति न प्रवर्तते यद् विश्वं तद् अगं तस्य प्रवर्तकत्वाच्चाग्निं भगवन्तं बाह्ययज्ञ एवाशेषेभ्यः स्वावरेभ्योऽग्र एवाभिपूज्यत्वादिनाऽमुख्य-तयाऽग्निशब्दवाच्यं प्रसिद्धाग्निं च ईळे = स्तौमि ।

स्तुत्यत्वं तस्य कुत इत्यत उक्तम् - **पुरोहितमिति ।** पुरः पूर्वमेवानादि-कालत एवाशेषेभ्यो हितम् । लोके हितो हि स्तुत्यो भवति । अयं च तथेति भावः । ऋचां कर्माङ्गत्वेन ऋत्विग्वाक्यतया आत्मनो नियामकस्य ज्ञान-प्रदस्य च स्तुतिरुपपन्नेत्याशयेनोक्तम् - **यज्ञस्य ऋत्विजमिति ।** समुदायापेक्षमेकवचनम् । बाह्यानां यज्ञानामृत्विजं, तत्र ये ऋत्विजः सन्ति तन्नियामकत्वेन तत्र स्थितत्वात् । अध्यात्मं - ज्ञानयज्ञे इन्द्रियदेवा ऋत्विजस्तन्नियामकतया स्थितत्वात् तदधीनत्वादिति न्यायेन ऋत्विक्शब्दवाच्यम् । गुणाधिकत्वाच्चायं स्तुत्य इत्याह - **देवमिति ।** द्योतनविजयकान्तिव्यवहृतिगतिरतिकर्तृत्वात् सर्वैः स्तुत्यत्वाच्च देवशब्दवाच्यम् । ऋग्वेदिनो हि होतृत्वापेक्षिणो भवन्ति । अतो होतृसंस्थस्य स्तुतिर्युक्तैवेत्याह - **होतारमिति ॥** होतृसंस्थमित्यर्थः । अन्येषु ऋत्विक्षु परमेश्वरसन्निधानमात्रमेवास्ति न विशेषसन्निधानम् । होतरि तु अग्निसंस्थेन रूपेण विशेषतः सन्निहित इति विष्णुर्होतेत्युच्यते । प्रसिद्धाग्नेस्तु - 'सोऽयमग्निः स होता' इति श्रुतेर्होतृदेवतात्वादभिमान्यधिकरणन्यायेन होतृशब्दवाच्यत्वं ज्ञातव्यम् । अध्यात्मं - भोगप्रदत्वाच्च तस्य स्तुत्यत्वं युक्तमित्याह - **होतारमिति ।** इन्द्रियाग्निषु विषयलक्षणहविषां होतारमित्यर्थः । परम-सुखरूपत्वादतिशयितधनवत्त्वाच्च सुखार्थिनो धनार्थिनश्च तत्स्तुतिर्युक्ते-त्याह- **रत्नधातममिति ॥** रत्न इति सुखं धनं वा धत्त इति रत्नधाः, अतिशयेन रत्नधा रत्नधातम इत्यर्थः ॥ १ ॥

१. 'विषयात्तृत्वाच्चाग्निं' इति 'क' पाठः ।

(ऋम.-२)

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त ।
स दे॒वाँ एह व॑क्षति ॥ २ ॥

(ऋगर्थोद्धारः) - अग्नेः स्तुत्यत्वे आचारोऽप्यस्तीत्युच्यते - **अग्निः पूर्वेभिरिति ऋग्द्वयेन ॥** अग्निस्तदन्तर्गतो हरिरध्यात्मगतो हरिश्च पूर्वेभिः = पूर्वैः अतीतैः नूतनैः = नूशब्दोऽद्यपर्यायः । तथा चाद्यतनैर्वर्तमानैरिरिति यावत् । उतशब्दादागामिभिरेवं सर्वैर्ऋषिभिर्विशिष्टज्ञानवत्त्वाद् ऋषिनामकैः देवादिभिरीड्यः स्तुत्यः । एवं सर्वैः स्तुतः सोऽग्निस्तेषां स्तोतॄणाम् इह बाह्ययज्ञे देवान् = हविर्भुजः आवक्षति = आनयेत् आनयति । ज्ञानयज्ञे चेन्द्रियदेवांस्तेषां विशेषेण उपकारिणः करोतीत्यर्थः ॥ २ ॥

(ऋम.-३)

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वे दि॑वे ।
य॒शसं॑ वी॒रव॑त्तमम् ॥ ३ ॥

(ऋगर्थोद्धारः) - अग्निना रयिमिति ॥ स्तोता स्तुतेनाग्निनैव तत्प्रसादेनैव रयिं = [1]बाह्ये धनात्मकम् अध्यात्मं विद्यात्मकं वित्तम् अश्नवत् = आप्नोति । प्राप्तस्य तस्य वित्तस्य दिवेदिवे = दिवसेदिवसे, नित्यमिति यावत् । पोषमेव = पुष्टिमेव अश्नवत् = आप्नोति । न पुनर्लोकवद्धीनता-मित्यर्थः । किञ्च यशसं प्राप्नोति । कथम्भूतम् ? वीरवत्तमम् = वीरः पुत्रः सोऽस्मिन्नस्तीति वीरवत् । अतिशयेन वीरवत् वीरवत्तमम् अतिशयेन सम्यक्त्वं तच्च सामर्थ्यात् पुत्रविशेषणं समीचीनपुत्रसंयुक्तमित्यर्थः । पुत्रं यशश्चेत्युभयं प्राप्नोतीति यावत् । इदं बाह्ये । अध्यात्मं - वीरशब्दो भावप्रधानो

१. 'बाह्यधनात्मकं' इति 'ख' पाठः ।

वीरत्वापरपर्यायवीर्यवाची । वीरवत्तमं = वीर्यवत्तमम् अतिशयितवीर्ययुक्तं यशसं, प्रापणार्थस्य यातेः [१]ज्ञानार्थत्वाद् येति ज्ञानमुच्यते । शशब्देन सुखं तदुभयं प्राप्नोतीत्यर्थः । अतोऽग्निः[२] स्तुत्य इति भावः ॥ ३ ॥

(ऋ.म.-४)

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑ ।
स इद्दे॒वेषु॑ गच्छति ॥ ४ ॥

(**ऋगर्थोद्धारः**) - [३]एवमग्निस्तुतेरुपपत्तिं ऋक्त्रयेणोक्त्वा स्तौति - **अग्ने यमिति** ॥ हे अग्ने ! त्वम् अध्वरं = अध्वनि रतं विधिमार्गस्थितं विहितप्रकारेणानुष्ठितं बाह्यमान्तरं च यज्ञं विश्वतः = विश्वस्मिन् काले, सदैवेति यावत् । परितो भवतीति परिभूः, असि = भवसि । परितो भूत्वा रक्षसीति यावत् । स इत् = स एव त्वद्रक्षित एव यज्ञो देवेषु देवान् गच्छति = आप्नोति । नात्र संशयोऽस्तीत्यर्थः । परमेश्वररक्षितमेव बाह्ययज्ञं देवाः स्वीकुर्वन्ति । अध्यात्मं - परमेश्वररक्षितस्यैव ज्ञानयज्ञस्य देवादिकं विषयो भवतीति भावः । यथोक्तमेकादशस्कन्धे -

> **"त्वां सुन्वतां सुरकृता बहवोऽन्तरायाः**
> **तान् को विलङ्घ्य भगवन् व्रजतात् पदं ते ।**
> **नान्यस्य बर्हिषि बलिं ददतः स्वभागं**
> **धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥"**
>
> (भागवतम् - स्क - ११, अ - ४, श्लोकः - १०)

इति ॥ ४ ॥

---

१. 'ज्ञानित्वात्' इति 'ख' पाठः । २. अन्तोऽग्निः इति 'क' पाठः ।
३. 'एवमग्निरुपपत्तिं' इति 'क' पाठः ।

(ऋ.म.-५)

अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः ।
दे॒वो दे॒वेभि॒राग॑मत् ॥ ५ ॥

(**ऋगर्थोद्धारः**) - **अग्निर्होतेति** ॥ सोऽग्निर्होता पूर्ववत् । कविक्रतुः = भावप्रधानो निर्देशः । कवित्वे अखिलग्रहणविषये, सर्वज्ञानायेति यावत् । क्रतुः प्रज्ञा प्रतिभा यस्यासौ [१]तथाभूतः, सत्यः = सत् सद्भिः गुणैस्ततः सतत् इत्युच्यते । अखिलं विश्वं यमयतीति यः । सच्चासौ यश्चेति सत्यः । चित्रश्रवस्तमः । **'चित्रमालेख्यमद्भुतम्'** इति वचनात् चित्रमद्भुतं श्रवः कीर्तिः यस्यासौ चित्रश्रवाः अतिशयेन चित्रश्रवाः चित्रश्रवस्तमः अग्र्यकीर्तीनां पुरुषाणां मध्ये उत्तम इति यावत् । देवः पूर्ववत् । एवम्भूतो भगवान् देवेभिः= बाह्ये यज्ञभुग्भिर्विबुधैः सह यज्ञस्थानं प्रति अध्यात्मम् - इन्द्रियाभिमानिभिर्देवैः सह भक्तशरीरं च प्रति [२]अखिलभक्तानां- बाह्याध्यात्मिकपूजास्वीकारतत्परः सन् आगमत्= सार्वकालिकोऽत्र लुङ् । आगन्ता भवति । तत्र विशेषतः सन्निहितो भवति । आगमनं न हविराद्याशया । किन्तु भक्तप्रियतयेति भावः ॥ ५ ॥

(ऋ.म.-६)

यद॒ङ्ग दा॒शुषे॒ त्वमग्ने॑ भ॒द्रं क॑रि॒ष्यसि॑ ।
तवेत्तत्स॒त्यम॑ङ्गिरः ॥ ६ ॥

(**ऋगर्थोद्धारः**) - **यदङ्गेति** ॥ [३]प्रियसम्बोधनेऽङ्गशब्दः । हे अङ्ग = सतां प्रिय ! अङ्गिरः, अध्यात्मं - 'एतमु एवाङ्गिरसं मन्यन्तेऽङ्गानां यद्रसस्तेन' इति श्रुतेरङ्गानां सर्वशरीराणां प्रेरकाग्ने ! बहिः अग्निरङ्गिरसः पुत्रो कचिदभवत्

१.'तथोक्तः' इति 'ध' पाठः । २. 'अखिलभूतानां' इति 'क' पाठः ।
३.'प्रिये' इत 'क' पाठः

अतोऽङ्गिराः । 'तदधीनत्वादर्थवत्' (ब्र.सू - १-४-३) इति न्यायात् । प्रसिद्धाग्नेरप्यङ्गिरसपुत्रत्वादङ्गिराः । तथा चैतादृशः त्वं दाशुषे = 'दाशृ दाने' दानशीलाय यजमानाय भद्रं करिष्यसि = कर्तुमिच्छसि इति यावत् । तत् = इच्छारूपमीहनं व्यापारं तवेत् = तवैव सत्यम् = अवितथम् अस्मा इदं दास्यामीति इच्छसि चेद् दास्यस्येव । सत्यसङ्कल्पत्वादिति भावः । अध्यात्मं - भगवत्यङ्गिरःशब्दप्रयोगेणेदं सूचयति । यजमानः पूजयति स्वयं फलं ददातीत्येवं विनिमयमात्रं न भवति । किन्तु यजमानशरीरे स्थित्वा पूजादिकर्मणां प्रवर्तकः 'निषुसीद' इति श्रुतेः, स्वातन्त्र्येणापि त्वमेवेति ॥ ६ ॥

(ऋम.-७)

उप॑ त्वाग्ने दि॒वे दि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम् ।

नमो॒ भर॑न्त॒ एम॑सि ॥ ७ ॥

(ऋगर्थोद्धारः) -उप त्वेति ॥ हे अग्ने ! धिया = बुद्ध्यादिभिर्गुणैः, अल्पा अपीति शेषः । वयं दिवेदिवे = दिवसे दिवसे तत्रापि दोषावस्तः = वस्तरित्यहरुच्यते । अहोरात्रं सदेति यावत् । नमो भरन्तः, अध्यात्मं - मनसा बहिः कर्मवाग्भ्यां तद्विषयकं, नमः = नमनं, भरन्तः = सम्बिभ्राणाः सन्तः, ईश्वरत्वादुच्चगुणमपीति शेषः । त्वा = त्वां । उप आ ईमसि । उपेमसि = उपयाम शरणं व्रजेम । धियेति पदसामर्थ्यादल्पा अपीति शेषे वक्तव्ये स्तुतित्वसिद्ध्यर्थं ईश्वरादुच्चगुणमपीत्यपि शेषो वक्तव्यो भवति। धिया एमसीत्यन्वयसम्भवेऽपि गुणाधिक्यलाभाय शेषोक्तिः । महागुणस्य शरणप्राप्तौ साधनहीनश्चेत् कथं शरणं याया इत्यतः प्रागुक्तमङ्गेत्येतद् अत्राप्यनुकृष्य व्याख्येयम् । प्राणिनामभीष्टेति तदर्थो द्रष्टव्यः । केवलं भक्त्यतिशयवशाच्छरणमुपयामीति भावः ॥ ७ ॥

(ऋम.-८)

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम् ।

वर्ध॑मानं॒ स्वे॒ दमे॑ ॥ ८ ॥

(ऋगर्थोद्धारः)- राजन्तमिति ॥ अध्वराणां = यज्ञानां राजन्तं = राजानं बाह्याध्यात्मिकाध्वरेशं ऋतस्य = यथार्थज्ञानस्य गोपां= गोप्तारं स्वे= स्वकीये दमे= सद्मनि स्वर्गे वैकुण्ठादौ हृदये वा दीदिविं= देदीप्यमानं वर्धमानं= सदा वृधं सदा सम्पूर्णमग्निशब्दवाच्यं त्वामुपेमसीति पूर्वेण सम्बन्धः ॥८॥

(ऋम.-९)

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व ।

सच॑स्वा नः स्व॒स्तये॑ ॥ ९ ॥ ३ ॥

(ऋगर्थोद्धारः) - स नः पितेवेति ॥ हे अग्ने ! स एवमस्माभिः शरणं प्राप्तस्त्वं तु नः = अस्माकं पितेव पुत्राणां सूपायनः = सूपाश्रयः शोभनाश्रयो भव । न केवलं पितेव पालितपुत्राणां, किन्तु, सूनवे = षष्ठ्यर्थे चतुर्थी । औरससूनोः यद्वत् तथेति । किञ्च त्वं नोऽस्मान् स्वस्तये = सन्ततसौख्याय सदा सम्यक् सत्त्वाय सद्भावाय वा । सचस्व = रक्ष । धातूनामनेकार्थत्वात् सचतिरिह रक्षायां वर्तते । सेवाया अयोगात् । यथा रक्षणेन सन्ततसौख्यादिकं भवेत् तथा रक्षेति ॥ ९ ॥ ॥ ३ ॥

वायुसूक्तम् - मण्डलम् - १, सूक्तम् - २, मधुच्छन्दा वैश्वामित्रः । १-३ वायुः, ४-६ इन्द्रवायू । ७-९ मैत्रावरुणः । गायत्री छन्दः ।

(ऋम.-१०)

वाय॒वा या॑हि दर्शते॒मे सोमा॒ अरं॑कृताः ।

तेषां॑ पाहि श्रु॒धी हव॑म् ॥ १ ॥

(ऋगर्थोद्धारः) - वायवायाहि दर्शतेत्यादि नवर्चं सूक्तम्। तत्राऽद्यस्तृचो वायव्यः। **वायवायाहीति**॥ हे दर्शत = दर्शो दर्शनं, तेन, तः = ततो दर्शतः ततदृष्टे ! तद्दृष्टेस्ततत्वं च बह्वर्थविषयकत्वं, सर्वज्ञ इति यावत्। वशब्दो बलवाची। अयनाद् गमनकर्तृत्वाद् आयुः वश्चासावायुश्चेति वायुः। वाति गच्छतीति वा लोकस्य प्राणधारणहेतुत्वादायुः । पूर्ववद्विग्रहश्चेति वा वायुः। वाति जानातीति वा वायुः । भक्तान् वृणोतीति वा वायुः। भक्तैर्व्रियत इति वा वायुः। वान्ति गच्छन्ति प्रकर्षेण वर्तन्तेऽस्मिन्निति वा वायुः। वयति बन्धयतीति वा वायुः। संसारादिकं व्ययते विनश्यत्यनेनेति वा वायुः। व्येति लीयते जगदत्रेति वा वायुः । 'वय श्रेष्ठत्वे' इति धातोः श्रेष्ठत्वाद् वा वायुः । तस्य सम्बुद्धिः हे वायो। अध्यात्मं ज्ञानयज्ञं बाह्ये प्रसिद्धं च यज्ञं प्रत्यायाहि। किमर्थम् ? यतः अध्यात्मम् इमे = इमाः, सोमाः = मनोवृत्तयो भक्त्यादिभिः अरङ्कृताः = अलङ्कृताः सन्ति। बहिः प्रसिद्धाः इमे सोमाः = सोमरसाः हिरण्येनालङ्कृताः। तेन मिश्रिताः सन्तीति यावत्। तेषां = तान् पाहि = पिब। तदीयानेव सोमांस्त्वं पिबेति वायुनामकस्य हरेः स्वातन्त्र्यस्य विवक्षितत्वात् तेषामित्येतद्विभक्तिव्यत्ययेन तानिति व्याख्येयम्।

अध्यात्मं - मनोवृत्तीनां पानं नाम **'मनोऽपि भोग्यमीशस्य प्रीतिमात्रेण केवलम्'** इति भाष्योक्तप्रकारेण ज्ञातव्यम्। अस्मादाह्वानं शृधि = शृणु। श्रुधीति संहितायां दैर्घ्यमुक्तार्थाधिक्य इति द्रष्टव्यम्। **'संहितायान्तु दैर्घ्यादिरुक्ताधिक्येपदेऽन्यथा'** इति भगवत्पादवचनात् केवलं श्रवणमात्रस्य वैयर्थ्याद् आगमनेन सफलं कुर्वित्याशयः॥ १॥

(ऋम.-११)

वायं उक्थेभिर्जरन्ते त्वामच्छा जरितारः।
सुतसोमा अहर्विदः ॥ २ ॥

(ऋगर्थोद्धारः) - **वाय उक्थेभिरिति**॥ हे वायो ! सुतसोमाः = सुतः खण्डितः सोमः यैस्ते सुतसोमाः, अच्छेति निपातोऽभेरर्थे वर्तते। अहर्विद= इत्यनेनास्य सम्बन्धः। अहरिति यज्ञोपलक्षणम्। तथा च अच्छा अहर्विदः= अच्छा अभि अभितो यथावद् अहर्विदः = यज्ञवेदिनो जरितारः = स्तोतारो ऋत्विजः उक्थेभिः = उक्थैः शस्त्रविशेषैः त्वां जरन्ते = स्तुवन्ति यतोऽत आयाहीति सम्बन्धः॥ २॥

(ऋम.-१२)

वायो तवं प्रपृञ्चती धेना जिगाति दाशुषे।
उरूची सोमं पीतये ॥ ३ ॥

(ऋगर्थोद्धारः) - **वायो तवेति**॥ हे वायो ! तव त्वां प्रपृञ्चती = 'पृञ्ची सम्पर्के'। त्वत्सम्पर्किणी त्वत्स्तुतिरूपा अत एवोरूची = उर्वीत्येव वक्तव्ये उरूचीत्यधिको वर्णः प्रयुज्यते। तस्यातीत्यर्थो द्रष्टव्यः। 'आधिक्येऽधिकम्' इति वचनात्। तथा च अतिमहती। वायुनामकस्य भगवतस्तवातिमहत्त्वात् त्वत्प्रतिपादकतया त्वदर्थाया वाचोऽप्यतिमहत्त्वं ज्ञातव्यम्॥

यद्वा, उरु = महान्तम् उत्कृष्टं भगवन्तम् अञ्चति। 'अञ्च गति पूजनयोः' गमयति पूजयतीति वा उरूची धेना = वाक्, दाशुषे यज्ञकृते सोमपीतये, सोमस्य पीतिः यस्य यजमानस्य देवानामस्तीति व्यधिकरणो बहुव्रीहिः। यस्य यजमानस्य सोमं देवाः पिबन्ति असौ यजमानः सोमपीतिः तस्मै, जिगाति गत्यर्थकोऽयं धातुरन्तर्णीतण्यर्थश्च। प्रापयति, ईप्सितमिति शेषः। त्वत्स्तुतिर्हि यजमानाभीप्सितसाधनस्वभावाऽतः स्तुवतामस्माकमभीप्सितं कुर्विति ऋगभिप्रायः॥ ३॥

(ऋम.-१३)

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् ।

इन्दवो वामुशन्ति हि ॥ ४ ॥

(ऋगर्थोद्धारः)- द्वितीयस्तृच ऐन्द्रवायव्यः । **इन्द्रवायू इमे इति** ॥ अत्रेन्द्रशब्देनोपेन्द्र उच्यते। वायुशब्देन सङ्कर्षणनामा हरिरिति ज्ञातव्यम्। 'इदि परमैश्वर्ये' इति धातोः परमैश्वर्याद् इन्द्रः । इदं विषयजातमुद्दिश्य द्रुतेः द्रवणात् सर्वविषयोपभोगवत्त्वादिति यावत् । अतश्चेन्द्रः । इदमदर्शमितित्र्। 'तस्मादिन्द्रो नाम तमिन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण' इति श्रुतेः इदं सर्वं ददर्शेति वा इन्द्रः । यद्वा, 'इन्धो हवै नाम योऽयं दक्षिणेऽक्षन् पुरुषस्तमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेण' इति श्रुतेः 'इन्धी दीप्तौ' इति धातोश्च दीप्तिमत्त्वाद् इन्द्रः । इदमभीष्टं राति ददातीति वा इन्द्रः । तथा च हे इन्द्रवायू ! इमे सुताः = कण्डिताः सोमाः मया सम्पादिताः सन्ति । ते चेन्दवः सोमाः सोमानामचेतनत्वाद् बहिः सोमाभिमानिनो देवाः । अध्यात्मं- अस्मन्मनोवृत्तयो हि यस्माद् वां युवाम् उशन्ति = 'उश इच्छायां' इति धातोः इच्छन्ति युवयोरागमनं कामयन्ते तेन कारणेन प्रयोभिः = प्रेयोभिः अतिशयेन प्रियैः सह, यजमानप्रियदानेच्छयेति यावत्। उपागतं = उपागच्छतमित्यर्थः ॥ ४ ॥

(ऋम.-१४)

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू ।

तावायातमुपद्रवत् ॥ ५ ॥ ३ ॥

(ऋगर्थोद्धारः) - वायविन्द्रश्च चेतथ इति ॥ हे वायो ! वाजमन्नं तदेव वाजि '' तृतीयोऽतिशये'' इत्युक्तत्वात् तन्नयतीति वाजिनीः सूर्यः । स हि वर्षणादिनाऽन्नं प्रवर्तयति । तथोक्तम् -

'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः' इति ।

तस्मिन् सूर्ये वसत इति वाजिनीवसू = अन्नपतौ सूर्ये सदा स्थितौ इन्द्रः चशब्दात् त्वं च सुतानां = सुतान् सोमान्, चेतथः = 'चिती सञ्ज्ञाने' विजानतः विजानीथः । अस्मत्स्वीकारयोग्या भवन्तीमे सोमा इति युवां विजानीथः । अतः कारणाद् द्रवत् = द्रुतं क्षिप्रमिति यावत् । तौ युवाम् उपयातम् ।

यद्वा, चेतथः = चेततो विजानतो युष्मद्ज्ञानिनो यजमानस्य यज्ञे सुतानां= सुतान् सोमान्, तत्पानार्थमिति यावत् । उपायातमिति योज्यम् । अत्र वायवायाहीति 'उपप्रयोभिरागतम्' । 'तावायातम्' इत्यभ्यासः सुतात्पर्यद्योतक इत्यवगन्तव्यम् ॥५॥

(ऋम.-१५)

वायविन्द्रश्च सुन्वत आयातमुप निष्कृतम् ।

मक्ष्विं१त्था धिया नरा ॥ ६ ॥

(ऋगर्थोद्धारः) - वायविन्द्रश्च सुन्वते इति ॥ मक्ष्वित्थेत्यत्र मक्षु इत्थेति पदच्छेदः । दीर्घः सांहितः । हे वायो ! नरा = नरौ । 'ला परिवर्तने' । परिवर्तनं च चलनं, विकार इति यावत् । रलयोश्चाभेदः । तथा च परिवर्तनरूपचलनापरपर्यायं विकारं न रातो न प्राप्नुत इति नरौ । यद्वा, 'रीङ् क्षये' इति धातोर्न रीयेते क्षयं न प्राप्नुत इति नरौ । अथवा 'रीङ् हिंसायां' इति धातोर्न रषतो हिंसां न प्राप्नुत इति नरौ । इदं च नरशब्द व्याख्यानं [१]विष्णोरेव मुख्यम् । प्रसिद्धे वायाविन्द्रे च मोक्षेऽविनाशित्वस्य

१.'विष्णावेव'

नियतत्वाद् इदानीमपि बहुकालं विनाशाभावेन बहुकालीनविनाशाभाव-रूपगुणयोगेन गौण्या वृत्त्यैव। देवानां मुख्यतो मरणभावाभावेनामरत्वं यथा तद्वदिति ज्ञातव्यम्। तथा चैवं नरशब्दवाच्यौ युवामिन्द्रश्च त्वं च सुन्वतः= यजमानस्य। यद्यपि सोमकण्डनकर्ता सुन्वन्नित्युच्यते। तादृशश्चर्त्विगेव न यजमानः, तथाऽपि ऋत्विग्भिः क्रियमाणस्यापि सोमकण्डनस्य यजमानार्थत्वेन मुख्यत्वाद् यजमान एव सुन्वन्नित्युच्यत इति ज्ञातव्यम्। निष्कृतं, 'निष्कृतं तु प्रतीकार अपकारः प्रतिक्रिया' इति वचनात् कृते प्रतीकारेऽयं शब्दो रूढः। तथा च तत्कृतपूजानुसारिफलदानं प्रति, तत्कर्तुमिति यावत्। इत्था = इत्थम्भूतया ददान्येव अस्मै फलमित्येवम्भूतया धिया मक्षु = क्षिप्रं, तन्नामसु पाठात्। तान् उपायातं = उपागच्छतमित्यर्थः॥ ६॥

(ऋम.-१६)

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्।
धियं घृताचीं साधन्ता ॥ ७॥

(ऋगर्थोद्धारः) - तृतीयस्तृचो मैत्रावरुणः। **मित्रं हुव इति**॥ पूतदक्षं = पूताः पाविताः दक्षाः यजमाना अनेनेति पूतदक्षस्तं पूतदक्षं रिशादसं = रमणं सुखं रीत्युच्यते। शं सुखम्, अनूनं सुखमतिशयितसुखमिति यावत्। अत्ति अनुभवतीति रिशादास्तम्। मित्रं = माति रक्षणीयं जगज्जानातीति मि। ज्ञात्वा च त्रातीति मित्रः। अह्नः प्रवृत्त्या वस्तुजातं मितं ज्ञातं करोतीति वा मित्रम्। यद्वा, मितं परिमितं यथायोग्यमेव फलमधिकारिणां राति ददातीति वा मित्रः। अथवा मितं परिमितं यथायोग्यं, योग्यतानुसारेणेति यावत्। रमयति सुखयतीति वा मित्रस्तम्, वरुणं बहिस्तमसा आवृणोति, अध्यात्मम् - अज्ञानेनाऽवृणोतीति वरुणः। वरमुत्तमजीवमुन्नयति, ऊर्ध्वं नयतीति वा वरुणः। अथवा 'णो हि निर्वृतिवाचकः' इति वचनाण्णशब्द

आनन्दवाची। तथा च वरः उत्तमो णः आनन्दो यस्यासौ वरुणः। उपपदस्थस्य अकारस्य उकारः। तं च हुवे = आह्वयामि। पुनः कीदृशौ मित्रावरुणावित्यत उक्तम् - **धियमिति**॥ घृताचीं = 'घृ क्षरणदीप्त्योः' इति धातोर्दीप्तत्वात् सुशुद्धत्वाद्धरिर्घृतः। तं प्रति अञ्चति गच्छति विषयीकरोतीति यावत्। घृताची तां, धियम् = अत्र धीरिति यथार्थं ध्यानं श्रवणादिरूपा यथार्थाधिगतिर्वोच्यते। तथा च घृताचीं धियं भगवद्विषयकयथार्थध्यानं तद्विषययथार्थाधिगतिं वा साधन्ता = साधन्तौ, भक्तानां नित्यं साधयन्तावित्यर्थः॥ ७॥

(ऋम.-१७)

ऋतेनं मित्रावरुणावृतावृधावृतस्पृशा।
क्रतुं बृहन्तंमाशाथे ॥ ८॥

(ऋगर्थोद्धारः) - **ऋतेनेति**॥ ऋतेन = सावधारणमेतत्। सत्येनैव न तूपचारत इत्यभिप्रायः। ऋतावृधौ = ऋतवृधौ, ऋतशब्दो नित्यपर्यायः। तथा च ऋतं नित्यं सर्वकालं, वृधौ वृद्धौ, ऋतस्पृशा = यथार्थत्वाद् ऋतो वेदः प्रतिपाद्यतया तं स्पृशत इति ऋतस्पृशौ मित्रावरुणौ। भगवत्पक्षे इत्थं व्याख्यानं प्रसिद्धम्। मित्रावरुणपक्षे तु ऋतेनेत्यव्ययम्। नित्यं, सर्वदेति यावत्। ऋतो हरिः तेन वृधौ वृद्धौ ऋतस्पृशौ = ऋतो हरिः तत्स्पृशौ तत्सम्बन्धिनौ, तद्भृत्याविति यावत्। ऋतावृधावित्यत्र संहितायां दैर्घ्यमुक्तार्थाधिक्यादिज्ञापनार्थम्। 'संहितायां तु दैर्घ्यादिरुक्ताधिक्ये पदेऽन्यथा। अनन्यार्थत्वविज्ञप्त्या' इति भगवत्पादवचनाद् अनन्यार्थत्व-विज्ञप्त्यै। अयमेवार्थः अन्योऽर्थो न भवतीत्येवं विज्ञापनाय, अवधारणार्थमिति यावदिति तदर्थः। एतादृशौ मित्रावरुणौ युवां बृहन्तं = महान्तं क्रतुं यज्ञं, क्रतुशब्दः सुखनामाऽपि भवतीति बृहन्तं क्रतुं = महत्सुखं वा आशाथे =

'तृतीयोऽतिशये' इति सामान्येन उक्तत्वाद् ईकारापेक्षया तृतीयो वर्णो आकारोऽतिशयार्थः । ईशाथे= प्रेरयथः ॥ ८ ॥

(ऋम.-१८)

कवी नो मित्रावरुणा तुविजाता उरुक्षया ।

दक्षं दधाते अपसम् ॥ ९ ॥ ४ ॥ २ ॥

(ऋगर्थोद्धारः) - कवी न इति ॥ भगवत्पक्षे - तुविजातौ = तुवीति बहुनाम । बहुः पूर्णतायाम् । भावप्रधानो निर्देशः । तथा च तुवित्वेन बहुत्वेन पूर्णत्वेन जातावस्थितौ तुविजाताविति व्याख्येयम् ।

प्रसिद्धमित्रावरुणपक्षे तु - तुविशब्देन पूर्णं परब्रह्मोच्यते । तेन जातौ [१]तुविजातौ । तथा च कवी = सर्वज्ञौ तुविजातौ । उरुक्षया = उरुक्षयौ क्षियन्ति निवसन्ति अस्मिन् इति व्युत्पत्त्या क्षयशब्दः स्थानवाची । उरु = महान् क्षयः = स्थानं ययोस्तौ तथोक्तौ सर्वगतौ, यद्वा, 'क्षि निवासगत्योः' इति धातोः क्षयो गतिरागतिश्च । तथा च उरू उर्व्यौ लोकविलक्षणत्वेन उत्कृष्टौ क्षयौ गत्यागती ययोस्तौ तथोक्तौ एतादृशौ मित्रावरुणौ नोऽस्मदर्थे अस्माकं तेन द्रविणप्राप्तिरिति दक्षं = यजमानं प्रति । अपसं = [२]अपःशब्दः कर्मनाम । '[३]अपो दंसः सुदं कर्म' इति तन्नामसु पाठात् । कर्म दधाते = अस्मदर्थं कर्मकर्तारं, कर्म कुर्वत इत्यर्थः। अथवा, नो अस्मदीयं अपसं 'अर्श आदिभ्योऽच्' (पा.सू. ५-२-१२७) कर्मवन्तं, तत्कर्तारं यजमानमिति यावत् । दक्षं = पटुं दधाते = कुर्वत इत्यर्थः । पूर्वयोजनायां दक्षशब्दो यजमानवाचीत्यङ्गीकृत्य तदनुवादेनापसं दधाते इति विधेयम् ।

१. 'तुविजाताविति' इति 'घ' पाठः ।
२. 'अप्शब्दः' इति 'घ' पाठः ।
३. 'आपः' इति 'घ' पाठः ।

द्वितीययोजनानां तु अपसशब्दो यजमानवाची । दक्षशब्दः पटुवाचीत्यङ्गीकृत्य अपसम् इत्यनुवादेन दक्षत्वं विधेयमिति ज्ञातव्यम् ॥ ९ ॥

मण्डलम् - १, सूक्तम् - ३,

मधुच्छन्दा वैश्वामित्रः । १-३ अश्विनौ । ४-६ इन्द्रः ।

७-९ विश्वेदेवाः । १०-१२ सरस्वती । गायत्री ।

(ऋम.-१९)

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ।

पुरुभुजा चनस्यतम् ॥ १ ॥

(ऋगर्थोद्धारः) - अश्विनेत्यादि-द्वादशर्चं सूक्तम् । तत्र आद्यस्तृच आश्विनः । द्वितीयः ऐन्द्रः । तृतीयो वैश्वदेवः । चतुर्थः सारस्वत इति विवेकः । **अश्विना यज्वरीरिति ॥** हे द्रवत्पाणी = क्षिप्रहस्तौ, औदार्यवन्ताविति यावत् । शुभस्पती = शुभसः = शुभस्य पती अधिपौ पुरुभुजौ = पुरोर्बहोर्विश्वस्य गोप्तारौ, पुरोर्बहोरन्नादेर्विषयस्य भोगस्य भोक्तारौ वा । 'भुज पालनाभ्यवहारयोः' इति धातोः भुजेरुभयार्थत्वात् । अश्विनौ = आशु शीघ्रं वानं गतिर्गमनमवगतिर्वा ययोस्तावश्विनौ । वातेर्गत्यर्थत्वाद् गत्यर्थानां चावगत्यर्थत्वात् । 'अशू व्याप्तौ' इति धातोरखिलं जगद् अश्नुतो व्याप्नुत इति वाऽश्विनौ । इदं च निर्वचनं यथायोग्यं भगवत्तदितर-साधारणम् । अश्वरूपात् सूर्याज्जातत्वाच्च-श्विनावित्यपि देवतान्तरे व्याख्येयम् । युवां यज्वरीः = यज्ञसाधनानि, इषः = अन्नानि, न इति शेषः । अस्माकं चनस्यतं = योजयतं, प्रयच्छतमित्यर्थः । अत्र द्रवत्पाणी इति हेतुगर्भविशेषणम् । औदार्यवत्त्वादित्यर्थः ।

यद्वा, यज्वरीः = यज्ञक्लृप्तान्, इषः = स्वभागान्, चनस्यतं = स्वीकुरुत।

अत्र द्रवत्पाणीत्यस्यौदार्यवत्त्वे न तात्पर्यम्। असङ्गतत्वात्। किन्तु क्षिप्रहस्तौ सन्तौ स्वीकुरुत आशु स्वीकुरुतमित्यर्थो द्रष्टव्यः ॥ १ ॥

(ऋम.-२०)

अश्विना पुरुदंससा नरा शवीरया धिया।

धिष्ण्या वनतं गिरः ॥ २ ॥

(ऋगर्थोद्धारः) - अश्विना पुरुदंससेति ॥ हे पुरुदंससा = पुरु बहु दंसः कर्म ययोस्तौ पुरुदंससौ बहुकर्मकृतौ ! नरौ 'नरौ तावविनाशित्वादुपचारः क्वचिद् भवेत्' इति पूर्वोक्तरीत्या नरशब्दार्थो द्रष्टव्यः। धिष्ण्या धिष्ण्यौ = सदा सर्वाश्रयौ अश्विनौ युवां शवीरया = शं सुखं वीरं वीर्यं पराक्रमः तदात्मिक्या धिया भगवद्गुणानां परस्परम् अभेदाद् गिरः =अस्मदीयाः स्तुतिरूपाः वाचो वनतं = सम्भजतं स्वीकुरुतम्। 'वन सम्भक्तौ' इति धातोरित्यर्थः ॥ २ ॥

(ऋम.-२१)

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः।

आयातं रुद्रवर्तनी ॥ ३ ॥

(ऋगर्थोद्धारः) - दस्रेति ॥ हे रुद्रवर्तनी = ऋजं द्रावयत इति रुद्रो वायुस्तस्य वर्तनिरनुवृत्तिस्तद्वशत्वं ययोस्तौ तथोक्तौ। अथवा, रुद्रस्य वायोः सम्बन्धिनी वर्तनिः मार्गो ययोस्तौ तथोक्ताविति वा। प्रसिद्धाश्विनोर्वाय्वनुवृत्तिः स येन मार्गेण गच्छति तन्मार्गेण गमनं च युक्तं तद्भृत्यत्वात्। भगवति तु कथमिति चेदुच्यते। स्नेहतः स्वेच्छया वाय्वनुर्तनतन्मार्गगमनयोः सम्भवात्। यद्व्यतिरेकान्वयप्रयोजकव्यतिरेकान्वयवान् कः पुमान् स्यादिति विचार्य भगवता मुख्यप्राणस्य सृष्टत्वात्।

यथोक्तं षट्प्रश्नोपनिषदि - 'कस्मिन् वाऽहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत' इति। दस्रा = दस्रौ 'दसु विभेदने' कर्तरि रः। सर्वशत्रूणां भेदकौ नासत्या = नासत्यौ नासिकासंस्थौ [1]नासाभिमानित्वादिति प्रसिद्धाश्विपक्षे।

भगवत्पक्षे तु - **'सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते'** इति वचनात् सच्छब्दपर्यायसत्यशब्दः सद्गुणवाची। तथा च न सत्याः असत्याः। असद्गुणा इति यावत्। न विद्यन्ते असत्याः ययोस्तौ नासत्यौ। 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति नियमेन सद्गुणपूर्णाविति व्याख्येयम्। वृक्तबर्हिषः= अनेकार्थत्वाद्धातूनां वृकधातुर्विस्तरार्थः। तथा च वृक्तं विस्तृतं बर्हिः येन तस्य। तत्स्थानात् पश्चिमतो विद्यमानं देवोपवेशनयोग्यं स्थानं येन तथोक्तस्तस्य यज्वन इति शेषः। यजमानस्य सम्बन्धिनः, सुताः = ऋत्विग्भिः कण्डिताः सोमाः, युवाकवः = युवयोः सम्बन्धिनः, युवयोरर्थे यजमानेन सम्पादिताः सन्ति हि यस्मात् तस्माद् आयातमित्यर्थः ॥ ३ ॥

(ऋम.-२२)

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः।

अण्वीभिस्तना पूतासः ॥ ४ ॥

(ऋगर्थोद्धारः) - इन्द्रा याहि चित्रभानाविति ॥ हे चित्रभानो = 'चित्रमालेख्यमद्भुतम्' इत्येवमभिधानाद् अद्भुताः चित्राः, चितौ सर्वजीवचैतन्ये नियामकतया रता वा चित्राः, यद्वा चिताः चिद्रूपाः अजडाः ताश्च ताः राः रतयश्चेति चित्राः अजडसुखात्मका इत्यर्थः। यद्वा, 'चायृ पूजानिशामनयोः' इति धातोश्चायनीयत्वाद् दर्शनीयत्वात् पूजनीयत्वाद् वा चित्राः। चितश्चैतन्यस्य स्वरूपस्यैवादनादनुभवाद् वा चित्राः। धातूनां

१. 'तदभिमानित्वात्' इति 'घ' पाठः।

अनेकार्थत्वाद् रातिरत्रादनार्थोऽभिप्रेतः। एतादृशाभानवो रश्मयस्तेजांसीति यावत्। ज्ञानानि वा यस्यासौ तथोक्तः। चितौ रतत्वादीनां भगवद्धर्मत्वेऽपि ज्ञानतेजोधर्मत्वमपि युक्तम्। गुणानां भगवता परस्परं चात्यन्ताभिन्न-त्वादित्यवगन्तव्यम्।

प्रसिद्धेन्द्रे तु - चित्रभानुशब्दार्थो यथासम्भवमवगन्तव्यः। हे चित्रभानो= इन्द्र, त्वमायाहि। कुतः ? सुताः = आदौ कण्डिताः पश्चात् अण्वीभिः = सूक्ष्माभिः सूक्ष्मतन्तुनिर्मिताभिर्व्यतिषङ्गविशेषविशिष्टाभिः अत एव सम्यक्शोधनसाधनीभिः पटीभिः तना = विस्तृत्य वल्कलाद्यपगमाय पूतासः= पूताः शोधिताः इमे सोमाः = सोमाभिमानिनश्चन्द्रप्रभृतयो देवाः त्वायवः= त्वदिच्छवः त्वदागमनेच्छवो वर्तन्ते तस्मादायाहीत्यर्थः। अध्यात्मन्तु - सोमस्थानीयानि मनांसि। उभयोरपि चन्द्रदेवताकत्वेन देवतैव स्यात्। तानि चाण्वीभिः = सूक्ष्मग्राहिणीभिः प्रमाभिः = यथार्थज्ञानैः पूतासः = पूतानि शोधितानि सन्ति। तानि च त्वदागमनं कामयन्तेऽतो ज्ञानयज्ञं प्रत्यायाहीति योज्यम्॥ ४॥

(ऋम.-२३)

इन्द्राया॑हि धि॒येषि॒तो विप्र॑जूतः सु॒ताव॑तः।

उ प॒ ब्रह्मा॑णि वा॒घतः॑ ॥ ५॥

(ऋगर्थोद्धारः) - इन्द्रायाहि धियेषित इति ॥ हे इन्द्र त्वं धिया = अस्मद्बुद्ध्या बुद्धिपूर्वकमस्माभिः इषितः = अधीष्टः, प्रार्थित इति यावत्। अथवा, धिया स्वबुद्ध्यैव प्रेरितो विप्रजूतः = विप्रैः ब्राह्मणैः ऋत्विग्भिः, तेषां भक्त्येति यावत्। प्रेरितस्सन् वाघतः = अञ्जसा वदतः स्तुवतो होतुः ब्रह्माणि = स्तुतिवाक्यानि उपायाहि = तानि स्वीकर्तुमुपैहीत्यर्थः। सुतवतः= सोमकण्डनं कृतवतो यजमानस्य सोमान् रसां स्वीकर्तुमिति यावत्।

उपायाहीत्यर्थः। अत्र सोमशब्दाभावेऽपि सुतवत इति पदसामर्थ्यात् सोमानिति लभ्यत इति ज्ञातव्यम्।

अध्यात्मं - मनो हि सोमः। सोमकण्डने हि रस उद्गिरति। एवं मनसो विकाररूपे कण्डने सति रसस्थानीयेच्छोत्पद्यते। तथा च सुतवतः = सुतं कण्डितं मनः 'कामं सङ्कल्पः' इति श्रुतेस्तदात्मत्वाद् इच्छा ग्राह्या। तद्वतः मोक्षेच्छावतोऽधिकारिणो वाघतः = होतुः यदा भगवन्तमाह्वयन् भवति तदा स साधक एव होतेत्युच्यते। तस्य ब्रह्माणि स्तुतिवाक्यानि स्वीकर्तुं मानसिकवाचिकयज्ञं प्रत्यायाहीति योज्यम्॥ ५॥

(ऋम.-२४)

इन्द्रा या॑हि॒ तूतु॑जान॒ उप॒ ब्रह्मा॑णि हरिवः।

सु॒ते द॑धिश्व न॒श्चनः॑ ॥ ६॥

(ऋगर्थोद्धारः) - इन्द्रायाहि तूतुजान इति ॥ हरिवः = हृञ् हरणे, वृतु वर्तने। 'भक्तानां संसारं' इति योग्यतया सम्बन्धः। तथा च यतो भक्तानां संसारं हरति वर्तते च संहरन् वर्तत इति यावत्। अतः परमेश्वरो हरिवाः। प्रसिद्धेन्द्रस्तु - हरिभिः हरिनामकैरश्वैः वर्तत इति हरिवाः। हरिनामकाश्ववानिति वा हरिवाः। यद्यपि निर्वचनद्वयेऽप्यर्थ एक एव तथाऽपि 'वृतु वर्तने' इति धात्वङ्गीकारेण प्रथमं व्याख्यानम्। द्वितीयं तु मतुबादेशो वकार इत्यङ्गीकृत्येति भेदः। हरिणा विष्णुना प्रेरितः सन् वर्तते प्रवर्तते इति वा हरिवाः, तस्य सम्बुद्धिः हरिवः।

अध्यात्मं - विषयेषु पुरुषमनसोऽपहरणात् चक्षुराद्याः प्राणा हरय ईरिताः। तेषु वर्तत इति वा, उक्तरीत्या हरिशब्दवाच्यान् प्राणान् विषयान् प्रति वर्तयेद् गमयेत् यापयेदिति यावदिति वा विष्णुः हरिवाः। तथा च हे हरिवः!

इन्द्र ! नो, ब्रह्माणि = स्तुतिवाक्यानि प्रति, स्वीकर्तुमिति यावत् तूतुजानः= तुजधातुर्गत्यर्थः। भृशं गतिमान्, अत्यन्तवेगवान् सन्निति यावत् । उपायाहि= आगत्य च सुते कण्डिते नोऽस्मदीये सोमे च नो मनो दधिश्व = धत्स्व। अस्मदीयं सोमं पातुमिच्छेति यावदित्यर्थः ॥६॥

(ऋम.-२५)

ओमासश्चर्षणीधृतो विश्वे देवास आ गत ।
दाश्वांसो दाशुषः सुतम् ॥ ७ ॥

(ऋगर्थोद्धारः) - ओमास इति ॥ आ उमास इत्यत्र गुणे ओमास इति भवति । तत्र आ इत्यस्य समन्तादित्यर्थः । उ इति निपात ऊरीकरणे वर्तते । तथा च आ = समन्तात् सर्वविषयतयोरीकृताः । स्वीकृता माः प्रमा यैस्ते ओमासः, सर्वविषयकज्ञानवन्त इति यावत् । इदं च परमेश्वरे मुख्यं सर्वदेवेष्वमुख्यम् । यद्वा, ॐशब्दसमानार्थक ओशब्दः । तथा च 'ओतमस्मिन् जगद् यस्माद् ओमित्युक्तो हरिः सदा' इति वचनात् जगत्प्रवेशाधिकरणत्वमोङ्कारस्यार्थः । स एव ओशब्दस्यापि । एवं च जगत्प्रवेशाधिकरणतया ओनामकेन विष्णुना माः मिता निर्मिताः सृष्टा इति ओमाः । 'मा निर्माणे' इति धातोः । इदं च व्याख्यानं देवतान्तरविषयमेव। अथवा, मानेषु प्रमाणेषु प्रतिपाद्यतया ओताः प्रविष्टा इति ओमाः । उपसर्जनस्य परनिपातः । ओताः प्रविष्टाः माः प्रमाः येषु प्रतिपादकतया ओताः प्रविष्टाः इति वा ओमाः । पूर्व मासु ओता ओमा इति विग्रहः । इदानीं तु ओताः माः एष्विति विग्रह इति भेदः । हे ओमासः 'आज्जसेरसुक्' (पा.सू.७-१-५०) चर्षणीधृतः = चर्षणीनां प्रजानां धर्तारः दाश्वांसः = भक्ताभीष्टदातारो विश्वे देवासः = भगवद्रूपविशेषाः । देवाश्च प्रेरकतया सर्वत्र प्रविष्टत्वाद् विश्वे इत्युच्यन्ते । 'विश प्रवेशने' इति धातोः । देवतापक्षे सर्वशब्दपर्यायो

विश्वशब्दः । विश्वेदेवाः = सर्वे देवाः । यद्वा, विशः प्रजाः वान्ति गमयन्ति प्रवर्तयन्ति जानन्तीति वा विश्वे । ते च ते देवासः देवाः दाशुषः = दातुर्यजमानस्य सुतं = सोमम् प्रति आगत । अन्यदेवतापक्षे दाश्वांस इत्येतत् 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतेर्भगवन्तं प्रति यजमाना यज्ञं कुर्वाणा इत्यपि व्याख्येयम् ॥ ७ ॥

(ऋम.-२६)

विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः ।
उस्रा इव स्वसराणि ॥ ८ ॥

(ऋगर्थोद्धारः) - विश्वे देवास इति ॥ हे अप्तुरः = अप्शब्दः कर्मवाची। तुर त्वरणे । कर्मकरणविषये वेगवन्तो विश्वेदेवाः स्वसराणि = दिनानि प्रति, उस्राः = सूर्यरश्मय इव, यथा सूर्योदये जातेऽह्नि सूर्यरश्मयस्त्वरिता आयान्ति तद्वत् । तूर्णयः = त्वरिताः सन्तोऽस्मदीयं सुतं = सोमं प्रति, आगन्त = आगच्छतेति ॥ ८ ॥

(ऋम.-२७)

विश्वे देवासो अस्रिध एहिमायासो अद्रुहः ।
मेधं जुषन्त वह्नयः ॥ ९ ॥

(ऋगर्थोद्धारः)- विश्वेदेवासो अस्रिध इति ॥ हे अस्रिधः = स्रिधुर्हिंसार्थः । न विद्यते स्रिध् हिंसा येषां तेऽस्रिधः = अहिंस्याः । इदं च भगवत्येव मुख्यम् । संसार एव हिंसायाः सम्भवेन भगवद्रूपाणां तदभावात् । देवतापक्षे तु - मोक्षे तेषामहिंस्यत्वस्य नियतत्वादिदानीमुपचरितममरत्ववदिति द्रष्टव्यम् । एहिमायासः = आइत्यत्र गुणे सति ए इति जातमस्ति । तत्र आ इत्यस्य समन्तादित्यर्थः । सर्वविषयेति यावत् । [1]'इकारेणोच्यते

१. 'इकारेण' इत्यारभ्य 'स्वतन्त्र इति यावत्' इत्यन्तभागः 'क' मातृकायां न दृश्यते।

कामः' इति वचनात् 'इषु इच्छायां' इति धातोश्च कर्मणि डिप्रत्यये सति निष्पन्नस्य इकारस्य यथेष्टेत्यर्थः । स्वतन्त्र इति यावत् । हिशब्दः प्रसिद्धवाचित्वान्निश्चितार्थः । 'माया वयुनं ज्ञानमभिख्या' इति प्रज्ञानामसु पाठान्मायाशब्दो ज्ञानार्थः । तथा च सर्वविषयकस्वतन्त्र-निश्चितज्ञाना इत्यर्थः । अद्रुहः = ध्रुक् क्लेशार्थः । न विद्यते ध्रुक् क्लेशो येषां तेऽद्रुहः वह्नयः= 'वह प्रवर्तने' इति धातोर्जगतो वहनात् प्रवर्तनात्, प्रवर्तकत्वादिति यावत् । वह्निशब्दवाच्याः विश्वेदेवाः मेधं = यज्ञं, जुषन्त जुषत, सेवध्वम् इत्यर्थः ॥ ९ ॥

(ऋ.म.-२८)

पावका नः सरस्वती वाजेभिर्वाजिनीवती ।

यज्ञं वष्टु धियावसुः ॥१०॥

(ऋगर्थोद्धारः)-पावका न इति ॥ पावकाः=[1]समस्तभक्तपापशोधकाः। 'पव शुद्धौ' इति धातोः । सरस्वती = प्रसिद्धसरस्वतीपक्षे इत्थं व्याख्येयम् । तथा हि । 'सृ गतौ' सरणात्, सर्वत्र गमनात्, सर्वगतत्वादिति यावत् । सरः। यद्वा, 'सृ गतौ' गत्यर्थानामवगत्यर्थत्वात् सर्वविषयकज्ञानवत्त्वात् सरः । अथवा, 'रसः सारो वरश्चेति शब्दाः पर्यायवाचकाः' इति वचनाद् रसेन सारेण, बलेनेति यावत् । सहितः सरसः बलवानित्यर्थः । अत्रान्त्यसकार-स्थाकारलोपो मन्तव्यः । अन्यथा सरसवन्तीति स्यात् । यद्वा, 'रमु क्रिडायां' इति धातोः असुन् प्रत्ययो डिच्च । तथा च रसा रत्या सुखेन सह वर्तत इति सरः । एवं सरसशब्दाभिधेयो हरिरस्याः वेदाभिमानिन्याः सरस्वत्या वाच्यतया विद्यत इति सरस्वती । एतादृशहरिवाचकत्वाद् [2]वेदाभिमानिनी ब्रह्माणी

---

१. समस्तभक्त्याऽपशोधकाः' इति 'क' 'ख' मातृकागतः पाठः ।

२. 'वेदाभिमानी' इति 'क' पाठः ।

सरस्वतीत्युच्यत इति यावत् । उक्तनिर्वचनेन हरिः सरः तद्वत्त्वात् तत्प्रियत्वाद् ब्रह्मा सरस्वान्, तद्वतीति तद्भार्येति वा ब्रह्माणी सरस्वती ।

ननु तर्हि सरस्वद्वतीति स्यादिति चेन्न । पुमाख्ये च पुंयोगात् स्त्रियां वर्तते । सरस्वच्छब्दस्यैव तत्स्त्रीवाचकत्वाङ्गीकारात् । तथा च पुंयोगाख्यायामित्यनेन ङीपि सरस्वतीति युक्तम् । भगवत्पक्षे तु - पूर्वोक्तनिरुक्तिभिरेव हरेर्गुणाः सरस्शब्दवाच्याः । गुणानां भगवदभिन्नत्वेन तद्धर्माणां गुणेष्वप्युपपत्तेः । तद्वत्त्वाद् भगवान् सरस्वतीत्युच्यते । यद्वा, उक्तनिरुक्त्यैव गुणाः सरस्शब्दवाच्याः । त एव स्वं धनं सरस्वं तेन ततत्वाद् व्याप्तत्वात् तः । ततः सरस्वतशब्दात् स्त्रियाम् ईकारो तकारस्थाकारलोपे सरस्वतीति भगवानुच्यते । स्त्रीरूपत्वाद् भगवतः स्त्रीलिङ्गशब्दवाच्यत्व-मुपपन्नमित्यवगन्तव्यम् । वाजिनीवती= वाजमन्नं तदेव वाजि । 'तृतीयोऽतिशये' । वृष्ट्यादिना तन्नयतीति वाजिनीः सूर्यः। 'णीञ् प्रापणे' । यद्वा, वाजमन्नं तस्येनो वाजेनः । स एव वर्णागमादिना वाजिनी । अथवा वाजिनामश्वानाम् अन्नं तद्वती वा इनाः स्वामीति वर्णागमादिना वाजिनीः। अथवा वाजिनामश्वानाम् इनानि स्वामिभूतानि सप्तच्छन्दांसि, तदभिमानि-दैवतानीति यावत् । वाजीनानि तान्येव शकन्ध्वादित्वात् पररूपेण वाजिनानीत्युच्यन्ते । अश्वरूपाणि सप्तच्छन्दांसि अस्य नियम्यतया सन्ति, तेषां स्वामीति यावत् । वाजिनीः सूर्यः । अत्र मत्वर्थे इकारो द्रष्टव्यः । सः अस्याः विष्ण्वाख्यायाः प्रसिद्धायाश्च सरस्वत्याः पुत्रतया वर्तत इत्येवं तद्वत्त्वाद् वाजिनीवती । भगवान् सरस्वती चेत्यर्थः । यद्वा, वाजं युद्धं ज्ञानसाधनीभूतं वागादीति यावत् । वाचो वादकथारूपयुद्धकारणत्वात् तदस्याः वाचोऽपि विद्यते साध्यतयेति वा वाजमन्नं तदस्यास्तीति वा वाजिनीशब्देन वागभिमानिन्युमोच्यते । सा अस्याः विष्ण्वाख्यायाः

प्रसिद्धायाश्च सरस्वत्याः पुत्रत्वेन वर्तत इति वाजिनीवती । धियावसुः= धिया सहैव वसति न कदाऽपि तां विनेति धियावसुः । वसेरुकारः, तेन सहार्थे तृतीयायाः समासः । तस्याः अलुक् च । नित्यबोधेति यावत् । एवंविधा सरस्वती नोऽस्माकं यज्ञं बाह्यं वाजेभिः वाजैरशनैः, अशनं दत्वेति यावत् । वष्टु = वहतु प्रवर्तयतु । अध्यात्मं- ज्ञानयज्ञं वाजेभिर्ज्ञान-साधनीभूतैर्वादादियुद्धैश्च ज्ञानं दत्वेति यावत् । वष्टु = वहतु प्रवर्तयत्वित्यर्थः ॥ १० ॥

(ऋम-२९)

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥ ११ ॥

(ऋगर्थोद्धारः) - चोदयित्रीति ॥ सूनृतानां = सुवाचां, चोदयित्री = सदा प्रेरका, सुमतीनां = सुबुद्धीनां, द्वितीयार्थे षष्ठी । सुबुद्धीन् चेतन्ती = स्वातन्त्र्येण सुबुद्धीनां ज्ञापिका, जनिकेति यावत् । स्वातन्त्र्यस्नेहयोः अन्तर्णीतणिजिति स्मरणात् । एवम्भूता सरस्वती यज्ञं दधे = वाग्बुद्धि-प्रवर्तकत्वेन यज्ञादिधारणी, वाग्बुद्धिमूलकत्वात् सर्वकर्मणामित्यर्थः ॥११॥

(ऋम-३०)

महो अर्णः सरस्वती प्रचेतयति केतुना ।
धियो विश्वा विराजति ॥ १२ ॥ ६ ॥ ३ ॥ १ ॥

(ऋगर्थोद्धारः) - महो अर्णः सरस्वतीति ॥ सरस्वती तेजस्वान्महत्त्वाच्च महः । 'णो हि निर्वृतिवाचकः' इति वचनात् । अरमलं णः आनन्दत्वादर्णः परं ब्रह्म, केतुना = ज्ञानेन, प्रचेतयति = भक्तेभ्यो महत्तरं ज्ञानं दत्वा महत्तरं परब्रह्मविषयीकरणरूपं सामर्थ्यं दत्वेति यावत् । ज्ञापयति महत्तरं

परब्रह्मविषयीकारिज्ञानं जनयतीत्यर्थः । इदं तु देवतान्तरविषयम् । भगवद्विषये तु, सरस्वती भगवान् स्वयमेवोक्तरीत्या महो अर्णः स्वकीयं स्वरूपं केतुना= ज्ञानेन महत्तरस्वविषयीकरणसामर्थ्यं दत्वेति यावत् । प्रचेतयति = प्रकाशयेत् । भक्तानां प्रदर्शयेदित्यर्थः । एवंविधा सरस्वती भगवान् अन्या च, परब्रह्मज्ञानदानेन भक्तानां, विश्वा = समस्ताः, धियः बुद्धीः विराजति= विराजयति । भगवद्विषयकज्ञानवती हि बुद्धिर्विराजत इति लोके प्रसिद्धत्वाद् इत्यर्थः ॥ १२ ॥

ऐन्द्रं सूक्तम् -४

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । गायत्री ।

(ऋम-३१)

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यविं द्यवि ॥ १ ॥

(ऋगर्थोद्धारः) - सुरूपकृत्नुमिति ॥ दशर्चमिदमैन्द्रं सूक्तम् । अत्र यद्यप्याद्ये तृचे इन्द्रवाचकपदं नास्ति । तथाऽपि 'अनादेशे त्विन्द्रो देवता' इति परिभाषायाम् उक्तत्वाद् आद्ये तृचेऽपीन्द्र एव देवतेति ज्ञातव्यम् । वयं द्यवि द्यवि = दिने दिने, गोदुहे = गां दोग्धीति गोधुक् तदर्थं, तस्येति यावत् । दोहायेति शेषः । गोदोहनेन क्षीराद्यपेक्षिपुरुषनिमित्तं क्षीरादिदोहाय सुदुघां = सुष्ठु दोग्धीति सुदुघा कामधेनुस्तामाह्वयन्ति । एवं भगवद्भक्तस्य यजमानस्य, ऊतये = अभिप्रेतार्थसिद्धये त्राणाय वा सुरूपकृत्नुम् = भक्तानां मुक्तौ साधुरूपाणां कर्तारं विष्णुमिन्द्रं च जुहूमसि = आह्वयामः ॥ १ ॥

(ऋम-३२)

उप नः सवनाऽऽगहि सोमस्य सोमपाः पिब ।
गोदा इद्रेवतो मदः ॥ २ ॥

(ऋगर्थोद्धारः) - उपन इति ॥ हे सोमपाः = इन्द्र ! यो भवान् रेवतः इत्= अध्यात्मज्ञानाख्यरयियुक्तस्य [1]भगवद्भक्तस्यैव, गोदाः = अधिकज्ञान-प्रदः, मदः = सुखकारी च, बहिरपि, रेवतः = त्वत्पूजार्थं गोहिरण्यादिमतो यजमानस्यैव, मदः = सुखकारी च। स त्वं नोऽस्माकं सोमस्य, सवना = सवनानि, उपागहि = सोमकण्डनाधिकरणेषु प्रातःसवनादिष्वागच्छेति यावत् ॥ आगत्य च सोमं पिब ॥ २ ॥

(ऋम-३३)

अथा ते अन्तमानां विद्याम सुमतीनां।
मानो अति ख्य आ गहि ॥ ३ ॥

(ऋगर्थोद्धारः) - अथात इति ॥ यस्मात् त्वं ज्ञानादिरयिमतोऽभि-प्रेतार्थदायी, अथ = तस्माद् वयम्, अन्तमानां = अन्ते उत्तमोत्तमगणस्यान्ते, उत्तमोत्तमत्वेन इति यावत्। मानां = मितानां प्रमितानां, ते= तव, सुमतीनां= त्वद्विषयकत्वेन शोभमानानां मतीनाम् । षष्ठी द्वितीयार्थे । अन्तमाः सुमतीः विद्याम= लभेमहि। त्वं च नोऽस्मान्, अति= अतीत्य, अन्यान् अस्मद्वैरिणः, मा ख्यः = मा पश्य। करुणार्द्रदृशा सदाऽस्मान् अवपश्य। अस्मद्वैरिणस्तु क्रूरदृष्ट्या पश्येत्यभिप्रायः। आगहि = आगच्छ च ॥३॥

(ऋम-३४)

परे हि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्।
यस्ते सखिभ्य आवरम् ॥ ४ ॥

(ऋगर्थोद्धारः) - परे हीति ॥ अत्र [2]परेत्यस्य न इहीति क्रियया

---

१. 'भक्तस्यैव' घ.।

२. 'परेत्यस्य न न इहीति' इति 'क' मातृकागतः पाठः प्रामादिकः।

सम्बन्धः। तथात्वे 'परेहि मृत्योर्गृहान्' इत्यादाविव मरणार्थत्वप्रतीत्या प्रकृतासङ्गतेः। किं नाम ? वर्तस इत्यध्याहृतक्रिययैव। तथा च 'हे मनः' इति शेषः। हे मदीयं मनः ! यद्यपि त्वमिन्द्रात् परा = दूरे वर्तसे। तद्ग्रहणासमर्थमिति यावत्। अथवा, परमेश्वरः त्वत्तः परा = दूरे वर्तते। त्वद्विषयो न भवति। तथाऽपि विग्रं= वीत्युपसर्गो नञर्थे। 'ग्रह उपादाने' कर्मणि डः। मनआदीन्द्रियाणामग्राह्यम्। अस्तृतं = अच्छिन्नम् अनष्टं चतुर्विधनाशशून्यं, विपश्चितं = विपा = व्याप्ता बहुविषयिणी चित् यस्यासौ विपश्चित् तं, य इन्द्रः ते तव, सखिभ्यः = उपकारकतया सखिभूतेभ्यः तत्त्वाभिमानिदेवेभ्यः आवरं नित्यमुत्तमः त्वम् इन्द्रं परमेश्वरं, इहि = 'इण् गतौ' गच्छ। शरणं याहि अवगच्छ वा। तदर्थं गुरून् पृच्छ। गुरुसमीपं गत्वा श्रवणादिना मम तज्ज्ञानसम्पादने साधनं भवेत्याशयः ॥ ४ ॥

(ऋम-३५)

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत।
दधाना इन्द्र इद्दुवः ॥ ५ ॥ ७ ॥

(ऋगर्थोद्धारः) - उत ब्रुवन्तु नो निद इति ॥ ये निदः = सृष्ट्यादौ परमेश्वरस्य समीप एव वर्तमानाः ब्रह्मादयो देवाः, ते उत = तेऽपि, नः = अस्मान् प्रति, ब्रुवन्तु = परमेश्वरस्वरूपं यथावद् व्याकुर्वन्तु। 'अन्यतः' इति वक्ष्यमाणसमुच्चायक उतशब्दः। अन्यतः = स्थानान्तरतः। संसारहेतोरज्ञानत इति यावत्। निः = निर्गत्यैव तं परमेश्वरं, आरत = प्रापुः, जीवन्मुक्तास्तेऽपि ब्रुवन्तु। ये च इन्द्र इत् = परमेश्वर एव, दुवः = विषयभोगान् जीवाय दुहन्तीति व्युत्पत्त्या दुवः प्राणाः तान् मनआदीन्द्रियाणीति यावत्। दधाना वर्तन्ते। तत्प्राप्त्यर्थं तमुपासत इति यावत्। तेऽपि नः परमेश्वरं ब्रुवन्त्वित्यर्थः ॥ ५ ॥ ७ ॥

(ऋम-३६)

उत नः॑ सुभगाँ॑ अरिर्वोचेयुर्दस्म कृष्टयः॑ ।

स्यामेदिन्द्रस्य शर्मणि ॥ ६ ॥

(ऋगर्थोद्धारः) - उत न इति ॥ हे [1]दस्म = दशयतिः भेदनार्थः । ततः कर्तरि मप्रत्ययः । शत्रुभेदिन् ! शत्रूणां हन्तरिति यावत् । अरिरुत = अरयोऽपि, कृष्टयः = प्रजाः, अस्मद्वैरिणोऽपि जना इति यावत् । नः = अस्मान्, सुभगान् सदा वोचेयुः वदेयुः । किञ्च, वयम् इन्द्रस्य तव, अनुग्रहे सतीति शेषः । शर्मणि = सुखे, स्याम इत् = स्यामैव । त्वदनुग्रहेण सुखिनो भवामैवेत्यर्थः ॥ ६ ॥

(ऋम.-३७)

एमाशुमाशवे॑ भर यज्ञश्रियं॑ नृमादनम् ।

पतयन्मन्दयत्सखम् ॥ ७ ॥

(ऋगर्थोद्धारः) - आ ईम् आशुमिति पदच्छेदः । विशब्दो वीर्यवाची । आशु वीर्यं यस्यासौ आशुविः, तस्य सम्बुद्धिः हे आशवे = क्षिप्रकारिसामर्थ्य आशुं = द्रवद्रव्यत्वाद् वेगवन्तं, यज्ञश्रियं = यज्ञभूषणं, नृमादनं = नृणां कृतपानानां पुंसां मादनं मदो हर्षस्तत्कारिणं, पतयत् = उत्पतयन्तं, हर्षमुत्पाद्योत्पतनादिव्यापारहेतुं, मन्दयत्सखं = मन्दयति मन्दबलं करोति सखायमिति मन्दयत्सखः तम् । यः सोमं पिबति तत्सखीनां मन्दत्वहेतुं, कृतपानानां धावमानानां धावनादौ बलवत्तया अकृतपानेभ्यः पुरोगमनादिति भावः । पुनःकीदृशं ? ई = एव । तवेत्यध्याहृतेनास्य सम्बन्धः । तवैव अधीनमित्यर्थः । एतादृशं सोमम् आभर = स्वोदर इति शेषः । स्वीकुरु पिबेति यावत् ।

---

१. 'देहस्ये' इति क ।

अध्यात्मं तु - चञ्चलत्वादाशुं भक्त्याद्युद्रेकेण नृमादनं मदं उत्पाद्य उत्पतनादिहेतुत्वात् पतयत् अकृतमनस्विभ्यः कृतमनस्विनामान्तरकार्ये ज्ञानादौ पुरोगमनात् मन्दयत्सखं ज्ञानयज्ञालङ्कारत्वाद् यज्ञश्रियम् ई त्वदधीनमेव । एतादृशं सोमं, मनः स्वोदरे आभर त्वद्विषयकतया साध्विदमिति स्वीकुर्वित्याशयः ॥ ७ ॥

(ऋम-३८)

अस्य पीत्वा श॑तक्रतो घनो वृत्राणा॑मभवः ।

प्रावो वाजे॑षु वाजिनम् ॥ ८ ॥

(ऋगर्थोद्धारः) - अस्य पीत्वेति ॥ हे शतक्रतो ! = शतमिति अपरिमितनाम, क्रतुर्ज्ञानम् । तथा च पूर्णज्ञान ! त्वम् अस्य = एनं सोमं पीत्वा वृत्राणां = सर्वजीवावरणाद् वृत्रशब्दवाच्यानामज्ञानानां, घनः = अभेद्योऽभवः । अज्ञानकर्तृकं यद्भेदनं प्रतिहतिरिति यावत् । तद्विषयो नाभूः । अज्ञानानावृतोऽभूरिति यावत् ।

ननु परमेश्वरस्य सोमपानोत्पन्नया शक्त्याऽ[1]ज्ञानाप्रतिहतिः कथमुच्यते ? प्रमाणविरोधादिति चेत् । उच्यते । येषां सोमः परमेश्वरेण पीतस्तेषु यज्ञोदितभगवत्प्रसादान्मुक्तेषु सत्सु तेषु परमेश्वरोऽज्ञानं न सहतेऽतः सोमं पीत्वा तेषामज्ञानाभेद्यताकारित्वात् त्वं वृत्राणां घनोऽभव इत्युच्यते तदधीनत्वादिति न्यायादिति द्रष्टव्यम् । किञ्च [2]वाजिनं = अन्नवन्तमन्नदातारं, नान्नदानमात्रेणेश्वरो रक्षतीत्यतो भक्तं ज्ञानिनं चेति शेषः कार्यः । नरं वाजेषु= अन्नेषु सर्वभोगेषु, तद्विषये तान् दत्वेति यावत् । प्रावः = अरक्षः । अथवा, वाजिनं = योद्धारं, वाजेषु = युद्धेषु प्राव इत्यर्थः ॥ ८ ॥

---

१. 'अज्ञानप्रतिहृतिः' इति 'ग' । २. 'वाजिर्यः' इति 'क' 'ख' पाठः ।

(ऋम-३९)

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।
धनानामिन्द्र सातये ॥ ९ ॥

(ऋगर्थोद्धारः) - तं त्वेति ॥ हे शतक्रतो = इन्द्र ! तं त्वा = एवमुक्तगुणवन्तं, वाजिनं = योद्धारं त्वां, धनानां सातये = [1]बाह्ये प्रसिद्धधनानां लब्धये अध्यात्मज्ञानादिलब्धये, वाजेषु = युद्धेषु बाह्यैररिभिः अज्ञानाद्यरिभिश्च सह, वाजयामः = योधयामः । अस्मदर्थे त्वमेव अस्मदरिभिः युद्धं कृत्वा धनादिकं देहीति तात्पर्यार्थः ॥ ९ ॥

(ऋम-४०)

यो रायो३ऽवनिर्महान् सुपारः सुन्वतः सखा ।
तस्मा इन्द्राय गायत ॥ १० ॥ ८ ॥ ४ ॥

(ऋगर्थोद्धारः) - यो रायोऽवनिरिति ॥ 'हे उद्गातारः' इति शेषः । इन्द्रः, रायः = रयिशब्दस्य षष्ठीयम् । अशेषद्रविणस्य, अवनिः = अवनिरिति पृथिवीनाम । अवनिरिवावनिराश्रयः । अशेषेति कम्पार्थः । यद्वाऽवनिरैश्वर्यार्थः प्राप्त्यर्थश्च । तथा चाशेषद्रविणस्यावनिरीश्वरः स्वामी । अशेष-द्रविणस्यावनिः अवाप्ताशेषद्रव्यप्राप्तिमान् इत्यर्थः । महान् = उत्तमः सुपारः= सुखदत्वात् सुः । संसृतेः पारदत्वात् पारः । सुश्चासौ पारश्चेति सुपारः । सुन्वतः यजमानस्य सखा, तस्मा इन्द्राय = तदुद्देशेनेति यावत् । गायत । सामेति शेषः । यद्वा हे ऋत्विज इत्यध्याहारः । य इन्द्रो रायोऽव-नित्वादिगुणवान् तस्मै तदर्थं गायत = 'गै शब्दे' स्तुतिरूपान् शब्दान् कुरुतेत्यर्थः ॥ १० ॥ ८ ॥ ४ ॥

१. 'बाह्ये' इत्यारभ्य 'युद्धेषु' इत्यन्तोभागः 'ग' मातृकायां न दृश्यते ।

ऐन्द्रं सूक्तम् -५

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । गायत्री ।

(ऋम-४१)

आत्वेता निषीदतेन्द्रमभि प्र गायत ।
सखायः स्तोमवाहसः ॥ १ ॥

(ऋगर्थोद्धारः)- आत्वेतेति ॥ दशर्चमैन्द्रं सूक्तम् । आतू आ इतेति पदच्छेदः । हे सखायः ! स्तोमवाहसः = स्तोमाः सामविशेषाः तान् वहन्ति गानार्थं धारयन्तीति स्तोमवाहसः, अकारान्तात् सोमवाहशब्दाज्जसि असुगागमे सवर्णदीर्घे सस्य रुत्वे विसर्गे च सति स्तोमवाहास इति वक्तव्यम् । वाहस इति ह्रस्वश्छान्दस इति द्रष्टव्यम् । उद्गातार इति यावत् । तु = विशेषेण, शीघ्रमिति यावत् । आ + इत = एत = आगच्छत । आगत्य च, तु = विशेषेण, सावधानतयेति यावत् । आ निषीदत = उपविशत । उपविष्टाः सन्तः इन्द्रम् अभिप्रगायत चेत्यर्थः॥ १॥

(ऋम-४२)

पुरुतमं पुरूणामीशानं वार्याणाम् ।
इन्द्रं सोमे सचा सुते ॥ २ ॥

(ऋगर्थोद्धारः) - पुरुतममिति ॥ हे उद्गातारः ! पुरूणां = सुपूर्णानां मध्ये पुरुतमं = पूर्णतमम् । पुरूणां पुरुमिति निर्धारणेनैवोक्त[1]पूर्णत्वलाभात् तमब् व्यर्थः । तथाऽपि छान्दस इत्यदोषः । वार्याणां = वरणीयानाम् उपा-देयानां वसूनाम् ईशानं = अधीश्वरम् । यद्वा, पुरूणाम् इत्येतद् वार्याणा-मित्यस्य विशेषणम् । तथा च योग्यतानुसारेण पूर्णानां वार्याणां= ब्रह्मा-

१. 'अतिपूर्णत्वलाभात्' इति 'घ'

दीनाम् ईशानं पुरुतमं = 'तमु अभिकाङ्क्षायां' पुरुभिः ब्रह्मादिभिः तम्यतेऽभिकाङ्क्ष्यते इति पुरुतमम् इन्द्रं सोमे सुते सति = सोमकण्डनानन्तरमिति यावत्। सचा = सुखेनैव, मनःप्रसादपूर्वकं [1]गायत इति सम्बन्धः ॥ २ ॥ ७ ॥

(ऋम-४३)

स घा नो योग आ भुवत्स राये स पुरन्ध्याम्।
गमद्वाजेभिरा स नः ॥ ३ ॥

(ऋगर्थोद्धारः)- स घा नो योग इति ॥ घशब्दोऽवधारणे। सघः = स एव भगवान्, नः = अस्माकं, योगे= तादर्थ्ये सप्तमी। आ= समन्ताद् योगे= योगार्थं सायुज्यलक्षणमुक्त्यर्थं भुवत् = अभवत्। तत्प्रसादो भवेदित्यर्थः। स एव च राये = वित्ताय अध्यात्मं ज्ञानविषयवित्ताय च भुवत्। स एव पुरन्ध्यां = पुरं शरीरं धीयतेऽस्याम्। अनया प्रवर्तत इति यावत्। इति पुरन्धिः बुद्धिः। तस्यां भवेत् = तत्रगो भवेत्, तद्विषयो भवेदित्यर्थः। यद्वा, 'पुरन्धिर्योषित्याह' इति श्रुतेः पुरन्धिशब्दः पत्नीवाची। तथा च पुरन्ध्यां, तादर्थ्ये सप्तमी, यज्ञाद्युपयुक्तपत्न्यर्थं भुवत् = तत्सम्पादको भवेदित्यर्थः। किञ्च, सः = इन्द्रो वाजेभिः = वाजैः अन्नैः सह, अन्नानि दातुमिति यावत्। नोऽस्मान् प्रति आगमत् = आव्रजेदित्यर्थः ॥ ३ ॥

(ऋम-४४)

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः।
तस्मा इन्द्राय गायत ॥ ४ ॥

(ऋगर्थोद्धारः) - यस्य संस्थ इति ॥ यस्येन्द्रस्य संस्थे = सम्यक्

१. 'ज्ञायत' इति 'क' पाठः।

स्थितौ सत्याम्, यस्मिन्निन्द्रे रथे स्थिते सतीति यावत्। समत्सु = ज्ञानयुद्धेषु शत्रवः, हरी = अश्वौ, अश्वाग्रमिति यावत्। न वृण्वते = न प्राप्नुवन्ति। अश्वाग्रभागमपि स्प्रष्टुं न समर्था भवन्तीति यावत्। तस्मा इन्द्राय रथे स्वावस्थानेन हर्यग्रस्य शत्रप्राप्यतापादकाय गायतेत्यर्थः। अध्यात्मं तु - यस्य = इन्द्रस्य, संस्थे = सम्यक् स्थितौ सत्यां, यस्मिन् परमेश्वरे विशेषतो भक्तशरीरे सन्निहिते सति समत्सु = ज्ञानयुद्धेषु, शत्रवः = अज्ञानाद्याः, हरी = विषयान् प्रति इन्द्रियाणां हरणान्मनोबुद्धी हरिशब्दवाच्ये। तदग्रमपि न वृण्वते। मनोबुद्धी ना[illegible]नाद्यावृते भवत इति यावत्। तस्मा इन्द्राय गायत = तदुद्देशेन प्रवचनादिरूपान् शब्दान् कुरुतेत्यर्थः ॥

(ऋम-४५)

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये।
सोमासो दध्याशिरः ॥ ५ ॥

(ऋगर्थोद्धारः) - सुतपाव्न इति ॥ शुचयः = शुद्धाः, सुताः = अभिषुताः ये दध्याशिरः = एकवचनं बहुवचनार्थे। दध्याशिराः आशिरशब्दो मिश्रितार्थः। दध्ना विमिश्रिताः इमे सोमासः= सोमाः, वीतये= यजमानस्य इन्द्रप्राप्त्यर्थं, सुतपाव्ने= कण्डितसोमपानकर्त्रे इन्द्राय यन्ति= यान्ति।

अध्यात्मं तु- सुताः = वेदवाक्यसङ्घर्षवन्तः, शुचयः = रागादिविधुराः, दध्याशिरः= दधि परमेश्वरे धारणं, ध्यानमिति यावत्। तेन आशिरः युक्ताः सोमाः मनांसि सुतपाव्ने= वेदवाक्यसङ्घर्षणरूपकण्डनयुक्तमनोरूपसोमपानकर्त्रे। मनसा सेव्यायेति यावत्। इन्द्राय हरये, सदा यन्ति= विषयीकुर्वन्ति । किमर्थं ? वीतये= यजमानस्य हरिप्राप्तिरूपमोक्षार्थमिति ॥ ५ ॥

(ऋ.म-४६)

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः ।
इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥

(ऋगर्थोद्धारः)- त्वं सुतस्येति ॥ हे इन्द्र ! सुक्रतो = शुभज्ञान ! सद्यः= [1]समानेनेत्यर्थे समानशब्दस्य सादेशः । तस्माद् अह्नि अभिधेये द्यप्रत्ययः । तथा च सद्यः = समानेऽहनि वृद्धः । स्वसत्ताधिकरणीभूताहः- समानेऽह्नि वृद्धः । तथा च भगवत्सत्तावृद्धिश्च समानकालीना एक-कालीनेत्युक्तं भवति । भगवत्सत्ता च सार्वकालिकी । अतः तद्वृद्धिरपि तादृशी । एवं च सद्योवृद्धः= सदा पूर्ण इत्यर्थः । एतादृशः त्वं सुतस्य= सोमस्य पीतये= पानाय । यद्वा, 'वष्टि भागुरिरल्लोपम्' इति वचनात्, पीतये= अपीतये प्राप्तये यदजायथाः= अभिव्यक्तोऽभवः, तज्ज्यैष्ठ्याय= सावधारण-मेतत् । ज्यैष्ठ्याभिव्यक्त्यै । एवं सर्वदेवतापेक्षयाऽग्रतः सोमपानादिना सर्वदेवतापेक्षयाऽतिशयेन स्वकीयं ज्यैष्ठ्यं प्रकटयितुमेव क्षुधादेर्हेतोरिति ॥ ६ ॥

(ऋ.म-४७)

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः ।
शं ते सन्तु प्रचेतसे ॥ ७ ॥

(ऋगर्थोद्धारः) - आ त्वेति ॥ हे गिर्वणः = गीर्भिः वेदवाक्यैः वननीय भजनीय! यद्वा, गीर्भिः वृत इन्द्र प्रभो आशवः = द्रवद्रव्यत्वेन क्षिप्राः वेगवन्तः, सोमासः = सोमाः त्वा = त्वाम् आविशन्तु । त्वामाविष्टाश्च ते सुताः सोमाः प्रचेतसे = प्रकृष्टज्ञानवते, त्वदीयाय त्वद्भृत्याय यजमानाय।

[1]. 'सयः समानेनेत्यर्थे, इति 'क' पाठः।

चतुर्थी षष्ठ्यर्थे । तस्य शंसन्तु= सुखमुद्दिश्य सन्तु सुखकराः सन्तु । स्युरित्यर्थः ॥ ७ ॥

(ऋम.-४८)

त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो ।
त्वां वर्धन्तु नो गिरः ॥ ८ ॥

(ऋगर्थोद्धारः) - त्वां स्तोमा इति ॥ हे शतक्रतो ! प्रभो त्वां स्तोमाः = सामविशेषाः अवीवृधन् = व्यञ्जयन्ति स्म । एवम् ऋक्षु उक्था = उक्थानि, शस्त्रविशेषाः मन्त्रविशेषा इति यावत् । त्वामेवावीवृधन् । हि यस्मादेवंभूतस्त्वं तस्मान्नोऽस्माकमपि गिरः त्वां वर्धन्तु = वर्धयन्तु । णिचो लोपः । स्वातन्त्र्यादिमहागुणैर्युक्तं त्वामेवाधिकं यथा स्यात् तथा व्यञ्जयन्त्वित्यर्थः ॥ ८ ॥

(ऋम.-४९)

अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् ।
यस्मिन् विश्वानि पौंस्या ॥ ९ ॥

(ऋगर्थोद्धारः) -अक्षितोतिरिति ॥ यस्मिन् = इन्द्रे विश्वानि पौंस्या= पौंस्यानि पौरुषाणि, अखिलाः शक्तय इति यावत् । सन्ति सः अक्षितोतिः= अक्षिता पूर्णा ऊतिः अभिप्रायो यस्यासौ तथोक्तः । वाञ्छितस्याखिलस्य पूर्तिमान् इन्द्रः सहस्रिणं= सहस्रशब्दोऽनन्तवाची। फलशब्दस्य लोपः । तद्वन्तम् अनन्तफलवन्तम् अनन्तफलप्रदमिति यावत् । इमं वाजमन्नं तद्रूपं हविः सनेत् = अस्मत्तो लभताम् । अथवाऽऽत्मपूजार्थं वाजं सनेत् सनयेत् लम्बयेत् । अस्मभ्यं ददात्वित्यर्थः ॥ ९ ॥

(ऋम.-५०)

मा नो मर्ता अभि द्रुहन् तनूनामिन्द्र गिर्वणः ।
ईशानो यवया वधम् ॥ १० ॥ १० ॥ ५ ॥ ५ ॥

(**ऋगर्थोद्धारः) - मानो मर्ता इति** ॥ हे गिर्वणः इन्द्र ! मर्ताः = मर्त्याः नोऽस्माकं तनूनां = षष्ठी चतुर्थ्यर्थे । शरीरेभ्यः माभिद्रुहन् = द्रोग्धारः कथञ्चन मा स्युः । सांसारिकक्लेशाः मा स्युरिति यावत् । कथम् ? येन कारणेन त्वम् ईशानः = ईशोऽसि तेन कारणेन नोऽस्माकं वधं = मरणं यवय = मुक्तिप्रदानेन अपगमय अपाकुरु । यद्वा, मर्ताः नस्तनूनाम् अभिद्रुहन्= अस्मत्तनूनां मानुषेभ्यो विपत्तयो नैव स्युः । ईशानस्त्वं वधं यवय = प्रापय । दुर्जनैः क्रियमाणाद् उपद्रवाद् दैवाधीनं मरणमेव वरम् अतो दुर्जनकृतोपद्रवपरिहारं कुर्वित्याशयः ॥ १० ॥

सूक्तम् -६

मधुच्छन्दा वैश्वामित्रः ।१-३ इन्द्रः । ४,६,८-९ मरुतः ।
५,७ मरुत इन्द्रश्च । १० इन्द्रः । गायत्री ।

(ऋम.-५१)

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥ १ ॥

(ऋगर्थोद्धारः) - युञ्जन्तीति ॥ दशर्चमेतत् सूक्तम् । तत्र प्रथमा द्वितीया चतुर्थी मारुत्यः । तृतीयापञ्चम्यौ [1]चैन्द्रमारुत्यौ । शेषास्त्वैन्द्र्य इति विभागः । भगवत्पक्षे यस्मिन् विश्वानि पौंस्येत्युक्तानि वासुदेवस्य पौंस्यानि । अरुषं= अरुणं वर्णतः, तस्थुषः = स्थावरान् गिरीन्, परि =

१. 'चेन्द्रमारुत्यौ' इति 'घ'. ।

परितः, चरन्तं ब्रध्नं = वृद्धत्वेन ब्रध्नशब्दवाच्यं दिवाकरं सर्वदा युञ्जन्ति = नियुञ्जते प्रवर्तयन्ति । किञ्च, तैरेव पौंस्यैः निमित्तैः रोचना= रोचनानि दिवाकरभिन्नानि चन्द्रादीनि ज्योतींषि, त्रिविष्टपे रोचन्ते= दीप्यन्ते रोचयन्ति चान्यान् । ब्रह्मादिदेवतापक्षे तु - वासुदेवस्य पौंस्यानीति स्थाने ब्रह्मादयो देवा इति कर्तृतया वक्तव्यम् । योजना तु समानैव । सूर्यादि-स्थापकत्वं च तदुक्तमेषु ब्रह्मादिदेवेष्वमुख्यम् । तदवरेषु वरुणादिषु तु छत्रिन्यायेन लक्षणया मुख्यं प्रतिपत्तव्यम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥१॥

(ऋम.-५२)

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥ २ ॥

(ऋगर्थोद्धारः) - युञ्जन्त्यस्येति ॥ प्रकृता वासुदेवस्य स्वरूपभूताः शक्तयः, काम्या = काम्यौ भगवद्ध्यानाद्युपयुक्तत्वाद्यधिकगुणवत्त्वेन काम्यौ विपक्षसा = विशिष्टौ पक्षौ ययोस्तौ विपक्षसा, गौण्या वृत्त्या क्षिप्रतरौ, वेगवन्ताविति यावत् । शोणा = शंशब्दसमानार्थः शशब्दः । 'अण पण गतौ' शकारस्थस्य अकारस्य आकाररूपो वर्णविकारः । धात्वाकारस्य पूर्वरूपत्वम् । वर्णविकारस्यार्थः सर्वकालीनत्वं द्रष्टव्यम् । तथा च शं सुखं सदा अणौ प्राप्तौ शोणौ, धृष्णू = वियातौ वैयात्यप्राप्तौ अतिधाष्ट्योपेताविति यावत् । नृवाहसा = नॄन् प्रति भगवन्तं वहन्तौ । नृणां भगवद्ज्ञानापादके इति यावत् । अथवा, न रीयते इति नरं विष्णुं वहन्तौ विषयीकारिण्यौ, अस्य = एतदधीने हरी = विषयान्प्रति, इन्द्रियाणां हरणाद्धरिभक्तानां मनोबुद्धी, द्वितीयाद्विवचनमेतत् । रथे = भक्तानां शरीरे युञ्जन्ति = तान् भक्तान् भगवद्विषयकमनस्विनो भगवद्विषयक बुद्धिमतश्च कुर्वन्तीत्यर्थः ।

अथवा, ब्रह्माद्या देवाः काम्या = समीचीनगत्यादिरूपाधिकगुणवत्त्वेन काम्यौ। विपक्षसा = उक्तरीत्या क्षिप्रतरौ, शोणा = सुखप्राप्तिमन्तौ। यद्वा, शक्ररथनियुक्तानां सहस्राश्वानां मध्ये अग्रगामिनावश्वौ सर्वतः श्यामवर्णावपि मूर्धनि शोणत्वाल्लक्षणया शोणाशब्दोदितौ, धृष्णू = धाष्ट्र्ययुक्तौ नृवाहसा= नॄन् प्रति इन्द्रं वहन्तौ, यद्वा, नरं बहुकालं क्षयरहितत्वात् नरशब्दवाच्यं इन्द्रं वहन्तौ अस्येन्द्रस्य इन्द्राधीनौ हरी अग्रगामिनौ अश्वौ, द्वितीयाद्विवचनमेतत्। अस्य तस्यैवेन्द्रस्य रथे युञ्जन्तीत्यर्थः। यद्वा, ब्रह्माद्या देवाः काम्यत्वादिविशेषणविशिष्टौ हरी = स्वकीयमनोबुद्धी अस्य = जीवजातस्य रथे = देहे युञ्जन्ति = तत्प्रेरणाय प्रयुञ्जत इत्यर्थः ॥ २ ॥

(ऋम.-५३)

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः ॥ ३ ॥

(ऋगर्थोद्धारः) - केतुं कृण्वन् इति ॥ हे इन्द्र ईश्वर ! [1]मर्याः = बहुवचनमेकवचनार्थे। मर्यः मारकः त्वम् अकेतवे = अज्ञानिने। चतुर्थी षष्ठ्यर्थे। अज्ञस्य, केतुं = सज्ज्ञानं, कृण्वन् = कुर्वन्, अपेशसे = हेमरहिताय हेमवर्जितस्य पेशः हेम च कुर्वन्, तत्स्रापयन् सन् इति यावत्। उषद्भिः = 'वश कान्तौ' शकारस्य षकार आधिक्यार्थः। अधिककान्तिमद्भिः, सम्प्रकाशमानैरिति यावत्। पौंस्यैः [2]शक्तिमद्भिः सह समजायथाः = यज्ञे व्यक्ततामगाः। न केवलं त्वं, किन्तु मर्याः मरणवन्तो देवा अप्येवम् अकेतवे केतुम् अपेशसे अपेशश्च कृण्वन्, एकवचनं बहुवचनार्थे। कुर्वन्तः सन्तः स्वसामर्थ्यैः सह समजायन्त प्रकटा अभूवन् इति ॥ ३ ॥

१.'मर्त्याः' इति 'क' पाठः। २. 'शक्तिभिः' इति 'क'.।

(ऋम.-५४)

आदह स्वधामनु पुनर्गर्भत्वमेरिरे।
दधाना नाम यज्ञियम् ॥ ४ ॥

(ऋगर्थोद्धारः) - आदहेति ॥ आत् अहेति पदच्छेदः। यज्ञियं = यज्ञे भवं यज्ञकाण्डे वाच्यं नाम दधानाः परमेश्वरस्य शक्तयः। आत् = अकारशब्दवाच्याद् विष्णोः निमित्ता, स्वेच्छयेति यावत्। अह = तदेव यज्ञे त्वं व्यक्त्यनन्तरमेव हविरादिकं गृहीत्वा स्वधामनु = सुखम् अनु सुखमन्वेव न तु भयेन, पुनगर्भत्वं गूडत्वम् आ = सम्यक्, ईरिरे = आपिरे प्राप्ताः। सर्वदेवतापक्षे - यज्ञियं नाम दधानाः ब्रह्माद्या देवाः, आत् = हरीच्छानुसारेण, अह = तदैव यज्ञे व्यक्त्यनन्तरमेव हविरादिकं गृहीत्वा स्वधामनु पुनर्गर्भत्वम् [1]एरिरे इति योज्यम् ॥ ४ ॥

(ऋम-५५)

वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः।
अविन्द उस्रिया अनु ॥ ५ ॥ ११ ॥

(ऋगर्थोद्धारः) - वीळुचिदिति ॥ हे इन्द्र ! गुहाचित् = हृदयगुहायां संस्थितोऽपि लोकानां गूढत्वेन अवस्थितोऽपि सन् त्वं वीळु = दृढं चित् अपि दृढमपि ब्रह्माण्डादिकं आरुजत्नुभिः = आरुजद्भिः [2]रुजो भङ्गे संहरद्भिः वह्निभिः = अखिललोकं वहद्भिः पौंस्यैः स्वसामर्थ्यैः सह उस्रियाः = प्रकाशत्वानि प्रकटत्वानि। नानाविधं प्राकट्यमनु स्वेच्छानुसारेण अविन्दः= लब्धवानसि। स्वप्रकाशो वर्तस इत्यर्थः। यद्वा वीळुचित् आरुजत्नुभिः वह्निभिः देवैः साकं त्वं गुहाचित् = हृदयगुहायां संस्थितो उस्रियाः =

१. 'ईरिरे' इति घ.। २.'ऋजोभङ्गे' इति 'ख' पाठः।

नानाविधानि प्रकटत्वानि अनु = आनुकूल्येन लब्धवानसि। हृद्गुहास्थितः त्वं स्वप्रकाशः तत्रत्याः [1]देवाश्च त्वदनुग्रहेण स्वप्रकाशाः सन्तीति फलितोऽर्थः ॥ ५ ॥

(ऋ.म-५६)

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः।
महामनूषत श्रुतम् ॥ ६ ॥

(ऋगर्थोद्धारः) - देवयन्त इति ॥ अच्छेति निपातः [2]सम्शब्दार्थे। अच्छा देवयन्तः = छान्दसो लिङ्गव्यत्यासः। दिव् क्रीडेत्यादित्यादिधातोः सम्यक् प्रकाशयन्त्यो गिरः = वेदरूपाः सुगिरः। अथवा देवयन्तः = हरिं प्रकाशयन्त्यः गृणन्तीति गिरः = स्तोतारो यथा = यथास्थितं निर्विकारं मतिं = ज्ञानं ज्ञानरूपं विदद्वसुं विदद्वित्तं लब्धवित्तं महां = महान्तं श्रुतं प्रसिद्धमिन्द्रम् अनूषत = [3]अस्तुवन् ॥ ६ ॥

(ऋ.म-५७)

इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा।
मन्दू समानवर्चसा ॥ ७ ॥

(ऋगर्थोद्धारः) - इन्द्रेणेति ॥ भगवत्पक्षे - मन्दू = कर्तरि उप्रत्ययः। मं मदं सुखं ददातीति मन्दुः शङ्करः पुरुहूतश्च, सुखात्मकत्वात् श्रीभूमी वा मन्दू। ततश्च मन्दू शङ्करपुरुहूतौ श्रीभूमी वा सन्दृक्षसे = परमेश्वरस्य सन्दर्शनाय साक्षात्काराय अबिभ्युषा = भयरहितेन समानवर्चसा = समानम् एकप्रकारं, निर्विकारमिति यावत्। वर्चस्तेजो यस्यासौ तथोक्तस्तेनेन्द्रेण

---

१. 'देवताः' इति 'ख' मातृकागतः पाठः। २. 'स्वशब्दार्थः' इति 'क'.।
३. 'अश्रवन्' इति 'घ' पाठः।

परमेश्वरेण सञ्जग्मानः = एकवचनं द्विवचनार्थे। सङ्गतौ बभूवतुः। मनसा सम्बद्धौ बभूवतुः। शङ्करः पुरुहूतश्च साक्षात्काराय तद्ध्यानादिकं चक्रतुः। श्रीभूमी तु शक्तिव्यक्तिरूपेण नवनवसुविशेषोपलम्भाय तद्ध्यानं चक्रतुरित्यर्थः।

प्रसिद्धेन्द्रविषये तु- मन्दू मन्दं सुखं तद्धेतुना द्यावापृथिव्यौ मन्दू मधु द्यौरस्तु नः पिता इति प्रयोगात्। सन्दृक्षसे = इन्द्रसाक्षात्काराय अबिभ्युषा समानवर्चसा प्रसिद्धेन्द्रेण सञ्जग्मानः मनसा सङ्गतौ, तद्ध्यानपरौ अभूतामित्यर्थः ॥ ७ ॥

(ऋ.म.-५८)

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति।
गणैरिन्द्रस्य काम्यैः ॥ ८ ॥

(ऋगर्थोद्धारः) - अनवद्यैरिति ॥ मखः मखाभिमानी पुरुहूतो अनवद्यैः = निर्दोषैः अभिद्युभिः = अभितो द्यौः प्रकाशो ज्ञानं येषां ते तथोक्तास्तैः महाज्ञानैरिन्द्रस्य = [1]महेन्द्रस्य काम्यैः = प्रियैः गणैः = देवतागणैः सह सहस्वत् = छान्दसो लिङ्गव्यत्ययः। सहस्वान्, सहो वायुः तद्वान् सन्। सहस्वद् यथा भवति तथेति वा। वायुना च सहेति यावत्। इन्द्रस्य= इन्द्रं परमेश्वरम् अर्चति। वायुः इन्द्रः सर्वे देवाश्च परमेश्वरमर्चन्तीत्युक्तं भवति। तेषां परमेश्वरार्चने सामर्थ्यद्योतनाय अनवद्यैरित्यादीनि त्रीणि हेतुगर्भविशेषणानि प्रयुक्तानीति ज्ञातव्यम्।

प्रसिद्धेन्द्रविषये तु - अनवद्यैरभिद्युभिरिन्द्रस्य काम्यैः ऋत्विग्गणैः क्रियमाणो मखो यज्ञः सहस्वत् बलवत्, अव्ययम्। अतिशयेन सुष्ठिवति

---

१. 'परमेश्वरस्य' इति 'घ'.।

यावत्। 'बलवत्सुष्ठु किमुत' इत्यभिधानाद् इन्द्रमर्चति। 'हन्ता रामशरः' इतिवत् करणे कर्तृत्वोपचारः । ऋत्विजो मखेनेन्द्रमर्चन्तीति तात्पर्यार्थः ॥ ८ ॥

(ऋम.-५९)

अर्तः परिज्मन्नागहि दिवो वा रोचनादधि ।

सर्मस्मिन्नृञ्जते गिरः ॥ ९ ॥

(ऋगर्थोद्धारः) - अत इति ॥ ज्मां भूमिं परितो वर्तत इति परिज्मा हे परिज्मन् = सर्वग ! परमेश्वरस्य अनेककर्तृकभिन्नभिन्नस्थानगतानेकयज्ञ-भोक्तृत्वसम्भावनाय इदं विशेषणम्। यत एवमुक्तरीत्या सर्वयज्ञानां भोक्ता अतो हेतोः, दिवः = स्वर्गाद् रोचनाद् = दीप्यमानात् सूर्यमण्डलाद्वा, अधि = अस्मदीयं समर्हणमधिकृत्य, तद् गृहीतुमिति यावत्। इह भूमौ विद्यमानं यज्ञस्थानम्, आगहि = आयाहि। किञ्च, अस्मिन् = यज्ञस्थाने गिरः = स्तुतिरूपाः वेदवाचः सं = सम्यक् परममुख्यया वृत्त्या ऋञ्जते = धातूनामनेकार्थत्वात् प्राप्नुवन्ति प्रतिपादयन्ति । करणे कर्तृत्वोपचारः । यज्ञस्थाने ऋत्विजो वेदवाग्भिः परममुख्यया वृत्त्या त्वामेव प्रतिपादयन्तीति यावत्। यतोऽतोऽप्यायाहीत्यर्थः ॥ ९ ॥

(ऋम.-६०)

इतो वा सातिमीमहे दिवो वा पार्थिवादधि ।

इन्द्रं महो वा रजसः ॥ १० ॥ १२ ॥ ६ ॥

(ऋगर्थोद्धारः) - इतो वा सातिमिति ॥ इतो दिवो वा = वैकुण्ठस्यापि द्युत्वेन तदपेक्षयाऽर्वाक्तनाद् द्युलोकात् [1]स्वर्गाद् वा, पार्थिवाद्वा =

१. 'स्वर्गलोकात्' घ.

पृथिवीसम्बन्धिनः पातालादिलोकाद्वा महो = महतो रजसो वा = रञ्जकात् मनोहराद् विष्णोः लोकाद् वैकुण्ठाद्वा। एतेषु स्थितमिति यावत्। सातिं= लाभस्वरूपिणं, भगवानेव हि एकान्तभक्तानां लाभरूपः तमिन्द्रम् अधीमहे स्मरामः। 'इक् स्मरणे' स्तुमो वा। 'इङ् अध्ययने' याचामहे वा। याञ्चार्थधातुषु पाठात् ॥ १० ॥

सूक्तम् - ७

मधुच्छन्दा वैश्वामित्रः। इन्द्रः। गायत्री।

(ऋम.-६१)

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।

इन्द्रं वाणीरनूषत ॥ १ ॥

(ऋगर्थोद्धारः) - इन्द्रमिदिति ॥ दशर्चमिदमैन्द्रं सूक्तम्। बृहत् = बृहन्तम् इन्द्रमित् = इन्द्रमेव, गाथिनः = गाथाः गानानि तद्वन्तः साम-वेदिनः, उद्गातार इति यावत्। साम्नेत्यध्याहारः। अनूषत= अस्तुवन् सदा स्तुवन्ति। अर्किणः = अर्काः ऋचः तद्वन्तो बह्वृचा होतार इति यावत्। अर्केभिः= अर्कैः ऋग्भिरिन्द्रम्। अनूषत। अन्याश्च यजुराद्या वाणीः= वाण्यः इन्द्रमनूषत। करणे कर्तृत्वोपचारः। तथा चाध्वर्युप्रभृतयो यजुरादि-वाणीभिरिन्द्रमनूषतेत्यर्थो द्रष्टव्यः ॥ १ ॥

(ऋम.-६२)

इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।

इन्द्रो वज्री हिरण्ययः ॥ २ ॥

(ऋगर्थोद्धारः) - इन्द्र इद्धर्योरिति ॥ इन्द्र इत् = इन्द्र एव वचोयुजा= वचोयुजोः वाङ्मात्रेणैव योगिनोः, हर्योः = अश्वयोः सम्बन्धिनि अश्वभ्यां

युक्ते वा, रथ इति शेषः। सचा = सुखेनैव, आ = समन्तात् सम्मिश्लः = सम्मिश्रः सम्बद्धः, सारथेरतिप्रयत्नमन्तरेण रथयोगवद्भ्यामश्वाभ्यां युक्तं रथमारूढ इति यावत्।

अध्यात्मं तु - इन्द्रः = परमेश्वरो भक्तशरीरे वचोयुजा = वचोयुजोः, वेदवाक्यानुवर्तिनोः हर्योः विषयान् प्रति इन्द्रियाणां हरणाद्धरिशब्दवाच्ययोर्मनोबुद्ध्योः सम्मिश्लः तद्युक्तं शरीरं विशेषतोऽध्यतिष्ठदिति यावत्।

किञ्च, स इन्द्रः = प्रसिद्धेन्द्रः वज्री = वज्ररूपायुधवान्। विष्णुस्तु वज्री= 'वज गतौ' 'रमु क्रीडायां' ज्ञानानन्दवान्, हिरण्ययः = हितश्च रमणीयश्चेति तथोक्तः। निर्वचनत्वाद्धितशब्दस्य हि इत्यादेशास्तकारलोपे वा सति रमणीय इत्यत्र मकारलोपे इकारस्य यकाररूपे वर्णविकारे च सति हिरण्यय इति भवतीति द्रष्टव्यम्॥ २॥

(ऋम.-६३)

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि।
वि गोभिरद्रिमैरयत् ॥ ३॥

(ऋगर्थोद्धारः) -इन्द्रो दीर्घायेति ॥ स इन्द्रः परमेश्वरः दीर्घाय= त्रिंशद्घटिकात्मकत्वाद् अहर्लक्षणं दीर्घकालं तस्मिन्निति यावत्। तथा चाहि, चक्षसे= जनानां पदार्थदर्शनाय, सूर्यं दिवि= गगने आरोहयत्= आरोपितवान् स्थापितवान्। किञ्च, आद्रियत इत्यद्रिः तमद्रिं = आदरणयोग्यं मुख्यप्राणं गोभिः= ज्ञानैः व्यैरयत्= ज्ञानयुक्तं कृत्वा प्रावर्तयत्।

प्रसिद्धेन्द्रस्तु - गोभिः= वज्रैः, बहुवचनमेकवचनार्थे। वज्रेणाद्रिं पर्वतं= व्यैरयत्= हतवान्। तत्पक्षान् अच्छिनदिति यावत्। यद्वा, गोभिः= उदकैः, वृष्ट्येति यावत्। अद्रिं= पर्वतं व्यैरयत् हतवान्। पर्वतोपरि ववर्षेत्यर्थः।

अथवा, गोभिः = उदकैर्निमित्तैः, उदकार्थमिति यावत्। अद्रिं = 'अद्रिरभ्रो बलाहकः' इति वचनात् मेघं व्यैरयत् = विगलितवान् शृङ्खलया विनिर्मुच्य बहिर्निर्यापितवान् इत्यर्थः॥ ३॥

(ऋम.-६४)

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च।
उग्र उग्राभिरूतिभिः ॥ ४॥

(ऋगर्थोद्धारः) - इन्द्र वाजेष्विति ॥ हे इन्द्र! दुष्टानामुग्रः त्वं वाजेषु= युद्धेषु अस्मासु सहस्रप्रधनेषु सत्सु = सहस्रेण जनेन प्रधनं येषां ते तथोक्ताः। बहुभिरपि युद्ध्यमानेषु सत्स्विति यावत्। नोऽस्मान् उग्राभिरूतिभिः = दुष्टानामुग्रत्वेन प्रतीयमानैः स्वभावतस्त्वनुग्रैरेवाभिप्रायैः अव= रक्ष॥४॥

(ऋम.-६५)

इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे।
युजं वृत्रेषु वज्रिणम् ॥५॥

(ऋगर्थोद्धारः) - इन्द्रं वयमिति ॥ वृत्रेषु = तमस्सु, अज्ञानेषु विषय इति यावत्। युजं= विरोधितया घटमानं, वज्रिणं तद्विनाशकमिति यावत्। वज्रिणं भीतिवशेन अरिभिः वर्ज्यं 'वृजी वर्जने' इति धातोः। तमिन्द्रं= परमेश्वरं महाधनार्थिनो वयं महाधने = महाधनार्थं, मोक्षस्यैव महाधनत्वेन तदर्थं हवामहे। अल्पधनार्थिनश्च वयं तमिन्द्रं परमेश्वरम् अर्भे = अल्पे धने मोक्षरूपधनापेक्षयाऽल्पधनार्थं सांसारिकपुरुषार्थमिति यावत्। हवामहे = आह्वयामः।

प्रसिद्धेन्द्रपक्षे तु, वृत्रेषु, बहुवचनमाद्यर्थे। वृत्रासुरप्रभृतिषु युजं= विरोधितया घटमानं वज्रिणं= वज्रधारिणं तमिन्द्रं महाधने अर्भे च धने प्रसिद्धमहदल्पधनप्राप्त्यर्थं तदर्थिनो वयं हवामह इत्यर्थः॥ ५॥

(ऋम.-६६)

स नो वृषन्नमुं चरुं सत्रादावन्नपावृधि ।
अस्मभ्यमप्रतिष्कुतः ॥ ६ ॥

(ऋगर्थोद्धारः)- स न इति ॥ हे वृषन्= भक्ताभीष्टवर्षणशील, श्रेष्ठ वा। सत्रादावन्= अव्ययानामनेकार्थत्वात् सत्राशब्दः सर्वपर्यायः। सर्वाभीष्टदातः। 'साकं सत्रा समं सह' इत्यभिधानात् सहार्थो वा सत्राशब्दः। तथा च सत्रा सह इष्टानिष्टे मिलित्वा दातरित्यर्थः [1]प्राप्नोति । तत्रानिष्टदातृत्वस्य स्तुतावनुपयोगाद् अर्थाद् इष्टदातरित्येवार्थो लभ्यते । यद्वा, सत्रा सह युगपदित्यर्थः। अर्थाद् अभीष्टसमुदायमिति यावत्। तथा च सर्वेष्टदातृत्वमेव लभ्यते। त्वं नः = अस्मदीयं अमुं= परोक्षं, मोक्षगमिति यावत्। चरुं= चरतिर्भक्षणार्थः। ततः कर्मण्युकारः। भोज्यमनुभवनीयमानन्दमस्मभ्यं= अस्मदर्थम्, अपावृधि= अविद्यावृतमपावृणु। अपगतावरणं कुरु। यतस्त्वमेव, अप्रतिष्कुतः= 'ष्कुञ् आप्रवरणे' आप्रवरणं आगमनं प्रतिष्कुतः प्रत्यागतः । नैवं त्वमित्यप्रतिष्कुतः । वैरिभिः युद्धेषु अप्रत्यागतः अप्रतिद्वन्द्व इत्यर्थः ।

प्रसिद्धेन्द्रपक्षे तु, वृषन् सत्रादावन् अमुं = दर्भादिनाऽऽवृतत्वेन परोक्षम् नः = अस्मदीयं, चरुं= दर्भादिनाऽऽच्छादितं सद्विद्यमानं हविरस्मभ्यम् अपावृधि= स्वीकारेण सफलं कुर्विति यावत् । यद्वा 'वज्रश्चरुर्वरारोहो मेघः' इति मेघनामसु पाठात् चरुं= मेघं जीवनप्रदाम्बुदानाय नोऽस्मदर्थमेव जातम् अस्मभ्यम् अपावृधि= शृङ्खलारूपावरणापगमेन बहिरुद्घाटय। त्वम् अप्रतिष्कुतः = यथायोग्यमप्रतिद्वन्द्व इति योज्यम् ॥ ६ ॥

१. 'प्रान्येति' इति क.।

(ऋम-६७)

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः ।
न विन्धे अस्य सुष्टुतिम् ॥ ७ ॥

(ऋगर्थोद्धारः) - तुञ्जे तुञ्ज इति ॥ आद्यस्तुञ्जतिः [1]गमनार्थः। द्वितीयो दानार्थः । तथा च तुञ्जे = लोकानां गमने त्वया क्रियमाणे सति, तुञ्जे क्रियाया इति शेषः। लोकानां गमनेतरसमस्तक्रियायाश्च दाने त्वया क्रियमाणे सति, त्वया समस्तप्रवृत्तिप्रेरणे जाते सतीति यावत् । यद्वा, धातूनामनेकार्थत्वात् तुञ्जतिः प्रेरणे वर्तते। तत्र तुञ्जेतुञ्जे इति वीप्सा। तथा च तत्रतत्र स्तोतृषु त्वयैव प्रेरणे जाते सतीत्यर्थः । ये प्रवृत्ताः उत्तरे = उत्तराः अपौरुषेयतया [2]उत्तमाः स्तोमाः = स्तुतिविशेषाः, तेऽपि वज्रिणः= ज्ञानानन्दरूपस्य इन्द्रस्य तव सुष्टुतिं = भावप्रधानो निर्देशः। सुष्टुतित्वं न विन्धे= न विन्दते न प्राप्नुयुः । कुतः ? तवानन्तगुणपूर्णत्वेन स्तोमानां सर्वगुण-व्याख्यानरूपत्वाभावादित्याशयः। त्वत्प्रेरणया स्तोत्रं कुर्वतामपि ते स्तुतिविशेषास्त्वां साकल्येन न प्रतिपादयन्ति। अनन्तगुणत्वात् तवेति ऋकृतात्पर्यार्थः ॥ ७ ॥

(ऋम.-६८)

वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा ।
ईशानो अप्रतिष्कुतः ॥ ८ ॥

(ऋगर्थोद्धारः) - वृषा यूथेवेति ॥ एकस्य वृषस्य यः प्रतिवीरोऽपरो वृषा स वंस इत्युच्यते । तं वंसं प्रति यो विभीः सन् युद्धाय गच्छति स वंसगो वृषायूथेव= यूथानीव। यथा गवां यूथानि आकर्षति। स्वगत्यनु-

२. 'गत्यर्थः' घ.। २. 'उत्तमोत्तमाः' क.।

विधायिगतिमन्ति करोति, प्रेरयतीति यावत् । एवमीशानः = प्रभुः = अप्रतिष्कुतः = अप्रतिद्वन्द्व इन्द्रः, कृष्टीः = प्रजाः, ओजसा = सामर्थ्येन, इयर्ति = गत्यर्थोऽयं धातुः । अन्तर्णीतण्यर्थः । गमयति प्रेरयतीति यावत् । दृष्टान्तस्य प्रत्या(त्य)यनार्थमुपादीयमानत्वादल्पस्यापि वृषस्येश्वरं प्रति दृष्टान्तत्वं युक्तमिति ज्ञातव्यम् ॥ ८ ॥

(ऋम.-६९)

य एकश्चर्षणीनां वसूनामिरज्यति ।
इन्द्रः पञ्च क्षितीनाम् ॥ ९ ॥

(ऋगर्थोद्धारः) - य एक इति ॥ य इन्द्रः एक एव चर्षणीनां = प्रजानां वसूनां = वित्तानां च, पञ्चक्षितीनां = देवगन्धर्वदैतेयपितृमानुष्यभेदेन पञ्चविधानां प्रजानामपि कर्मणि षष्ठी । ताः प्रति इरज्यति = ऐश्वर्यार्थोऽयं धातुः । ईश्वरो भवति । राजा भवतीति यावत् । स कृष्टीरियर्तीति पूर्वेण सम्बन्धः । चर्षणीनां पञ्चक्षितीनां चेति ब्राह्मणपरिव्राजकन्यायेन सामान्य-विशेषभावमाश्रित्योक्तम् अतो न पुनरुक्तिदोष इति ज्ञातव्यम् ॥ ९ ॥

(ऋम.-७०)

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ॥ ११ ॥ १४ ॥ ७ ॥ २ ॥

(ऋगर्थोद्धारः)- इन्द्रं व इति ॥ जनेभ्यो व इति वचनात् जनान् प्रतीदं मधुच्छन्दसो वचनमिति ज्ञायते । अतोऽत्र हे जना इत्यध्याहार्यम् । तथा च हे जनाः विश्वतः = सर्वतः सर्वत्र स्थितं सर्वगतमिन्द्रं जनेभ्यो वः = युष्माकमर्थाय प्रयोजनाय, परि = सम्यक्, हवामहे = आह्वयामः । [1]सर्वगतस्यापि तस्याऽह्वानं व्यक्तरूपेण एकत्रावस्थानायेति ज्ञातव्यम् ।

१. 'सर्वगस्यापि' घ.

आहूतश्चासौ केवलः = सर्वोत्तमः इन्द्रः अस्माकं भवदर्थं आह्वयितॄणामस्माकं, इदमुपलक्षणम् । भवदादीनां सर्वेषामपि अस्तु । इष्टद इति शेषः ॥ १० ॥

सूक्तम्-८,

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । गायत्री ।

(ऋम.-७१)

ऐन्द्र सानसिं रयिं सजित्वानं सदासहम् ।
वर्षिष्ठमूतये भर ॥ १ ॥

(ऋगर्थोद्धारः) - ऐन्द्रेति ॥ दशर्चमिदमैन्द्रं सूक्तम् । आ इन्द्रेति पदच्छेदः । हे इन्द्र ! सानसिं = सानो लाभः । मतुबर्थे सिः । सानो अस्यास्तीति सानसिः तं लाभयुक्तं, सजित्वानं = जित्वना जयिना पुत्रादिना सहितं, सदासहं = सदाबलं सदाबलवत्, देहादौ बलापादकं वर्षिष्ठं = वृद्धशब्दादतिशयार्थे इष्टन् प्रत्ययः । 'प्रिय स्थिर' (पा.सू. ६-४-१५७) इत्यादिना वृद्धशब्दस्य वर्षादेशः । तथा च वृद्धतमं, सुमहदिति यावत् । वित्तेनैव रक्षायाः सुप्रसिद्धत्वात् । ऊतये = रक्षायै रक्षानिमित्तं रयिं = बाह्यमान्तरञ्चेत्युभयविधं वित्तम् अस्मभ्यं नित्यदा आभर = आहर, देहीति यावत् ॥ १ ॥

(ऋम.-७२)

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहे ।
त्वोतासो न्यर्वता ॥ २ ॥

(ऋगर्थोद्धारः) - त्वत्प्रार्थनानुसारेण मया वित्ते दत्ते सति किं तेन तव स्यादित्यत आह **- नि येनेति** ॥ येन वित्तेन दत्तेन निमित्तेन त्वोतासः = अवतिः प्रेरणार्थः । त्वत्प्रेरिता वयं मुष्टिहत्यया = मुष्टिघातेन, मुष्टियुद्धेनेति

यावत्। अरीन् निरुणधामहे = निरुन्धाम। किञ्च, अध्यात्मं येन ज्ञानवित्तेन दत्तेन निमित्तेन वृत्राणि तमांसि ज्ञानयुद्धत इति शेषः। निरुणधामहे। किञ्च, येन वित्तेन निमित्तेन अर्वता= तुरगेण तदादिभिः वाहनैरिति यावत्। कांश्चिदरीन् निरुणधामहे। तादृग्वित्तम् आभरेति पूर्वेण सम्बन्धः ॥ २ ॥

(ऋ.म-७३)

इन्द्र॒ त्वोता॑स॒ आ व॒यं वज्रं॑ घ॒ना द॑दीमहि।
जये॑म॒ सं यु॒धि स्पृधः॑　　॥ ३ ॥

(ऋगर्थोद्धारः) - इन्द्र त्वोतास इति॥ हे इन्द्र! त्वोतासः = त्वत्प्रेरिता वयं वज्रं ज्ञानं रयिं च। यद्वा, वज्रं ज्ञाने सति या रतिः तां ज्ञाननिमित्तां रतिमिति यावत्। घनेति तृतीयैकवचनम्। तृतीयायाः अकारादेशस्य जातत्वात्। भावप्रधानं चेदम्। दृढत्वेनेत्यर्थः। आददीमहि = आददामः स्वीकुर्मः। त्वत्प्रेरणयैव दृढज्ञाननिमित्तकरतिमन्तो भवाम इत्यर्थः। त्वत्प्रेरिता एव युधि प्रसक्तायां सत्यां स्पृधः, युद्धनामैतत्। तानि युद्धानि, यद्वा, युधि = युद्धे, स्पृधः = स्पर्धावन्तो ये वैरिणः तान् सम्यक् जयेम॥ ३ ॥

(ऋ.म-७४)

व॒यं शूरे॑भि॒रस्तृ॑भि॒रिन्द्र॒ त्वया॑ यु॒जा व॒यम्।
सा॒स॒ह्याम॑ पृतन्य॒तः　　॥ ४ ॥

(ऋगर्थोद्धारः) - वयं शूरेभिरिति॥ हे इन्द्र! वयं त्वया युजा युनक्तीति युक्, तेन युजा = सख्येत्यर्थः। त्वया सख्या सता, त्वादृशे सखाये सतीति यावत्। त्वत्प्रसादेनैवेत्याशयः। शूरेभिः= शूरैः, अस्तृभिः= अस्त्रिभिः अस्त्रवद्भिः सुयोद्धृभिः, सुपरिवारभूतभृत्यैः सहेत्यर्थः। पृतन्यतः = युध्यतः शत्रून् सासह्याम= अतिशयेन पुनःपुनर्वा सहामहे। अभिमुखाः स्मेत्यर्थः।

किञ्च, वयं च त्वयैव प्रेरिताः त्वदधीनसत्ताका इत्यर्थः। द्रव्यादिदानरूप-राजाद्यनुग्रहेण भृत्यानां योद्धभिमुख्येनावस्थानमिव नास्माकमवस्थानमात्रं, किं नाम? अस्मत्सत्ताऽपि त्वदधीनेति भावः॥ ४ ॥

(ऋ.म.-७५)

म॒हाँ इन्द्रः॑ प॒रश्च॒ नु म॑हि॒त्वम॑स्तु व॒ज्रिणे॑।
द्यौर्न प्र॑थि॒ना शवः॑　　॥ ५ ॥ १५ ॥

(ऋगर्थोद्धारः) - महाम् इन्द्र इति॥ नु = यस्मात् कारणाद् असौ इन्द्रः= विष्णुः, महान्= गुणैरनन्तः, परश्च= बहुकालीनश्च, अनादिरित्यर्थः। कालतोऽप्यनन्त इति यावत्। तथा च प्रथिना= प्रथिम्ना व्याप्त्या द्यौर्न। अव्याकृताकाशवद् देशतोऽप्यनन्त इत्यर्थः। तथा च शवः= शवशब्दः सुखवाची बलवाची च। उभयनामसु पाठात्। तथा च नित्याभिव्यक्त-सुखात्मकः तादृशबलात्मकश्चेत्यर्थः। यद्वा, शशब्दः सुखवाची। वशब्दो बलवाची। तथा च शः नित्याभिव्यक्तसुखात्मकः वः तादृशबलात्मक-श्चेत्यर्थः। तथा च त्रिविधानन्त्यवान् विष्णुरेव। जीवस्त्वनेवंविध इति शेषः। तस्मात् कारणात् महित्वं= महत्त्वं ब्रह्मत्वमुक्तरूपं त्रिविधं पूर्णत्वमित्यर्थः। वज्रिणे वज्रिणः ज्ञानानन्दात्मकस्य तस्य विष्णोरेव अस्तु= जानीयात्। धातूनामनेकार्थत्वात्। न पुनर्जीवस्योक्तरूपं त्रिविधं पूर्णत्वं महित्वं कदाऽपि स्मरेदिति तात्पर्यार्थः॥ ५ ॥

(ऋ.म.-७६)

स॒मो॒हे वा॒ य आश॑त॒ नर॑स्तो॒कस्य॒ सनि॑तौ।
विप्रा॑सो वा धिया॒यवः॑　　॥ ६ ॥

(ऋगर्थोद्धारः) - समोह इति॥ ये समोहे = संवहने सम्यग् अन्यप्रेरणे

वा अपि । सप्तमी तृतीयार्थे । अन्यप्रेरणेनापि, अन्यप्रेरिता अपीति यावत्। तोकस्य सनितौ= तोकस्य अपत्यस्य, ज्ञानमेव हि जीवतोऽपत्यं 'ज्योतिर्हि पुत्रः परे व्योमन्' इति श्रुतेः। अतो ज्ञानलक्षणस्यापत्यस्य सनितौ= लाभे सति, ज्ञानलाभेनेति यावत्। तमिन्द्रं जनार्दनम् आशत= आश्नुवत प्राप्ताः, शरणमिति शेषः। स्वबुद्ध्यैव ज्ञानं सम्पाद्य शरणं प्राप्तैर्भाव्यम्। तद्विहाय परप्रेरणयाऽपि एतं शरणं प्राप्ता इत्यर्थः। त एव [1]नरः = पुरुषाः, अन्यप्रेरणयाऽपि ये तं न शरणं प्राप्तास्ते पशव इति शेषः। किञ्च धियायवः= 'यु मिश्रणे' धिया युक्ताः। तृतीयाया अलुक्। भगवज्ज्ञानिन इति यावत्। ते के ? त एव विप्रासः = विप्राः। तदन्ये तु ये मूर्खाः, भगवज्ज्ञानरहिताः ते शूद्रसमाना इति शेषः ॥ ६ ॥

(ऋ.म.-७७)

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते ।
उर्वीरापो न काकुदः ॥ ७ ॥

(ऋगर्थोद्धारः) - यः कुक्षिरिति ॥ तस्येन्द्रस्य देवस्य यः सोमपातमः = अतिशयेन सोमपाः कुक्षिः = उदरं सः समुद्र इव = रत्नाकर इव कुक्षौ सोमं समर्पितवते भक्तायाखिलान् कामान् पिन्वते = 'पिवि सेचने' सिञ्चति, ददातीति यावत्। किञ्च काकुदः = ककुदिति तालुनाम। तत्र भवा जिह्वा काकुत्। तथा च [2]भगवतो बहुमुखत्वेन तत्सम्बन्धिककुदामपि बहुत्वात् तत्र भवाः बह्व्यः काकुदो जिह्वाश्च। उर्वीः = उर्व्यः महत्यः आपो न = आप इव, महापइव भक्तानामभीष्टतर्पका इत्यर्थः ॥ ७ ॥

---

१. 'नराः' इति 'ख' पाठः।
२. 'भगवतो मुखत्वेन' इति क पाठः।

(ऋ.म.-७८)

ए वा ह्यस्य सूनृता विरप्शी गोमती मही ।
पक्वा शाखा न दाशुषे ॥ ८ ॥

(ऋगर्थोद्धारः) - एवा ह्यस्येति ॥ यस्त्वं विरप्शी = विशिष्टबलवान् तस्य विरप्शिनो बलिष्ठस्य तव सम्बन्धिनीति शेषः। यद्वा, या विरप्शी बलिष्ठस्य तव सम्बन्धिनीत्यर्थः। तर्हि विरप्शिनीति स्यादिति वाच्यम्। प्रत्ययलोपात्। गोमती = वाग्युक्ता वेदेता वेदैः स्तुत्या, मही = महती, सूनृता = साध्वी वाणी साऽप्येवाहि = एवं हि एवमेव हि। कुक्ष्यादिवदेव। दाशुषे = यजमानाय, पक्वा = पक्वफलवती कल्पतरुशाखेव वरदात्री भवतीति शेषः ॥ ८ ॥

(ऋम-७९)

एवा हि ते विभूतय ऊतय इन्द्र मावते ।
सद्यश्चित् सन्ति दाशुषे ॥ ९ ॥

(ऋगर्थोद्धारः) - एवा हि त इति ॥ हे इन्द्र ! ते त्वां दाशुषे= यजते, मावते = ज्ञानिने, दातुमिति शेषः। ते तव विभूतयः = ऐश्वर्याणि ऊतयः= रक्षाश्च, रक्षणोपाया इति यावत् । सद्यश्चित्= सद्योऽपि, नित्यमिति यावत्। सन्त्येव हि। अतोऽहं त्वामाह्वयामीति भावः ॥ ९ ॥

(ऋम-८०)

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या ।
इन्द्राय सोमपीतये ॥ १० ॥ १६ ॥ ८ ॥

(ऋगर्थोद्धारः) - एवा ह्यस्येति ॥ अस्य परमेश्वरस्य काम्या = काम्यानि

प्रियाणि उक्थं = उक्थानि शस्त्राणि, सोमपीतये = सोमपानार्थं, तस्मै = इन्द्राय, शंस्या = शंस्यान्येव हि। तथा स्तोमः = स्तोमाः सामविशेषाश्च इन्द्राय सोमपीतये, गेया इति शेषः। स्तुत्या प्रसन्न एव ह्यागत्य सोमं पिबति। न त्वभिलाषेण। येनोक्थशंसनादिकं व्यर्थं स्यात्। अतः सोमपानाय तदागमनार्थम् उक्थादिशंसनं कर्तव्यमिति भावः॥ १०॥

सूक्तम् - ९

मधुच्छन्दा वैश्वामित्रः। इन्द्रः। गायत्री।

(ऋम-८१)

इन्द्रे हि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः।
महाँ अभिष्टिरोजसा ॥ १॥

(ऋगर्थोद्धारः) - इन्द्रे हीति॥ एतदपि दशर्चमैन्द्रं सूक्तम्। हे इन्द्र! महान् ओजसा= सामर्थ्येन निमित्तेन, अभिष्टिः = अभितः सर्वजगत्प्रवृत्तिविषये इष्टिः इच्छा यस्येति तथोक्तः। शकन्ध्वादित्वाद् दीर्घाभावः। स्वेच्छया सर्वजगत्प्रवर्तक इत्यर्थः। एतादृशस्त्वं विश्वेभिः = विश्वैः, सोमपर्वभिः= सोमशब्दोपपदात् पिबतेः कर्तरि अर्वन् प्रत्यये पररूपे च सोमपर्वन्शब्दः सोमपानकर्तृवाची। तथा च सोमपानकर्तृभिः। यद्वा, पर्वन्शब्दोऽवदानवाची। तथा च सोमावदानवद्भिः। यद्यपि सोमावदानवान् यजमान एव। तथाऽपि यजमानकर्तृकसोमावदानस्यापि देवोद्देश्यत्वेन देवाहारत्वात् तद्वत्त्वं देवानां युक्तम्। तथा च सोमस्य पर्वाणि अवदानानि यजमानकर्तृकाणि येषामुद्देश्येन सोमपर्वणो देवाः तैः सह आ इहि। एत्य चान्धसो = अन्धसा हविरादिना अन्नेन मत्सि= मदं प्राप्स्यसि। नित्यसुखरूपोऽपि त्वं सुखाभिव्यक्तिं प्राप्स्यसीत्याशयः॥ १॥

(ऋम-८२)

एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने।
चक्रिं विश्वानि चक्रये ॥ २॥

(ऋगर्थोद्धारः) - एमेनमिति॥ आ ईम् एनमिति पदच्छेदः। तत्र आ इत्युपसर्गस्य 'सृजता चक्रिम्' इत्येताभ्यां सम्बन्धः। ईंशब्द एवार्थः। हे ऋत्विज इत्यध्याहारः। तथा च हे ऋत्विजः! तमेतं मन्दिं = माद्यन्त्यनेनेति करणे इकारः। सर्वेषां सुखकारणम्, आचक्रिं = आ सम्यक् कर्म क्रियतेऽनेनेति चक्रिः तं सम्यक् कर्मकर्तारं विष्णुं, मन्दिने = मदशीलाय सुखस्वभावाय विश्वानि = समस्तानि कार्याणि, चक्रये = कृतवते, सर्वकर्त्रे इति यावत्। इन्द्राय विष्णवे, तस्य पानायेति यावत्। सुते = सोमे आसृजता ईम्= आसृजतैव सन्निहितं कुरुतैव। भगवान् विष्णुः स्वसन्निधानेन पवित्रितमेव सोमं पिबति नान्यथेति हेतोः ऋत्विजः प्रति सोमे विष्णुं सन्निहितं कुरुतेति प्रार्थनं युक्तमिति भावः॥ २॥

(ऋम.-८३)

मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे।
सचैषु सवनेष्वा ॥ ३॥

(ऋगर्थोद्धारः) - मत्स्वेति॥ हे सुशिप्र = शोभनानन्द[1]युक्त! विश्वचर्षणे= विश्वाः चर्षणयः प्रजाः अधीना यस्यासौ विश्वचर्षणिः। तस्य सम्बुद्धिः हे विश्वचर्षणे समस्तजीवेश, एषु = त्रिषु प्रातरादिसवनेषु, सचा= सह, अस्मद् रक्षयेति शेषः। अस्मद्रक्षां कुर्विति यावत्। मन्दिभिः= मदहेतुभिः स्तोमेभिः = अस्माभिः क्रियमाणैः स्तोत्रविशेषैः आमत्स्व = सम्यक् मदं सुखव्यक्तिम् [2]अवाप्नुहि॥ ३॥

---

१. 'युत' घ.। २. अवामहि' इति क.।

(ऋम.-८४)

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत।
अजोषा वृषभं पतिम् ॥ ४॥

(ऋगर्थोद्धारः) - **असृग्रमिति** ॥ हे इन्द्र ! अजोषाः = त्वद्दतेऽन्येन स्तुत्यरूपेण कचिदप्यसेव्याः, त्वद्व्यतिरिक्तसेव्यशून्यास्त्वामेव स्तुतिरूपेण सेवमाना इति यावत्। ते त्वदीया हयग्रीवव्यासादिरूपेण त्वन्निःसृताः, गिरः = वेदवाचः, असृग्रं = अनारतं, निरन्तरमिति यावत्। वृषभं = श्रेष्ठं पतिं = स्वपतिं वेदपतिं व्यासादिरूपिणं त्वां प्रत्येवेति यावत्। उत् = उच्चैः सम्यक्, मुख्यतयेति यावत्। अहासत = अगमत्। अस्माभिर्विसृष्टाः। 'ओ हाङ् गतौ'। त्वन्निःसृता वेदवाचस्त्वामेव मुख्यया वृत्त्या प्रतिपादयितुमस्माभिरुचारिता इति तात्पर्यम् ॥ ४॥

(ऋम.-८५)

सश्चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम्।
असदित्ते विभु प्रभु ॥ ५ ॥ १७॥

(ऋगर्थोद्धारः) - **सश्चोदयेति** ॥ हे इन्द्र ! अर्वाक् = अधस्तात् स्थितान्, नीचानिति यावत्। अस्मान् प्रति चित्रं = भद्रं वरेण्यं = वरणीयं राधः = ऐश्वर्यं सश्चोदय = प्रचोदय, अस्मभ्यं देहीति यावत्। अस्मभ्यं दातुं वा ते तव विभु = विशिष्टं भवतीति विभु, प्रभु = प्रकृष्टं भवतीति प्रभु, विशेषेण प्रकृष्टमिति यावत्। यद्वा, प्रभु प्रभूतं पूर्णम् अक्षयमिति यावत्। शुभमिति शेषः। असदित् = अस्त्वेव। अतः सश्चोदयेत्यर्थः ॥ ५ ॥

(ऋम.-८६)

अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः ॥
तुविद्युम्न यशस्वतः ॥ ६ ॥

(ऋगर्थोद्धारः) - **अस्मान्त्स्विति** ॥ हे तुविद्युम्न ! = तुवीति बहुनाम। द्युम्नं कीर्तिः। महाकीर्ते इन्द्र ! रभस्वतः = शब्दवतः, स्तोतॄनिति यावत्। यशस्वतः = यशस्विनोऽस्मान्, राये = सप्तम्येषा। महैश्वर्यरूपे, तत्र = त्वयि, त्वद्विषयकबुद्ध्यादाविति यावत्। सुचोदय= त्वद्विषयकबुद्ध्यादियुक्तान् अस्मान् कुर्वित्याशयः ॥ ६ ॥

(ऋम.-८७)

सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्।
विश्वायुर्धेह्यक्षितम् ॥ ७ ॥

(ऋगर्थोद्धारः) - **सं गोमदिति** ॥ हे इन्द्र ! विश्वं सम्पूर्णम् आयुः यस्यासौ विश्वायुः = नित्यः त्वम् अस्मे = अस्मासु गोमत् = गोयुक्तं वाजवत् = अन्नेनापि सहितं अक्षितं = अक्षयं, पृथु = बृहत् = अतिबृहच्छ्रवः = श्रवणेन जायत इति श्रवो ज्ञानं सन्धेहि = सम्यक् देहि ॥ ७ ॥

(ऋम.-८८)

अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम्।
इन्द्र ता रथिनीरिषः ॥ ८ ॥

(ऋगर्थोद्धारः) - **अस्मे धेहीति** ॥ हे इन्द्र ! अस्मे = अस्मासु, बृहत् = बृहतीं, श्रवः = श्रवणेन जायमानां विद्यां, सहस्रसातमं = अतिशयेन सहस्रलाभसहितं, बहुलाभयुक्तमिति यावत्। द्युम्नं = कीर्तिं च, सत्यामेव कीर्तौ धनादिबहुलाभो भवतीति प्रसिद्धम्। ताः = प्रसिद्धाः रथिनीः = रथो देहस्तद्वतीः, इषः = अन्नानि, सदेहान्नं चेत्यर्थः। अविकलेन देहेन [1]सहितमन्नमिति यावत्। धेहि = देहि। यद्यपि सश्चोदयेत्यादिनोक्तमेवात्र

---

१. 'युक्तम्' घ.।

पुनः प्रार्थ्यते । तथाऽपि प्रार्थनारूपत्वात् तत्र पौनरुक्त्यं न दोषायेति मन्तव्यम् ॥ ८ ॥

(ऋम.-८९)

वसोरिन्द्रं वसुंपतिं गीर्भिर्गृणन्तं ऋग्मियम् ।
होम गन्तारमूतयें ॥ ९ ॥

(ऋगर्थोद्धारः) - वसोरिन्द्रमिति ॥ वसोः वसुपतिं = वसुशब्दो देवतापर्यायः । जातावेकवचनम् । बुद्ध्या विवेकेन योज्यम् । तथा च वसोः वसूनां देवानां ये वसवो देवाः, देवानां देवत्वप्रदमिति यावत् । तेषां पतिम् ईश्वरं देवदेवेश्वरमित्यर्थः । ऋग्मियं = ऋग्भिः मेयं ज्ञेयम् इन्द्रं प्रभुं भक्तान् प्रति गन्तारं गीर्भिः गृणन्तः = स्तुवन्तो वयम् ऊतये= अभीष्टसिद्धये यज्ञस्थाने होमे आह्वयामः ॥ ९ ॥

(ऋम.-९०)

सुतेसुंते न्योंकसे बृहद् बृंहत एदरिः ।
इन्द्रांय शूषमंर्चति ॥ १० ॥ १८ ॥ ९ ॥

(ऋगर्थोद्धारः) - सुते सुत इति ॥ एदरिरित्यत्र आ इत् अरिरिति पदच्छेदः । यद्यप्यरिशब्दः ईश्वरनामसु पठितः । तथाऽप्यत्रानन्वयाद् अन्यथा व्याख्यायते । यः अरिः = 'रिषु हिंसायां' इति धातोः न रिष्यति हिंसां न प्राप्नोतीत्यरिः । 'रीङ् क्षये' इति धातोः न रीयते न क्षीयत इति वाऽरिः । तथा चारिः आत्मनः स्वस्याहिंसेच्छुरविनाशी अदुष्ट इत्यर्थः । एतादृशो यः पुरुषः सः बृहत्= महत् शूषं = सुखं प्रति, तच्चोद्दिश्येति यावत् । इष्टप्राप्तिमुद्दिश्येति यावत् । ओकसे= गृहाय, योग्यतया सतामिति सम्बन्धः। सतामाश्रयायेति यावत् । बृहते= पूर्णाय इन्द्राय इत्= चतुर्थी द्वितीयार्थे ।

परमेश्वरमेव । सुते सुते सोमसवनं नि आ अर्चति न्यार्चति नितरां सम्यगर्चेदित्यर्थः । इष्टानिष्टप्राप्तिपरिहारकामः परमेश्वरमेवार्चेदिति तात्पर्यार्थः ॥ १० ॥ १८ ॥ ९ ॥

सूक्तम् - १०

मधुच्छन्दा वैश्वामित्रः । इन्द्रः । अनुष्टुप् ।

(ऋम.-९१)

गायंन्ति त्वा गायत्रिणोऽर्चं न्त्यर्कमर्किणंः ।
ब्रह्माणंस्त्वा शतक्रत उद्वंशमिंव येमिरे ॥ १ ॥

(ऋगर्थोद्धारः) - गायन्तीति ॥ द्वादशर्चमेतदैन्द्रं सूक्तम् । हे शतक्रतो बहुज्ञान ! अर्कं = अरं कं अरम् अलम् अतिशयेनेति यावत् । कं सुखरूपं त्वा = त्वां गायत्रिणः गायत्रं सामविशेषः । तद्वन्तः सामगा इत्यर्थः गायन्ति। अर्किणः= अर्काः ऋचः तद्वन्तो ऋग्वेदिनः त्वामर्चन्ति। 'ऋच स्तुतौ' ऋग्भिः शंसन्ति । किञ्च ब्रह्माणः = भूतभविष्यद्विरिञ्चाः उद्वंशमिव = उच्चं वंशम् इव शक्रकेतुमिव, शक्रध्वजमिव उच्छ्रितमिति यावत् । त्वां येमिरे= व्यजानन् । धातूनामनेकार्थत्वात् । यद्वा, उदित्यस्य येमिरे इत्यनेन सम्बन्धः । तथा चोद्येमिरे= उच्छ्रितमकुर्वन्, उच्छ्रितत्वेन व्यजानन् इति यावत् । विरिञ्चानां भगवदुच्छ्रितत्वकरणस्य मुख्यस्यासम्भवादिति द्रष्टव्यम् ।

'चतुस्तम्भं ध्वजाकारं राजद्वारे प्रतिष्ठितम् ।
आहुः शक्रध्वजं नाम पौरलोकसुखावहम् ॥'

इति [1]पुराणवचनेन शक्रध्वजशब्दार्थो द्रष्टव्यः ॥ १ ॥

---

१. 'प्रमाणवचनेन' घ. ।

(ऋम.-९२)

यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति　　॥ २ ॥

(ऋगर्थोद्धारः) - यत्सानोरिति ॥ आ अरुहदिति पदच्छेदः। हे अस्पष्ट= गूढशक्तिमन् ईश्वर ! यत् = यस्मात् तव कर्त्वं = कर्तृत्वं, जगत्सृष्टादिकरणे सामर्थ्यमिति यावत्। सानोः सानुमारुहत् = सानुशब्दो गिरिशिखरवाची। गिरिशिखराद् गिरिशिखरमारुहदिति मुख्यार्थस्य बाधाद् गिरिशिखराद् गिरिशिखरमारूढवस्तुनिष्ठोच्चादुच्चत्वरूपधर्मसाम्यमाश्रित्योपचारेण व्याख्येयम् । तथा च सानोः सानुम् आ अरुहत् उच्चादप्युच्चमभवत् । परिपूर्णमभवदित्यर्थः ।भूरि = ततोऽप्यधिकं चाभवत्। अतिपूर्णमभवदिति [1]यावत्। तत् तेन कारणेन पूर्णशक्तिसद्भावरूपकारणेन वृष्णिः = वर्षिता इन्द्रोऽभवत्। अर्थं = अर्थान् स्वपरगताशेषविशेषान् चेतति = जानाति। अत एव च यूथेन = मुक्तामुक्तसमूहेन सेवितस्सन् इति शेषः। एजति = एजृ दीप्त्यर्थः शोभते। नहि पूर्णशक्तिमतामन्तरेण सर्वज्ञत्वं सर्वसेव्यत्वं च युज्यत इत्याशयः। यद्वा, यत् यस्मात् कारणाद् इन्द्रस्य परमेश्वरस्य कर्त्वं कर्तृत्वं सानोः सानुम् आरुहत् । उच्चादुच्चं विरिश्चादिदेवजातं प्राप्तमिति यावत् । परमेश्वरो हि तेषु स्थित्वा करोति तत् तेनैव कारणेन तत्कर्तृत्वं भूरि अतिशयेन अस्पष्टं स्पष्टमभूत् । 'स्पशाज्ञातदशौ' इति धातोः । नह्यन्यान्तर्गततया विना साक्षादीश्वरगतं कर्तृत्वं मन्दैर्ज्ञायते । ततश्च सर्वकर्तृत्वादेव स इन्द्रः अर्थम् अशेषांश्चार्थान् चेतति। यूथेन स्वरूपाणां महायूथेन मत्स्यादीनां समुदायेन सह एजते कम्पते चेष्टते ॥ २ ॥

---
१. 'यावदित्यर्थः' घ.।

(ऋम.-९३)

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर　　॥ ३ ॥

(ऋगर्थोद्धारः) - युक्ष्वाहीति ॥ हे सोमपाः = इन्द्र ! केशिना = केशिनौ प्रलम्बकेशवन्तौ, वृषणा= वृषणौ रेतस्सेचकौ, युवानाविति यावत्। कक्ष्यप्रा= यया रज्वाऽश्व उरसि बध्यते सा कक्ष्येत्युच्यते। 'प्रा पूरणे' कक्ष्याभि- पूरकौ। पुष्टत्वादिति भावः। हरी अश्वौ युङ्क्ष्व रथे योजय। अथ तदनन्तरम् इहोपगम्य नो गिरां उपश्रुतिम् = उपश्रवणं च कुरु। स्तुतिरूपाः नो गिरः शृण्विति यावत्॥ ३ ॥

(ऋम.-९४)

एहि स्तोमाँ अभिस्वराभिगृणीह्यारुव ।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय　　॥ ४ ॥

(ऋगर्थोद्धारः) - एहीति ॥ हे इन्द्र ! आ इहि एहि। स्तोमान् = स्तुतिम् अभिस्वर च = स्वीकारानुसारिणं स्वरं कुरु। अभिगृणीहि = अस्मदीयां प्रशंसां कुरु। हे स्तोतारः साधु कृतमिति आरुव = पुनर्हर्षान्महत्तरं शब्दं च कुरु। सर्वत्र वसतीति वसुः। सर्वस्याप्यन्तस्थो बहिष्ठश्चेत्यर्थः। तथा च हे वसो ! नः = अस्मदीयं ब्रह्म = वेदं, स्तुतिमिति यावत्। अन्तस्थस्सन् यज्ञं च बहिष्ठःसन् सचा = सहैव, मिलित्वैव सुखेनैव वा। वर्धय = प्रवर्धय॥ ४ ॥

(ऋम.-९५)

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च　　॥ ५ ॥

(ऋगर्थोद्धारः) -उक्थमिति ॥ पुरुनिष्षिधे = पुरून् बहून् शत्रून् निषेधयति परिहरति, हन्तीति यावत् । पुरुनिष्षित् । तस्मै पुरुनिष्षिधे । दनुज-घातकायेत्यर्थः । इन्द्राय= परमेश्वराय, परमेश्वरस्योद्देशेनेति यावत्। वर्धनं= तद्गुणप्रकाशकम् उक्थं, शंस्यं = शंसनीयं । यस्य उक्थं शंस्यं स शक्रो यथा सोमेषु सुतेषु सत्सु, सोमकण्डनानन्तरमिति यावत् । रारणत्= शब्दं करोति । ऋत्विक्षु संस्थितः सन् देवाह्वानरूपां स्तुतिं प्रवर्तयति । एवं नः सख्येषु= अस्मत्सख्याय च अस्मत्कर्मकस्वकर्तृकसख्यज्ञापनायेति यावत् । रारणत्= अस्मासु संस्थितः सन् सखाऽहमस्मीति शब्दं करोत्वि-त्यर्थः । मधुच्छन्दसो वचनमिदम् ॥ ५ ॥

(ऋम.-९६)

तमित्सखित्व ईमहे तं राये तं सुवीर्ये ।
स शक्र उतनः शकदिन्द्रो वसु दयमानः ॥ ६ ॥ १९ ॥

(ऋगर्थोद्धारः) - तमित्सखित्व इति ॥ वयं सखित्वे= सखित्वार्थं तमित्= तमेवेन्द्रं नित्यं शरणम् ईमहे= प्राप्नुमः । राये= वित्तार्थं च तमी-महे । सुवीर्ये = साधुवीर्यार्थं च तमीमहे । शरणं प्राप्तश्च सः यस्मात् शक्रः, 'शक्ल शक्तौ', 'रमु क्रीडायाम्' शक्तिरतिस्वरूपत्वाच्छक्रशब्दवाच्यः, उत तस्मात् शकत्= अशकत् । प्रार्थितसम्पादने शक्तो भवत्येवेत्यर्थः । किञ्च, स इन्द्र नोऽस्मभ्यं वसु= वित्तं दयमानः = 'दय दानगतिरक्षणेषु' ददेव, सदा प्रवर्तत इति शेषः । यतोऽतश्च तमीमह इति सम्बन्धः ॥ ६ ॥

(ऋम.-९७)

सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥ ७ ॥

(ऋगर्थोद्धारः) - सुविवृतमिति ॥ हे अद्रिवः ! आदरणीयत्वाद् अद्रिः प्राणस्तत्प्रवर्तकत्वाद् अद्रिवाः हरिः तस्य सम्बुद्धिः अद्रिवः इति । प्रसिद्धेन्द्रस्तु 'व्रश्चू छेदने' 'वृञ् वरणे' वरणं वारणमिति यावत् । तथा च अद्रीन् वृश्चति छिनत्तीति वा वारयतीति वाऽद्रिवा इत्युच्यत इति द्रष्टव्यम्। इन्द्र = परमेश्वर, यस्मात् कारणाद् त्वादातमित्= त्वद्दत्तमेव यशः सुविवृतं= विस्पष्टं सु सुष्ठु निरजं= निर् निषेधार्थः । 'अज गतिक्षेपणयोः' क्षेपणं क्षयः। तथा च न अज्यते क्षीयत इति निरजम् अनपहार्यमिति यावत् । एवं शुभं त्वदीयं दानमिति यावत् । तस्मात् त्वं गवां व्रजं = ज्ञानसमूहं च, स्वरूपभूतं गूढमिति शेषः । अन्यथा अपवृधीति आवरणापगमप्रार्थनायोगात् । अप-वृधि= आवरणापगमेन विवृणु । नोऽस्माकं गवां राधः = ऋद्धिम् अभिवृद्धिं च कृणुष्व = कुरु ॥ ७ ॥

(ऋम.-९८)

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः सङ्गा अस्मभ्यं धूनुहि ॥ ८ ॥

(ऋगर्थोद्धारः) - नहि त्वेति ॥ हे इन्द्र ऋघायमाणं = वर्धमानं, सर्वगतमिति यावत् । त्वा = त्वां रोदसी = द्यावापृथिव्यौ तदभिमानिन्यौ [1]श्रीभूमी उभे सहितेऽपि नहीन्वतः = न व्याप्नुतो हि । व्याप्तिकर्मसु पाठात्। [2]त्वत्प्रसादाद् विना तत्समानव्याप्तिमत्यौ न भवत इति यावत् । अन्यथा समानेत्युक्तविरोधात् । किञ्च त्वं स्वर्वतीः= सुखवतीः, अपः = प्रजाः मुक्तान्, जेषः = अजयः । ते त्वद्वशा इति यावत् । एवंविधश्च त्वं स्वयमस्मभ्यं गाः = ज्ञानानि, संधूनुहि = सम्यग् गमय । धातूना-मनेकार्थत्वात् । अस्मान् प्रति प्रापयेति यावत् । तथा सङ्गा इत्यपि सम्बन्धः । सं समीचीना उचा

---

१. 'श्रिभुवौ' घ. । २. 'त्वत्प्रसादं' घ. ।

इति यावत्। गाः प्रसिद्धाश्च धूनुहि = प्रापयेत्यर्थः। प्रसिद्धेन्द्रपक्षे - रोदसी द्यावापृथिव्यौ नहीन्वतः । स्वर्वतीः सुखवतीः स्वर्गिणः प्रजाः जेष इति व्याख्येयम् ॥ ८ ॥

(ऋम.-९९)

आश्रुत्कर्ण श्रुधी हवं नूचिद्धधिष्व मे गिरः।
इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥ ९ ॥

(ऋगर्थोद्धारः) - आश्रुत्कर्णेति ॥ हे आश्रुत्कर्ण ! = आ समन्तात् श्रुणुत इति व्युत्पत्त्या आश्रुतौ कर्णौ यस्यासौ तथा तस्य सम्बुद्धिराश्रुत्-कर्णेति ॥ बहुश्रवणसाधनीभूतकर्णेति यावत्। हवं= अस्मदाह्वानं श्रुधि= शृणु। स्नेहविशेषादिति शेषः। अनेनाऽश्रुत्कर्णश्चेत् स्वयमेव श्रोष्यति किं प्रार्थनेनेति शङ्कानवकाशः। नुचित्= अद्यैव, मे= मयि, गिरः = वेदरूपाः दधिष्व = धेहि। वेदविदं मां कुर्वित्यर्थः। हे इन्द्र! इमं मम स्तोमं = मत्कृतं स्तुतिविशेषं युजश्चित् = समाधिलक्षणाद् योगादपि अन्तरं सन्निकृष्टं, प्रियमिति यावत्। कृष्व = कुरु ॥ ९ ॥

(ऋम.-१००)

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् ॥
वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥ १० ॥

(ऋगर्थोद्धारः) - विद्महीति ॥ हि = यस्माद् वृषन्तमं = वृषः शक्तिमान्, अतिशयेन वृषो वृषन्तमः, नकारागमश्छान्दसः । तं वृषन्तमं शक्तिमत्तमम् वाजेषु = युद्धेषु, हवनश्रुतं = स्वसंरक्षणाय भक्तकर्तृकाह्वानस्य श्रोतारं च, त्वा= त्वां, विद्म= विद्मः । तस्माद् वृषन्तमस्य शक्तिमत्तमस्य तव सहस्रसातमां= सहस्रं सनोति लम्भयति प्रापयतीति सहस्रसाः अतिशयेन

सहस्रसाः सहस्रसातमा । सहस्रसङ्ख्याकमनोरथादिप्रापकेषु बहुलाभेषु अतिशयितां बहुलाभोत्तमामित्यर्थः। ऊतिं = त्वत्कर्तृकां रक्षां हूमहे = आह्वयामः, प्रार्थयाम इति यावत् ॥ १० ॥

एवमेकानुपूर्वीगतमेकस्मिन् देशे एकस्मिन् काले एकस्यामवस्थायां वा मधुच्छन्दसा दृष्टम् ऋकूशतं समाप्तम्। उत्तरम् ऋग्द्वयम् आनुपूर्व्यन्तरस्थे कालान्तरादौ यज्ञार्थमागतमिन्द्रं दृष्ट्वा 'आतू न' इत्यृग्द्वयेन तमस्तुवदिति ज्ञातव्यम्।

(ऋम.-१०१)

आतू न इन्द्र कौशिक मन्दसानः सुतं पिब।
नव्यमायुः प्रसूतिर कृधी सहस्रसामृषिम् ॥ ११ ॥

(ऋगर्थोद्धारः) - आतू न इति ॥ हे इन्द्र = परमेश्वर, कौशिकः हिरण्मयाण्डकोशे भवः मन्दसानः = मन्दो मदः, अनुस्वारः आधिक्यार्थः। 'आधिक्येऽधिकम्' इति सूत्रात्। नित्यसुखमिति यावत्। तस्य सानो लाभो यस्यासौ तथोक्तः। यद्वा, मन्दस्य सुखस्य सानः सम्भजनं, नित्यं भजनमिति यावत्। यस्यासौ मन्दसानः। पक्षद्वयेऽपि नित्यसुखीत्यर्थः। सः नोऽस्माकं सुतं = सोमं, तु = विशेषेण, क्षिप्रमिति यावत्। आपिब। नव्यं = 'णु स्तुतौ' सार्थकमस्याऽयुरिति सर्वैः स्तुत्यम् आयुश्च वः, प्र = प्रकर्षेण, सु = सम्यक्, अतिप्रकर्षेणेति यावत्। तिर= देहि। मां सहस्रसां= सोमपा-शब्दवदयमाकारान्तपुल्लिङ्गस्येयं द्वितीया। सहस्रलाभयुक्तम् ऋषिं= ज्ञानिनं च, कृधि = कुरु। प्रसिद्धेन्द्रस्य तु कौशिकत्वं जन्मसमये मात्रा अदित्या कुशैर्गृहीतत्वात्। यद्वा, कुशिकस्य पुत्रो गाधी स चेन्द्रः। तथा च गाधेः कौशिकत्वात् तद्रूपस्येन्द्रस्यापि कौशिकत्वं द्रष्टव्यम् ॥ ११ ॥

(ऋ.म.-१०२)

परिं त्वा गिर्वणो गिरः इमा भवन्तु विश्वतः ।

वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ १२ ॥ २० ॥ १० ॥

(ऋगर्थोद्धारः) - परि त्वेति ॥ हे गिर्वणः = गीर्भिः स्तुत !, इमाः = मदीयाः, गिरः = स्तुतिरूपाः वाचो वृद्धः पूर्णः आयो लाभो यस्यासौ वृद्धायुः तं = पूर्णलाभवन्तं, त्वा = त्वां विश्वतः = सर्वदा परि = परितोऽतिशयेन भवन्तु। सर्वदाऽतिशयेन त्वद्विषया भवन्तु। किञ्च, वृद्धयः= वृद्धिरूपाः त्वद्वृद्धिप्रकाशिन्यो जुष्टाः = स्तुतिरूपेण त्वया सेव्याः नो गिरः जुष्टयो अनु = त्वत्सेवारूपाश्च भवन्तु सन्त्वित्यर्थः ॥ १२ ॥

सूक्तम् - ११

माधुच्छन्दसः । इन्द्रः । गायत्री ।

'इन्द्रं विश्वा' इत्यष्टा ऋचो आनुपूर्व्यन्तरस्थाः तपःकरणावस्थायां मधुच्छन्दसा दृष्टा इति ज्ञातव्यम् ।

(ऋ.म.-१०३)

इन्द्रं विश्वां अवीवृधन् समुद्रव्यंचसं गिरः ।

रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १ ॥

(ऋगर्थोद्धारः) - इन्द्रं विश्वा इति ॥ समुद्रव्यचसं = सम्यग् उद्राणाम् उद्रिक्ताणां गुणानां व्यचो व्यक्तिर्यस्यासौ समुद्रव्यचाः तं समुद्रव्यचसं, रथिनां रथितमं = अतिशयेन रथिनं, वाजानां= अन्नानां, पतिं सत्पतिं= पतिमिन्द्रं विश्वा गिरः = सर्वा वेदवाचोऽवीवृधन्= प्रकाशितवत्यः॥१॥

(ऋ.म.-१०४)

सख्ये तं इन्द्र वाजिनो मा भेम शवसस्पते ।

त्वामभि प्र णोनुमो जेतारमपराजितम् ॥ २ ॥

(ऋगर्थोद्धारः) - सख्ये त इति ॥ हे शवसस्पते = शवस्य सुखस्य बलस्य वा पते इन्द्र ! सख्ये सति = त्वदनुग्रहे सतीति यावत्। वाजिनः = युद्धवन्तो वयं मा भेम = भैष्म। भयाभावसम्पादकत्वदनुग्रहार्थं च सर्वेषां परेषां जेतारं स्वयमपराजितं त्वाम् अभिप्रणोनुमः = प्रकर्षेण पुनः पुनः स्तुमः ॥ २ ॥

(ऋ.म.-१०५)

पूर्वीरिन्द्रस्य रातयो न वि दंस्यन्त्यूतयः ।

यदि वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३ ॥

(ऋगर्थोद्धारः)- पूर्वीरिन्द्रस्येति ॥ इन्द्रस्य ते तव रातयः = दानानि पूर्वीः = पूर्वाः प्रथमाः, उत्तमा इति यावत् । ऊतयश्च= रक्षाश्च पूर्वीः प्रथमाः, महत्त्वादिति यावत् । किञ्च, रातयः ऊतयश्च न विदस्यन्ति= न विदस्यन्ते । दसिर्विभेदनार्थः । न विभिद्यन्ते । क्षयार्थो वा । न नश्यन्ति । स इन्द्रः ईशो यदि गोमतो वाजस्य= षष्ठी द्वितीयार्थे । गोमदन्नं, तद्युक्त-मन्त्रमिति यावत्। मघं= यशश्चेत्यादिकं स्तोतृभ्यो मंहते= मंहतिर्दानार्थः। ददाति तर्हि ताः रातयः ऊतयश्च पूर्वीरिति सम्बन्धः। अस्माकं गोमदन्नादिकं दत्वा रक्षाकरणे त्वद्दानानामेव महत्त्वेन सर्वोत्तमत्वं वयं जानीम इत्याशयः ॥ ३ ॥

(ऋ.म.-१०६)

पुरां भिन्दुर्युवा कविरमितौजा अजायत ।

इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ४ ॥

(ऋगर्थोद्धारः) - पुरां भिन्दुरिति ॥ पुरां = शरीराख्यपुराणां भिन्दुः भेत्ता । युवा = नित्ययौवनोपेतः, कविः = सर्वज्ञः, अमितमोजो यस्यासौ अमितौजाः, विश्वस्य कर्मणो धर्ता = सर्वकर्मणां प्रेरको वज्री = ज्ञानानन्दरूपः, पुरुभिः = ब्रह्मादिभिः स्तुतः इन्द्रः परमेश्वरः यज्ञे अजायत= अभिव्यक्तोऽभवत् । प्रसिद्धेन्द्रपक्षे तु - पुरां शम्बरासुराख्यपुराणां भिन्दुः भेत्तेत्यादि यथायोग्यं व्याख्येयम् ॥ ४ ॥

(ऋ.म.-१०७)

त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ ५ ॥

(ऋगर्थोद्धारः) - त्वं वलस्येति ॥ अत्र वलतिः परिवर्तनार्थः । तथा च ज्ञानस्य यद् अर्थवैपरीत्येन विषयीकरणं स वल इत्युच्यत इत्यर्थः । हे अद्रिवः = मुख्यप्राणप्रवर्तक त्वं गोमतः = वेदवाक्यस्य सम्बन्धिनो वलस्य= मिथ्याज्ञानस्य, वेदवाचां विपरीतार्थविषयीकारिण्या बुद्धेरिति यावत् । यद् बिलं= मूलकारणमज्ञानं तद् अपावः= अपावृतवानसि । गुरुद्वारा [1]तत्त्वमार्गप्रवृत्तिदर्शनेनोत्सारितवानसि । तथा च मूलकारणनाशेन मिथ्याज्ञाननाशानन्तरं देवाः = सात्विकप्रकृतयः पुरुषाः [2]अभिभ्युषः = द्वितीया प्रथमार्थे । अबिभीवांसः संसारभयापेताः तुज्यमानासः = त्वयैव सन्मार्गे प्रेर्यमाणाश्च सन्तः त्वाम् आविषुः । निर्गुणनिराकारत्वादि-दुष्टगिरा दैत्यैराच्छिद्यमानं त्वां गुणपूर्णत्वादिप्रतिपादकसद्गिरा अरक्षन्निव अयोग्येष्वनुपदेशेन सच्छिष्येषु व्याख्यानेन च प्रकाशितवन्त इति यावत्।

प्रसद्धेन्द्रपक्षे त्वित्थं व्याख्येयम् । तथा हि । अश्वमेधेऽश्वस्येव गोसवाख्ययज्ञविशेषे गवामपि भूसञ्चारस्याऽवश्यकत्वात् । सरमया

१. 'तत्त्वमार्गप्रदर्शनेन' घ.। २. 'आ भिभ्युषः' घ.।

[1]दिवशुन्या रक्षिताः सत्य इन्द्रस्य गावो जगति चर्तुं समुत्सृष्टास्तदा बलपूर्वकाः दैत्याः सरमां प्रत्यागत्य 'त्वमस्माकं स्वसाऽसि । अतस्त्वया तूष्णीं स्थातव्यम् । तथा त्वया गोपयः पीत्वा तदुच्छिष्टं क्रियताम् । पश्चात् ताः गावः शुना त्वया स्पृष्टत्वाद् यज्ञे अयोग्या भविष्यन्ति' इत्येवं सरमां प्रलोभ्य गा अपहृतवन्तः । अत एव स्वसृत्वादिमृषोक्त्या ते पणय इत्युच्यन्ते । पश्चात् सरमा तदुक्तं श्रुत्वा गोपयः पीत्वोच्छिष्टं कृतम् । अनन्तरं सा सरमा इन्द्रं प्रत्यागत्य दैत्यैर्गा अपहृता इत्युवाच तच्छ्रुत्वेन्द्रः सरमां प्रत्युवाच । किमिति ? त्वदानुकूल्याभावे कथं दैत्या अपहरिष्यन्ति? अतस्त्वयि कापट्यं वर्तत इति । तथोक्तेऽपि नैवास्ति मयि कापट्यमिति वादिनीं सरमां प्रति क्रुद्धःसन् 'सत्यं ब्रूहि' इति पदा ताडितवानिन्द्रः । अनन्तरं पदा ताडितायाः भीतायाः सरमायाः वक्त्रात् पीतं पयो बहिर्निःसृतम् । तदृष्ट्वाऽनया गोपय उच्छिष्टं कृतमिति ज्ञातवान् । पश्चात् सा सरमा 'मयाऽऽगः कृतं तत्क्षम्यतां' इतीन्द्रं शरणं जगाम । पश्चात् तां शरणागतां सरमां प्रति देवेन्द्र उवाच । किमिति ? त्वमस्म[2]दूतीभव । भूत्वा च त्वमेव पणिनां बलपूर्वकाणां सकाशं गच्छ । गत्वा च ता गावः कुत्र स्थापिताः सन्ति ? तद् ज्ञात्वाऽस्मान् प्रति ब्रूहीति । एवमिन्द्रेणोक्ता सा सरमा दैत्यानां समीपं गत्वा यत्र ता गावो दैत्यैर्निरुद्धा आसन् तं गिरिकूटाधस्तनं विवररूपं प्रदेशं ज्ञात्वाऽऽगत्येन्द्रायोवाच । एवं सरमामुखतो यत्र गावो निरुद्धास्तं गिरिकूटं ज्ञात्वा तत्र गत्वा तं भित्त्वा तस्माद्गिरिकूटाद् गावो बहिर्निस्सारिताः । तद् ज्ञात्वा दैत्या असहमाना युद्धार्थम् आगताः ते च सर्वे इन्द्रेण निहताः । अनन्तरं गोसवाख्यं यज्ञं चकारेन्द्र इत्यस्तीतिहासः । तमिमं हृदि निधायोच्यते ॥

१. देवशुन्या' क.। २. 'दूता' घ.।

त्वं बलस्येति ॥ हे अद्रिवः ! = अद्रीणां छेदक ! त्वं गोमतः = गोभिर्युक्तस्य तदपहारकस्य, वलस्य = वबयोरभेदाद् बलस्य दैत्यस्य बिलं तेन यत्र गावो निरुद्धा आसन् तद् बिलं = गिरिकूटाधस्तनं विवरम्, अपावः = अपाहृतवानसि । तद्भित्वा गाः बहिः [1]निष्कासितवानसीति यावत् । स्वस्पर्शेन गाः शुद्धाः कृत्वा, गोसवनेष्टमिति शेषः । तदसहमाना बलपूर्वका दैत्याः यदा युद्धार्थमागतास्तदा देवाः तुज्यमानासः = माऽस्तु वो भयं युद्धार्थमागन्तव्यमिति त्वयैव प्रेर्यमाणाः अबिभ्युषः भयरहितास्सन्तस्त्वाम् आविषुः = स्वपतिं त्वां परितो जुगुपुरित्यर्थः ॥ ५ ॥

(ऋ.म.-१०८)

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् ।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥ ६ ॥

(ऋगर्थोद्धारः) - तवाहमिति ॥ हे शूर= इन्द्र ! सर्वदा त्वाम् आवदन्= सम्यक् स्तुवन् अहं तव रातिभिः = दानैर्निमित्तैः । त्वया मां प्रति बाह्याभ्यन्तरधनसम्पत्तेर्दत्तत्वादिति यावत् । तत्सार्थक्यकरणाय सिन्धुं = नदीं प्रति, आयम् = आगमम् । आगत्य च तत्र बाह्याभ्यन्तरयज्ञदीक्षार्थम् उद्यतोऽस्मीति शेषः ।

'जपस्नानहुतव्याख्यायज्ञपूर्वाखिलाः क्रियाः ।
अनन्तफलदाः प्रोक्ताः नदीतीरे तु याः कृताः ॥'

इति हरिवंशवचनात् । यद्वा, सिन्धुं प्रत्यागत्य तत्र वेदपदैः त्वाम् आवदंश्च जातोऽस्मीति योज्यम् । हे गिर्वणः = गिरा सम्भजनीय, वेदगिरोदितेति यावत् । तस्य ते तं त्वां ये विदुस्ते कारवः = कर्मकर्तारः, ऋत्विज इति

१. 'निष्कृतवानसि' इति 'ग' पाठः ।

यावत् । तत्र नदीतीरे क्रियमाणे बाह्याभ्यन्तरयज्ञे उपातिष्ठन्त = मन्त्रैस्त्वाम् अपूजयन्नित्यर्थः 'उपान्मन्त्रकरणे' (पा.सू.१-३-२५) इति सूत्रात् ॥ ६ ॥

(ऋ.म.-१०९)

मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः ।
विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥ ७ ॥

(ऋगर्थोद्धारः) - मायाभिरिति ॥ हे इन्द्र ! त्वं मायिनं = शक्तिमन्तं शुष्णं = पीडनेन प्रजानां शोषकं, वृत्रासुरमिति यावत् । मायाभिः शक्तिभिः। अवातिरः = तिरतिर्वधार्थः, हतवानसि । अध्यात्मं तु - महेन्द्र ! परमेश्वर ! त्वं मायिनं= मोहकत्वादिमहाशक्तियुक्तं, शुष्णं= ज्ञानभक्त्यादिगुणशोषकमज्ञानं मायाभिः अवातिर इति योज्यम् । किञ्च, ये मेधिराः = मेधे यज्ञे अतिशयेन रताः मेधरा इति भाव्ये अकारापेक्षया तृतीयस्य इकारस्यातिशयार्थत्वात् । ये च ते तस्य तं त्वां विदुः । तेषां श्रवांसि= श्रूयन्त इति श्रवांसि, वेदादिविद्या इति यावत् । उत्= उच्चैस्तरां तिर = धातूनामनेकार्थत्वाद् देहि ॥ ७ ॥

(ऋ.म.-११०)

इन्द्रमीशानमोजसाऽभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः
॥ ८ ॥ २१ ॥ ११ ॥ ३ ॥

(ऋगर्थोद्धारः) - इन्द्रमीशानमिति ॥ यस्येन्द्रस्य सहस्रम् उत वा ततोऽपि भूयसीः = भूयस्यो रातयः दानानि सन्ति । भक्तं प्रति देयानि यथेष्टं सन्तीति यावत् । तम् । ओजसा वै = ओजःप्रभृतिभिर्गुणैः सहेति शेषः । ईशानमिन्द्रं त्वां स्तोमाः = स्तुतिविशेषाः अभ्यनूषत= सदा स्तुवन्तीत्यर्थः ।

करणे कर्तृत्वोपचारः। ऋत्विजः स्तोमैः। गुणाः त्वां च अस्तुवन्। गुणसहितं त्वामस्तुवन् इति तात्पर्यम्॥ ८॥

सूक्तम् - १२

मेधातिथिः काण्वः। अग्निः, ६ प्रथमपादस्य (निर्मथ्याहवनीयौ) अग्नी। गायत्री।

(ऋ.म.-१११)

अ॒ग्निं दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम्।
अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु॑म्॥ १॥

(ऋगर्थोद्धारः)- उत्तरैः शतर्चैः मेधातिथिरग्र्यादिनामकमच्युतमस्तौदिति द्रष्टव्यम्। **अग्निं दूतमिति**॥ द्वादशर्चमेतदाग्नेयं सूक्तम्। वयं दूतं= यज्ञभागानयनार्थं देवैः सम्प्रेष्यमाणत्वाद् अग्निर्दूतः। विष्णुस्तु तत्प्रार्थितकृत्त्वाद् उपचारेण दूत इव, तं होतारं= अग्निसंस्थेन रूपेण होतरि विशेषतः सन्निहितत्वाद् विष्णुः होता। प्रसिद्धाग्निस्तु होतृदेवतात्वादिति ज्ञेयम्। विश्वं वेत्तीति विश्ववेदाः तं विश्ववेदसं, अस्य= प्रमाणप्रमितस्य यज्ञजातस्य, सुक्रतुं = सम्यग्ज्ञानिनमग्निं प्रसिद्धं तन्नामानं जामदग्र्यं च, वृणीमहे = प्रार्थयामह इति यावत्॥ १॥

(ऋ.म.-११२)

अ॒ग्निम॑ग्निं हवी॑मभिः॒ सदा॑ हवन्त वि॒श्पति॑म्।
ह॒व्यवा॑हं पुरुप्रि॒यम्॥ २॥

(ऋगर्थोद्धारः) - अग्निमग्निमिति॥ ऋत्विजो विश्पतिं = विशां प्रजानां पतिं (हव्यवाहं) हव्यं वहति देवान् प्रापयतीति हव्यवाट् तं हव्यवाहम्। (पुरुप्रियं) पुरु = सम्पूर्णं प्रियं सुखं यस्यासौ पुरुप्रियः तम् अग्निमग्निं

"तेभ्योऽग्नयः समभवन् चत्वारिंशाच्च पञ्च च।
त एकोनपञ्चाशत् साकं पितृपितामहैः॥
वैतानिके कर्मणि च नामभिर्ब्रह्मवादिभिः।
आग्नेय्या इष्टयो यत्र निरूप्यन्तेऽग्रयस्तु ते"॥ इति

वचनेनाग्नीनामनेकत्वात् तत्र वीप्सायां द्विरुक्तिर्युक्ता। जामदग्र्यरूपिणो विष्णोस्तु रूपबहुत्वादिति ज्ञातव्यम्। एवं चाग्निमग्निमित्यस्य सर्वानग्नीनित्यर्थः। हवीमभिः = ऋग्रूपैराह्वानैः, सदा हवन्त = आह्वयन्त, आहूतवन्तः॥ २॥

(ऋ.म.-११३)

अग्ने॑ दे॒वाँ इ॒हा व॑ह जज्ञा॒नो वृ॒क्तब॑र्हिषे।
असि॒ होता॑ न॒ ईड्यः॑॥ ३॥

(ऋगर्थोद्धारः) - अग्ने देवानिति॥ हे अग्ने! जज्ञानः = व्यज्यमानः, अस्मद्यज्ञे व्यज्यमान इति यावत्। त्वं वृक्तबर्हिषे = वृक्तं [1]प्रस्तृतं, दर्भादिना प्रसारितमिति यावत्। बर्हिः = घृतस्थानात् पश्चिमतो विद्यमानं देवोपवेशनयोग्यं स्थानं बर्हिः तद्येनासौ वृक्तबर्हिः यजमानः तस्मै तत्प्रयोजनाय देवान् इह = यज्ञे आवह। यतस्त्वं होताऽसि नोऽस्माकमीड्यः = स्तुत्यश्चासि॥ ३॥

(ऋ.म.-११४)

ताँ उ॒शतो॒ वि बो॑धय॒ यद॑ग्ने॒ यासि॑ दू॒त्य॑म्।
दे॒वैरा स॑त्सि ब॒र्हिषि॑॥ ४॥

(ऋगर्थोद्धारः) - तामुशत इति॥ हे अग्ने! यत्= यस्माद् दूत्यं=

१. 'विस्तृतम्' घ.।

दूतस्य भावं दूतस्य कर्म वा, यासि = प्रतिपद्यसे, देवानां दूतो यत इति यावत्। तस्माद् उशतः = आगन्तुमिच्छतः, तान् = सुरान्, विबोधय = विज्ञापय। अमुष्य यज्ञो युष्माभिर्गन्तव्य इति। एवं त्वद्विबोधनेन देवेष्वागतेषु सत्सु तैः देवैः सह, बर्हिषि = घृतस्थानात् पश्चिमभागे आसत्सि = आसीदसि, उपवेक्ष्यसीत्यर्थः ॥ ४ ॥

(ऋ.म.-११५)

घृताहवन दीदिवः प्रति ष्म रिषतो दह।
अग्ने त्वं रक्षस्विनः ॥ ५ ॥

(ऋगर्थोद्धारः) - घृताहवनेति ॥ घृतम् आ सम्यक् यज्ञयोग्यं हवनं हविर्यस्य स घृताहवनः तस्य सम्बुद्धिः हे घृताहवन! दीदिवः = देदीप्यमान! अग्ने त्वं रिषतः = 'रिष हिंसायां' अन्तर्णीतण्यर्थोऽयम्। हिंसकान्, यज्ञघ्नानिति यावत्। रक्षस्विनः = रक्षांसि येषां स्वामितया सन्ति तान्, रक्षसां सम्बन्धिनो जनान्, प्रतिदह स्म = प्रतिदहैव च ॥ ५ ॥

(ऋ.म.-११६)

अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा।
हव्यवाड् जुह्वास्यः ॥ ६ ॥ २२ ॥

(ऋगर्थोद्धारः) - अग्निनाऽग्निरिति ॥ जुह्वास्यः = जुहूः होमाधिकरणम् आस्यं मुखं यस्यासौ तथोक्तः, कविः = सर्वज्ञः, गृहाणां पतिर्गृहपतिः गार्हस्थ्यापादकः, युवा = तरुणो हव्यराट् अग्निना = परेशेन त्वया त्वदनुग्रहेण त्वत्प्रेरणया वा, समिध्यते= सन्दीप्तो भवति। अग्न्यादीनां दीप्त्यादि-गुणप्रदस्त्वमिति यावत्।

प्रसिद्धाग्निविषये तु - यथायोग्यं कवित्वादिगुणोपेतो जुह्वास्यः =

होमाधिकरणीभूतास्यः आहवनीयोऽग्निः अग्निना = मथितेन गार्हपत्याग्निना सह समिद्ध्यत इति योज्यम् ॥ ६ ॥

(ऋ.म.-११७)

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे।
देवममीवचातनम् ॥ ७ ॥

(ऋगर्थोद्धारः) - कविमग्निमिति ॥ मेधातिथिः स्वात्मानं प्रति वक्ति। कविं = सर्वज्ञं, सत्यधर्माणं = सत्याः साधवो धर्माः गुणाः यस्यासौ सत्यधर्मा तम्। अमीवचातनं = अमीवं रोगं, तत्कार्यदुःखमिति यावत्। तत् चातयति नाशयति अपसारयतीति वाऽमीवचातनः तम् अग्निदेवम् अध्वरे उपस्तुहि ॥ ७ ॥

(ऋ.म.-११८)

यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति।
तस्य स्म प्राविता भव ॥ ८ ॥

(ऋगर्थोद्धारः) - यस्त्वामिति ॥ हे अग्ने देव! यो हविष्पतिः = यजमानः दूतं त्वा = त्वां सपर्यति = पूजयति। तस्य यजमानस्य प्र = प्रकर्षेण अविता = रक्षिता भव ॥ ८ ॥

(ऋ.म.-११९)

यो अग्निं देववीतये हविष्माँ आ विवासति।
तस्मै पावक मृळय ॥ ९ ॥

(ऋगर्थोद्धारः) - यो अग्निमिति ॥ यो हविष्मान् = यजमानः, देववीतये= यज्ञं प्रति देवानां वीतये 'वी गति' इत्यादिधातोः आगमनाय परत्र देवतासामीप्यप्राप्तिरूपफलाय वा, अग्निं त्वाम् अविवासति = आवासयति,

आधानं करोतीति यावत् । पूजयति च । हे पावक ! त्वं तस्मै, चतुर्थी द्वितीयार्थे । तं यजमानं सर्वदा मृळय = सुखय ॥ ९॥

(ऋ.म.-१२०)

स नः पावक दीदिवोऽग्ने देवाँ इहा वह ।
उप यज्ञं हविश्च नः ॥ १० ॥

(ऋगर्थोद्धारः) - स नः पावकेति ॥ पुनातीति पावकः । तस्य सम्बुद्धिः हे पावक = अग्ने ! विष्णो ! दीदिवः = देदीप्यमानस्त्वं नोऽस्मदीयं यज्ञं नो हविश्च प्रति त्वत्पूजारूपयज्ञादिविषये, तत्सिद्ध्यर्थमिति यावत् । इह शरीरे देवान् इन्द्रियाभिमानिनो देवान् उपाहव = विशेषतः सन्निहितान् कुरु । प्रसिद्धाग्नौ तु हविर्भुजो देवान् इह यज्ञे उपावहेति योज्यम् ॥ १०॥

(ऋ.म.-१२१)

स नः स्तवान आ भर गायत्रेण नवीयसा ।
रयिं वीरवतीमिषम् ॥ ११ ॥

(ऋगर्थोद्धारः) - स नः स्तवान इति ॥ हे अग्ने ! नवीयसा = ईयसुनः अतिशयार्थत्वाद् अतिनूतनेन वेदस्यापौरुषेयत्वेनेदानीं वेदद्रष्ट्रा मया दृश्यमानेन, व्यज्यमानेनेति यावत् । गायत्रेण साम्ना, स्तवानः = स्तूयमानः स त्वं नोऽस्मभ्यं, रयिं = वित्तं, वीरवतीं = पुत्रयुक्तां, अथवा वीरं भावप्रधानो निर्देशः । वीर्यं देहादिदार्ढ्यमिति यावत् । तद्युक्ताम् इषम् = अन्नं च, आभर = आहर देहीति यावत् । 'हृग्रहोर्भश्छन्दसि' (वा. ५९२) इति हकारस्य भकारः ॥ ११ ॥

(ऋ.म.-१२२)

अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः ।
इमं स्तोमं जुषस्व नः ॥ १२ ॥ २३ ॥ १२ ॥

(ऋगर्थोद्धारः) - अग्ने शुक्रेणेति ॥ हे अग्ने ! शुक्रेण = शुभ्रेण, ज्वलतेति यावत् । शोचिषा = तेजसा युक्तः त्वं विश्वाभिः = सर्वाभिः, देवहूतिभिः = देवाह्वानैः सह, आहूतैर्देवैः सहेति यावत् । नोऽस्माकमिमं स्तोमं = स्तुतिं जुषस्व = सेवस्व ॥ १२ ॥

सूक्तम् -१३

मेधातिथिः काण्वः (आप्रीसूक्तम् - अग्निरूपा देवताः)
१ इध्मः, समिद्धोऽग्निर्वा, २ तनूनपात्, ३ नराशंसः, ४- इळः, ५ बर्हिः,
६ देवीर्द्वारः, ७ उषासानक्ता, ८ दैव्यौ होतारौ प्रचेतसौ,
९ तिस्रो देव्यः सरस्वतीळाभारत्यः, १० त्वष्टा, ११ वनस्पतिः,
१२ स्वाहाकृतयः । गायत्री ।

(ऋ.म.-१२३)

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १ ॥

(ऋगर्थोद्धारः) - सुसमिद्ध इति ॥ द्वादशर्चमेतदाप्रीसूक्तम् । प्रत्यृचं भिन्नदेवताकम् । यथोक्तमनुक्रमणिकायाम् । सुसमिद्ध इतीध्मः समिद्धो वाऽग्निः तनूनपान्नाराशंस इळोबर्हिर्देवीर्द्वार उषासानक्तादैव्याहोतारौ प्रचेतसौ । तिस्रो देव्यः । सरस्वतीळाभारत्यः त्वष्टा वनस्पतिः स्वाहालङ्कृतिरिति प्रत्यृचं देवता एतदाप्रीसूक्तमिति ॥

हे होतः ! पावक = अग्ने ! सुसमिद्धः = अतिसुदीप्तः त्वं नो हविष्मते = अस्मद्यजमानाय, तादर्थ्ये चतुर्थी । देवान् आवह । आहूय यक्षि च = यज च । 'यज देवपूजासङ्गतिकरणदानेषु' इति धातोः अस्मद्दत्तं हविरादिकं तेभ्यो देहीति । देवानावहेति बहुवारमुक्तिरादरार्थेति ज्ञातव्यम् ॥ १ ॥

(ऋ.म.-१२४)

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥ २ ॥

(ऋगर्थोद्धारः) **-मधुमन्तमिति** ॥ हे कवे तनूनपात् ! इदं नामाग्निविशेषस्य प्रसिद्धम् । विष्णुस्तु शरीरस्य नप्ता पौत्रः । नपाच्छब्दस्य पौत्रपर्यायत्वात् । शरीराश्रितत्वेन वागिन्द्रियं शरीरस्यापत्यं ततः परमेश्वरस्य व्यज्यमानतया तत्पुत्र इत्युच्यते । तथा च हे तनूनपात् = तन्वाः पौत्र ! त्वं वीतये= वी गत्यादौ पठ्यते । यजमानस्य देवतालोकसामीप्यप्राप्त्यै नोऽस्मदीयं मधुमन्तं = मधुशब्दो मधुररसवद् हविरादिपरोऽभिप्रेतः तद्वन्तं यज्ञम् अद्यैव देवेषु कृणुहि = कुरु, देवान् प्रापयेति यावत् ॥ २ ॥

(ऋ.म.-१२५)

नराशंसमिह प्रियमस्मिन् यज्ञ उपह्वये ।
मधुजिह्वं हविष्कृतम् ॥ ३ ॥

(ऋगर्थोद्धारः) **- नरासंशमिति** ॥ इह = सर्वप्राणिनां शरीरेषु प्रियं मधुमती स्वादुरसवती जिह्वा यस्य तं मधुजिह्वं हविष्कृतं = 'न ऋते' इति श्रुतेः भगवतः सर्वक्रियाकर्तृत्वेन हविष्कृत्त्वम् अग्नेस्तु पचनकरणत्वेन करणे कर्तृत्वोपचारेण हविष्कृत्त्वं द्रष्टव्यम् । नराशंसं = 'नरैराशंस्यते स्तूयत इति नराशंसो विष्णुः तन्नामानमग्निविशेषं चास्मिन् यज्ञेऽहम् उपह्वये = आह्वयामि ॥ ३ ॥

(ऋ.म.-१२६)

अग्ने सुखतमे रथे देवाँ ईळित आ वह ।
असि होता मनुर्हितः ॥ ४ ॥

(ऋगर्थोद्धारः) **- अग्ने सुखतम इति** ॥ हे अग्ने ! ईळितः त्वं सुखतमे रथे= सप्तमी तृतीयार्थे । सुखतमेनातिशयेन सुखकारिणा रथेन देवान् आवह । यस्मात् त्वं होता = होतृसंस्थोऽसि मनुर्हितश्चासि = मनुशब्दपर्यायो मनुस्शब्दः । तथा च मनुसां ज्ञानिनां देवानां तेभ्य इति यावत् । हितकरश्चासि । अध्यात्मं तु - सुखतमे रथे देहे इन्द्रियदेवान् आवह विशेषतः । सन्निहितान् कुर्विति योज्यम् ॥ ४ ॥

(ऋ.म.-१२७)

स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः ।
यत्रामृतस्य चक्षणम् ॥ ५ ॥

(ऋगर्थोद्धारः) **- स्तृणीतेति** ॥ हे मनीषिणः = बुद्धिमन्तः ऋत्विजः, यत्र = स्थाने, अमृतस्य = देवतासमुदायस्य, चक्षणं = दर्शनं भवति तत् घृतपृष्ठं = घृतपात्रं यत्र स्थाप्यते तत्स्थानात् पश्चिमतो वर्तमानं देवस्थानम्, देवत्स्थाने आनुषक् = सर्वतो बहिस्तृणीत = विस्तारयत । देवैरागत्योपवेशनायेति शेषः । अस्यामृचि अनुक्रमणिकानुसारेण बर्हिर्नाम्नी काचिद्देवता [1]प्रतिपाद्यत इति ज्ञातव्यम् ।

अध्यात्मं तु - हे मनीषिणोऽधिकारिणः ! यत्र= यस्मिन् मनसि अमृतस्य= नित्यामरणधर्मिणो विष्णोः, चक्षणं= साक्षात्कारो भवति तत् घृतपृष्ठं = घृतः शुद्धो विष्णुः पृष्ठे यस्य मनोरूपस्थानस्योपरि वर्तते । तद्विषयतया प्रतीयत इति यावत् । तद्घृतपृष्ठं देवाभिव्यक्तिस्थानं तस्मिन्निति यावत् । मनसि, बर्हिः= वेदवाक्यं स्तृणीत- तेन तव मनस्संयोजयत वेदवाक्येन मनस्सम्बन्धं कुरुतेत्यर्थः । भगवद्व्यक्तिस्थानभूतेन मनसा वेदविचारं कुरुतेति

---

१. 'प्रतिपाद्येति' घ. ।

भावः । मनसि भगवद्व्यक्त्यर्थं मनसा वेदार्थो विचारयितव्य इति फलितोऽर्थः ॥ ५ ॥

(ऋ.म.-१२८)

वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः ।
अद्यानूनं च यष्टवे ॥ ६ ॥ २४ ॥

(ऋगर्थोद्धारः) - विश्रयन्तेति ॥ ऋतवृधः = ऋतरूपेण यथार्थज्ञानरूपेण हरिणा वृधः वृद्धाः समृद्धा यास्ता ऋतवृधः । वृध्शब्दस्येदं बहुवचनम् । असश्चतः = सश्चतिः सङ्गार्थः । असश्चतोऽसङ्गाः अप्रतिबद्धाः गतिमत्यः, द्वारः = 'द्वारमात्रं तु सा देवी ब्रह्मणो हि मुमुक्षुतः' इति प्रयोगात् । द्वारशब्दः श्रियो वाची, षष्ठ्येकवचनमिदम् । देविशब्दश्च दासीपरः । दिव् क्रीडेत्यादिधातोः देवशब्दस्य गतिमत्त्वार्थत्वाद् गतिरनुगतिश्च भवति। एवं च द्वारश्रियः देवीः अनुगतिमत्यः दास्य इति यावत् । नदीदेवताः अद्य = अस्मिन्नहनि तथा नूनं = निश्चितं, अद्यैवेति यावत् । यष्टवे= यष्टुं यजमानरूपप्रयोजनाय नो मानसयज्ञे बाह्ययज्ञे चेति यावत् । विश्रयन्तां= वर्तन्तां, सन्निहिता भवन्तामित्यर्थः ।

भगवत्पक्षे - ऋतवृधः = ऋतेन सत्येन अनुचरतो वृधो वृद्धाः नित्यवृद्धाः, असश्चतः = असङ्गाः द्वारः, प्रथमाबहुवचनम् । मुमुक्षतो साक्षाद् द्वारभूताः मार्गभूताः 'अगम्यत्वाद्धरिस्तस्मिन्नाविष्टो मुक्तिदो भवेत् ।'

इति वचनेन गुर्वादिषु स्थित्वा मोक्षमार्गोपदेशेन, मोक्षे मुख्यसाधनभूता इति यावत् । देवीः क्रीडादिगुणवत्यः । अद्या नूनं च यष्टवे विश्रयन्तामित्यर्थः । भगवतः स्त्रीरूपत्वात् स्त्रीलिङ्गप्रयोगः । बहुरूपत्वाद् बहुवचनं युक्तमिति ज्ञातव्यम् ॥ ६॥

(ऋ.म.-१२९)

नक्तोषासा सुपेशसाऽस्मिन् यज्ञ उपह्वये ।
इदं नो बर्हिरासदे ॥ ७ ॥

(ऋगर्थोद्धारः) - नक्तेति ॥ नक्तेति रात्रिदेवता, उषा इत्यपररात्रिदेवतेति प्रसिद्धम् । भगवान् पापादिना अक्तः सङ्गतो न भवतीति नक्तः । पररूपत्वम् । स्त्रीरूपत्वात् स्त्रीलिङ्गशब्दवाच्यत्वं युक्तम् । प्रकाशरूपत्वाद् उषाः, तथाच अहं सुपेशसा = सुपेशसौ सुरूपे सुभद्रे, नक्तोषसा = नक्ता च सा उषाश्च नक्तोषसौ, नोऽस्माकम् अस्मिन् इदं बर्हिरस्मिन् बर्हिषि आसदे- आसदनाय संस्थित्यै, उपवेशनायेति यावत् । उपह्वये= उपाह्वयामि ॥७॥

(ऋ.म.-१३०)

ता सुजिह्वा उपह्वये होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमम् ॥ ८ ॥

(ऋगर्थोद्धारः) - ता सुजिह्वेति ॥ सुजिह्वा शोभना जिह्वा ययोस्तौ सुजिह्वौ । कवी = दैव्यौ, दूतत्वेन देव सम्बन्धिनाविति यावत् । होतारौ = होतृगौ गार्हपत्याहवनीयनामकौ वह्नी उपह्वये । आगत्य च ता तौ इमम् = अस्मदीयं यज्ञं = यज्ञभागं यक्षतां = यजताम् । देवेषु प्रयच्छताम् । अध्यात्मं - आत्मान्तरात्मरूपेण द्विरूपो हरिरिह द्विवचनविषयः । ताविमं यज्ञं देवेषु यक्षतामिति तु भगवति । वह्निकर्तृकव्यापारस्यापि 'न ऋते' इति श्रुत्या भगवत्कर्तृकत्वावगमाद् युक्तमिति ज्ञातव्यम् ॥ ८ ॥

(ऋ.म.-१३१)

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ।
बर्हिः सीदन्त्वस्रिधः ॥ ९ ॥

(ऋगर्थोद्धारः) - इळेति ॥ 'ईड्यत्वाद् इळा = श्रीः, सरस्वती = ब्रह्मभार्या मही = भूरूपा लक्ष्मीः । यद्वा, मही वायुभार्या भारती इत्येता मयोभुवः = मयः सुखं तस्य भुवः आश्रयभूताः, अस्रिधः = अविनाशाः, तिस्रो देवीः = देव्यः । आयान्तु । आगत्य च बर्हिः = बर्हिषि सीदन्तु = उपविशन्तु । तत्तद्गतः पृथक्स्थो वा भगवाननपीड्यत्वेनेळाशब्देनोच्यते। 'हरेर्गुणाः सरस्शब्दाः तद्वत्येव सरस्वती' इत्युक्तरीत्या सरस्वती महती यतोऽतो महीत्युच्यत इति द्रष्टव्यम् । स्त्रीरूपत्वाद् बहुरूपत्वाच्च स्त्रीलिङ्गशब्दवाच्यत्वं च युक्तमिति ज्ञातव्यम् ॥ ९ ॥

(ऋ.म.-१३२)

इह त्वष्टारमग्रियं विश्वरूपमुपह्वये ।
अस्माकमस्तु केवलः ॥ १० ॥

(ऋगर्थोद्धारः) - इहेति ॥ अहम् । अग्रियम्= अग्रेभवं प्रधानं त्वष्टारं = 'त्विष दीप्तौ' इति धातोः दीप्तिपदेन तेजसो बलस्य च ग्रहणात् । अथवा धातूनामनेकार्थत्वेन दीप्तिवद् बलस्यापि त्विषुधात्वर्थत्वात् तेजोरूपत्वाद् बलरूपत्वाद् वा त्वष्टृशब्दवाच्यं विश्वरूपं = विश्वानि समस्तानि रूपाणि ब्रह्मादीनां रूपाणि यस्मादिति वा, विश्वं पूर्णं रूपमस्येति वा विश्वरूप-शब्दवाच्यं भगवन्तम् इह = यज्ञे उपह्वये । प्रसिद्धत्वष्टृदेवतापक्षे विश्वरूपं= विश्वरूपाचार्याख्यपुत्रस्रष्टारं, त्वष्टारमिति व्याख्येयम् । स त्वष्टा हरिः । प्रसिद्धश्चास्माकं केवलोऽस्तु = केवलशब्दोऽवधारणार्थः । पालयितेति पदाध्याहारः । अस्माकमेव पालयिताऽस्त्वित्यर्थः ॥ १० ॥

१. 'इज्यत्वात्' घ.

(ऋ.म.-१३३)

अवं सृजा वनस्पते देवं देवेभ्यो हविः ।
प्र दातुरस्तु चेतनम् ॥ ११ ॥

(ऋगर्थोद्धारः) - अवसृजेति ॥ हे वनस्पते ! = वनसां वननीयानां सम्भजनीयानां पते । यद्वा वनकर्मणि अकारः । वनानां भजनीयानां पते इति वा । सुडागमः । देव त्वं देवेभ्यो हविरवसृज = देहि । तेन च प्रदातुर्यजमानस्य चेतनं, 'चिती सञ्ज्ञाने' ज्ञानमस्तु ॥ ११ ॥

(ऋ.म.-१३४)

स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे ।
तत्र देवाँ उपह्वये ॥ १२ ॥ २५ ॥ १३ ॥

(ऋगर्थोद्धारः) - स्वाहेति ॥ 'ओ हाङ् गतौ' तथा च भगवान् स्वभागं प्रति आ सम्यग् गतिमत्त्वात् स्वाहा । यद्वा, 'ओ हाक् त्यागे' सु सुष्ठु आ समन्तात् आहा न हीयते न नश्यतीति स्वाहा । अथवा 'हृञ् हरणे' सुष्ठु आसमन्तात् आहा न ह्रियत इति स्वाहा । स्त्रीरूपत्वात् स्त्रीलिङ्गवाच्यत्वं युक्तम् । स्वाहा = स्त्रीरूपो हरिः अग्निभार्या च, यज्वनः = यजमानस्य गृहे वर्तमानं यज्ञं = इन्द्रं यत्कृणोतन = करोतु इन्द्रं प्रापयत्विति यावत् । 'इडो यजति' 'समिधो यजति' 'बर्हिर्यजति' 'तनूनपातं यजति', 'स्वाहाकारं यजति' इति पञ्च प्रयाजाः सन्ति । तत्र स्वाहाकाररूपेऽन्तिमप्रयाजाख्ये यज्ञे स्वाहैव यक्ष्यमाणा न तत्रेन्द्रसम्बन्धोऽस्तीत्यस्मिन् मते स्वाहा यज्ञं कृणोतनेन्द्रायेत्युपपन्नम् । अतः स्वाहादेवी इन्द्राय चतुर्थी षष्ठ्यर्थे, इन्द्रस्य सम्बन्धि नो यज्वनो यजमानस्येति स्वरूपकीर्तनम् । तस्य गृहे यज्ञं कृणोतन प्रवर्तयत्विति योज्यम् । किञ्च, तत्र स्वाहादेव्या प्रवर्तनीये यज्ञे देवान् अहमुपह्वये ॥ १२ ॥

सूक्तम् - १४

मेधातिथिः काण्वः । विश्वे देवाः । (विश्वैर्देवैः सहितोऽग्निः)

३ इन्द्रवायुबृहस्पतिमित्राग्निपूषभगादित्यमरुद्गणाः,

१० विश्वेदेवाग्नीन्द्रवायुमित्रधामानि, ११ अग्निः । गायत्री छन्दः ।

(ऋ.म.-१३५)

ऐभि॑रग्ने दु॒वो॒ गिरो॒ विश्वे॑भिः॒ सोम॑पीतये ।

दे॒वेभि॑र्याहि॒ यक्षि॑ च ॥ १ ॥

(ऋगर्थोद्धारः) - **ऐभिरग्न इति ॥** द्वादशर्चमिदं वैश्वदेवं सूक्तम् । आ एभिरिति पदच्छेदः । हे अग्ने ! दुवः = 'दुह प्रपूरणे' काम स्य योग्यतया सम्बन्धः । तथा च कामान् दुहन्तीति दुहः । गिरः = अस्मदीयाः स्तुतिरूपा गिरः प्रति, तत्स्वीकारायेति यावत् । सोमपीतये च एभिः विश्वेभिः देवेभिः= विश्वैर्देवैः सह आयाहि । आगत्य यक्षि च= देवेभ्यो भागं देहि च ॥ १ ॥

(ऋ.म.-१३६)

आ त्वा॒ कण्वा॑ अहूषत गृ॒णन्ति॑ विप्र ते॒ धियः॑ ।

दे॒वेभि॑रग्न॒ आ ग॑हि ॥ २ ॥

(ऋगर्थोद्धारः) - **आ त्वेति ॥** मेधावी कविर्विप्रेति पाठात् । हे विप्र = मेधाविन् अग्ने ! कण्वाः = कण्वगोत्रोत्पन्ना वयमिति यावत् । त्वाम् आ अहूषत = आहूतवन्तः । किञ्च, ते = तव धियो बुद्धीः गृणन्ति = स्तुवन्ति। अतिशयेन बुद्धिमानसीत्यादि । स त्वं देवैः सह आगहि= आगच्छ ॥ २॥

(ऋ.म.-१३७)

इ॒न्द्र॒वा॒यू बृह॒स्पतिं॑ मि॒त्राग्निं पू॒षणं॒ भग॑म् ।

आ॒दि॒त्यान् मारु॑तं ग॒णम् ॥ ३ ॥

(ऋगर्थोद्धारः) - **इन्द्रवायू इति ॥** इन्द्रवायुमित्राग्निशब्दाः भगवति पूर्वं निरुक्ताः । बृहंश्चासौ पतिश्चेति बृहस्पतिः । यद्वा, बृहत्या वाचो लक्ष्म्या पतिं तद्बृहधातोः 'करपत्योश्चोरदेवतयोः समासे सुट् तलोपश्च' इति वचनात् सुट् । मित्रेति मित्रावरुणौ, दस्रेतिवत् साहचर्याद् द्वयोरेकनामा द्विरूपत्वाद् द्विवचनम् । पोषणात् पुष्टत्वाद्वा पूषणं [1]पूर्णैश्वर्यादिरूपत्वाद् भगम्, आदित्यान् = [2]आदित्यस्थत्वाद् आदिकाले विद्यमानत्वादा-दित्यः । यद्वा, आददाति पृथिवीरसं गृह्णातीत्यादित् । आङ्पूर्वकाद् दाणः इत् प्रत्यये धात्वाकारलोपे सति आदित् इति भवति । यातीति यः । आदिश्चासौ यश्चेत्यादित्यः । बहुरूपत्वाद् बहुवचनम् । मारुतं गणं = मा मानं वेदः, तेन रुतः शब्दितः मारुतः । एतादृशं भगवद्रूपगणं कण्वा वयमाहूषत इति पूर्वेण सम्बन्धः । अन्यदेवतापक्षे तु इन्द्रवायुबृहस्पतिमित्रावरुणाग्न्यादिदेवान् आहूषतेति स्पष्टोऽर्थः ॥ ३ ॥

(ऋ.म.-१३८)

प्र वो॑ भ्रियन्त॒ इन्द॑वो मत्स॒रा मा॑द॒यिष्ण॑वः ।

द्र॒प्सा मध्व॑श्चमू॒षदः॑ ॥ ४ ॥

(ऋगर्थोद्धारः) - **प्र व इति ॥** हे देवाः ! मत्सराः = मत् मदं सुखं सरन्ति सारयन्ति प्रापयन्तीति मत्सराः, मादयिष्णवः = मदकरत्वशीलाः, द्रप्साः = द्रवत्ववन्तः, मध्वः = मधवः स्वादुरसवन्तः चमूषदः, चमूशब्दश्च-मसवाचकः । तत्र सीदन्तीति चमूषदः । चमसाख्यपात्रविशेषास्थाः इन्दवः= इकारः कामवाची । इं कामं काम्यं ददातीति इन्दवः सोमा वोऽर्थे प्रभ्रियन्ते= सम्पाद्यन्ते सम्पादिताः सन्तीति यावत् । तान् पिबतेत्याशयः। अध्यात्मं - इन्दवो मनोवृत्तयः तव सुखप्रापकत्वेन सुखकारित्वशीलत्वेनातिवेगवत्त्वेन

१. 'पूर्णैश्वर्यरूपत्वात्' घ. । २. 'आदिस्थत्वात्' घ. ।

'इदं तच्छिरः' इति श्रुतेः। 'ता वा एताः शीर्षन्' इत्यादिश्रुतेश्च चमसस्थानीये शिरसि विद्यमानत्वात् [1]मत्सरत्वादि-विशेषणानि युक्तानि। सति [2]तस्मिन् सर्वत्र स्वादुता भवतीति तदापादकत्वान्मधुत्वमपि युक्तम्। [3]वोऽर्थे प्रभ्रि-यन्ते। एतादृशमनोवृत्तयो समाधीयन्त इत्यर्थः ॥ ४ ॥

(ऋ.म.-१३९)

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः।
हविष्मन्तो अरङ्कृतः ॥ ५ ॥

(ऋगर्थोद्धारः) - ईळत इति ॥ हे देव हविष्मन्तः अरङ्कृतः= अरम् अतिशयेन कृतः कर्मकर्तारः, यद्वा, लस्य रेफादेशत्वमङ्गीकृत्यालङ्कृतः। आगतान् देवान् पूजादिनाऽलङ्कारयितारः [4]भूषयितारो वृक्तबर्हिषः अवस्यवः= आत्मनोऽवनार्थमिच्छावन्तः कण्वासः, वयमिति यावत्। त्वाम् ईळते= स्तुवन्ति ॥ ५ ॥

(ऋ.म.-१४०)

घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः।
आ देवान् सोमपीतये ॥ ६ ॥ २६ ॥

(ऋगर्थोद्धारः) - घृतपृष्ठा इति ॥ हे अग्ने ! ये घृतपृष्ठाः = घृतमिव स्निग्धं पृष्ठं येषां ते तथोक्ताः। अथवा, घृतः शुद्धो विदोषो हरिः सः पृष्ठे येषां ते घृतपृष्ठाः, [5]विदोषिणा हरिणा समारूढा इति यावत्। मनोयुजः = सारथेर्यत्नमन्तरेण मनोमात्रेण रथे नियोज्याः वाहकत्वाद् वह्नयः = अश्वाः सोमपीतये त्वां देवांश्च यज्ञं प्रत्यावहन्ति। यच्छब्दस्य 'तान् यजत्रान्' इत्युत्तरेण सम्बन्धः ॥ ६ ॥

१. मत्सरत्वादिविशेषणानियुक्तोऽसि' क.। २. 'मनसि' घ.पाठः।
३. 'योऽर्थे' घ.। ४. 'भूषितारः' इति 'क' पाठः। ५. 'विदोषेण' घ.।

(ऋ.म.-१४१)

तान् यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि।
मध्वः सुजिह्व पायय ॥ ७ ॥

(ऋगर्थोद्धारः) - तान् यजत्रान् इति ॥ हे अग्ने य एवंविधा अश्वाः तान् तैः यजत्रान् = विष्णुं यजतः, स्तुत्यर्थो वा यजिः। विष्णोः स्तोतॄन् वा ऋतवृधः = ऋतेन सम्यज्ज्ञानेन ब्रह्मणा एधितान् देवान् पत्नीवतः कृधि= कुरुत। यज्ञं प्रत्यागन्तुं पत्नीभिः सह योजय। पत्नीसहितान् उक्त-लक्षणैरश्वैरिहाऽनयेति भावः। आनीय च हे सुजिह्व ! मध्वः = मधुं स्वादुं सोमं पायय। विष्णुपक्षे तु - यजत्रानित्यस्योक्तार्थद्वयस्य बाधितत्वाद् यजत्रान् इज्यानिति व्याख्येयम् ॥ ७ ॥

(ऋ.म.-१४२)

ये यजत्राः य ईड्यास्ते ते पिबन्तु जिह्वया।
मधोरग्ने वषट्कृति ॥ ८ ॥

(ऋगर्थोद्धारः) -ये यजत्रा इति ॥ अत्राऽद्यं त इत्येतत् तच्छब्दस्य प्रथमाबहुवचनम्। द्वितीयं त इत्येतद् युस्मच्छब्दस्य षष्ठ्येकवचनम्। आद्यस्तच्छब्द आवर्तनीयः। अग्ने यजत्राः = यजन्तः, भगवद्रूपपक्षे इज्या वा। ईड्याः = स्तुत्याश्च ये ये देवाः सन्ति ते ते सर्वे वषट्कृति = वषट्कृतौ सत्यां, वषट्कारयुक्तमन्त्रैरवदानानन्तरमिति यावत्। ते = तव, जिह्वया, त्वदीयया जिह्वयेति यावत्। मधोः, षष्ठी द्वितीयार्थे। मधु स्वादुरसोपेतं सोमं [1]पिबन्तु ॥ ८ ॥

१. 'पिबतु' घ.।

(ऋम.-१४३)

आकीं सूर्यस्य रोचनाद्विश्वान् देवाँ उषर्बुधः ।
विप्रो होतेह वक्षति ॥ ९ ॥

(ऋगर्थोद्धारः) - आकीमिति ॥ आङोऽर्थे आकीमिति निपातः । होता= होतृसंस्थः 'अग्निर्वै ब्राह्मणः' इति श्रुतेः, विप्रः = अग्निः, उषर्बुधः = बुच्छब्दस्य द्वितीयाबहुवचनमेतत् । प्रकाशरूपत्वाद् उषःशब्देन परब्रह्मोच्यते । तद् बुध्यन्ति जानन्तीत्युषर्बुधः परब्रह्मविदः तान् विश्वान् देवान् सोमपान् सूर्यस्य रोचनाल्लक्षयोजनोच्छ्रितान्तरिक्षोपरितनभागस्यापि स्वर्गत्वेन तत्र सूर्येण प्रकाशसद्भावात् सूर्यस्य सूर्येण निमित्तेन अतिशयतः प्रकाशमानात् । यद्वा, सूर्येण अतिशयितः सूर्यापेक्षयाऽतिशयितः आधिक्येन प्रकाशमानात् । स्वर्गाद् इह यज्ञं प्रति आकीं वक्षति = आवक्षति । आवहेत् ॥ ९ ॥

(ऋम.-१४४)

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना ।
पिबा मित्रस्य धामभिः ॥ १० ॥

(ऋगर्थोद्धारः)- विश्वेभिरिति ॥ हे अग्ने ! मित्रस्य = विष्णोः धामभिः= अधिष्ठानभूतैः, विश्वेभिः = समस्तैः भूतैः देवैः इन्द्रेण वायुना च सह सोम्यं = सोमरूपं मधु पिब विश्वेभिरित्यनेनैव गृहीतयोरपीन्द्रवाय्वोः पृथग्ग्रहणं प्राधान्यादिति ज्ञातव्यम् ॥ १० ॥

(ऋम.-१४५)

त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि ।
सेमं नो अध्वरं यज ॥ ११ ॥

(ऋगर्थोद्धारः) - त्वं होतेति ॥ हे अग्ने ! मनुर्हितः = [1]मनूनां देवानां,

१. 'मनुसां' इति घ. ।

तेभ्य इति यावत् । हितो, होता त्वं, यज्ञेषु सीदसि = यज्ञानाम् अधिष्ठाता भवसि । तस्मात् स त्वं नः इममध्वरं यज = देवेभ्यो देहि ॥ ११ ॥

(ऋम.-१४६)

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः ।
ताभिर्देवाँ इहावह ॥ १२ ॥ २७ ॥ १४ ॥

(ऋगर्थोद्धारः) - युक्ष्वेति ॥ हे अग्ने देव ! त्वं रथे अरुषीः = अरुणाः अग्निसप्रभा अश्वतरीः युक्ष्वा = युङ्क्ष्व संयोजय । अथवा, अरुषीः = लोहिताः अग्निसप्रभा अश्वाश्च युङ्क्ष्व । हरितः = हरिद्वर्णाः दूर्वासप्रभाः अश्वतरीश्च युङ्क्ष्व संयोजय । इदमुपलक्षणम् । पद्मसप्रभा अश्वतरीश्च युङ्क्ष्वेति द्रष्टव्यम्। रोहितः = रोहिन्मृगीर्वा युङ्क्ष्व । ताभिः = अग्निदूर्वापद्मसमानप्रभाभिः अश्वतरीभिः अग्निसप्रभाभिः अश्वाभिः रोहिद्भिर्वा युक्तेन रथेन स्वकीयरथे आरोप्येति यावत् । देवान्, इह = यज्ञे आवह ॥ १२ ॥

सूक्तम् - १५

मेधातिथिः काण्वः । (प्रतिदैवतं ऋतुसहितम्) १ इन्द्रः, २ मरुतः, ३ त्वष्टा, ४ अग्निः, ५ इन्द्रः , ६ मित्रावरुणौ, ७-१० द्रविणोदाः, ११ अश्विनौ, १२ अग्निः । गायत्री छन्दः ।

(ऋम.-१४७)

इन्द्र सोमं पिब ऋतुनाऽऽत्वा विशन्त्विन्दवः
मत्सरासस्तदोकसः ॥ १ ॥

(ऋगर्थोद्धारः)- इन्द्रं सोममिति ॥ द्वादशर्चमेतत् सूक्तं समस्तम् ऋतव्यं ऋतुदेवताकम् । इन्द्राद्यवान्तरदेवताभेदोऽपि तत्रतत्र ज्ञातव्यः । यथोक्त- मनुक्रमणिकायाम् - ऐन्द्री मारुती त्वाष्ट्री आग्नेयी ऐन्द्री मैत्रावरुणी चतस्रो

द्राविणोदस अश्विनेत्येता ऋतुदेवताः सर्वत्रेति। हे इन्द्र ऋतुना 'ऋ गतौ' गमनसाधनेनाऽदित्यस्य मार्गेणागत्य ऋतुना तन्नामकेन पात्रेण तथा कुसुमोद्भवादीनि स्वनियम्यषड्ऋतुलिङ्गानि ज्ञापयन्तीति षड्ऋतुदेवताः केशवादिद्वादशमूर्तीः तदन्याः काश्चिद्देवताश्च ऋतुशब्देनोच्यन्ते। एकैकस्य ऋतोर्मासभेदेन रूपद्वयं ज्ञातव्यम्। तथा च ऋतुना = तद्देवतया सह सोमं पिब। तदोकसः = तद् ऋतुपात्रम् ओकः स्थानम् येषां ते तदोकसः। [१]ऋतुपात्रस्थिता इति यावत्। मत्सरासः = मत् मदं सारयन्ति नमयन्ति प्रापयन्तीति मत्सराः इन्दवः सोमाः त्वाम् आविशन्तु = त्वदुदरस्था भवन्तु ॥ १ ॥

(ऋ.म.-१४८)

म॒रुतः॒ पिब॑त ऋ॒तुना॑ पो॒त्राद्य॒ज्ञं पु॑नीतन।
यू॒यं हि ष्ठा सु॑दानवः ॥ २ ॥

(ऋगर्थोद्धारः) - **मरुत इति** ॥ पावनात् पोता देवतात्वाच्च पोतारो मरुतः तत्सम्बन्धिपात्रं पोत्रशब्देनोच्यते। तथा च हे मरुतः! ऋतुना = मार्गेण देवतया सह द्रष्टव्यम्। पोत्राद् उक्तरीत्या पोतृशब्दवाच्यानां भवतां सम्बन्धिनः पात्राच्च, पञ्चमी तृतीयार्थे। तेन सोमं पिबत। तत्र स्थितं सोमं पिबतेति यावत्। पीत्वा च यज्ञं पुनीतन = पावयत। ततश्च हि यस्माद् वयं सुदानवः = सुदानशीलाः स्थ तस्माद् अस्मभ्यम् अभिमतं दत्तेत्यभिप्रायः ॥ २ ॥

(ऋ.म.-१४९)

अ॒भि य॒ज्ञं गृ॑णीहि नो॒ ग्नावो॒ नेष्टः॒पिब॑ ऋ॒तुना॑।
त्वं हि र॑त्न॒धा असि॑ ॥ ३ ॥

१. 'ऋतुपात्रस्था इति यावत्' इति 'ख' पाठः।

(ऋगर्थोद्धारः) - **अभि यज्ञमिति** ॥ हे नेष्टः! = न विद्यते इष्टा ईशिता यस्यासौ नेष्टा विष्णुः तस्य सम्बुद्धिः नेष्टः विष्णो! यद्वा, जगन्नेतृत्वाद्वा हे नेष्टः इन्द्र अग्ने त्वष्टर्वा। ग्नावः = गतिशीलत्वाद् ग्नाः नद्यः ताः अस्य नेष्टशब्दवाच्यस्य सन्तीति ग्नावान् तस्य सम्बुद्धिः ग्नावः। नदीदेवताभिः सहित, ऋतुना पूर्ववत्। सोमं पिब। पीत्वा च नो यज्ञम् अभिगृणीहि, साधुरयमिति। हि यस्मात् त्वं रत्नधाः = रतिधारको धनधारकश्चासि तस्माद् अस्मभ्यं रतिं धनं च देहीति भावः ॥ ३ ॥

(ऋ.म.-१५०)

अग्ने॑ दे॒वाँ इ॒हा व॑ह सा॒दया॒ योनि॑षु त्रि॒षु।
परि॑ भूष॒ पिब॑ ऋ॒तुना॑ ॥ ४ ॥

(ऋगर्थोद्धारः) - **अग्ने देवानिति** ॥ हे अग्ने! देवानिह = यज्ञे आवह। आगतान् त्रिषु तिसृषु योनिषु उत्तरा वेदी सदः प्राग्वंश इति स्थानेषु सादय = उपवेशय। देवानामुपवेशनेन नो यज्ञं परिभूष = परिभूषय। पिब ऋतुनेति [१]गतार्थम् ॥ ४ ॥

(ऋ.म.-१५१)

ब्राह्म॑णादिन्द्र॒ राध॑सः॒ पिबा॒ सोम॑मृ॒तूँरनु॑।
तवेद्धि स॒ख्यमस्तृ॑तम् ॥ ५ ॥

(ऋगर्थोद्धारः) - **ब्राह्मणादिति** ॥ हे इन्द्र! त्वं राधसः = नो राधसोऽर्थाद् ऋतूननु = ऋतुदेवता अनु, अत्रेन्द्रशब्देन भगवद्विवक्षापक्षे तदन्यदेवता विवक्षापक्षे च ऋतुदेवतानामिन्द्रस्य च साहित्यमात्रं विवक्षितं न पुनः इन्द्रस्याप्राधान्यम्। ऋतुदेवताभिः सहेति यावत्। ब्राह्मणात् = ब्राह्मणेन

१. 'उक्तार्थः' घ.।

शंसनकर्ता [1]कश्चिद् ऋत्विक् ब्रह्मेत्युच्यते। तत्सम्बन्धिपात्रं ब्राह्मणमित्युच्यते। पञ्चमी तृतीयार्थे। तेन पात्रेण, सोमं पिब। हि = यस्मात् तवेत् = तवैव सख्यं मयि कृतम् अस्तृतं = अच्छिन्नं तस्मात् सखा त्वं सोमं पिबेति ॥ ५ ॥

(ऋ.म.-१५२)

युवं दक्षं धृतव्रता मित्रावरुण दूळभम्।
ऋतुना यज्ञमाशाथे ॥ ६ ॥ २८ ॥

(ऋगर्थोद्धारः) - युवं दक्षमिति॥ हे मित्रावरुणौ ! धृतव्रता = धृतं व्रतं जगद्रक्षणादिकं कर्म याभ्यां तौ धृतव्रतौ, युवं = युवां, दूळभं = दुर्दभम्, अस्तभ्यं = स्वकर्मणि परिनिष्ठितं दक्षं = यजमानं यज्ञं च ऋतुना = पात्रेण, सोमं पीत्वेति शेषः। आशाथे = ईशाथे। तदीयसोमपानेन प्रसन्नौ पुनस्तं प्रवर्तयथः। यद्वा, ऋतुना ऋतुदेवतया सह युवां दक्षम् आशाथ इति योज्यम्। ऋतुदेवताऽपि यजमानस्य यज्ञस्य चेष्ट इति भावः॥ ६ ॥

(ऋ.म.-१५३)

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे।
यज्ञेषु देवमीळते ॥ ७ ॥

(ऋगर्थोद्धारः) - द्रविणोदा इति॥ द्रविणोदाः = होता, द्रविणसः = होतृकाः, होतुस्त्रयः शिष्या इति यावत्। अध्वरे = अध्वरेषु विधिमार्गस्थितेषु, यथाविध्यनुष्ठितेष्विति यावत्। यज्ञेषु ग्रावहस्तासः = सोमकण्डनार्थं ग्रावहस्ताः सन्तो देवं = विष्णुं होत्रन्तर्गतैरग्निभिः सहितं प्रधानहोत्रन्तर्गतं प्रधानाग्निं च, ईळते = स्तुवन्ति॥ ७॥

१. 'कश्चिदार्त्विक्' इति 'क' पाठः।

(ऋ.म.-१५४)

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे।
देवेषु ता वनामहे ॥ ८ ॥

(ऋगर्थोद्धारः) - द्रविणोदा ददात्विति॥ द्रविणोदाः = होत्रन्तर्गतोऽग्निः यानि वसूनि शृण्विरे = श्रूयन्ते, प्रसिद्धानीति यावत्। तानि नोऽस्मभ्यं ददातु। ता = तानि अग्निना दत्तानि वसूनि च वयं देवेषु = देवनिमित्तमेव वनामहे = सम्भजामहे सेवामहे स्वीकुर्मः। न तु स्वशरीरपोषणार्थम्। यद्वा, तानि देवेषु = देवेभ्यः वनामहे। वनतिर्दानार्थः। दद्मः। **'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः'** इति वचनात्॥ ८॥

(ऋ.म.-१५५)

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत।
नेष्ट्रादृतुभिरिष्यत ॥ ९ ॥

(ऋगर्थोद्धारः)- द्रविणोदाः पिपीषतीति॥ द्रविणोदाः = अग्निः, पिपीषति= 'पीङ् पाने' सोमं पातुमिच्छति। सोमाश्च तस्मै प्रतिष्ठत= प्रातिष्ठन्त, तदुद्देशेनैव प्रतिष्ठिताः क्लृप्ताः सन्ति। अतः तान् तस्मै जुहोत= जुहुत। किञ्च नेष्ट्रात् = नेष्टृनामर्त्विक्सम्बन्धिना पात्रेण ऋतुभिः = ऋतुपात्रैश्च, तत्रत्यसोमेनेति यावत्। ऋतुदेवताभिः सहेति वा। एनमग्निमिष्यत= अभीप्सत, पूज्यत्वेनेति शेषः॥ ९ ॥

(ऋ.म.-१५६)

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे।
अध स्मा नो ददिर्भव ॥ १० ॥

(ऋगर्थोद्धारः) - यत् त्वेति॥ हे द्रविणोदः ! अग्ने ! ऋतुभिः = ऋतुपात्रैः

तत्रत्यैः सोमैः, ऋतुदेवताभिश्च सह वा, तुरीयं = चतुर्थवारमपि, यत् = यस्मात् त्वा यजामहे । चतुर्थी हीयमृग्, द्राविणोदसी । अध = अथ, तस्मान्नोऽस्मभ्यं, ददिः = अभीष्टस्य दाता भव स्म ॥ १० ॥

ऋचि, तुरीयमिति रूपनिष्पत्तिप्रकारस्त्वित्थम् । 'चतुरश्छयतावाद्यक्षरलोपश्च' (वा.) चतुर्शब्दात् छप्रत्यये तस्य 'आयनेयीनीयियः . . . .' (पा.सू. ७-१-२) इति सूत्रेण ईयादेशे चकारलोपे तुर् ईय तुरीयेति रूपम् । तथा च तुर् शब्दात् यत्प्रत्यये चकारलोपे 'हलन्त्यम्' (पा.सू. १-३-३) इति तकारलोपे तुर्यमिति भवति । एवं च तुर्यतुरीयशब्दौ चतुस्सङ्ख्यावाचिनाविति द्रष्टव्यम् । तथा चतुर्शब्दात् 'तस्य पूरणे डट्' (पा.सू.५-२-४८) इति सूत्रेण पूरणार्थे डट् प्रत्यये अकारमात्रं विहाय डकारस्य 'चुटू' (पा.सू. १-३-७) इत्यनेन डवर्गस्थत्वात् लोपे 'हलन्त्यम्' (पा.सू.१-३-३) इति टकारलोपे 'षट्कतिकतिपयचतुरां थुक्' (पा.सू.५-२-५१) इति थुगागमे उक् इत्यस्य लोपे च तुरीयार्थे चतुर्थेति रूपम् । चतुस्सङ्ख्यापूरकं चतुर्थमित्यर्थः ॥१०॥

(ऋ.म.-१५७)

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता ।
ऋतुना यज्ञवाहसा ॥ ११ ॥

(ऋगर्थोद्धारः) - अश्विनेति ॥ हे अश्विनौ, दीद्यग्नी = दीप्ताग्नी, अतिशयेन दीप्ताग्निसदृशौ, शुचिव्रता = शुचि शुद्धं व्रतं कर्म ययोस्तौ शुचिव्रतौ यज्ञवाहसौ = यज्ञानां प्रवर्तकौ, युवां ऋतुना = पूर्ववत् । मधु = सोमं पिबतम् ॥ ११ ॥

(ऋ.म.-१५८)

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि ।
देवान् देवयते यज ॥ १२ ॥ २९ ॥ १५ ॥

(ऋगर्थोद्धारः) - गार्हपत्येनेति ॥ सम्पूर्वात् तनोतेर्ड्यप्रत्यये सन्ततत्वाद् व्याप्तत्वाद् विष्णुः सेव्यः अग्निरपि सन्ततत्वाद् अजस्रमाहितत्वात् सन्त्यः हे सन्त्याग्ने त्वं गार्हपत्येन पात्रेण ऋतुना = ऋतुपात्रेण च, सोमं, पीत्वेति शेषः । ऋतुदेवतया सहेति वा । यज्ञनीः = यज्ञानां प्रवर्तकोऽसि । स च त्वं देवयते = देवान् यातीति देवयन् यजमानः तस्मै तत्प्रयोजनाय देवानुद्दिश्य, यज = देहि, यज्ञभागं देवेभ्यो देहीति यावत् ॥ १२ ॥

सूक्तम् - १६,

मेधातिथिः काण्वः । इन्द्रः । गायत्री छन्दः ।

(ऋ.म.-१५९)

आ त्वा वहन्तु हरयो वृषणं सोमपीतये ।
इन्द्र त्वा सूरचक्षसः ॥ १ ॥

(ऋगर्थोद्धारः) - आ त्वेति ॥ नवर्चमेतदैन्द्रं सूक्तम् । हे इन्द्र ! वृषणं= वर्षितारं, त्वा = त्वां, सोमपीतये = सोमपानाय, सूरचक्षसः = ऊरेत्युपसर्गः ऊरीत्युपसर्गार्थः । छन्दस्त्वाद् धातुं विनाऽपि प्रयोगः । सुष्ठु ऊराणि तृणचणकादिरूपान् विषयान् ऊरीकुर्वन्ति गृह्णन्तीति सूराणि चक्षांसि चक्षूंषि येषां ते सूरचक्षसः । त्वा द्वितीया षष्ठ्यर्थे । तव त्वदीया इति यावत् । हरयः अश्वाः आवहन्तु ॥ १ ॥

(ऋ.म.-१६०)

इमा धाना घृतस्नुवो हरी इहोप वक्षतः ।
इन्द्रं सुखतमे रथे ॥ २ ॥

(ऋगर्थोद्धारः) - इमा धाना इति ॥ अध्यात्मम् - हे हरी = मनोबुद्धी इमाः = इन्द्रविषयिण्यः घृतस्नुवः = स्नेहसाम्याद् घृतं भक्तिः तया स्नुताः

'ष्णु प्रस्रवणे' आर्द्राः धानाः, बुद्धेर्धानानि वृत्तिविशेषाः सन्ति तस्माद् इह सुखतमे रथे = शरीरे इन्द्रं परमेश्वरं उपवक्षतः = उपवहतं सन्निधापयतम् । बाह्ये तु - हे हरी = अश्वौ युवयोरर्थे इमा घृतस्नुवः = घृताक्ताः धानाः = चणकाद्याः सम्पादिताः सन्ति । तस्माद् इन्द्रं सुखतमे रथे स्थितं, सुखतमेन रथेनेति वा । इह यज्ञम् उपवक्षतः = उपवहतम् ॥ २ ॥

(ऋ.म.-१६१)

इन्द्रं॑ प्रा॒तर्ह॑वामह॒ इन्द्रं॑ प्र॒य॒त्य॑ध्व॒रे ।
इन्द्रं॒ सोम॑स्य पी॒तये॑ ॥ ३ ॥

(ऋगर्थोद्धारः)- इन्द्रं प्रातरिति ॥ वयं प्रातः = प्रातस्सवने इन्द्रं हवामहे । अध्वरे = यज्ञे, प्रयति = प्रवर्तमाने सति, माध्यन्दिनसवन इति यावत् । इन्द्रं हवामहे । सोमपानस्यान्यत्र सद्भावेऽपि तृतीये सवने तस्य पूर्णत्वाद् 'असाधारण्येन व्यपदेशा भवन्ति' इति न्यायेन तद्विवक्षया सोमपीतिशब्देन तृतीयं सवनं विवक्षितम् । तथा च सोमस्य पीतये= तृतीयसवनेऽपि, सोमपानायेति यावत् । इन्द्रं हवामहे । एवं सदा तं हवामह इति ॥ ३ ॥

(ऋ.म.-१६२)

उप॑ नः सु॒तमा ग॑हि॒ हरि॑भिरिन्द्र के॒शिभिः॑ ।
सु॒ते हि त्वा॒ हवा॑महे ॥ ४ ॥

(ऋगर्थोद्धारः) - उप न इति ॥ हे इन्द्र ! केशिभिः = प्रलम्बकेशवद्भिः हरिभिः = अश्वैः नः सुतं सोमम् उपागहि = उपागच्छ हि = यस्मात् त्वा= त्वां सोमे सुते सति हवामहे। न तु भवदागमनानन्तरं सोमः कण्ड्यते तस्माद् विलम्बाभावाद् उपागच्छेत्यर्थः ॥ ४ ॥

(ऋ.म.-१६३)

सेमं न॒ः स्तोम॒मा ग॒ह्युपे॒दं सव॑नं सु॒तम् ।
गौ॒रो न तृ॑षि॒तः पि॑ब ॥ ५ ॥ ३० ॥

(ऋगर्थोद्धारः) - सेममिति ॥ हे इन्द्र ! स त्वं नः इमं स्तोमं = स्तुतिम् इदं सवनं च सुतं सोमं च उपागहि । स्तुतिं श्रुत्वा प्रातरादिसवनेषु सोमं पातुमुपागहीत्याशयः । आगत्य च तृषितो गौरः = मृगविशेषः स इव सोमं पिब ॥ ५ ॥

(ऋ.म.-१६४)

इ॒मे सोमा॑स॒ इन्द॑वः सु॒तासो॒ अधि॑ ब॒र्हिषि॑ ।
ताँ इ॑न्द्र॒ सह॑से पिब ॥ ६ ॥

(ऋगर्थोद्धारः) - इमे सोमास इति ॥ हे इन्द्र ! इमे इन्दवः = इष्टदाः, सुतासः = अभिषुताः सोमासः = सोमाः अधि बर्हिषि= बर्हिषः उपरि स्थापिताः सन्ति । तान् सोमान् सहसे= बलार्थं पिब । इदं प्रसिद्धेन्द्रे घटते । सोमपानादिना तस्य बलवृद्धिसद्भावात् । परमेश्वरे तु - इन्द्र ! तान्= सोमान् सहसे = बलाय यजमानाय ज्ञानभक्त्यादिरूपबलदानाय तदीयं सोमं पिबेति योज्यम् । यद्वा, हे इन्द्र = परमेश्वर ! तान् सोमान् सहसे त्वदीयबलाख्यगुणाभिव्यक्त्यर्थं पिबेति योज्यम् ॥ ६ ॥

(ऋ.म.-१६५)

अ॒यं ते॒ स्तोमो॑ अग्रि॒यो हृ॑दि॒स्पृग॑स्तु शन्त॑मः ।
अथा॒ सोमं॑ सु॒तं पि॑ब ॥ ७ ॥

(ऋगर्थोद्धारः) - अयं त इति ॥ हे इन्द्र ! अग्रियः = श्रेष्ठः शन्तमः = श्रोतॄणामतिशयेन सुखप्रदोऽयं स्तोमः = स्तुतिः ते हृदिस्पृक् =

हृदयङ्गमोऽस्तु । अथ स्तुत्या प्रीतस्त्वं सुतं = अभिषुतं सोमं पिब ॥ ७ ॥

(ऋ.म.-१६६)

विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति ।

वृत्रहा सोमपीतये ॥ ८ ॥

(**ऋगर्थोद्धारः**) - **विश्वमिति** ॥ वृत्रहा = इन्द्रः, मदाय = यजमानस्य हर्षाय स्वसुखव्यक्तये वा, सोमपीतये, विश्वमित् = सर्वमपि सवनं सर्वेष्वपि सवनेषु सुतं सोमं प्रतिगच्छति आगच्छति ॥ ८ ॥

(ऋ.म.-१६७)

सेमं नः काममा पृण गोभिरश्वैः शतक्रतो ।

स्तवाम त्वा स्वाध्यः ॥ ९ ॥ ३१ ॥ १६ ॥

(**ऋगर्थोद्धारः**) - **सेमं न इति** ॥ हे शतक्रतो ! स त्वं नोऽस्माकम् इमं = गवादिविषयं, कामं = अभिलाषं, गोभिः अश्वैश्च = गवाश्वं दत्त्वा आपृण = सम्पूरय । एवं त्वया गवाश्वादिकं दत्त्वा अस्मदभिलाषापूरणे सति स्वस्थान्तःकरणा वयं स्वाध्यः = सु आङ्पूर्वकस्य ध्यायते रूपम् । सुधीतये भवाम । सम्यक् त्वद्विषयकध्यानाख्यचिन्तावन्तो भवाम । भूत्वा च त्वां स्तवाम ॥ ९ ॥

सूक्तम् - १७ ,

मेधातिथिः काण्वः । इन्द्रावरुणौ । गायत्री छन्दः ।

(ऋ.म.-१६८)

इन्द्रावरुणयोरहं सम्राजोरव आ वृणे ।

ता नो मृळात ईदृशे ॥ १ ॥

(**ऋगर्थोद्धारः**) - **इन्द्रावरुणयोरिति** ॥ नवर्चमिदमैन्द्रावरुणं सूक्तम् । अहं सम्राजोः = सम्यग् दीप्तयोः इन्द्रावरुणयोः, तत्कर्तृकमिति यावत् । अवः = अवनं रक्षाम् आवृणे = प्रार्थये । तौ चेन्द्रावरुणौ नोऽस्मान् ईदृशे = भावप्रधानोऽयं निर्देशः । ईदृक्त्वाय इदानीं यथा तथैव सर्वदा भावः ईदृक्त्वम् अविकारेण संस्थानमिति यावत् । तस्मै ईदृशेऽविकारेण संस्थापनाय मृळातः = रक्षेताम् ॥ १ ॥

(ऋ.म.-१६९)

गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः ।

धर्तारा चर्षणीनाम् ॥ २ ॥

(**ऋगर्थोद्धारः**) - **गन्तारा हि स्थमिति** ॥ हे इन्द्रावरुणौ ! चर्षणीनां = प्रजानां धर्तारौ युवां मावतः = ज्ञानयुक्तस्य विप्रस्य हवं = आह्वानं प्रति, तच्छ्रुत्वेति यावत् । अवसे = तस्य रक्षायै गन्तारौ = गमनस्वभाववन्तौ स्थः । हि यस्मात् तस्मात् ममापि ब्राह्मणत्वाद् मदाह्वानं श्रुत्वा ममावसे आगच्छतामित्यर्थः ॥ २ ॥

(ऋ.म.-१७०)

अनुकामं तर्पयेथामिन्द्रावरुण राय आ ।

ता वां नेदिष्ठमीमहे ॥ ३ ॥

(**ऋगर्थोद्धारः**) - **अनुकाममिति** ॥ हे इन्द्रावरुणौ । अस्मान् रायः = वित्तस्य विषये अनुकामं यथेष्टम् आतर्पयेथां = तृप्तान् कुरुतम् । वयं च तौ वां = युवां नेदिष्ठं = कालसामीप्येन क्षिप्रमिति यावत् । ईमहे = 'इण् गतौ' गताः स्मः, शरणमिति शेषः ॥ ३ ॥

(ऋ.म.-१७१)

युवाकु हि शचीनां युवाकु सुमतीनाम्।
भूयाम वाजदाव्नाम् ॥ ४ ॥

(ऋगर्थोद्धारः) - युवाकु हीति ॥ हे इन्द्रावरुणौ ! वयं युवाकु = लुप्तषष्ठी। बहुवचनान्तमेतत्। युवाकूनां युवयोरेव सम्बन्धिनीनां शचीनां= वाक्यानां साधवो यूयमित्येवंरूपाणां विषयाः भूयाम= भवेम। तथा युवाकु= युवयोरेव सम्बन्धिनीनां सुमतीनां = शोभनानां मतीनां, सर्वस्मिन्नपि काल इति शेषः। विषया भूयाम। सर्वदा अस्मन् संरक्ष्यतया जानीहीति यावत्।

किञ्च, वाजदाव्नां = अन्नप्रदातॄणां सर्वदा विषया भूयाम = सर्वैरन्नादिना पूज्या भवेमेत्यर्थः ॥ ४ ॥

(ऋ.म.-१७२)

इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम्।
क्रतुर्भवत्युक्थ्यः ॥ ५ ॥ ३२ ॥

(ऋगर्थोद्धारः) - इन्द्रः सहस्रेति ॥ इन्द्रः सहस्रदाव्नां = भूरिदातॄणां शंस्यानां = सर्वैर्मन्त्रैः स्तुत्यानां देवानां च मध्ये क्रतुः = क्रतुरिव क्रतुः, यथा क्रतुः कर्ममध्ये विशिष्टः तथाऽयमपि प्रधान इत्यर्थः। उक्थ्यः = उक्थानि शस्त्राणि, मन्त्रविशेषा इति यावत्। तैः स्तुत्यश्च भवति। एवं वरुणोऽपीति योज्यम्। अत्र शंस्यानां क्रतुरुक्थ्य इत्यनयोः सामान्यविशेषभावेनापुनरुक्तिः ॥ ५ ॥

(ऋ.म.-१७३)

तयोरिदवसा वयं सनेम नि च धीमहि।
स्यादुत प्रेचनम् ॥ ६ ॥

(ऋगर्थोद्धारः) - तयोरिति ॥ वयं तयोरिन्द्रावरुणयोः, इत् = एव अवसा= रक्षणेन सनेम = वित्तं बाह्यं सदा प्राप्नुमः। प्राप्य निधीमहि च = भुवं निखाय अन्येषां दृष्टिपातो यथा न स्यात् तथा स्थापयाम। अथवा तयोरिदमवसा वयं ज्ञानाख्यं वित्तं सनेम = प्राप्नुमः। प्राप्य निधीमहि च। सर्वदा ताविन्द्रावरुणौ चिन्तयामेति यावत्। किञ्च, त्यागहीनस्य धनस्य व्यर्थत्वाद् अस्माकं प्रेरेचनं = विसर्जनमुत स्यात्। धनार्थिने ज्ञानार्थिने वा सत्पात्राय ज्ञानधनयोर्दानमपि स्यादेव ॥ ६ ॥

(ऋ.म.-१७४)

इन्द्रावरुण वामहं हुवे चित्राय राधसे।
अस्मान्त्सु जिग्युषस्कृतम् ॥ ७ ॥

(ऋगर्थोद्धारः) - इन्द्रावरुणेति ॥ अत्रेन्द्रावरुणेति ह्रस्वः पदकाले दीर्घश्च, प्रसिद्धेन्द्रावरुणयोर्मर्त्यैक्यप्रदर्शनाय, भगवद्रूपयोस्तु स्वरूपैक्यप्रदर्शनायेति ज्ञातव्यम्। एवमुत्तरत्रापि। हे इन्द्रावरुणा = हे इन्द्रावरुणौ अहं चित्राय= भद्राय राधसे = सिद्धये वां = युवां हवे = आह्वयामि। युवाम् अस्मान् सुजिग्युषः = [1]सुष्ठुवैरिजयवन्तः कृतं = कुरुतम् ॥ ७ ॥

(ऋ.म.-१७५)

इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा।
अस्मभ्यं शर्म यच्छतम् ॥ ८ ॥

(ऋगर्थोद्धारः)- इन्द्रावरुणेति ॥ हे इन्द्रावरुणौ ! नु = अद्य वां = युवां नु = नुमः। 'णु स्तुतौ' स्तुमः। ननु कथमेतत् ? मस्प्रत्ययस्यादर्शनादिति चेन्न। मस्प्रत्ययलोपात् 'लोपः स्वातन्त्र्ये' इति सूत्रात्। नुम इति मस्प्रत्ययप्रयोगेन हि स्तोतुर्जीवस्य स्वातन्त्र्यलक्षणं कर्तृत्वं वक्तव्यम्।

---
१. 'सुष्ठु परिजयवन्तः' घ.।

तल्लोपेन च कर्तृत्वस्यापि लोपो ज्ञापितो भवति। ननु भवतामस्मद्विषयक-बुद्ध्यभावात् कथमस्मत्स्तुतिकरणमित्यत उच्यते। धीषु= अस्मद्बुद्धिषु वां = युवां आ = सम्यक् सिषासन्तीषु= साधयतीषु प्रकाश-यन्तीषु सतीष्वेव अस्मद्बुद्धयो युवां प्रकाशयन्ति विषयीकुर्वन्ति यतः तस्मादिति यावत्। अस्मभ्यं शर्म= गृहं सुखं च यच्छतं= प्रयच्छतम्॥ ८॥

(ऋ.म.-१७६)

प्रवांमश्नोतु सुष्टुतिरिन्द्रांवरुण॒ यां हु॒वे।

यामृ॒धाथे॑ स॒धस्तु॑तिम्   ॥ ९॥ ३३॥ १७। ४॥

(ऋगर्थोद्धारः) - प्रवामिति॥ हे इन्द्रावरुणौ! अहं यां स्तुतिं हुवे = आह्वयामि सम्पादयामि। यद्वा, द्वितीया तृतीयार्थे। यया वां हुवे सा सुष्टुतिः = शोभना स्तुतिः वां प्राश्नोतु = प्रकर्षेण आप्नोतु। तस्यां च स्तुतौ न मम स्वातन्त्र्यं, किन्तु यां = मया क्रियमाणां सधस्तुतिं = सधेति सहार्थे। सहस्तुतिं अर्थसहितां स्तुतिं, यथास्थितस्तुतिमिति यावत्। मयि स्थित्वा युवामेव सदा ऋधाथे = 'ऋध वृद्धौ' अन्तर्णीतण्यर्थः। वर्धयेथे = प्रवर्तयथः। सैव [1]भवत्प्रेरिता स्तुतिः वां प्राश्नोत्विति सम्बन्धः॥ ९॥

सूक्तम् - १८

मेधातिथिः काण्वः। १-३ ब्रह्मणस्पतिः। ४ इन्द्रो ब्रह्मणस्पतिः सोमश्च, ५ ब्रह्मणस्पतिः सोम इन्द्रो दक्षिणा च। ६-८ सदसस्पतिः ९ सदसस्पतिः नराशंसो वा। गायत्री।

(ऋ.म.-१७७)

सो॒मानं॒ स्वर॑णं कृणु॒हि ब्रह्मणस्पते।

क॒क्षीव॑न्तं॒ य औ॑शि॒जः   ॥ १॥

१. 'भवत्प्रवर्तिता' इति 'घ' पाठः।

(ऋगर्थोद्धारः) - सोमानमिति॥ नवर्चमिदं सूक्तम्। अत्र पञ्च ब्राह्मण-स्पत्याः। चतुर्थ्यामृचि इन्द्रश्च सोमश्च। पञ्चम्यामृचि दक्षिणा च। शिष्टाश्चतस्रः सादसस्पत्याः। तत्रान्त्या नाराशंसी च।

हे ब्रह्मणस्पते! = ब्रह्मणो वेदस्य तन्मुख्याभिमानिन्याः लक्ष्म्याः पते विष्णो! तदवान्तराभिमानिन्याः भारत्याः पते वायो! वा, त्वं नोऽस्मान् प्रति कारुण्यात् सोमानं स्वरणं = सौम्यं शब्दं कृणुहि = कुरु। यः शब्दः प्राक् कक्षीवन्तं ऋषिं प्रति दत्तः, कृत इति यावत्। तादृशं कुरु। यः कक्षीवान् यः औशिजः यः उशिङ्नाम्नो ऋषेः सुतः सः अत्र कक्षीवन्तमिति परोक्षत्वोक्त्या कक्षीवतो मेधातिथ्यन्यत्वं न मन्तव्यम्। योऽत्र मुनिर्विवक्षितः स मेधातिथिरेव कक्षीवान्। तस्मात् कक्षीवन्तं प्रतीत्यस्य मां प्रतीत्येवार्थो द्रष्टव्यः। तथा च कण्वस्योशुरिति नामान्तरम्। तत्पुत्रस्य मेधातिथेरपि कक्षीवानिति नामान्तरमिति ज्ञेयम्॥ १॥

(ऋ.म.-१७८)

यो रे॒वान् यो अ॑मीव॒हा व॑सु॒वित् पु॑ष्टि॒वर्ध॑नः।

स नः॑ सिषक्तु॒ यस्तु॒रः   ॥ २॥

(ऋगर्थोद्धारः) - यो रेवान् इति॥ यो रेवान् ज्ञानाख्यवसुनो वेत्ता, ज्ञातव्यं सर्वं जानातीति यावत्। यश्च अमीवहा = रोगहा यश्च भक्तानां पुष्टिवर्धनः एवम्भूतो यस्तुरः = 'तुर त्वरणे' वकारस्य सम्प्रसारणं उकारः, [1]वेगवान् हरिर्वायुर्वा स नोऽस्मान् सिषक्तु = 'षच समवाये' अस्माभिः सयुग् भवेत्, अस्मत्सखा भवेदिति यावत्॥ २॥

(ऋ.म.-१७९)

मा नः॒ शंसो॒ अर॑रुषो धू॒र्तिः प्रणङ् मर्त्य॑स्य।

रक्षा॑ णो ब्रह्मणस्पते   ॥ ३॥

१. 'रेवान्' इति क. पाठः।

(ऋगर्थोद्धारः)- मा न इति ॥ हे ब्रह्मणस्पते = हरे वायो ! वा, अररुषः= अरशब्दोऽलंशब्दार्थे । अलं रुष्यतीति अररुट्, तस्य अररुषो मर्त्यस्य धूर्तिः शंसः = धूर्तिः वचः, धूर्विहिंसार्थः । उपद्रवकारिवचनं नोऽस्मान् मा प्रणक् = 'प्रा पूरणे' न पूरयेत् । स्वार्थे णिच् । धातूनामनेकार्थत्वात् न प्रविशेत् । मा प्रापयदित्यर्थः । हे ब्रह्मणस्पते नोऽस्मान् रक्ष । यथा तद्वचोऽस्मान् न प्राप्नुयात्, कार्यक्षमं न स्यादिति यावत् । तथा रक्षेत्यर्थः ॥ ३ ॥

(ऋम.-१८०)

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः ।
सोमो हिनोति मर्त्यम् ॥ ४ ॥

(ऋगर्थोद्धारः) - स घेति ॥ यं मर्त्यम् इन्द्रो ब्रह्मणस्पतिः सोमश्च हिनोति = 'हि गतौ वृद्धौ च' गच्छति प्राप्नोति । एते त्रयो यस्मिन् मर्त्ये सन्निहिता भवन्तीत्यर्थः । वर्धयति अभिवृद्धं करोतीति वाऽर्थः । सः, घशब्दोऽवधारणे वृद्धौ च । तथा च स घः = स एव वीरः = आरब्धान्तगामी भवति । न रिष्यति न हिंस्यते चान्यैरित्येतत् । घ = ह प्रसिद्धमित्यर्थः । 'अक्रूरः सौम्य उच्यते' [1]इत्यभिधानात् । सौम्यत्वाद् भक्तान् प्रति अक्रूरत्वाद् भगवान् सौम्य उच्यते । यद्वा, उकारेणोच्यते रुद्रः, मा लक्ष्मीः तथा च उश्च मा च उमे, उमाभ्यां सह वर्तत इति सोमः । अथवा 'भूतानि वै विश्व उमा' इति श्रुतेः उमैः भूतैः सह वर्तते, सर्वभूतानि प्रेरयतीति यावदिति वा सोमः । अथवा सारत्वात् सः, न विद्यते मा प्रमा परिमितिरियत्ता यस्थासावमः सश्चासावमश्चेति सोम इति द्रष्टव्यम् ॥ ४ ॥

१. 'इति वचनात्' घ. ।

(ऋम.-१८१)

त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम् ।
दक्षिणा पात्वंहसः ॥ ४ ॥ ३४ ॥

(ऋगर्थोद्धारः) - त्वं तमिति ॥ अत्र तच्छब्दश्रवणाद् यच्छब्दोऽध्याहार्यः । तथा च हे ब्रह्मणस्पते ! यस्त्वद्भक्तस्तं मर्त्यं त्वम् अंहसः = पापात् पाहि । तथा सोमः पातु । इन्द्रश्च पातु । दक्षिणा = दक्षे दक्षिणभागे इनः स्वामी विष्णुः यस्याः सा दक्षिणा महालक्ष्मीः । अथवा 'दक्षिणे सरलोदारौ' इत्यभिधानाद् दक्षिणत्वात् सरलत्वात्, चतुरत्वादिति यावत्। दक्षिणा जनार्दनः स्त्रीरूपत्वात् स्त्रीलिङ्गत्वं, सा च पात्वित्यर्थः ॥ ५ ॥

(ऋम.-१८२)

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥ ६ ॥

(ऋगर्थोद्धारः) - सदसस्पतिमिति ॥ अहम् अद्भुतं = आश्चर्यम् इन्द्रस्य प्रियं, सर्वजनानामपि काम्यं = प्रीत्यास्पदमिति यावत् । सनिं = उत्तमाधिकारिणां लाभरूपं मेधां = ज्ञानस्वरूपं सदसस्पतिं = सदसो यज्ञगृहविशेषस्य पतिं पालयितारं हरिं प्रधानवायुं वा, अयासिषं = गतोऽस्मि, शरणमिति शेषः ॥ ६ ॥

(ऋम.-१८३)

यस्माद् ऋते न सिद्ध्यति यज्ञो विपश्चितश्चन ।
स धीनां योगमिन्वति ॥ ७ ॥

(ऋगर्थोद्धारः) - यस्मादिति ॥ यस्मात् सदसस्पतेः ऋते विपश्चितश्च= ज्ञानिनोऽपि यज्ञः बाह्याभ्यन्तरो न सिध्यति सः सदसस्पतिरस्माकं धीनां

योगं सम्बन्धमिन्वति = प्राप्त्यर्थोऽयं धातुः । सम्बन्धश्चात्र प्रेर्यप्रेरकभावो विषयविषयिभावश्च विवक्षितः । तथा च धीनां प्रेरको धीनां विषयश्च भवति । ध्येयो भवतीत्यर्थः ॥ ७ ॥

(ऋ.म.-१८४)

आर्ध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् ।
होत्रा देवेषु गच्छति ॥ ८ ॥

(ऋगर्थोद्धारः) -आदृध्नोतीति ॥ सदसस्पतिं विना यज्ञो न सिद्ध्यतीत्येतदत्रोपपाद्यते । यस्मात् सदसस्पतिः विभुः हविष्कृतिम् ऋध्नोति । यजमानं स्वृधं करोति । यस्माच्च = अध्वरं = यज्ञं प्राञ्चं = प्रकृष्टतया अञ्चति 'अञ्चु गतिपूजनयोः' गच्छति प्रवर्तते, उत्तममिति यावत् । कृणोति = करोति । यस्माच्च देवेषु देवविषयाणि होत्रा = होत्राणि देवाह्वानानि गच्छति = प्राप्नोति स्वीकरोति, आत् = तस्मात् तेन विना यज्ञो न सिद्ध्यति । अत्र हविष्कृदृद्धिकरणं नाम सफलीकरणम् । अध्वरस्योत्तमत्वकरणं तु देवोपयोग्यतापादनम् ।

ननु कथमनेन सदसस्पतिं विना यज्ञो न सिध्यतीत्येतदुपपादितम् ? पादत्रयस्यापि परस्परं सङ्गत्यभावादिति चेद्, उच्यते । पादत्रयोक्तानां हविष्कृदृद्धिकरणाध्वरोत्तमत्वकरणदेवाह्वानस्वीकर्तॄणां मध्ये हविष्कृदृद्धिकरणे अध्वरोत्तमत्वकरणं हेतुः । तत्र च देवाह्वान-स्वीकर्तृत्वम् तथा च सदसस्पतिर्हरिः हविष्कृतः फलदानेन ऋद्धिकर्ता यज्ञस्य देवोपभोग्यतापादनरूपोत्तमताकर्तृत्वात् । सदसस्पतिः अध्वरोत्तमताकर्ता देवाह्वानस्वीकर्तृत्वादित्यनुमानं कर्तव्यम् । तथा च देवाह्वानानि स्वयं स्वीकृत्यामुष्य यज्ञो युष्माभिर्गन्तव्य इति तान् प्रबोध्य तैः सहाऽगत्य हविरादेर्देवोपयोग्यतापादनेनाध्वरस्योत्तमत्वं सम्पाद्य तादृशोत्तमयज्ञस्य

फलदानेन साफल्यं सम्पाद्य हविष्कृदृद्धिं करोतीत्येवं सदसस्पतिनैव यज्ञस्य सिध्यमानत्वात् तं विना यज्ञो न सिद्ध्यतीत्येवं हेतुहेतुमद्भावस्य विवक्षितत्वान्नासङ्गतिरिति भावः ॥ ८ ॥

(ऋ.म.-१८५)

नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् ।
दिवो न सद्ममखसम् ॥ ९ ॥ ३५ ॥ २८ ॥

(ऋगर्थोद्धारः) - नराशंसमिति ॥ अत्र तृतीयपादे यस्य प्रियतमम् ईयत इति पदत्रयाध्याहारः । तथा च यस्य नराशंसस्य सद्ममखसं = मखसशब्दो मखपर्यायो नपुंसकलिङ्गः । तथा च सद्म च तत् मखसं च सद्ममखसं, मखरूपं गृहमित्यर्थः । यद्वा, सद्म च मखसं चेति द्वन्द्वैकवद्भावो नपुंसकत्वं च । तथा च सद्म अग्न्याधानगृहं, मखसं मखश्च दिवः = स्वर्गादपि प्रियतमम् अतिशयेन प्रियं न प्रियमिव ईयते प्रतीयते । तं सुधृष्टमं = 'लोपः समाने' (अथर्वणभाष्योदाहृतमहाव्याकरणसूत्रम्) इति एकस्य तकारस्य लोपः । तमबर्थे मप्रत्ययो वा । तथा चातिशयेन प्रगल्भतमं सप्रथस्तमम् = 'प्रथ प्रख्याने' प्रथसा गुणानां प्रथिम्ना विस्तारेण सह वर्तत इति सप्रथाः अतिशयेन सप्रथाः सप्रथस्तमस्तम् अतिशयेन गुणविस्तारयुक्तं नराशंसं = नरैर्ब्राह्मणादिभिः शंस्यते स्तूयत इति नराशंसो हरिरग्निविशेषश्च, तमहमपश्यमिति ॥ ९ ॥

सूक्तम् - १९

मेधातिथिः काण्वः । अग्निर्मरुतश्च । गायत्री ।

(ऋ.म.-१८६)

प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे ।
मरुद्भिरग्न आ गहि ॥ १ ॥

(ऋगर्थोद्धारः) - प्रति त्यमिति ॥ नवर्चमिदमाग्निमारुतं सूक्तम्। हे अग्ने ! त्वं गोपीथाय = रक्षणाय चारुं = भद्रं सम्यकूशास्त्रोक्तलक्षणं त्यं = तं प्रसिद्धमध्वरं यज्ञं प्रति प्रति, प्रतिरयं वीप्सायां कर्मप्रवचनीयः। सर्वान् यज्ञान् प्रति प्रहूयसे = आहूयसे यस्मात् तस्मान्मरुद्भिः सह आगहि = आगच्छ॥ १॥

(ऋम.-१८७)

न हि देवो न मर्त्यो महस्तव क्रतुं परः।
मरुद्भिरग्न आगहि ॥ २॥

(ऋगर्थोद्धारः) - नहीति॥ हे अग्ने ! क्रतुं प्रति, आगन्तुमिति शेषः। तव सकाशात् परः = अन्यो देवो महः = महान् पूज्यो नहि = नैवास्ति। मर्त्यस्तु नैवास्तीति किमु ? तस्मात् मरुद्भिः सह आगहि। अत्र हे अग्ने ! तव सकाशाद् अन्यो महान् देवो नास्तीत्येतद् अग्निशब्देन विष्णौ विवक्षिते सति सङ्कोचेन विना व्याख्येयम्।

[1]प्रसिद्धाग्निविवक्षयां तु ब्रह्मादीन् आरभ्य नारदान्तान् विना तदन्यो देवो महान्नास्तीति व्याख्येयम्॥ २॥

(ऋम.-१८८)

ये महो रजसो विदुर्विश्वे देवासो अद्रुहः
मरुद्भिरग्न आ गहि ॥ ३॥

(ऋगर्थोद्धारः) - ये मह इति॥ ये अद्रुहः = न द्रुह्यन्तीत्यद्रुहः अद्रोग्धारः, साधूनामिति शेषः। विश्वे देवासः = मरुत इति यावत्। महः = महतः रजसः = रञ्जकात्, मनोहरात् स्वर्गादिति यावत्। ल्यब्लोपनिमित्ता

१. प्रसिद्धाग्नौ विवक्षिते तु क.।

पञ्चमी। स्वर्गमधिष्ठायैव विदुः, अखिलमिति शेषः। तैः दूरदर्शनादिमद्भिः सहाग्ने त्वमागहि॥ ३॥

(ऋम.-१८९)

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा।
मरुद्भिरग्न आ गहि ॥ ४॥

(ऋगर्थोद्धारः)- य उग्रा इति॥ ये उग्राः = दैत्यान् प्रति क्रूराः ओजसा= सामर्थ्येन निमित्तेन अनाधृष्टासः = अनाधृष्टाः अधर्षिताः, परैरनभिभूताः सन्तः। यद्वा, ओजसा अनाधृष्टासः अनभिभूतसामर्थ्योपेता इति यावत्। अर्कमानृचुः = प्राप्ताः, अर्के विशेषेण सन्निहिता इति यावत्। तैर्मरुद्भिः भगवद्रूपविशेषैः सहाग्ने ! आगहि॥ ४॥

(ऋम.-१९०)

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः।
मरुद्भिरग्न आ गहि ॥ ५॥ ३६॥

(ऋगर्थोद्धारः) - ये शुभ्रा इति॥ शुभ्राः = शुद्धाः घोरं = दैत्यान् प्रति क्रूरं वर्पः = बलं येषां ते घोरवर्पसः। सुक्षत्रासः = 'क्षि निवासगत्योः' इति धातोः क्षियन्ति = निवसन्ति अस्मिन्निति क्षं क्षेत्रं शरीरं सुष्ठु क्षं त्रायन्त इति सुक्षत्रासः। यद्वा, 'क्षि क्षये' इति धातोः क्षं क्षतिः क्षयः तस्मात् सुष्ठु त्रायन्त इति सुक्षत्रासः, रिशादसः = रि रम्यं निर्दोषत्वात् शं सुखं [1]तद् अदन्तीति रिशादसः। एवम्भूता ये मरुतः = माभिः वेदैः ऋताः मुख्यतः शब्दिताः तैः मरुद्भिरग्न आगहि। अध्यात्मं - इन्द्रियस्थानि रूपाणि वा प्राणादिवायुवृत्तिगतानि वा मरुच्छब्देनोच्यन्ते। जाठराग्निस्थान्यग्निशब्दे-

१. 'तद् ददतीति' इति घ.।

नोच्यन्ते। अधिष्ठानान्तरस्थतां विना पृथगेव मरुदग्निशब्दवाच्यानि रूपाणि सन्ति। तान्येवात्रोच्यन्ते। यद्वा, बाह्ये मरुदग्निदेवतागतानि मरुदग्निशब्दवाच्यानि रूपाणि [1]वोच्यन्त इति ज्ञातव्यम्॥ ५॥

(ऋ.म.-१९१)

ये नाकस्याधि रोचने दिवि देवास आसते।

मरुद्भिरग्न आ गहि　　॥ ६॥

(ऋगर्थोद्धारः) - ये नाकस्येति॥ ये देवासः = देवाः मरुतो नाकस्य= कं सुखं तद्विरुद्धं दुःखम् अकं तत्र विद्यतेऽस्मिन्निति नाकः निर्दुःखस्वरूपः स्वर्गलोक इति यावत्। तस्य, अधि = उपरि ये आसते तथा दिवि= प्रकाशरूपे सूर्यादौ च ये आसते सन्निहिताः सन्ति, तथा रोचने= 'रुच दीप्तौ' सूर्यप्रकाशे च ये आसते तैः मरुद्भिरग्न आगहि॥ ६॥

(ऋ.म.-१९२)

य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम्।

मरुद्भिरग्न आ गहि　　॥ ७॥

(ऋगर्थोद्धारः) - य ईङ्खयन्तीति॥ ये पर्वतान् = गिरीन् ईङ्खयन्ति = ईङ्खिर्गत्यर्थः। गमयन्ति प्रतोलयन्ति, चालयन्तीति यावत्। तथा अर्णवं= अर्णांसि जलानि विद्यन्तेऽत्रेत्यर्णवः तम्, उदकवन्तमिति यावत्। समुद्रं= सागरं अपां खातं वरुणं वा। तिरः = तिरस्कृत्य वर्तन्ते, इतस्ततः समुद्रजलचालनेन मरुतां समुद्रतिरस्कर्तृत्वं ज्ञातव्यम्। तैः मरुद्भिरग्न आगहि।

विष्णुविषये तु - ये मरुतो भगवद्रूपविशेषाः - जन्माद्याः पर्वस्थानीयाः,

१. 'वाऽत्रोच्यन्ते' घ.।

तथा च मत्त्वर्थे तप्रत्ययमङ्गीकृत्य जन्मलक्षणपर्ववन्तो ये जीवाः तान् तथा अर्णवम्= उदकवन्तं 'आकाश एव तदोतं च प्रोतं च' इति प्रकृतेः सर्वाधारत्वोक्तेः उदकाधारत्वेनोदकवत्वं ज्ञातव्यम्। समुद्रं = भगवदनन्तरं समुद्रेकात् = समुद्रशब्दवाच्यं प्रकृतिम् ईङ्खयन्ति प्रेरयन्तीति यावत्। ये तिरः = जीवान् प्रकृतिं च तिरस्कृत्य, तदुत्तमत्वेनेति यावत्। वर्तन्ते तैः मरुद्भिरग्न आगहि। अत्राग्निशब्दवाच्यभगवद्रूपविशेषस्य मरुच्छब्दवाच्यरूपविशेषसाहित्योक्त्या मरुच्छब्दवाच्यरूपविशेषाणामप्राधान्यप्रतीतिरज्ञदृष्ट्यैव, सर्वेषामपि भगवद्रूपाणां सद्गुणैः समत्वेन तत्र गुणप्रधानभावाभावादिति ज्ञातव्यम्॥ ७॥

(ऋ.म.-१९३)

आये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा।

मरुद्भिरग्न आ गहि　　॥ ८॥

(ऋगर्थोद्धारः) - आ य इति॥ ये रश्मिभिः तेजोभिः सर्वं आ तन्वन्ति= व्याप्नुवन्ति। तथा ओजसा = सामर्थ्येन समुद्रं तिरस्कुर्वन्ति तैर्मरुद्भिरग्न आगहि॥ ८॥

(ऋ.म.-१९४)

अभि त्वां पूर्वपीतये सृजामि सोम्यं मधु।

मरुद्भिरग्न आ गहि　　॥ ९॥ ३७॥ १॥ १९॥

(ऋगर्थोद्धारः) - अभि त्वेति॥ अहं त्वा अभि = त्वां प्रति पूर्वपीतये = प्रथमं पानाय विष्णुपक्षे - तस्य सर्वदेवोत्तमत्वेन सर्वापेक्षया प्रथमं पानाय। प्रसिद्धाग्निपक्षे तु - अग्निद्वारेणैव सर्वदेवानामाहुति-

प्राप्तेस्तदपेक्षया प्रथमं पानायेत्यर्थः । सोम्यं = सोमरूपं मधु स्वादु द्रव्यं सृजामि = निर्मिमामि । तस्मान्मरुद्भिरग्न आगहि ॥ ९ ॥

इति श्रीयदुपत्याचार्यपूज्यपादाराधकेन वेणुपल्लिश्रीनिवासेन विरचिते श्रीमदृग्भाष्यटीकागतऋगर्थोद्धारे प्रथमोऽध्यायः ॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ अथ द्वितीयोऽध्यायः ॥

॥ ऋभुसूक्तम् - २० ॥

॥ श्रीगुरुभ्यो नमः हरिः ॐ ॥

मेधातिथिः काण्वः ऋषिः । ऋभवो देवताः । गायत्री छन्दः ।

(ऋ.म-१९५)

अयं देवाय जन्मने स्तोमो विप्रेभिरासया ।
अकारि रत्नधातमः ॥ १ ॥

(ऋगर्थोद्धारः) - अयं देवायेति ॥ अष्टर्चमिदम् आर्भवं सूक्तम् । यद्यपि त्रयाणां मध्ये ऋभुनामैक एव । विभ्वा (श्वा) वाजश्चापरौ । तथाऽपि साहचर्यादिकस्य नाम्ना त्रयोऽप्युच्यन्त इति ज्ञातव्यम् । विप्रेभिः = विप्रैः मेधाविभिः, काण्वाद्यैः = कण्वपुत्रो मेधातिथिः, तदादिभिः अस्मादादिभिरिति यावत् । ते चैकस्यापि बहवः स्युः सूक्तस्येति ऋषिबाहुल्योक्तत्वाद् विप्रेभिरिति बहुवचनम् । जन्मने = सर्वजन्मकृते, सर्वेषां कार्याणां जनयित्रे । देवाय = क्रीडादिगुणसम्पन्नाय विष्णवे । तादर्थ्ये चतुर्थी । षष्ठ्यर्थे वा विष्णुदेवस्योद्देशेन । आसया = आस्यन्ते क्षिप्यन्ते उच्चार्यन्त इति यावत्, वर्णा अनयेत्यासा तया मुखेनेत्यर्थः । वचसाऽपीति यावत् । न केवलं मनसेत्याशयः । अयं स्तोमः = इयं बुद्धिस्था स्तुतिरकारि कृता । मेधातिथिगणस्य प्रवाहतोऽनादित्वादकारीति लुङ्प्रयोगो युक्तः । कस्मादकारि, यस्मात् स स्तोमो विष्णुस्तुतिरेव। रत्नधातमः, डु धाञ् दानधारणयोः । रतिधातमा= अतिशयेन सुखधात्री[1]। तस्मादकारि प्रसिद्ध-ऋभुविषये तु - देवाय, जन्मने, एकवचनं बहुवचनार्थे। देवत्वेन ज्ञातेभ्यो[2]

१. 'सुखदात्री' घ. । २. 'जातेभ्यः' घ. ।

ऋभुभ्यो विप्रेभिरयं स्तोमोऽकारीति योज्यम् । मानुषा एव देवा भवन्तीति हि प्रसिद्धम् । यथोक्तं सूत्रकृता 'तदुपर्यपि बादरायणः सम्भवात्' (ब्र.सू.१-३-२६) इति ॥ १ ॥

(ऋ.म-१९६)

य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी ।
शमीभिर्यज्ञमाशत ॥ २ ॥

(ऋगर्थोद्धारः) - य इन्द्राय ॥ ये ऋभवः इन्द्राय = इन्द्रस्यार्थे, वचोयुजा= वचसा युज्येते रथे सम्बद्ध्येते इति वचोयुजौ, सारथेर्वाङ्मात्रेणैव रथे नियोज्यौ, हरी= वाजिनौ । मनसा सङ्कल्पमात्रेण ततक्षुः, तक्षतिः करोत्यर्थः । चक्रुः । ये च शमीभिर्विष्णुनिष्ठाभिः, 'शमो मन्निष्ठता बुद्धेः' इति वचनात् । स्त्रीलिङ्गं ङीप् च छान्दसः । अन्यथा शमैरिति स्यात् । तज्जनितभगवदनुग्रहेणेति यावत् । यज्ञं यज्ञभागम् आशत अशू व्याप्तौ । आश्नुवत लेभिरे । तेभ्यो ऋभुभ्यः स्तोमोऽकारीति पूर्वेण सम्बन्धः । यद्यपीन्द्रस्य कर्मकरा[1] ऋभवः। इन्द्रार्थं हरिनिर्माणं तेषूपपद्यते । मनुष्याणामेव दैवत्वस्य प्राप्तत्वात् । तत्प्राप्त्यनन्तरं भगवदनुग्रहेण यज्ञभागप्राप्तिश्च, न तु भगवति । तथाऽपि ऋभूणां स्वतःसामर्थ्याभावाद् ऋभुभिः क्रियामाणाऽपि क्रिया तदन्तर्गतभगवतैव क्रियत इति भगवत्यपीदं हरिनिर्माणादिकमुपपन्नम् । **'न ऋते त्वत्क्रियते किञ्चनारे'** ॥ **'तत्रतत्र स्थितो विष्णुस्तत्तच्छक्तीः प्रबोधयन् । एक एव महाशक्तिः कुरुते सर्वमञ्जसा ॥'** इति वचनात् । यद्वा, ऋभ्वन्तर्गतरूपं विना पृथगीश्वररूपेणैवैतदखिलं कृतवान् । इदमपि कथम् ? इन्द्रादिभ्यः फलदातृत्वात् । तथा हि इन्द्राद्यनुष्ठितशमीभिः प्रसन्नो भगवान् यज्ञभागं गृहीत्वा ऋभुभी रथहर्यादिकं कारयित्वेन्द्रादिभ्यस्तद्रथहर्यादिरूपं लौकिकं

१. 'कर्मभृत्याः' इति घ. ।

फलं प्रयच्छतीत्येवं फलदातृत्वाद् भगवत्यपि एतावदुक्तं प्रमेयमुपपन्नम् । तथा चात्रैवं योजना । ये भगवद्रूपविशेषा इन्द्रानुष्ठिताभिः शमीभिः प्रसन्नाः सन्तस्तदीयं यज्ञमाशत ऋभुभिः करणैः इन्द्राय हरी च ततक्षुः कारयामासुः । तेभ्यो भगवद्रूपेभ्यः स्तोमोऽकारीति सम्बन्धः । अध्यात्मं तु - ये भगवद्रूपविशेषाः इन्द्राय परमेश्वराय, तं विषयीकर्तुमिति यावत् । भक्तानां हरी = मनोबुद्ध्याख्यौ वचोयुजौ वेदवाक्यानुसारिणौ ततक्षुः चक्रुः । तदीयाभिः शमीभिः तदीयं ज्ञानयज्ञं चाऽशत, तेभ्यः स्तोमोऽकारीति सम्बन्धः ॥ २ ॥

(ऋ.म-१९७)

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम् ।
तक्षन् धेनुं सबर्दुघाम् ॥ ३ ॥

(ऋगर्थोद्धारः) - तक्षन्निति ॥ ऋभवो नासत्याभ्यां, अश्विनोर्मध्ये एको नासत्यः अपरो दस्रः । साहचर्याद् द्वयोरेकं नाम दस्राविति यावत् । अत एव 'नासत्यदस्रौ परमस्य नासे' इति प्रयोगः । अश्विनोरर्थे परिज्मानं = परितः सर्वतः ज्मां भूमिं गच्छतीति परिज्मा तं परिज्मानं, परितश्चरज्मानम् इति वक्तव्ये मध्यमपदलोपी समासोऽयमिति ज्ञातव्यम् । सकलपृथिवीगामिनम् अप्रतिहतगतिमिति यावत् । सुखं = सुखकरं, रथं तक्षन्= अतक्षन्= अकुर्वन् । सबर्दुघां= 'ब कामने' अस्मात् कर्मणि असुन्प्रत्यये तद्बलात् पूर्वं सकारागमे काम्यं सबरित्युच्यते । तथाच्च कामस्य सर्वस्य दोग्ध्रीं धेनुं= बृहस्पतेः कामधेनुं च तक्षन् अतक्षन् । 'बृहस्पतिर्विश्वरूपामुपाजत'[1] इति श्रुतेरिति भावः ॥ ३ ॥

१. 'उपायजत' इति पाठेन भाव्यमिति भाति ।

(ऋ.म-१९८)

युवांना पितरा पुनः सत्यमंन्त्रा ऋजूयवंः ।
ऋभवों विष्ट्यंक्रत ॥ ४ ॥

(ऋगर्थोद्धारः) - युवानेति ॥ ऋभवः, स्वीयौ पितरौ = माता च पिता च = सुधन्वा च पितरौ, जीर्णौ सन्तौ पुनर्युवानौ, अक्रत = अकुर्वन् । कथम् ? सत्यमन्त्राः = अमोघमन्त्राः । तदपि कथम् ? यतो ऋजूयवः = ऋजून् ब्रह्मपदयोग्यान् देवान् आत्मनो गुरुत्वेन कामयन्त इति ऋजूयवः । भक्ता हि स्वामिनं कामयन्ते । तच्छिष्या इत्यर्थः । किञ्च, ऋभवो विष्टी = विष्टि अम् इत्यत्र द्वितीयायाः 'सुपां सुलुक्' इति पूर्वसवर्णादेशे विष्टि इति जाते सवर्णदीर्घे विष्टी इति द्वितीयैकवचनम् । देवानां विष्टिम् अवेतनं स्वामिबलाद् यत् कर्म क्रियते तद्विष्टिशब्देनोच्यते । 'एकं चमसं चतुरः कुरुत' इत्यादिना वक्ष्यमाणमक्रत = अकुर्वन् । 'ऋ गतौ', ऋतस्य= ज्ञानस्य, भुः = भूमिः, आश्रय इति ऋभुर्भगवान् । बहुरूपत्वाद् बहुवचनम् । 'ऋ गतौ' अस्मात् क्तप्रत्यये ककारलोपः सति ऋतमिति भवति । तत्र प्रत्यय-लोपः । भूमित्वार्थकस्य भूशब्दस्य ह्रस्वः । तथा च ऋभु इति भवति । ऋतं कर्म भूतं सत्यं येषां ते ऋभवः । अत्रापि प्रत्ययलोपः । भूतशब्दस्य भुशब्दस्वरूपो वर्णविकारः । तथा च ऋभु इति भवति । यद्वा, ऋताः प्राप्ताः भागमिति ऋभवः । अत्र ऋतशब्दस्य ऋकारः । भागशब्दस्य भु इत्यादेशः । तथा च ऋभु इति भवति । यद्वा, ऋतशब्दो यज्ञनामा । भू प्राप्तौ इति धातोः भुशब्दः प्राप्त्यर्थकः । तथा च ऋतं यज्ञं यज्ञभागमिति यावत् । भूताः प्राप्ता इति ऋभवः । अत्र ऋभुशब्दस्य ऋकारादेशो द्रष्टव्यः । तथा च ऋभु इति भवति ॥ ४ ॥

(ऋ.म-१९९)

सं वो मदांसो अग्मतेन्द्रेण च मरुत्वंता ।
आदित्येभिंश्च राजंभिः ॥ ५ ॥ १ ॥

(ऋगर्थोद्धारः)- सं व इति ॥ हे ऋभवो मदासः= मदहेतवः सोमाः, मरुत्वता= मरुद्भिः सहितेन इन्द्रेण सह, राजभिः = दीप्यमानैः, आदित्यैश्च सह, वः = युष्माकम् । द्वितीयार्थे षष्ठी । युष्मान् समग्मत= सम्प्राप्ताः ॥ ५ ॥ १ ॥

(ऋ.म-२००)

उत त्यं चंमसं नवं त्वष्टुर्देवस्य निष्कृंतम् ।
अकंर्त चतुरः पुनंः ॥ ६ ॥

(ऋगर्थोद्धारः) - उत त्यमिति ॥ पूर्वं देवैः प्रेषितौ त्वष्टाऽग्निश्च ऋभून् प्रत्याहतुः । पूर्वं युष्माभिः कृतम् इमं जीर्णमिकमेव चमसं नूतनान् एतत्प्रमाणान् चतुरः कुरुतेति । तेऽब्रुवन् । द्वौ वा त्रीन् वा करिष्यामः, चत्वारो दुष्करा इति । पुनश्चाग्निना त्वष्ट्रा च निर्बन्धे कृते च द्वौ वा त्रीन् वा करिष्याम इति स्वोक्तं परित्यज्य चतुर्निर्माणरूपं त्वष्ट्रादीनां शुश्रूषणं तैः कृतमित्येवं कथागर्भितेयमृक् । उत= अन्यच्च, ऋभूणां कर्म कथ्यते । ऋभवः, त्यं= तं, पूर्वमेव[1] कृतं जीर्णमिकमेव, चमसं पुनर्नवं= नवान् नूतनान् चतुरश्चमसान्, अकर्त= अक्रत, अकुर्वन् । एवं त्वष्टुर्देवस्य, उपलक्षणमेतत् । अग्नेश्च निष्कृतं शुश्रूषणमकर्त ॥ ६ ॥

(ऋ.म.-२०१)

ते नो रत्नांनि धत्तन त्रिरा साप्तांनि सुन्वते ।
एकंमेकं सुशस्तिभिंः ॥ ७ ॥

१. 'पूर्वकृतं' इति घ. पाठः ।

(ऋगर्थोद्धारः) - ते न इति ॥ ये = एवम्भूता ऋभवस्ते नोऽस्माकं, सुन्वते= अस्मदीयाय यजमानाय, त्रिः = त्रिकालेष्वपि, साप्तानि, स्वार्थिकोऽत्र तद्धितः । सप्तैव साप्तानि,

'चक्रं रथो मणिर्भार्या निधिरश्वो गजस्तथा ।
एतानि सप्त रत्नानि पूर्वेषां चक्रवर्तिनाम् ॥'

इति पुराणोक्तानि सप्तसङ्ख्याकानि रत्नानि, धत्तन = दत्त । एषां रत्नानां मध्ये, एकमेकं= एकैकमपि रत्नं, सुशस्तिभिः = प्रशंसा-हेतुभिरखिलैस्तत्तद्रत्न-गुणैर्युक्तम् । एवम्भूतानि सप्त रत्नानि धत्तनेत्यर्थः । विष्णुपक्षे तु, पुराणपञ्च-रात्रेतिहाससहिताश्चत्वारो वेदाः सप्त रत्नानि, मीमांसाब्रह्मतर्कभारत-सहिताश्चत्वारो वेदा वा सप्तरत्नानि, गायत्र्युष्णिगनुष्टुब्बृहतीत्रिष्टुप्पङ्क्ति-जगत्याख्यानि वा सप्तरत्नानि धत्तनेति योज्यम् । तेषु परिनिष्ठितं कुर्विति यावत् ॥ ७ ॥

(ऋ.म-२०२)

अधारयन्त वह्नयोऽभंजन्त सुकृत्यया ।
भागं देवेषु यज्ञियम् ॥ ८ ॥ २ ॥ २० ॥

(ऋगर्थोद्धारः) -अधारयन्तेति ॥ वहतिर्धारणार्थः । अनेकार्थत्वाद् धातूनाम् । जगतो धारकत्वेन वह्नयो वह्निनामानः । यद्वा, स्वात्माधारकत्वेन स्वयंस्थिरत्वेनेति यावत् । वह्निनामानो ऋभवः सुकृत्यया सुकर्मणा देवेषु देवानां मध्ये भूत्वा देवत्वं प्राप्येति यावत् । यज्ञियं भागं यज्ञार्हं भागम् अभजन्त अभजन् प्राप्ताः, अधारयन्त च अधारयन्नपि, प्राप्तस्य भागस्या-विच्छेदो धारणम् । ततश्चेदानीमभजन्त । पश्चादप्यधारयन्त कालान्तरेऽपि स्थिरीकृतवन्त इत्यर्थः ॥ ८ ॥

ऐन्द्राग्नं सूक्तम् - २१, काण्वो मेधातिथिः ऋषिः ।
इन्द्राग्नी देवते । गायत्री छन्दः ॥

(ऋ.म-२०३)

इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि ।
ता सोमं सोमपातमा ॥ १ ॥

(ऋगर्थोद्धारः) - इहेन्द्राग्नी इति ॥ षळर्चमेतद् ऐन्द्राग्नं सूक्तम् । अहमिह यज्ञे इन्द्राग्नी स्तोमं स्वीकर्तुमुपह्वये । कस्मात् ? यस्मात् तयोरित् इन्द्राग्न्योरेव तदुभयविषयकमेव स्तोमं स्तुतिं कर्तुमिति शेषः । उश्मसि सर्वे वयं कामया-महे । किञ्च, ता तौ सोमपातमा अतिशयेन सोमानां पातारौ इन्द्राग्नी यतोऽतः वः सोमं च उप सोमं प्रति तं पातुं इति यावत् । ह्वय इति पूर्वेण सम्बन्धः ॥ १ ॥

(ऋ.म-२०४)

ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः ।
ता गायत्रेषु गायत ॥ २ ॥

(ऋगर्थोद्धारः) - ता यज्ञेष्विति ॥ हे नरः ! ऋत्विजः ! ता = तौ प्रकृतौ इन्द्राग्नी द्वितीयाबहुवचनमेतत् । यज्ञेषु प्रशंसत प्रकर्षेण स्तुत । शुम्भता 'शुभ शुम्भ शोभार्थे' । अन्तर्भावितण्यर्थः । शोभयत भूषयत । किञ्च, इन्द्राग्नी गायत्रेषु सामसु गायत । सप्तमी तृतीयार्थे । गायत्रैः सामभिः स्तुतेत्यर्थः ॥ २ ॥

(ऋ.म-२०५)

ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे ।
सोमपा सोमपीतये ॥ ३ ॥

(ऋगर्थोद्धारः) - ता मित्रस्येति । यौ तौ प्रसिद्धौ मित्रस्य हरेः प्रशस्तये । प्रशंसार्थौ प्रशंसाज्ञापकौ भवतः । देवैर्हि ऋष्यादीन् प्रति उपदेशद्वारा परमेश्वरस्य प्रशंसा लोकेषु ज्ञाप्यते । तौ सोमपौ इन्द्राग्नी सोमपीतये हवामहे ॥ ३ ॥

(ऋ.म-२०६)

उ॒ग्रा सन्ता॑ हवामह॒ उपे॒दं सव॑नं सु॒तम् ।
इ॒न्द्रा॒ग्नी एह ग॑च्छताम् ॥ ४ ॥

(ऋगर्थोद्धारः) - उग्रा सन्तेति ॥ एहेत्यत्र आ, इहेति पदच्छेदः । वयं उग्रा उग्रौ शत्रूणां क्रूरौ सन्ता सन्तौ प्रशस्तौ इन्द्राग्नी इदं सवनम् इमं यज्ञं सुतं सोमं चोप प्रति हवामहे । तदाह्वानमवधार्येन्द्राग्नी इहाऽगच्छताम्॥४॥

(ऋ.म-२०७)

ता म॒हान्ता॑ सद॒स्पती॒ इन्द्रा॑ग्नी॒ रक्ष॑ उब्जतम् ।
अप्र॑जाः सन्त्व॒त्रिणः॑ ॥ ५ ॥

(ऋगर्थोद्धारः) - ता महान्तेति ॥ हे इन्द्राग्नी यौ युवां महान्तौ पूज्यौ सदसो यज्ञगृहविशेषस्य पती स्वामिनौ तौ रक्षः रक्षांसि उब्जतम् । यद्यपि उब्ज आर्जवे इति पठ्यते । तथाऽपि योग्यतावशादत्र वधार्थो ग्राह्यः । हतम् । किञ्च अत्रिणः । अत्र विशेष्यान्तरादर्शनात् पूर्वार्धाद् रक्ष इत्यनुवर्तते । अत्रिणो रक्ष इत्यनयोर्यथास्थितयोर्विशेषणविशेष्यभावस्य बाधितत्वाद् रक्ष्यरक्षकभावसम्बन्धस्य सम्भवाद्[1] रक्षःशब्देन तदीया जनाः लक्ष्यन्ते । तथा च त्रयो मार्गाः एषां सन्तीति त्रिणः । न त्रिणो अत्रिणः ।

---
१. 'सत्वात्' घ.।

स्वर्गरूपपितृगतिरहितत्वात्, मोक्षरूपदेवतागतिरहितत्वात् पृथिवीरूपमानुष-गतिरहितत्वात् मार्गत्रयोज्झिताः, अधोगतियोग्या इति यावत् । रक्षःसम्बन्धिनो जनाः अप्रजाः प्रजारहिताः निस्सन्ततयः सन्तु ॥ ५ ॥

(ऋ.म-२०८)

तेन॑ स॒त्येन॑ जागृ॒तमधि॑ प्र॒चे॒तुने॑ प॒दे ।
इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम् ॥ ६ ॥ ३ ॥ २१ ॥

(ऋगर्थोद्धारः) - तेन सत्येनेति ॥ हे इन्द्राग्नी युवां तेन प्रसिद्धेन सत्येन गुणपूर्णेन विष्णुना तत्प्रसादेनेति यावत् । प्रचेतुने प्रकृष्टचेतने । उकारः आधिक्यार्थः । पदे, पद्यत इति व्युत्पत्त्या गम्ये हरौ विषये अधि सम्यक् । अनन्ययोगेन अनन्यभक्त्येति यावत् । यद्वा, अधि सम्यक् स्वभावतः लौकिकफलानपेक्षयेति यावत् । जाग्रतं जागरणवन्तौ स्थः तद्विषय-ज्ञानास्पृष्टाविति यावत् । एवम्भूतौ युवामस्मभ्यं शर्म सुखं यच्छतम् । यद्यपि तेन सत्येनेत्युक्तं करणत्वं प्रचेतने पदे इत्युक्तमधिकरणत्वं जाग्रतमित्याख्यातोक्तं कर्तृत्वं च विष्णौ दुर्घटम् । 'देवदत्तो गृहे पात्र्या भुङ्क्ते' इत्यादौ करणत्वादीनां भिन्नाधिकरणत्वदर्शनात् । भगवति च सत्येनेत्यादिनोक्तानां चतुर्गुणादीनां भेदाभावात् । तथाऽपि भेदप्रतिनिधि-विशेषशक्त्या युक्तमेव । तथा चायमर्थः । इन्द्राग्नी भगवद्रूपविशेषौ युवां तेन सत्येन प्रसिद्धेन इच्छादिना गुणेन प्रचेतुने पदे स्वविषयेऽधि जागृतम् । भगवद्रूपयोः स्वविषये सदा जागरणसद्भावाद् जागृतमिति विध्यर्थकस्य लोड्लकारस्यानुपपन्नत्वात् । तद्व्यत्ययेन स्वसामर्थ्येन सदा जागरणवन्तौ स्थ इति व्याख्येयम् । सदा स्वप्रकाशौ स्थ इति यावदित्यर्थः । एवम्भूतौ युवामस्मभ्यं शर्म यच्छतम् ॥ ६ ॥ ३ ॥ २१ ॥

सूक्तम्-२२,

मेधातिथिः काण्वः ऋषिः। १-४ अश्विनौ देवते।
५-८ सविता। ९-१० अग्निः। ११ देव्यः। १२ इन्द्राणी-वरुणानी-
अग्नाय्यः। १३-१४ द्यावापृथिव्यौ। १५ पृथिवी। १६ विष्णुर्देवा वा।
१७-२१ विष्णुः। गायत्री छन्दः।

(ऋ.म-२०९)

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम्।
अस्य सोमस्य पीतये ॥ १ ॥

(ऋगर्थोद्धारः) - प्रातर्युजेति ॥ एकविंशत्यृचमिदं सूक्तम्। तत्राऽद्याश्चतस्र आश्विन्यः। हे होतः! प्रातर्युजा = प्रातर्युजौ = प्रातःसवने स्तुत्यौ, अश्विनौ, प्रसिद्धौ। भगवत्पक्षे तु प्रातर्युजौ प्रातर्योगो हंसमन्त्रः **'प्रातर्योगो महानयम्'** इति तन्त्रसारोक्तेः। उपायोपेययोरभेदोपचारः। तथा च प्रातर्योगेन गम्याविति व्याख्येयम्। एतादृशावश्विनौ भगवद्रूपविशेषौ विबोधय। अत्र लोटो व्यत्ययमङ्गीकृत्य वर्तमानार्थतया व्याख्येयम्। अन्यथा परतो बाधापत्त्याऽज्ञानप्राप्तेः सर्वज्ञत्वभङ्गात्। तथा च सदा विबुधावेव वर्तेते। तौ आगमनाय प्रार्थयस्वेति यावत्। एवं त्वया प्रार्थितौ तौ इहास्य सोमस्य पीतये आगच्छताम्॥ १ ॥

(ऋ.म-२१०)

या सुरथा रथीतमोभा देवा दिविस्पृशा।
अश्विना ता हवामहे ॥ २ ॥

(ऋगर्थोद्धारः) - या सुरथेति ॥ या = यौ अश्विनौ, उभा देवौ, सुरथा = सुरथौ = शोभनरथवन्तौ, रथीतमौ = रथितमौ = अतिशयितरथिनौ, दिविस्पृशौ = दिवि वर्तमानौ, ता = तौ, वयं हवामहे॥ २ ॥

(ऋ.म-२११)

या वां कशा मधुमत्यश्विना सूनृतावती।
तया यज्ञं मिमिक्षतम् ॥ ३ ॥

(ऋगर्थोद्धारः) - या वां कशेति ॥ हे अश्विनौ! या, वां = युवयोः सम्बन्धिनी, मधुमती = स्वादुमती यज्ञोपयुक्तघृतादिवस्तुनः स्पर्शमात्रेण स्वादुत्वकारिणी, सूनृतावती, सूनृता = वेदवाणी, तद्वती = तत्स्तुता[1], कशा = अश्वनोदिनी, तया अस्मदीययज्ञं मिमिक्षतं **'स्पर्शो मेक्षणमुच्यते'** स्पृशतमित्यर्थः। अत्र क्रियारूपस्य यज्ञस्य कशया मेक्षणायोगाद् यज्ञसम्बन्धिघृतसोमादिवस्तु मिमिक्षतमिति व्याख्येयम्॥ ३ ॥

(ऋ.म-२१२)

न हि वामस्ति दूरके यत्रा रथेन गच्छथः।
अश्विना सोमिनो गृहम् ॥ ४ ॥

(ऋगर्थोद्धारः) - न हि वामिति ॥ हे अश्विनौ! यत्र, सप्तमी द्वितीयार्थे। यत् सोमिनो यजमानस्य गृहं प्रति रथेन गच्छथः आगच्छथः। तत् गृहं वां युवयोः दूरके विदूरे न ह्यस्ति दूरं न भवति। हि यस्मात् तस्माद् आगच्छतम्॥ ४ ॥

(ऋ.म-२१३)

हिरण्यपाणिमूतये सवितारमुप ह्वये।
स चेत्ता देवता पदम् ॥ ५ ॥

(ऋगर्थोद्धारः) - हिरण्यपाणिमिति ॥ अतः पराश्चतस्रः सावित्र्यः। अहं हिरण्यपाणिं, अत्र पाणिशब्दः समग्ररूपोपलक्षकः। हितं च रमणीयं

---

१. 'तद्वत् स्तुता' घ.।

चेति वा हिरण्यवर्णत्वाद् वा, हिरण्यं पाणिः रूपं शरीरं यस्यासौ तथोक्तस्तं सवितारं जगत्स्रष्टृत्वात् सवितृशब्दवाच्यं भगवन्तमूतये रक्षाद्यर्थमुपह्वये। कुतः? यस्मात् स सविता विष्णुः पदं स्वस्यान्यस्य च स्वरूपं चेत्ता 'चिती सञ्ज्ञाने' ज्ञाता। तथा च स एव विष्णुरेव देवता। 'सर्वं वाक्यं सावधारणम्' इति न्यायाद् देवशब्दपर्यायो देवताशब्दः। देव इत्यर्थः। अन्ये तु देवाभासा इति भावः। यद्वा, अयं तल्प्रत्ययो भावाभिधायी **'तस्य भावस्त्वतलौ'**, (पा.सू-५-१-११९) इति स्मरणात्। तथा च देवस्य भावो देवता देवशब्द-प्रवृत्तिनिमित्तमित्यर्थः ॥ क्रिडादिगुणजातार्थकाद् दिव्धातोः कर्तरि पचाद्यचि निष्पन्नो देवशब्दश्च क्रीडादिगुणवद्वाची। तस्य धर्मः क्रीडादि-गुणसमुदाय एव देवत्वम्। एवं च देवता देवशब्दप्रवृत्तिनिमित्तं गुणजातं स एव विष्णुरेव तदभिन्नमेवेति योज्यम्। पूर्वयोजनायां स एवेत्यनुवादो देवतेति विधेयम्। अत्र तु देवतेत्यनुवादेन स एवेति विधेयमिति ज्ञातव्यम् ॥ ५ ॥ ४ ॥

(ऋ.म-२१४)

अपां नपातमवसे सवितारमुपस्तुहि।
तस्य व्रतान्युश्मसि ॥ ६ ॥

(ऋगर्थोद्धारः) - अपान्नपातमिति ॥ नपाच्छब्दः पौत्रपर्यायः। तथाच, हे होतः ! अपान्नपातम् 'अद्भ्यः पृथिवी' इति श्रुतेः पृथिवी तावदपां पुत्री। पृथिव्यात्मकत्वाद् देहोऽप्यपां पुत्रः। अधिकारिविशेषणं तत्र व्यज्यमानत्वाद् जनार्दनः पृथिवीपुत्र इत्येवम् अपां नपातं पौत्रं सवितारं विष्णुं, तथाऽपां कार्येऽण्डे जातत्वात् प्रसिद्धः सविताऽप्यपान्नपात्। तं सवितारं प्रसिद्धं च अवसे अस्मद्रक्षणार्थमुपस्तुहि। भवद्रक्षणार्थमपां स्तोत्रं कुतः कर्तव्य-मित्याशङ्कायामुच्यते यस्मात् तस्य सवितुः व्रतानि कर्माणि उष्मसि। सर्वे वयं स्तुत्यतया कामयामहे। अयं भावः। अस्माभिर्भगवत्कर्मणां स्तुतिस्तावत्

कर्तव्याऽस्ति। तत्र प्राप्तविघ्नपरिहारायास्मदर्थे त्वं तमुपस्तुहि। त्वत्स्तुति-प्रसन्नेन सवित्रा रक्षिता वयं तदीयानि कर्माणि स्तुम इति ॥ ६ ॥

(ऋ.म-२१५)

विभक्तारं हवामहे वसोश्चित्रस्य राधसः।
सवितारं नृचक्षसम् ॥ ७ ॥

(ऋगर्थोद्धारः)- विभक्तारमिति ॥ वयं, चित्रस्य राधसः = उत्तमसिद्धि-रूपस्य वसोर्वस्तुनः, विभक्तारं = सदा विभज्य दातारं, यस्य यावद् योग्यं तावतो दातारं, नृचक्षसं = नृणां जीवानां द्रष्टारम् अशेषपुण्यपापादिविशेषैः सह जीवचैतन्यस्य साक्षाद् द्रष्टारं, सवितारं हवामहे आह्वयामः ॥ ७ ॥

(ऋ.म-२१६)

सखाय आ निषीदत सविता स्तोम्यो नु नः।
दाता राधांसि शुम्भति ॥ ८ ॥

(ऋगर्थोद्धारः)- सखाय इति ॥ अत्र केवलः आ इत्युपसर्गः सकारकक्रियावचनो व्याख्येयोऽर्थातिशयलाभात्। अतो निषीदतेति क्रियया न सम्बन्धनीयः ॥ तथा च हे सखायः ! ऋत्विजः ! आ अस्मत्समीपमागत्य निषीदत। अस्माभिरागत्योपवेशनं किमिति कर्तव्यमिति चेदुच्यते। नु = इदानीं, नोऽस्माकम् ॥ अभिलषितस्य दाता स्तोम्यः स्तोमार्हः स्तोतव्यः सविता हरिः राधांसि स्वेन दत्ताः सिद्धीः शुम्भति। अञ्जसा शोभयति। तथा च भगवद्दत्तत्वेनातिशोभावन्मदीयसिद्धिसन्दर्शनायाऽगत्य निषी-दतेत्याशयः ॥ ८ ॥

(ऋ.म-२१७)

अग्ने पत्नीरिहावह देवानामुशतीरुप।
त्वष्टारं सोमपीतये ॥ ९ ॥

(ऋगर्थोद्धारः) - अग्ने पत्नीरिति ॥ इतः परं यथा प्रतीता एव देवपत्नीत्वष्टृभारत्याद्या देवता द्रष्टव्याः। हे अग्ने ! उशतीः काममाना[1] यज्ञं प्रत्यागमनमिति शेषः । देवानां पत्नीः त्वष्टारं सोमपीतये इहोपावह । भगवांस्तु देवानां पालकत्वेन देवानां पत्नीत्युच्यते। बहुरूपत्वाद् बहुवचनमिति ज्ञातव्यम् । पत्युर्नकारोऽन्तादेशः । यज्ञसंयोग इति तु नाऽश्रितम् ॥ ९ ॥

(ऋ.म-२१८)

आ ग्ना अंग्न इहावंसे होत्रां यविष्ठ भारंतीम् ।
वरूंत्रीं धिषणां वह ॥ १० ॥ ५ ॥

(ऋगर्थोद्धारः) - आ ग्ना अग्न इति ॥ हे यविष्ठ ! अतिशयेन यौवनावस्थावन् ! अग्ने! ग्नाः नदीदेवताः गङ्गाद्याः होत्रां, धातूनामनेकार्थत्वाद् जुहोतिरत्राऽह्वानार्थकः । तथा हूयन्ते एभिरिति होतृशब्दवाच्यमन्त्राभिमानित्वात् तच्छब्दवाच्यां वरूत्रीं व्रियत इति वरूः, त्रायत इति त्री, वरूश्चासौ त्री चेति वरूत्री, तां धिषणां बुद्ध्यभिमानित्वाद् तच्छब्दवाच्यां भारतीं च । यद्वा, बुद्ध्यभिमानित्वाद् धिषणाशब्दवाच्यां श्रीदेवीं चावसेऽस्मद्रक्षणायेहावह । भगवत्पक्षे तु हे यविष्ठ अग्ने ! ग्नाः ज्ञातृत्वान्नेतृत्वाद्वा गमनान्नयनाद्वा ग्नाः । आहूयन्त इति होत्रा । पूर्ववद् वरूत्रीं धिषणां बुद्धिप्रेरकां भारतीं, भरो भारः, तेन ततत्वान्निरवधिकगौरवादिति यावत् । भरतो मुख्यप्राणः, भृञ् भरणेऽस्मादतच्प्रत्यये गुणे च सति जगतो भर्तृरूपत्वाद्वा प्राणो भरतः । तस्येयं स्वामिनी भारती । तां चावसे इहाऽवहेति । अत्र बहुरूपत्वाद् बहुवचनम्, स्त्रीरूपत्वात् स्त्रीलिङ्गप्रयोग इति द्रष्टव्यम् ॥ १० ॥ ५ ॥

१. 'कामयमानाः' इति पाठेन भाव्यमिति भाति ।

(ऋ.म-२१९)

अभिनों देवीरवंसा महः शर्मणा नृपत्नीः ।
अच्छिंन्नपत्राः सचन्ताम् ॥ ११ ॥

(ऋगर्थोद्धारः) - अभि न इति ॥ अच्छिन्नपत्राः, पत्रशब्देन ताटङ्कमुच्यते । अच्छिन्नकर्णभूषणयुक्ताः, अविधवा इति यावत् । नृपत्नीः प्रधानपुरुषत्वात् नरो देवाः । तेषां पत्नीः नृणां पालयितृत्वाद्वा नृपत्नीः, विभक्तिव्यत्ययेन नृपत्न्यो देवीर्देव्यः अवसा अवनकर्त्रा प्राणेन साकं महो महतः सर्वोत्तमस्य विष्णोः शर्मणा, विष्णुना दीयमानतया तत्सम्बन्धि यन्मोक्षादिरूपं शर्म तद् दत्वेति यावत् । नोऽस्मान् अभि अभितः सर्वतः सचन्तां रक्षन्तु । देवपत्नीनामपि धर्ममार्गप्रेरणद्वारा मोक्षसुखदातृत्वाद् इत्याशयः ॥ ११ ॥

(ऋ.म-२२०)

इहेन्द्राणीमुपंह्वये वरुणानीं स्वस्तयें ।
अग्नायीं सोमंपीतये ॥ १२ ॥

(ऋगर्थोद्धारः) - इहेन्द्राणीमिति ॥ अहमिन्द्राणीमिन्द्रस्य पत्नीं शचीदेवीं वरुणानीं वरुणस्य पत्नीं गङ्गां, अग्नायीं अग्नेः पत्नीं स्वाहां च, सोमपीतये, स्वस्तये, सन्ततसौख्याय च सोमं पीत्वा अस्मभ्यं सन्ततसौख्यं दातुमिति यावत् । इहोपह्वये ॥ १२॥

(ऋ.म-२२१)

मही द्यौःपृंथिवी चं नः इमं यज्ञं मिंमिक्षताम् ।
पिपृतां नो भरींमभिः ॥ १३ ॥

(ऋगर्थोद्धारः) - मही द्यौरिति ॥ द्युपृथिवीशब्दवाच्यो भगवान् । यद्वा,

मही महती, प्रकाशरूपत्वाद् द्यौः श्रीदेवी, पृथिवी भूदेवी च द्युपृथिवीलोकाभिमानिन्यौ = द्यावापृथिव्यौ भारतीरूपे वा, नोऽस्मदीयं यज्ञं मिमिक्षतां स्पृशतां यज्ञं प्रत्यागच्छतामिति यावत्। आगत्य च भरीमभिः भरणैः भरणं कृत्वेति यावत्। पिपृतां = पारयतां, दुःखेभ्य इति शेषः ॥ १३ ॥

(ऋ.म-२२२)

तयोरिद् घृतवत् पयो विप्रा रिहन्ति धीतिभिः।
गन्धर्वस्य ध्रुवे पदे ॥ १४ ॥

(**ऋगर्थोद्धारः**) - **तयोरिति** ॥ द्युपृथिवीलोकाभिमानिदेवताया भारत्या एव परोक्षापरोक्षज्ञानदेवतात्वात्, तयोर्द्यावापृथिव्योस्तदभिमानिन्या भारत्याः सम्बन्धि, तद्देवताकमिति यावत्। तयोर्द्यावापृथिव्योः प्रसादत इति वा। इत्= एव, गन्धर्वस्य= गां वाचं धारयन् वर्तते यतोऽतो गन्धर्वो विष्णुः। उपपदस्य गम्भावः। तस्य ध्रुवे नित्ये पदे स्वस्वरूपे, विषयसप्तमीयम्। तत्स्वरूपविषयकमिति यावत्। घृतवत् = 'घृ क्षरणदीप्त्योः' घृतं दीप्तिरपरोक्षज्ञानं तद्वत् = तेन सहितं, यत् पयः = पीयते मुमुक्षुभिः सेव्यत इति पयो विज्ञानं तदुभयं परोक्षापरोक्षं विप्रा मेधाविनौ, धीतिभिर्बुद्धिवृत्तिभी रिहन्ति लिहन्ति आस्वादयन्ति, सेवन्ते, तद्वन्तो भवन्तीति यावत् इत्यर्थः ॥ १४ ॥

(ऋ.म-२२३)

स्योना पृथिवि भवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथः ॥ १५ ॥ ६ ॥

(**ऋगर्थोद्धारः**) - **स्योनेति** ॥ हे पृथिवि ! या त्वम्, अनृक्षरा = नृवत् मनुष्यवत् क्षरति नश्यतीति नृक्षरा, न नृक्षरा अनृक्षरा, निविशन्तेऽस्यामिति

निवेशनी = सर्वप्राण्याधारभूता च साऽस्माकं स्योना, स्योनाशब्दः सुखवाची। तन्नामसु पाठात्। स च सुखासनमितिवत् तत्कारिणि वर्तते। तथा च सुखकारिणी भव। नोऽस्मभ्यं सप्रथः प्रथो विस्तारः। सः प्रथसा वर्तत इति सप्रथः। महत्तरमिति यावत्। [1]शर्म गेहो गृहमायतनमिति तन्नामसु पाठात्, शर्म गृहं च यच्छ प्रयच्छ ॥ १५ ॥ ६ ॥

(ऋ.म-२२४)

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्याः सप्तधामभिः ॥ १६ ॥

(**ऋगर्थोद्धारः**) - **अतो देवा इति** ॥ षड् वैष्णव्यः। आद्या ऋक् दैवी च। यतः कारणाद् विष्णुः, विशब्दो विशिष्टत्ववाची। **'णकारो बलं षकारः प्राण आत्मा'** इति श्रुतेः शकारणकारौ चेष्टाबलवचनौ। उन्प्रत्ययश्च ताच्छील्यार्थः। तथा च विशिष्टचेष्टाबलशीलत्वाद् विर्विष्णुर्भगवान्। पृथिव्याः, ल्यब्लोपनिमित्ता पञ्चमी। पृथिवीमारभ्य सप्तधामभिः सप्तलोकैः सार्क त्रिभिः क्रमैः पादविक्षेपैरिति शेषः। इदमिति वक्ष्यमाणमत्रापि सम्बध्यते। इदं वक्ष्यमाणं जगद् विचक्रमे विक्रान्तवान्, असुरेभ्यो जहारेति यावत्। हृत्वा च सुरान् स्वस्वपदस्थानपि चक्र इति शेषः। अत एवं देवानां विष्णुप्रसादबललब्धपदवत्त्वेनास्मदवने समर्थत्वाद् देवा नोऽस्मान् अवन्तु रक्षन्तु ॥ १६ ॥

(ऋ.म-२२५)

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्।
समूळ्हमस्य पांसुरे ॥ १७ ॥

---

१. 'शर्म गेहे गृहमिति' इति घ. पाठः।

(ऋगर्थोद्धारः) - इदं विष्णुरिति ॥ यदा तदेत्यध्याहारः । इदमित्यस्योत्तरार्धेऽपि सम्बन्धः । तथा च यदा विष्णुर्भगवान् इदं विश्वं विचक्रमे विक्रान्तवान्, असुरेभ्यो जहारेति यावत् । कथम् ? त्रेधा पदं निदधे । तदा अस्य जगत्पतेः पांसुरे, पांसवो यत्र रमन्ति, जडानां रमणासम्भवाच्छोभन्ते । यद्वा, पांसुशब्देन तदाश्रिता देवा विवक्षिताः । ते यत्र रमन्ति रमन्ते तत् पांसुरं पदम् । तस्मिन् पदे विश्वं समूळ्हं अज्मध्यस्थढकारस्य ळकारं बह्वृचा जगुः । 'वह प्रापणे' प्रापितं प्रतिष्ठितमन्तर्गतमिति यावत् ॥ १७ ॥

(ऋ.म-२२६)

त्रीणि॒ प॒दा वि च॑क्रमे॒ विष्णु॑र्गो॒पा अदा॑भ्यः ।
अतो॒ धर्मा॑णि धा॒रय॑न् ॥ १८ ॥

(ऋगर्थोद्धारः) - त्रीणि पदेति ॥ अदाभ्यः केनाप्यस्तम्भनीयोऽनिवारणीयो विष्णुः सर्वाणि त्रीणि त्रित्वावच्छिन्नानि पदा पदानि पदार्थस्वरूपानि[1] त्रित्वावच्छिन्नाश्च पदार्थाः । अथर्वणवेदस्य सामवेदान्तर्भावेन ऋगादयस्त्रयो वेदाः, अतीतानागतवर्तमानकालाः, सत्वरजस्तमोगुणाः, भूर्भुवस्स्वराख्या लोकाः, देवमानुषदानवरूपा जीवाः, चेतनाचेतनमिश्राः सकलपदार्थाश्च, अत्र चेतनशब्देन श्रीदेवी मुक्ताश्चोच्यन्ते । अचेतना घटादयः, मिश्राः जीवमिश्राः सात्मकदेहा इति यावदिति द्रष्टव्यम् । विचक्रमे अतिक्रान्तस्तदुत्तमो जात इति यावत् । कथम् ? इत्यत उक्तम्- गोपा इति । यतो गोपा रक्षकः, इदमुपलक्षणम् । स्रष्टा भर्ता मोक्षदश्च अतो विचक्रम इत्याशयः । यत एवंमाहात्म्यो विष्णुरतः कारणाद् धर्माणि धर्मान् जगतो धारकानपि वाय्वादीन् स एव धारयन् वर्तत इति शेषः ॥ १८ ॥

१. 'पदार्थस्य रूपाणि' इति घ. ।

(ऋ.म-२२७)

विष्णोः॒ कर्मा॑णि पश्यत॒ यतो॑ व्र॒तानि॑ पस्प॒शे ।
इन्द्र॑स्य॒ युज्यः॒ सखा॑ ॥ १९ ॥

(ऋगर्थोद्धारः) - विष्णोः कर्माणीति ॥ हे जनाः ! यः पस्पशे 'स्पशाज्ञातदृशौ' इति धातुः । प्रत्यक्षायोग्यस्यार्थस्य दर्शने स्पशधातुः प्रवर्तत इति तदर्थः । तथा च यः प्राकृतैरदृश्य एव भगवान् योगिभिर्दृष्टो बभूव । यश्चेन्द्रस्य मुख्यप्राणस्य 'त्वयेदिन्द्र युजा वयम्' इत्यस्यामृचि इन्द्रशब्दस्य प्राणे प्रयोगदर्शनात् । युज्यः = सर्वदा योगार्हः । सदा तेन सहितः, विष्णुप्राणयोर्नित्ययोगस्य 'कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि' इत्यादिश्रुतिसिद्धत्वात् । अत एव सखा, यतो विष्णोर्व्रतानि = अशेषप्राणिकर्माणि जातानीति शेषः । तस्य विष्णोः कर्माणि पश्यत जानीथ । यतो येभ्यो विष्णुकर्मभ्यो व्रतानि अशेषप्राणिकर्माणि जातानि दृष्टानि तादृशानि अशेषप्राणिजनकत्वमहिमाविशिष्टानि विष्णोः कर्माणि क्रियाः पश्यतेति वा योज्यम् । [1]अशेषप्राणिजनकत्वरूपम् अशेषप्राणिकर्मजनककर्मवत्त्वरूपं वा विष्णोर्माहात्म्यम् अनुपलम्भबाधितमिति शङ्कापरिहाराय पस्पश इत्युक्तमिति द्रष्टव्यम् । प्राकृतानामनुपलम्भेऽपि योगिभिर्दृश्यमानत्वाद् अनुपलम्भोऽसिद्ध इति भावः ॥ १९ ॥

(ऋ.म- २२८)

तद्विष्णोः॑ प॒र॒मं प॒दं सदा॑ पश्यन्ति सू॒रयः॑ ।
दि॒वीव॒ चक्षु॒रात॑तम् ॥ २० ॥

(ऋगर्थोद्धारः)- तद्विष्णोरिति ॥ विष्णोस्तत् परमं रमाब्रह्मशिवादिभ्यः अत्युत्तमं पदं स्वरूपं सूरयः संसारान्निर्मुक्ताः । ते हि मुख्यतः सूरयः । त

१. 'अशेप्राणिकर्मजनकत्वरूपं' इति घ. पाठः ।

एव सर्वदा पश्यन्ति। नत्वन्ये, ‘ हृदा इव स्नात्वा उत्वे ददृशिरे’ इति श्रुतेः। मुक्ता एव चेत् सदा पश्यन्ति तर्ह्यन्येषां कथं तज्ज्ञानमित्याशङ्कायां-मनुमानेनेत्याशयेनाऽह - **दिवीवेति** ॥ दिवि आततं चक्षुरिव। यथा दिवि आकाशे व्याप्तमपि चक्षुर्न दृश्यते, किन्तु अयं चक्षुष्मान् रूपज्ञत्वात्, इत्येवं विषयोपलब्धिलक्षणेन फलेनानुमीयते, तथा परमेश्वररूपं सर्वगतमपि न दृश्यम्। किन्तु ब्रह्माद्याः पदार्थाः स्वसत्तादिषु परसापेक्षाः, अस्वतन्त्र-त्वादित्येवम् अस्वतन्त्राणां पदार्थानां सत्ताप्रतीतिप्रवृत्तिभिर्ज्ञायत इति तात्पर्यम्। अत्र चक्षुषो व्याप्तिर्नाम अशेषध्रुवादिमण्डलपर्यन्तं रश्मिद्वारा दूरगमनमेव विवक्षितं, न तु मुख्या व्याप्तिः। ‘अणवश्च’ (ब्र.सू-२-४-८) इति सूत्रविरोधापत्तेरिति द्रष्टव्यम्॥ २० ॥

(ऋ.म २२९)

तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वांस॒: समि॑न्धते।
विष्णो॒र्यत्प॑र॒मं प॒दम् ॥ २१ ॥ ७ ॥ २२ ॥

(ऋगर्थोद्धारः) - तद्विप्रास इति ॥ विष्णोर्यत्परमं पदं तत्, विप्रासो मेधाविनो विपन्यवः। पनतिरत्र ज्ञानार्थः। ततो युः। वि = विशेषेण पन्यवो ज्ञानिनः ज्ञानितया इति यावत्। जागृवांसः प्राप्तजागराः = सदा जागरणवन्तः, संसारान्मुक्ता इति यावत्। समिन्धते। इन्धी दीप्तौ। सन्दीपयन्ति = जानन्ति। शास्त्रैर्ज्ञापयन्ति वा। ‘ब्रह्मा त्वो वदति जातविद्याम्’ इति श्रुतेरित्यर्थः। यद्यपि मुक्तज्ञेयत्वेनाभिप्रेतो विष्णोः सर्वोत्तमत्वरूप एतादृगर्थः ‘तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः’ इति पूर्वस्याम् ऋच्येवोदित इति पुनरुक्तिर्व्यर्था। तथाऽपि सर्वोत्तमत्वेन मुक्तज्ञेयो विष्णुरित्यस्मिन्नर्थे वेदानां महातात्पर्यमिति ज्ञापनाय पुनरुदित इत्यदोष इति ज्ञातव्यम्॥ २१ ॥ ७ ॥ २२ ॥

सूक्तम् - २३

मेधातिथिः काण्वः ऋषिः। १ वायुर्देवता। २-३ इन्द्रवायू।
४-६ मित्रावरुणौ ॥ ७ -९ इन्द्रो मरुत्वान्। १०- १२ विश्वेदेवाः।
१३-१५ पूषा। १६-२२-२३(पूर्वार्धस्य) आपः, (उत्तरार्धस्य)
२४ अग्निर्देवता। १-१८ गायत्री छन्दः। १९ पुर उष्णिक्। २१ प्रतिष्ठा।
२०-२२-२४ अनुष्टुप्।

(ऋ.म-२३०)

ती॒व्राः सोमा॑स॒ आ ग॑ह्या॒शीर्व॑न्तः सु॒ता इ॒मे।
वायो॒ तान् प्रस्थि॑तान् पिब ॥ १ ॥

(ऋगर्थोद्धारः) - तीव्राः सोमास इति ॥ चतुर्विंशत्यृचमिदं सूक्तम्। तत्राऽद्या ऋग् वायव्या। अत्र यच्छब्दोऽध्याहार्यः। हे वायो! य इमे तीव्राः तिग्माः आशुस्वकार्यकारिणो वीर्यवन्त इति यावत्। आशीर्वन्तः, आशीरित्याशास्यमानोऽर्थः, तद्वन्तः तेन सह साध्यसाधनभाववन्तः, यजमानेष्टसाधका इति यावत्। सुताः = अभिष्टुताः[१] सोमासः सोमाः सन्ति। तान् प्रतिस्थितान् प्रस्थितनामकान्। यद्वा, प्रकर्षेणाभिमुख्येन स्थिताः = प्रस्थिताः, तान् त्वदभिमुखान् इति यावत्। एतादृशान् प्रत्या-गहि। आगच्छ, आगत्य पिब च ॥ १ ॥

(ऋ.म-२३१)

उ॒भा दे॒वा दि॑वि॒स्पृशे॑न्द्रवा॒यू ह॑वामहे।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ २ ॥

(ऋगर्थोद्धारः) - उभा देवाविति ॥ द्वे ऐन्द्रवायव्ये। उभा = उभौ, देवा= देवौ, दिविस्पृशा = दिविस्पृशौ। दिव् क्रीडेत्यादिधातोः[२]द्युत्यर्थकस्य

१. ‘अभिषुताः’ - इति क.। २. ‘रत्यर्थस्य’ इति घ.।

गत्यर्थस्य वा दीव्यतेः द्यौरिति रूपम्। उभयथाऽपि ज्ञानवाचकम्। विषय-सप्तमी चेयम्। देवशब्दसन्निधानसामर्थ्याच्च देवानां मध्ये इति लभ्यते। तथा च सर्वदेवानां मध्ये दिवि ज्ञानविषये स्पृशतः। सम्बध्नीतः इति दिवि-स्पृशौ। ज्ञानसम्बन्धिनौ। निर्धारणसामर्थ्यादधिकज्ञानाविति लभ्यते। एतादृशौ इन्द्रवायू वयमस्य सोमस्य पीतये हवामहे॥ २॥

(ऋ.म-२३२)

इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये।
सहस्राक्षा धियस्पती ॥ ३ ॥

(ऋगर्थोद्धारः) - इन्द्रवायू इति॥ मनोजुवा मनोजुवौ। जुवतिरत्र प्रेरणार्थः, वेगार्थश्च। मनःप्रेरकौ, मनोवेगिनौ वा। धियस्पती, अत एव सहस्राक्षा = सहस्राक्षौ। सहस्रशब्दोऽपरिमितवाची। अक्षशब्देन तज्जन्य-साक्षात्कारो लक्ष्यते। तथा च बहुज्ञानौ पूर्णज्ञानावित्यर्थः। एतदृशाविन्द्र-वायू विप्रा = मेधाविनः ऊतये रक्षायै हवन्ते = आह्वयन्ति॥ ३॥

(ऋ.म-२३३)

मित्रं वयं हवामहे वरुणं सोमपीतये।
जज्ञाना पूतदक्षसा ॥ ४ ॥

(ऋगर्थोद्धारः) -मित्रं वयमिति॥ तृचो मैत्रावरुणः। वयं मित्रं वरुणं च सोमपीतये हवामहे। आहूतौ जज्ञानौ जनानां यज्ञेषु व्यज्यमानौ व्यक्तौ सन्तौ च पूतदक्षसौ, पूतो दक्षो यजमानो याभ्यां तौ तथोक्तौ॥ ४॥

(ऋ.म-२३४)

ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती।
ता मित्रावरुणा हुवे ॥ ५ ॥ ८ ॥

(ऋगर्थोद्धारः) - ऋतेन याविति॥ यौ सकलवेदावगतत्वाद् ज्ञानरूपत्वाद्वा ऋतेन परब्रह्मणा, तत्प्रसादेनेति यावत्। ऋतवृधौ, तस्मिन्नेव विषये वृद्धौ ज्ञानादिनाऽभिवृद्धाविति यावत्। ज्योतिषः प्रकाशमानस्य, प्रमाणप्रसिद्धस्येति यावत्। ऋतस्य सत्यस्य। सत्यमेव हि प्रमाणप्रसिद्धं भवति। पती विवेचनकारीति यावत्। अहं हुवे। परमेश्वरविषये तु यौ मित्रावरुणाख्यरूपविशिष्टौ ऋतेन स्वात्मना ऋते स्वस्वरूपविषये एव वृद्धौ सर्वदा स्वस्वरूपज्ञानवन्ताविति व्याख्येयम्॥ ५॥ ८॥

(ऋ.मन्त्र-२३५)

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः।
करतां नः सुराधसः ॥ ६ ॥

(ऋगर्थोद्धारः) - वरुणःप्राविता भुवदिति॥ वरुणो विश्वाभिः समस्ताभिः ऊतिभिः = रक्षाभिः, रक्षणोपायैः, प्राविता= प्रकर्षेणाविता= रक्षको, भुवत्= भवेत्। तथा मित्रश्च। किञ्च, तौ मित्रावरुणौ नोऽस्मान्, सुराधसः = शोभनसिद्धिमन्तः संसिद्धान् इति यावत्। करतां = कुरुताम्॥ ६॥

(ऋ.म-२३६)

मरुत्वन्तं हवामह इन्द्रमा सोमपीतये।
सजूर्गणेन तृम्पतु ॥ ७ ॥

(ऋगर्थोद्धारः) - मरुत्वन्तमिति॥ तृचो मरुत्वतीयः। इन्द्रस्यापि मरुदन्तर्भावात्। अत एव 'इन्द्रज्येष्ठा मरुद्गणाः' इति वक्ष्यति। 'झलां जशोऽन्ते' (पाणिनीसूत्रम् -८-२-३९) इति तकारस्य दकाररूप-जस्त्वानाश्रयणेन मरुत्वन्तमित्युक्तम्। तथा च मरुत्वन्तं मरुद्वन्तं = मरुद्भिः सहितमिन्द्रं, सोमपीतये आहवामहे। आहूतश्चेन्द्रो हरिः प्रसिद्धश्च, गणेन मरुद्गणेन, सजूः = सह, सगणस्तृम्पतु तृप्यताम्॥ ७॥

(ऋम-२३७)

इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।
विश्वे मम श्रुता हवम् ॥ ८ ॥

(**ऋगर्थोद्धारः**) - **इन्द्रज्येष्ठा इति** ॥ हे इन्द्रज्येष्ठाः = इन्द्रो ज्येष्ठो येषां त इन्द्रज्येष्ठाः, पूषरातयः, 'पुष पुष्टौ' । पुष्टिः पूर्णत्वम् । तथा च पुष्टत्वात् पूषा विष्णुः । सः रातिः मित्रं येषां ते पूषरातयो मरुद्गणाः = मरुतां गणाः । सप्तसप्तका हि त इति बहुवचनम् । देवासो देवाः, विश्वे = सर्वे यूयं मम हवम् = आह्वानं श्रुत = श्रुणुत । इन्द्रस्त्वात्महन्तारं पुत्रं कामयन्तीं दितिं व्रतं चरन्तीमन्तर्वर्त्नी ज्ञात्वा ब्रह्मचारी सन् आगत्य तच्छुश्रूषां छिद्रान्वेषी सन्नकरोत् । पश्चात् तस्याः कदाचिद् व्रतछिद्रमालोक्य गृहीतवज्र इन्द्रो योगमायया तदुदरं प्रविष्टः सन् वज्रेण एकं गर्भमादौ सप्तधाऽच्छिनत् । एकैकमपि पुनः सप्तधाऽच्छिनत् । एवं सप्तसप्तकाः सन्त एकोनपञ्चाशत्सङ्ख्याकाः सम्पन्नाः । ते च स्वस्तुतिप्रसन्नेन्द्रेण रोदनं मा कुरुतेत्युक्तत्वान् मरुत इत्युच्यन्ते । ते च इन्द्रानुग्रहेण मातृजातिप्रयुक्तासुरस्वभावमपहाय इन्द्रेण देवत्वेन स्वात्मसाम्यं नीत्वा सोमपाः कृता इति षष्ठस्कन्धे भागवते स्पष्टेतिहाससद्भावान्मरुद्गणा इति बहुवचनं युक्तमित्यवगन्तव्यम् ॥ ८ ॥

(ऋम-२३८)

हत वृत्रं सुदानव इन्द्रेण सहसा युजा ।
मा नो दुःशंस ईशत ॥ ९ ॥

(**ऋगर्थोद्धारः**) - **हत वृत्रमिति** ॥ हे सुदानवोऽतीवदानशीलाः मरुतः! सहसा बलवता बलाभिमानिना चेन्द्रेण युजा योगवता, सख्येति यावत् । सतेति शेषः । विद्यमानेन निमित्तेन, शक्रेण सहिता इति तात्पर्यम् । वृत्रं

हतेति बाह्ये स्पष्टम् । अध्यात्मं तु वृणोतीति व्युत्पत्या सम्यग्ज्ञानावरणरूपत्वाद् वृत्रमज्ञानम् । अभ्यर्हितत्वान्मदीयं हत नाशयत । किञ्च दुःशंसः दुष्टं शंसनं दुर्वाक् । यद्वा, दुष्टः शंसः यस्यासौ दुःशंसः दुर्वाग्वान् पुमान्, नोऽस्माकं मा ईशत न शक्नुयात् । अज्ञानमुत्पादयितुं शक्तो न भवेत् ॥९॥

(ऋम-२३९)

विश्वान् देवान् हवामहे मरुतः सोमपीतये ।
उग्रा हि प्रश्निमातरः ॥ १० ॥

(**ऋगर्थोद्धारः**) - **विश्वान् देवान् इति** ॥ वैश्वदेवस्तृचः । वयं विश्वान् देवान् मरुतश्च सोमपीतये हवामहे । कुतः ? हि यस्मात् प्रश्निमातरः, प्रश्निशब्दो गोवाग्द्युलोकनामसु पठ्यते । अतः प्रश्निर्गोरूपा वा, वेदाभिमानित्वेन वाग्रूपा वा द्युलोकाभिमानित्वेन द्युरूपा वा भारती । सा माता येषां ते प्रश्निमातरो विश्वेदेवाः, उग्राः = दिव्यमातृत्पन्नत्वेन महासामर्थ्योपेतत्वाच्छत्रुभिरप्रसह्याः । तस्माद्धवामह इति सम्बन्धः । भारत्याः कार्यविशेषार्थं गोरूपत्वं च 'सा गौरभवत्' इति बृहदारण्यके प्रसिद्धम् । उक्तं च तद्भाष्ये -

'सर्वज्ञाऽपि तु सा देवी विरिञ्चे भक्तिमत्यपि ।
तद्धार्यतामात्मनश्च नितरां धर्ममीक्षती ।
अनाद्यन्तसम्बन्धमुभयोरपि जानती ।
नानासृष्टिप्रसिद्ध्यर्थं सा गोत्वादिकमाव्रजेत् ।
वृषभादिरूपतां सोऽपि प्राप्य सृष्ट्वेदमञ्जसा' इत्यादि ॥ १०॥ ९ ॥

(ऋम-२४०)

जयतामिव तन्यतुर्मरुतामेति धृष्णुया ।
यच्छुभं याथ ना नरः ॥ ११ ॥

(ऋगर्थोद्धारः) - जयतामिवेति ॥ हे नरः! प्रधानपुरुषत्वाद् विश्वेदेवाः! यद् यदा शुभमुत्तमं विष्णुं वायुं वा प्रति तत्सेवार्थमिति यावत्। यूयं याथ, न याथ। तदा मरुतां युष्माकं तन्यतुर्ध्वनिः सङ्ग्रामे जयतामिव। धृष्णुया ञि धृषा प्रागल्भ्ये, भावप्रधानश्च निर्देशः। ततो भावप्रधानाद् धृष्णुशब्दात् तृतीयायाः पञ्चम्या वा 'सुपां सुलुक्' (पा.सू-७-१-३९) इत्यादिना यादेशः। ततश्च धृष्णुत्वेन धैर्याद्वा एति प्रवर्तते। युद्धे जयतां ध्वनिर्यथा धैर्यात् प्रवर्तते तेषां भयाभावात्। एवं [1]विष्णोः वायोः सेवार्थं गच्छतां युष्माकमपि भयाभावाद् विष्णुवायुसेवार्थं वयं गच्छाम इत्यादिरूपो भवतां ध्वनिरपि धैर्यात् प्रवर्तत इति द्रष्टव्यम् ॥ ११ ॥

(ऋ.म-२४१)

ह॒स्का॒राद् वि॒द्युत॒स्पर्यतो॑ जा॒ता अ॑वन्तु नः।
म॒रुतो॑ मृळयन्तु नः ॥ १२ ॥

(ऋगर्थोद्धारः) - हस्कारादिति ॥ ये सर्वे देवा मरुतश्च हस्काराद् 'ओ हाक् त्यागे' त्यजति दोषानिति हः। स्वेन सह ज्ञानभक्त्यादिगुणान् करोतीति स्कारः। अत्र सहकार इति भाव्ये 'सहस्य सः' (पा.सू. ६-३-७८) इति सहेत्यस्य सादेशः । तथाऽपि हसकार इति भाव्ये सकारस्थाकार-लोपमङ्गीकृत्य हश्चासौ स्कारश्चेति हस्कारो वायुः। तस्मात्। 'द्युत दीप्तौ' इति धातोर्विशेषेण द्योतत इति विद्युत्। विशिष्टज्ञानेति यावत्। भारती। तस्याश्च सकाशात्, परि = सम्यग् जाताः यस्मादतो विशिष्ट-जनिमत्त्वेन बलिष्ठत्वान्नः, अवन्तु = रक्षन्तु। नोऽस्मान्, मृळयन्तु = सुखयन्तु च। यद्यपि नोऽस्मान् [2]अवन्तु, मृळयन्तु चेत्येकेनैव न इत्यनेन पूर्णत्वात् पुनर्न इति व्यर्थम्। तथाऽपि तात्पर्यार्थं पुनर्वचनमिति ज्ञातव्यम्। वायु-

१. 'विष्णुवाय्वोः' इति घ.। २. 'अवयन्तु' घ.।

भारतीपुत्रभूतसर्वदेवमरुदन्तर्गतत्वेन व्यज्यमानत्वाद् भगवानपि वायुभारती-पुत्र उच्यत इति द्रष्टव्यम् ॥ १२ ॥

(ऋ.म- २४२)

आ पू॑षन् चि॒त्रब॑र्हिष॒माघृ॑णे ध॒रुणं॑ दि॒वः।
आजा॑ न॒ष्टं यथा॑ प॒शुम् ॥ १३ ॥

(ऋगर्थोद्धारः) - आ पूषन्निति ॥ पौष्णोऽयं तृचः। आजेत्यत्र आ + अजेति पदविभागः। तथा च आ अजेत्यत्र पूर्वरूपे सति आजेति भवतीति द्रष्टव्यम्। आपूषन्नित्यत्रत्यस्याप्याङः अजेति क्रियया सम्बन्धः। तथा च आघृणे = आ समन्ताद् घृणयो रश्मयो यस्यासावाघृणिः। तस्य सम्बुद्धिः हे आघृणे! पूर्णत्वात् पूषन् हरे! चित्रबर्हिषं = चित्रं विचित्रं नाना विश्वं बर्हिः, 'बृह वृद्धौ' पूर्णत्वं यस्यासौ चित्रबर्हिस्तं ब्रह्माणं, नः = अस्मान्, प्रत्या अज = सम्यग् गुरुत्वेनाऽगमय = प्रापय। तथा दिवोदेव्याः भारत्याः, धरुणं = धर्तारं, भर्तारमिति यावत्। वायुं च आ अज = गुरुत्वेन प्रापय। कं प्रति कमिव? नष्टं = 'णश अदर्शने' अदर्शनं गतं, पशुं = गवादिरूपं यथा गृहमागमयन्ति तथेत्यर्थः। दृष्टान्ते सर्वसाम्याभावाद् ब्रह्मणः कथं पशुसाम्यमिति चोद्यानवकाशः। आङ्द्वयस्य सत्त्वादेव धरुणं दिव इत्येतद् भिन्नवाक्यतया व्यख्यातम्। यद्वा, आजेत्यत्र आ अजेति शाकल्यदृष्ट-पदविभागपरित्यागेन [1]सपक्षदित्यादाविव आजेति लिङन्तमेकमेव पदम्। तेन चाऽपूषन्नित्यत्रत्यस्याऽङः सम्बन्धः। तथा च नः = अस्मदर्थे, भवान् ब्रह्माणं वायुं च, आ = सम्यक्, आज = आदिकाले प्राप्तवानसीति। तथा च तव तादृश[2]पुत्रद्वयोत्पादनमस्मन्निमित्तमेव। तदुपदेशपरम्परया ह्यस्माकं ज्ञानप्राप्तिरिति भावः। अयमेवार्थ उत्तरस्यामृच्युच्यत इति द्रष्टव्यम्।

१. 'सपक्षे दित्यादांविव' इति क.। २. 'पुत्रोत्पादनं' इति घ.।

प्रसिद्धपूषापक्षे तु स्वयमश्रुतस्येतरान् प्रत्युपदेशायोगाद् अस्माकं तत्त्वमुपदेष्टुं हे पूषन् ! आदिकाले ब्रह्माणं वायुं च त्वं श्रोतुं प्राप्तवानसीति योज्यम् । अत एव टीकायां 'आदिकाले प्राप्तवानसि' इति [1]सामान्येनोक्तमिति ज्ञातव्यम् ॥ १३ ॥

(ऋ.म-२४३)

पूषा राजानमाघृणिरपगूळ्हं गुहाहितम् ।
अविन्दच्चित्रबर्हिषम् ॥ १४ ॥

(ऋगर्थोद्धारः) - अस्मदर्थमेवाऽदिकाले ब्रह्माणं वायुं च सुतं प्राप्तवानसीत्युक्तमेव प्रपञ्च्यते - **पूषा राजानमिति** ॥ उक्तरीत्या आघृणिः पूषा भगवान्, राजानं= जगद्राजं, गुहाहितं= स्वहृदयगुहायां निहितं, अत[2] एव अपगूळ्हं = स्वकुक्षिगूढमिति यावत् । उक्तरीत्या चित्रबर्हिषं ब्रह्माणं सुतमविन्दत् । अविन्ददिति यत् तदुक्तरीत्या अस्मदर्थमेवेति भावः ॥ १४ ॥

(ऋ.म-२४४)

उतो स मह्यमिन्दुभिः षड्युक्ताँ अनु सेषिधत् ।
गोभिर्यवं न चर्कृषत् ॥ १५ ॥ १० ॥

(ऋगर्थोद्धारः)- उतो स मह्यमिति ॥ उतो पूषाणं प्रत्यन्यच्च प्राथ्यते । स पूषा, इन्दुभिः = सोमैः, तर्पित इति शेषः । मह्यं = मदर्थे, षट् = इन्द्रियाणि, युक्तान् = अर्थैः सन्निकृष्टानि, अनुसेषिधत् = साधयामास, चर्कृषत् = चकार च । किमिव? गोभिः = वार्भिरुदकैः, यवं न = यवं यथा साधयन्ति कुर्वन्ति च तथेत्यर्थः । अत्र साधयामासेत्युक्तं साधनम् इन्द्रियाणामर्थ-

१. 'सामान्योक्तं' घ. । २. 'तत एव' घ. ।

ज्ञानजननशक्त्याविर्भावदानमभिप्रेतम् । करणे तु फलोपधानमिति द्रष्टव्यम् । एवं च यथा यवस्य वार्भिः सेके सति क्लेदनेनाङ्कुरजननशक्त्याविर्भावे सति पश्चात् तेनाङ्कुरं जायते । एवमिन्द्रियाणामर्थसन्निकर्षेण ज्ञानजननशक्त्याविर्भावे सति पश्चाद् ज्ञानमुत्पद्यत इत्येतत् सर्वं सोमतर्पितपूषानुग्रहेणैवेति ऋगाशयो ज्ञातव्यः ॥ १५ ॥ १० ॥

(ऋ.म-२४५)

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् ।
पृञ्चतीर्मधुना पयः ॥ १६ ॥

(ऋगर्थोद्धारः)- अम्बय इति ॥ एता आप्यः । अन्त्याध्यर्धाऽऽग्नेयीत्येके । पयस्वानग्ने, सम्माग्ने इत्युक्तत्वात् प्रतीत्यनुसारेण तु पयस्वानित्यर्धर्चे आग्नेय आप्यश्च, पयस्वानग्न इत्युभयश्रुतिसद्भावात् । तत्र पयःशब्दस्याब्वाचित्वात् । सम्माग्न इत्यृक् सर्वदैवत्या । विद्युर्मे [1]अस्य देवा इत्युक्तत्वादित्यवधेयम् । अम्बयः, अम्बाशब्दपर्यायोऽम्बिशब्दः । अतोऽम्बयो जगतो मातरः । अपां मातृत्वं च जगत्कारणत्वात् । जामयः = जगतः सहोदराः, भगिन्य इति यावत् । पार्थिवादिभागचतुष्टयात्मकं जगद् वर्धमानमाप्यभागेन सहैव वर्धत इति प्रसिद्धेः । अध्वरीयतां = अध्वरमिच्छतां, इच्छया करणमुपलक्ष्यते । अध्वरं कुर्वतामिति यावत् । यन्मधु, तेन मधुना सोमेन सह पयः क्षीरं, सोमं क्षीरं चेति यावत् । पृञ्चतीः, 'पृची सम्पर्के' [2]प्रपृञ्चन्त्यः, सम्पृक्ता आप इति शेषः । अध्वभिः 'प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः नद्यः स्यन्दन्ते' इत्युक्तमार्गैर्यन्ति गच्छन्ति । अनेनाम्बय इत्यत्र विशेष्यभूता आपो नद्य इति गम्यते । अध्वभिर्यन्तीति वचनादित्यवगन्तव्यम् ॥ १६ ॥

१. 'अस्या' इति घ. । २. 'प्रपृञ्चत्यः' घ. ।

(ऋ.म-२४६)

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ।
ता नों हिन्वन्त्वध्वरम् ॥ १७ ॥

(ऋगर्थोद्धारः) - **अमूर्या इति** ॥ या अमूरापः, उपसूर्ये = सूर्यसमीपे सूर्यसमीपस्थाः । सूर्यश्च याभिरद्भिः सह वर्तते ताः आपो नोऽस्मदीयमध्वरं हिन्वन्तु । 'हि गतौ वृद्धौ च' अध्वरं प्रति गच्छन्तु आगच्छन्तु फलदानादिना अध्वरमभिवृद्धं कुर्वन्तु च ॥ १७ ॥

(ऋ.म-२४७)

अपो देवीरुपह्वये यत्र गावः पिबन्ति नः ।
सिन्धुभ्यः कर्त्वं हविः ॥ १८ ॥

(ऋगर्थोद्धारः) - **अपो देवीरिति** ॥ यत्रेति सप्तमी द्वितीयार्थे । याः आपः, नः = अस्मदीयाः, गावः पिबन्ति ता अपो देवीरहमुपह्वये = आह्वयामि । कस्मात् ? यतः अस्माभिर्हविः सोमान्नादिलक्षणं सिन्धुभ्यो नदीभ्यः, तादर्थ्ये चतुर्थी । तदुद्देशेन कर्त्वं कृत्यार्थे त्वन् । नदीदेवतोद्देशेन सोमान्नादिलक्षणं हविः कार्यमस्ति । अतस्ताभिरागतं चेत् तर्हि तदुद्देशेनाहं करिष्यामि । अन्यथा वृथा स्यात् । अतस्ता आदावहमुपह्वय इत्याशयः। यद्वा, सिन्धुभ्यो नदीभ्यः इति पञ्चमी । यतो नदीजलेभ्यः सोमान्नादिलक्षणं हविर्मिश्रितं पक्वं च कार्यमस्ति, अतोऽपो देवीरुपह्वये । ताभिरागतं चेत् तदुदकेन सोमान्नादिलक्षणं हविर्मिश्रितं पक्वं च करिष्यामीत्याशयः ॥१८॥

(ऋ.म-२४८)

अप्स्वं१न्तरमृतंमप्सु भेषजमपामुत प्रशंस्तये ।
देवा भवंत वाजिनंः ॥ १९ ॥

(ऋगर्थोद्धारः) - **अप्स्वन्तरिति** ॥ अमृतं मरणाभावसाधनं द्रव्यं यदुच्यते क्षीरसमुद्रोत्पन्नं देवाहारभूतं सुधारूपं द्रव्यं तत्, तास्वप्सु, अन्तः = मध्ये स्थितम् । न च सर्वैरुपलभ्यतेऽतो नास्त्येवेति वाच्यम् । अदृश्यतया स्थितत्वेन योग्यानुपलब्ध्यभावादिति सूचयति कम्पेन । यद्वा, अमृतं तास्वप्सु स्थितं कथं तर्हि नोपलभ्यत इत्यत उक्तम् - **अन्तरिति** ॥ अन्तः अन्तर्हितम् अदृश्यं, तेन नानुपलम्भबाधः । भेषजम् = रोगनिवर्तकं द्रव्यं चाप्स्वेव स्थितम् । तासामपामुत = अपामेव, प्रशस्तये, प्रशंसार्थं, वाजिनः = अन्नाद्युपलक्षितभोगवन्तो देवाः, भवत, नः सहाया इति शेषः । अपां स्तुतिं कुर्वतामस्माकं वाङ्मनसादिकं प्रेरयन्त्विति भावः ॥ १९ ॥

(ऋ.म-२४९)

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥ २० ॥ ११ ॥

(ऋगर्थोद्धारः) - **अप्सु मे सोम इति** ॥ सोमो राजा इदं मेऽब्रवीत् । तत् किम् ? अप्स्वन्तर्विश्वानि भेषजा भेषजानि सन्तीति । किञ्च, विश्वशम्भुवं= सम्पूर्णसुखभूमिम् अग्निं चाप्स्वन्तःस्थितमब्रवीत् ।

'भूतादिभूताम्बुनिधानमध्ये भूत्वा हरिः सर्वहरोऽतिधाम्ना ।
अगाधमम्भो विदधाति भस्म यो स वाडवाग्निर्नृहरिर्विचिन्त्यः'

इति (कर्मनिर्णये) वचनात् । आपश्च विश्वभेषजीः = विश्वानि भेषजानि यासु ता विश्वभेषजीरित्यब्रवीत् । यद्वा सकलभेषजरूपा एवेत्यब्रवीत् । अपां सकलरोगनिवर्तकत्वादित्याशयः । 'अप्स्वन्तरमृतम्' इति पूर्वऋगुक्तमेवात्र कस्मादुच्यते ? किञ्च, अप्सु विश्वानि भेषजानि सन्तीत्युक्त्वा पुनश्च 'आपश्च विश्वभेषजीः' इति कस्मादुच्यते ? अतः पूर्वोत्तरर्चोरस्यामृचि द्वितीयचतुर्थपादयोः पुनरुक्तिरिति नाऽशङ्कनीयम्।

तात्पर्यज्ञापनार्थत्वात्, पूर्वोक्तानुवादेन 'सोमोऽब्रवीत्' इति प्रमाणोपन्यासार्थत्वाच्चापुनरुक्तिरिति द्रष्टव्यम् ॥ २० ॥ ११ ॥

(ऋ.म-२५०)

आपः पृणीत भेषजं वरूथं तन्वे३ मम ।
ज्योक्च सूर्यं दृशे ॥ २१ ॥

(ऋगर्थोद्धारः) - आपः पृणीतेति ॥ हे आपः ! मह्यं भेषजं पृणीत दत्त । मम तन्वे, 'अहल्यायै जार' इतिवत् षष्ठ्यर्थे चतुर्थी । शरीरस्य वरूथं गुप्तिं च पृणीत । यद्वा, वरूथमित्येतद् भेषजस्य विशेषणम् । तथा च हे आपः ! मम तन्वे वरूथं गुप्तिकरं भेषजं पृणीतेत्यर्थः । तथा सूरिप्राप्यत्वात् सूर्यं विष्णुं दृशे, 'कृन्मेजन्तः' (पा.सू.१.१.३९) इत्येजन्तमव्ययम् । द्रष्टुम् । यद्वा, सूर्यमिति द्वितीया षष्ठ्यर्थे । दृशे इति दृक्शब्दस्य चतुर्थी । तथा च सूर्यस्य दृशे अपरोक्षज्ञानाय ज्योक् च ध्यानरूपं ज्ञानं च अन्तःकरणशुद्धिद्वारा पृणीत ॥२१ ॥

(ऋ.म-२५१)

इदमापः प्रवहत यत्किञ्च दुरितं मयि ।
यद्वाऽहमभि दुद्रोह यद्वा शेप उतानृतम् ॥ २२ ॥

(ऋगर्थोद्धारः) - इदमाप इति ॥ हे आपः ! यत्किञ्चेदं मयि दुरितम् अस्मदीयमखिलमपि पापं प्रवहत । अपनयत । किं तत् पापं, अहं यदभिदुद्रोह वा 'द्रुह हिंसायाम्' इति धातोर्हिंसाजन्यमित्यर्थः । यद्वा, शेपे शेपशब्दः शिश्नार्थकशेफशब्दपर्यायः । निमित्तसप्तमी चेयम् । तथा च [1]शेफनिमित्ते सति यत् पापं तज्जन्यं यत् पापं प्रमेहव्याधिव्यभिचारादिकम् उतानृतम्

१. 'शेफे निमित्ते' घ. ।

अनृतवचनसम्भवं च तत् सर्वं प्रवहतैव । वावाशब्दौ उतशब्दश्च समुच्चये ॥ २२ ॥

(ऋ.म-२५२)

आपो अद्यान्वचारिषं रसेन समगस्महि ।
पयस्वानग्न आगहि तं मा संसृज वर्चसा ॥ २३ ॥

(ऋगर्थोद्धारः) - आपो अद्येति ॥ हे आपः ! अद्य वयं यस्माद् वः अन्वचारिषं समगस्महीत्युत्तरत्र[1] बहुवचनसद्भावादत्रैकवचनं बहुवचनार्थे। युष्माकमनुचरा अभूमेति । तस्माद् रसेन सुखेन समगस्महि सङ्गता स्म तद्वन्तोऽभूमेति यावत् । अग्निं च विश्वशम्भुवमप्सु स्थितं, सोमो राजाऽब्रवीत्, इति पूर्वमग्नेरप्सु स्थितत्वोक्तेरत्राग्नेः पयस्वानिति विशेषणमुपपद्यते । तथा च पयस्वान्, पयस्वन् ! अद्भिः सहिताग्ने आगहि अस्मान् प्रत्यागच्छ, आगत्य च तमेवं स्तुवन्तं मा मां वर्चसा तेजसा संसृज संयोजय ॥ २३ ॥

(ऋ.म-२५३)

सं माऽग्ने वर्चसा सृज सम्प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः
॥ २४ ॥ १२ ॥ २३ ॥

(ऋगर्थोद्धारः) - सं माऽग्न इति ॥ हे अग्ने ! मा मां वर्चसा = ब्रह्मवर्चसेन संसृज । संयोजय । प्रजया च सन्तत्या च संसृज । आयुषा च संसृज । विद्युरित्यन्तर्णीतणिजर्थम् । अस्य मे इति षष्ठ्यौ द्वितीयार्थे । तथा च देवा अग्न्याद्याः अस्य मे = एनं मां, विद्युः = विद्वांसं कारयेयुः । वसिष्ठादिऋषिभिः सह स्थितमिन्द्रश्च विद्यात् = मां वेदयेत् । विद्वांसं कुर्यादित्यर्थः । अथवा

१. 'उत्तरबहुवचनसद्भावात्' घ. ।

विद्युरिति यथास्थितमेव, न णिजन्तम्। षष्ठ्यौ च न द्वितीयार्थे। तथा च ये देवाः सर्वं विद्युः = ज्ञातवन्तः। यश्चेन्द्रः सर्वं विद्यात्, व्यजानात्। ते सर्वे ऋषिभिः सह स्थिता अस्य मे सन्तु [1]मदर्थे सन्तु, ममोपकारकाः सन्त्वित्यर्थः। यद्वा, षष्ठ्यौ द्वितीयार्थे। विद्युरिति यथास्थितमेव, न णिजन्तम्। तथा च देवा अग्न्याद्याः अस्य मे एतं मां विद्युः = कृपापात्रं जानीयुः, ज्ञात्वा च कृपां कुर्युरिति यावत्। ऋषिभिः सह स्थित इन्द्रश्च विद्यात् कृपापात्रं मां जानीयात्। ज्ञात्वा च कृपां कुर्यादिति यावदित्यर्थः। अथवा देवाः अस्य मे, उदितमिति शेषः। विद्युः = अनुजानन्तु, सम्यगुदितमनेनेत्यनुमोदनं कुर्वन्तु। ऋषिभिः सहेन्द्रोऽपि अस्य मे उदितं विद्यात् सम्यगुदितमनेनेत्यनुजानात्वनुमोदत्वित्यर्थः ॥ २४ ॥ १२ ॥ २३ ॥

सूक्तम् - २४,

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरात ऋषिः।
१ कः (प्रजापतिः) २ अग्निः, ३-५ सविता भगो वा देवता,।
६-१५ वरुणः। १,२,६-१५ त्रिष्टुप् छन्दः। ३-५ गायत्री।

(ऋ.म-२५४)

कस्य॑ नू॒नं क॑त॒मस्या॒मृता॑नां॒ मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑।
को नो॑ म॒ह्या अदि॑तये॒ पुन॑र्दात् पि॒तरं॑ च दृ॒शेयं॑ मा॒तरं॑ च ॥ १ ॥

(**ऋगर्थोद्धारः**) - व्याख्याता मेधातिथिदृष्टा ऋचः। अतः परं त्र्यूनं ऋक्शतं 'त्वमग्ने प्रथमः' इत्यतः प्राक्तनं यूपादात्मविमोक्षाय देवान् पृथक् पृथक् स्तुवन् शुनःशेपो ददर्श। वामदेवसञ्ज्ञकचतुर्थमण्डलस्थं 'त्वन्नो अग्ने वरुणस्य विद्वान्' 'स त्वन्नो अग्ने' इत्यृगृद्वयं, तथा आत्रेयसञ्ज्ञकपञ्चममण्डलस्थां 'शुनश्चिच्छेपं निन्दितं सहस्रात्' इत्येकां च ऋचं शुनःशेपो

---

१. मदर्थं घ.।

ददर्श। एवं स्थानान्तरस्थऋक्त्रयसाहित्येन शुनःशेपस्य शतर्चित्वमविरुद्धमिति ज्ञातव्यम्।

त्र्यूनशतसङ्ख्याकऋङ्मध्येऽपि संहितायां [1]यथाश्रुत एव क्रमो न विवक्षितः। किन्तु ब्राह्मणोक्त एव। तथा हि यच्छिद्धि सत्यसोमपा इत्यादिकाभिरिन्द्रेऽश्विनोरुषसि च स्तुतायां विमुक्तपाशं शुनःशेपमधिकृत्य ब्राह्मणं तमृत्विज ऊचुः। त्वमेव नोऽस्याह्नः संस्थामधिगच्छतेत्यादि। तत्र च 'यत्र ग्रावा' इत्यादीनां स्फुटं परत्वमवगम्यत इति द्रष्टव्यम्।

हरिश्चन्द्रो राजा पुत्रमलभमानो नारदवचनात् पुत्रे जाते तेन त्वां यजामीत्युक्त्वा वरुणमुपाधावत्। तदनन्तरं रोहितो नाम पुत्रो जज्ञे। पश्चाद् वरुण आगत्याजनि[2] ते पुत्रस्तेन मां यजस्वेत्याह। पश्चाद् राजा निर्देशश्चेत्[3] पशुः शुद्धः [4]स्यादित्यादिना प्रकारेण प्रलोभ्यान्ते पुत्रमामन्त्रयामास। तातायं वै वरुणो मह्यं त्वामदात्। त्वया अहं वरुणं यजामीति। पश्चात् स पुत्रो नेत्युक्त्वाऽरण्यमगात्। तं च राजानं वरुणो महोदरव्याधिरूपेण जग्राह। स रोहितो महोदररूपव्याधिग्रस्तं पितरं श्रुत्वा ग्रामाभिमुखोऽभूत्। तमिन्द्रः पुरुषरूपेणाऽगत्य निवारितवान्। एवं वर्षपञ्चकमरण्ये रोहितो निन्ये।

अनन्तरं षष्ठे वर्षे आगमनसमये अशनायापरीतऽस्य आजीगर्तेर्मध्यमं पुत्रं शुनःशेपं गवां शतेन विक्रयाद् गृहीत्वाऽरण्याद् ग्राममागत्य पित्रे प्रायच्छत्। अनन्तरं स राजा वरुणमुवाच। अनेन त्वा यज इति। पश्चाद् वरुणो भूयान् वै ब्राह्मणः क्षत्रियादतोऽनेनैव यजस्वेत्याह। पश्चाद् विश्वामित्रादीन् होतॄन्

---

१. 'यथास्थितमेव' घ.। २. 'जातो पुत्रः' इति घ.।
३. 'निर्दिष्टश्चेत्' इति पाठः समीचीनः भवेत्। 'निर्दशाश्चेत्' घ.।
४. 'इत्यादिकानाप्रकारेण घ.।

वरयित्वा यज्ञं कर्तुमारेभे। तत्र यज्ञे पशुभूतोऽयं शुनःशेप [1]'आलम्भनाय यूपे बद्धोऽभूत्। पश्चाद् यूपाद् आत्मविमोक्षाय प्रजापतिपूर्वकान् देवान् 'कस्य नूनम्' इत्यादिकया तुष्टावेति ब्राह्मणे सप्तमपञ्चिकायां 'हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजा पुत्र आस' इत्यादिखण्डचतुष्केणोक्ता कथा द्रष्टव्या॥

कस्य नूनं कतमस्येति॥ पञ्चदशर्चमिदं सूक्तम्। **'स प्रजापतिमेव प्रथमं देवतामुपससार। कस्य नूनं कतमस्यामृतानामित्येतयर्चेति'** ब्राह्मणवचनात् प्राजापत्येयमृक्। वयं कस्य, कृञ् करणे इति धातोः करोतीति कः, तस्य जगत्कर्तुः, अमृतानां = **'अमरा निर्जरा देवाः'** इत्यभिधानात् सुराणां मध्ये, कतमस्य = सुखतमस्य, परानन्दतनोरिति यावत्। यद्वा, अमृतानां = मुक्तानां ब्रह्मादीनां सकाशात्, कतमस्य, अत्र सुखवाची कशब्दोऽन्येषामपि गुणानामुपलक्षणार्थः। सुखादिगुणविषयेऽभ्यधिकस्य देवस्य विष्णोश्चारु भद्रं नाम नूनमिदानीं मनामहे = 'मनु अवबोधने' इति धातुरत्र योग्यताबलाद् उच्चारणस्मरणाद्यर्थे वर्तते। तथा चोच्चरामः, स्मरामश्चेत्यर्थः। यस्य विष्णोर्नाम मनामहे, स कः = सर्वकर्ता, विष्णुः, मह्यै = महत्यै = देशतोऽपरिच्छिन्नायै, अदितये = 'दोऽवखण्डने'। ततो नञ्समासः। तथा च दितिः = खण्डिता कालेन न भवतीत्यदिति-रखण्डिता, तस्यै कालतोऽपरिच्छिन्नायै।

यद्वा, **'सर्वं वा अत्तीति तददितेरदितित्वम्'** इति श्रुतेः सर्वात्रीस्वस्त्रियै इन्दिरायै पुनर्दात् = ददातु तां प्रापयत्विति यावत्। इन्दिरायाः सर्वगतत्वेन तां सर्वदा प्राप्तानप्यस्मान् वैकुण्ठादिदेशविशेषस्थितायै ददात्वित्याशयेन पुनःशब्दः। ततश्च वैकुण्ठादिदेशविशेषस्थितेन्दिरा[2]प्राप्त्यनन्तरं पितरं तत्र तं देवं विष्णुं मातरं तां च देवीमिन्दिरां दृशेयं पश्येयमित्यर्थः।

१. 'आलभनाय' घ.। २. 'इन्द्रप्राप्त्यनन्तरं' क.।

प्राक् मह्यै अदितय इति इन्दिराविषयं व्याख्यातम्। इदानीं परमेश्वर-विषयतया[1] व्याख्यायते। तथाहि। यस्य विष्णोर्देवस्य चारु नाम मनामहे स कः नोऽस्मान् मह्यै महत्यै देशतोऽपरिच्छिन्नायै अदितये कालतो गुणतश्चाखण्डितायै, 'सर्वं वा अत्तीति' इति श्रुतेः सर्वात्र्यै वा स्वस्त्रीरूपाय पुनर्दात्। सर्वगतभगवत्स्त्रीरूपप्राप्तानप्यस्मान् वैकुण्ठादिदेशविशेषस्थित-स्वस्त्रीरूपाय ददात्वित्यर्थः।

प्राक् पितरं मातरं चेत्यत्र मातरमितीन्दिराविषयं व्याख्यातम्। द्वयमपि परमेश्वरविषयं च प्रतिपत्तव्यम्। तथा हि। वैकुण्ठादिदेशविशेषस्थित-स्त्रीरूपभगवत्प्राप्त्यनन्तरं तत्र पितरं मातरं च,

'पिता माता सुहृद् बन्धुर्भ्राता पुत्रस्त्वमेव मे' इति वचनात् पितरं मातरं च तमेव स्त्रीरूपं भगवन्तं दृशेयमित्यर्थः।

प्रसिद्धप्रजापतिशब्दवाच्यचतुर्मुखविषयेऽपीयम् ऋग् व्याख्यायते। तथा हि वयं कस्य = करोतीति योगेन जगत्कर्तुः, **'को ब्रह्मेति समाख्यातः'** इत्यभिधानाद् रूढ्या वा कशब्दवाच्यस्य, अमृतानां = विष्णुरमास्वसमान-ऋजुव्यतिरिक्तसरस्वत्यादिसर्वजीवेभ्यः, कतमस्य= कशब्दोऽन्येषां गुणाना-मुपलक्षणार्थः। सुखज्ञानादिगुणविषयेऽभ्यधिकस्य, देवस्य प्रजापतेः = चतुर्मुखस्य, चारु = भद्रं, नाम, नूनमिदानीं मनामहे = उच्चारयामः, स्मरामश्च। स कः = कशब्दवाच्यश्चतुर्मुखः, नः = अस्मान्, मह्यै अदितये= उक्तनिर्वचनाभ्यां तच्छब्दवाच्यायै इन्दिरायै, विष्णुवे च पुनर्दात् = ददातु, तौ प्रापयत्विति यावत्। लक्ष्मीनारायणयोः सर्वगतत्वेन तौ सर्वदा प्राप्तानप्यस्मान् भगवद्व्यक्तिस्थानरूपवैकुण्ठादिस्थानरूपदेशविशेषगताभ्यां लक्ष्मीनारायणाभ्यां ददात्वित्यर्थः। ततश्च वैकुण्ठादिदेशविशेषस्थित-

१. 'विषयताऽपि' घ.।

लक्ष्मीनारायणप्राप्त्यनन्तरं पितरं देवं नारायणं मातरं तां देवीं महालक्ष्मीं च दृशेयं पश्येयमित्यर्थः । **'स एनान् ब्रह्म गमयति'** इति, **'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म न चापरः'** इत्यादिश्रुतिस्मृतिसिद्धं चतुर्मुखस्य वैकुण्ठादिगत-भगवत्प्रापकत्वमिति द्रष्टव्यम् ॥ १ ॥

(ऋ.म-२५५)

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात् पितरं च दृशेयं मातरं च ॥ २ ॥

(ऋगर्थोद्धारः) - अग्नेर्वयमिति ॥ तं 'तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति। सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा' इति ब्राह्मणोक्तेरियमृगाग्नेयी । भगवत्पक्षे, तु यो यज्ञेशो हूयते जामदग्न्यस्तदाख्यम् अग्निनामकं हरेरन्यद्रूपमत्र प्रतिपाद्यत इति द्रष्टव्यम्। वयममृतानां देवानां प्रथमस्य मुख्यस्य अग्नेरत्तृत्वादिना तन्नामकस्य देवस्य जामदग्न्यस्य, तथा देवानां हविःप्रापकत्वादिना प्रथमस्य मुख्योपजीव्यस्य प्रसिद्धाग्नेश्च चारु नाम मनामहे । स नो मह्या इत्यादि पूर्ववत् । अत्र ऋग्द्वयेऽपि नामोच्चारणस्मरणादिमात्रस्य वैकुण्ठादिप्राप्तिसाधनत्वस्य प्रमाणविरुद्धत्वाद् अर्थानुसन्धानपूर्वकं कृतस्यैव वैकुण्ठादिप्राप्तिरूप-सर्वकामप्रदत्वमिति ज्ञातव्यम् । नाम्नश्चारुत्वमपि अर्थानुसन्धानपूर्वकं कृतस्योच्चारणस्य स्मरणस्य वा सर्वकामप्रदत्वेनेति ज्ञातव्यम् ॥ २ ॥

(ऋ.म-२५६)

अभि त्वा देव सवितरीशानं वार्याणाम् ।
सदाऽवन् भागमीमहे ॥ ३ ॥

(ऋगर्थोद्धारः) - अभित्वेति ॥ 'तमग्निरुवाच । सविता वै

प्रसवानामीशो । तमेवोपधावेति । स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेन' इति ब्राह्मणवचनात् सावित्रोऽयं तृचः ।

'सवितेत्यपरं रूपं जगत्कारणमीशितुः' (ऋग्भाष्यम्)

इति द्रष्टव्यम् । हे सवितः ! जगत्कारणत्वेन सवितृशब्दवाच्य देव ! सदा नित्यम् अवन् रक्षन्, अभ्यर्हितत्वादात्मानमिति लभ्यते । तथाऽऽत्मानं रक्षन् रक्षितुं तद्रूपप्रयोजनायेति यावत् । अहं, वार्याणां = वरणीयत्वेन वार्यशब्दवाच्यानां वित्तानां, ईशानं = स्वामिनं, भागं = भगा ऐश्वर्यादयो गुणाः, तेषां समूहो भागः, तम् ऐश्वर्यादिगुणसमितिरूपं, त्वा= त्वाम्, अभी-महे । अवन्नहमित्येकवचनाद् अभीमह इति बहुवचनम् एकवचनार्थे । एमि, शरणं गतोऽस्मीत्यर्थः । यद्यपि अवन्नित्येतत् सम्बुद्ध्यन्तं कृत्वा वयं त्वामभीमहे इति व्याख्यातुं शक्यते । साक्षाद् रक्षणरूप-प्रयोजनोक्तिलाभाय वचनव्यत्यासेन व्याख्यानं द्रष्टव्यम् ॥ ३ ॥

(ऋ.म-२५७)

यश्चिद्धि त इत्था भगः शशमानः पुरा निदः ॥
अद्वेषो हस्तयोर्दधे ॥ ४ ॥

(ऋगर्थोद्धारः) - यश्चिद्धि त इत्था भग इति ॥ हे सवितर्देव विष्णो ! इत्था= अविकारित्वाद् इत्थम्भूतः, इदानीन्तनप्रकार एव, सर्वदा शशमानः= शशब्दः सुखवाची, द्विर्वचनमतिशयार्थे । अधिकं सुखं शशं, तत् मन्यतेऽनुभवतीति शशमानः, सुखाधिक इति यावत् । निद इत्यव्ययं दूरत्ववाचि । दूरत्वं च देशतो विवक्षितम् । तथा च निदः = नेदीयसः = सत्यलोकादिरूपबहुदूरदेशस्थाद् ब्रह्मणो हिरण्यगर्भादपि, पुरा = पूर्वः, अद्वेषः - उपलक्षणमेतत् । द्वेषादिदोषवर्जितः, एवम्भूतो यश्चित् = योऽपि, ते भगः = परमैश्वर्यादिरूपो विग्रहः, तमहं हस्तयोर्दधे पुत्र इव पितरम् ।

प्रसिद्धसवितृपक्षे इत्थं योजना । हे सवितर्देव ! यश्चिद् योऽपि ते तव स्वामी इत्था शशमानो निदः पुरा भग ऐश्वर्यादिरूपोऽद्वेषो हरिस्तमहं हस्तयोर्दध इति । निर्विकारत्वसुखाधिकत्वहिरण्यगर्भपूर्वत्वैश्वर्यादिरूपत्वाद्वेषत्वानां विष्णुलिङ्गत्वं च,

'निर्विकारोऽक्षरः शुद्धो निरातङ्कोऽजरोऽमरः ।
अविश्वो विश्वकर्ताऽजो यः परः सोऽभिधीयते',
'ज्ञानज्ञानः सुखसुखः', 'एको नारायण आसीन्न ब्रह्मा न च शङ्करः',
'तं त्वा भग प्रविशानि स्वाहा', 'अद्वेषो विष्णुः'

इत्यादिवचनात् सिद्धमिति ज्ञातव्यम् ॥ ४ ॥

(ऋ.म-२५८)

भगं भक्तस्य ते वयमुदंशेम तवावसा ।
मूर्धानं राय आरभे ॥ ५ ॥ १३ ॥

(ऋगर्थोद्धारः) - हे सवितर्देव ! प्रसिद्ध ! वयं तवावसा रक्षणेनाऽरभे, एकवचनं बहुवचनार्थे । आरभामहे । त्वदीयां विद्यामिति शेषः । तद्विद्याफलं च भगभक्तस्य, भगः = ऐश्वयादिरूपो विष्णुः, तद्भक्तस्य = तत्सेवकस्य, ते, रायः - रैशब्दस्य पञ्चमीयम् । 'हिरण्यपाणिमूतये सवितारम्' इति सवितुर्हिरण्यपाणितोक्तेः । प्रसिद्धद्रव्यस्य दीयमानत्वेन तत्सम्बन्धित्वात् ते तव सम्बन्धिनो रायः = प्रसिद्धात् वित्तात्, मूर्धानं, मूर्धशब्दो गौण्या वृत्त्योत्तममाह । तथा चोत्तमं वित्तं [१]मौक्तिकसुखं उदशेम = उच्चैरश्नीमः।

भगवत्पक्षे तु, हे सवितर्हरे ! तवावसा रक्षाबलाद् वयमारभे त्वदीयां विद्यामारभामहे । ततश्च तत्फलं भगभक्तस्य, भगः ऐश्वर्यादिगुणसमूहः, स

१. 'मौक्तसुखं' घ. ।

भक्तमन्नं भोग्यं यस्य परमात्मनः स तथोक्तस्तस्य ते रायो दीयमानत्वेन त्वत्सम्बन्धिनो रायः प्रसिद्धाद् वित्तान्मूर्धानमुत्तमं वित्तं मोक्षाख्यम् उदशेम उच्चैरश्नीमः ॥ ५ ॥ १३॥

(ऋ.म-२५९)

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम्
॥ ६ ॥

(ऋगर्थोद्धारः) - **नहि ते क्षत्रमिति ॥ 'तं सवितोवाच । वरुणाय वैराज्ञे नियुक्तोऽसि, तमेवोपधावेति । स वरुणं राजानमुपससार उत्तराभिरेकत्रिंशता'** इति ब्राह्मणवचनाद् इतःपरा एकत्रिंशद् वरुणदेवताः। तत्राऽद्यं दशर्चं सूक्तम् ।

हे वरुण ! [१]वरणं सुखं यस्य शीलमिति वरुण, परानन्दतनो, वृणोति भक्तानिति वा वरुण विष्णो ! ते, क्षत्रं = क्षताद् [२]हानेस्त्राणमनिष्टनिवारणानुकूलव्यापाराख्यं गुणविशेषं, वयश्चन - विशब्दो विशिष्टवाची । वय इति विशिष्टस्य प्रथमाबहुवचनम् । चनोऽप्यर्थः । तथा च विशिष्टा अपि लोकविलक्षणा अपि, अमी = परोक्षाः, अतीन्द्रिया इति यावत् । ये मुक्तिगास्तेऽपि नाऽपुर्हि । तथा ते सहो बलं च नाऽपुः । मन्युं 'मनु अवबोधने' ज्ञानं च नाऽपुः ।

यद्यपि मन्युशब्दः क्रोधरूपगुणार्थतयाऽपि शक्यते व्याख्यातुम् । भगवति ज्ञानानन्दात्मकक्रोधस्य 'क्रोधमयोऽक्रोधमयः' इत्यत्र

'क्रोधः क्षमात्मको यस्य चिदानन्दात्मकस्तथा'

१. 'वरुणं' घ. । २. 'हरेः' घ. ।

इति बृहदारण्यकभाष्येऽभिहितत्वात् । तथाऽपि तमोगुणकार्यक्रोधस्य गुण-त्वाभावेन तस्य भगवत्यभावात् । तत्प्रसक्तिपरिहारायेत्थं व्याख्यातम् । यथोक्तं तत्रैव -

'अन्यक्रोधसमक्रोधः तस्य विष्णोः कथं भवेत्' इति ।

अत एवोक्तं टीकाकारैः - **'क्रोधस्य गुणत्वाभावात्'** इति । ज्ञानानन्दा-त्मकक्रोधाभिप्रायतया व्याख्यानं त्वनुमतमेव । अप्रतिषिद्धमनुमतं भवतीति न्यायादिति द्रष्टव्यम् । तथा च त्वदीयक्षत्रबलज्ञानसदृशक्षत्रबलज्ञानवन्तो मुक्ता अपि न भवन्तीत्यर्थः । नन्विदं प्रमाणबाधितं मुक्तगुणानां भगवद्गुण-प्रतिबिम्बत्वेन तत्सदृशत्वस्य **'एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति'**, **'तद्गुणसारत्वात् तद्व्यपदेशः प्राज्ञवत्'** (ब्र.सू- २-३-२८), **'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः'** (ब्र.सू- ३-२-३२) इत्यादिश्रुतिसूत्रसिद्धत्वेन तत्प्रतिषेधायोगादिति चेत् । सत्यं, भगवत्क्षत्रादि-गुणजातस्य निस्सीमत्वेन पूर्णत्वात् तदभिप्रायेण नाऽपुरिति सादृश्य-प्रतिषेधोपपत्तेः । यथोक्तं भाष्ये - **'क्षतात् त्राणं ते बलं संविदं च पूर्णं नाऽपुः'** इति । उक्तं चानुव्याख्याने -

'अन्यानन्दादिसादृश्यानुकूल्यादिना परम् ।
पूर्णत्वादिमहत्तेषां वैलक्षण्यं श्रुतौ श्रुतम् ॥ इति ॥

किञ्च ये पतयन्तः, स्वार्थे णिच् । स्वयं संसृतेरुत्पतन्तः उत्पन्नमार्गे पतिताः दग्धपटायमानलिङ्गदेहाः, जीवन्मुक्ता इति यावत् । तेऽपि नाऽपुः । तथा च त्वदीयक्षत्रादिसदृशक्षत्रादिमन्तो जीवन्मुक्ता अपि न भवन्तीत्यर्थः । यद्वा, पतयन्तः प्रयोजकव्यापारे णिच् । शिष्यादीन् उपदेशादिना संसृतेः पतयन्तः उद्गमयन्तो ये आचार्या जीवन्मुक्तव्यतिरिक्ता अनपरोक्षज्ञानिनो महात्मानस्तेऽपि नाऽपुः । त्वदीयक्षत्रादिसदृशक्षत्रादिमन्तो व्याख्यातारोऽ-

नपरोक्षज्ञानिनोऽपि महात्मानो न भवन्तीत्यर्थः । किञ्च अनिमिषं सदा चरन्तीः चरन्त्यः = शुभान्याचरन्तः, इमा आपः **'आपो वै सर्वा देवताः'** इति श्रुतेरिमे प्रसिद्धाः [1]'सर्वे देवा अपि नाऽपुः । यद्वा, आपः = अब्देवताः, अबभिमानिदेवताः- 'उदकात्मको बुधश्चैव', 'जलाभिमानी वरुणः' इत्यादि-प्रमाणप्रमिता देवताविशेषा अपि नाऽपुः । अथवा अनिमिषं सदा चरन्तीः चरन्त्यः = प्रवाहवत्यः, आपः = गङ्गाद्या नद्यो नाऽपुः समस्तोदकाभि-मानिदेवताभ्यः तत्तन्नदीजीवा भिन्ना एव सन्तीति द्रष्टव्यम् । तथा च त्वदीयक्षत्रादिसदृशक्षत्रादिमन्त्य आपोऽपि न भवन्तीत्यर्थः । तथा च पतयन्तु जीवन्मुक्ता नाऽपुरिति प्रतिषेधस्तु देवेतरजीवन्मुक्तविषय इत्यवगन्तव्यम् ।

किञ्च ये देवसङ्घाः वातस्य [2]वायुदेवस्य विष्णोः, सकाशादिति शेषः । अभ्वं, उत्पत्तिपर्यायोऽयम् । उत्पत्तिं प्रमिनन्ति च । अपरोक्षतो जानते । यद्वा वातस्य, 'वा गतिगन्धनयोः' इति धातोः ज्ञानरूपत्वात्, ततत्वाच्च वातो विष्णुस्तस्याभ्वम् उत्पत्तिं प्रादुर्भावं प्रमिनन्ति जानते, उपासनेन समस्त-प्रादुर्भावान् अपरोक्षतः पश्यन्ति, तेऽपि महाज्ञाना[3] ब्रह्माद्या नाऽपुः । त्वदीयक्षत्रादिसदृशक्षत्रादिमन्तो महाज्ञाना ब्रह्मादिदेवसङ्घा अपि न भवन्तीत्यर्थः । तथा च नेमा आप इति प्रतिषेधस्तु ब्रह्मादिमहाज्ञानि-व्यतिरिक्तदेवताविषय इत्यवगन्तव्यम् ।

पूर्वं वयश्चनेत्येतद् विशिष्टा मुक्ता अपीति व्याख्यातम् । अथवा 'विः पक्षिपरमात्मनोः' इत्यभिधानाद् वयः सुपर्णाः, अतीतानागतवर्तमाना गरुडदेवा अपि नाऽपुः । त्वदीयक्षत्रादिसदृशक्षत्रादिमन्तोऽतीतानागतवर्तमानगरुडदेवा अपि न भवन्तीत्यर्थः । अस्यामृचि विष्णोर्मुक्तामुक्तसर्वप्राप्यपूर्णगुणवत्त्वेन

---

१. 'सर्वदेवाः' घ. । २. 'प्राणस्य' घ. । ३. 'माहाज्ञानाः' इति क. ।

सर्वोत्तमत्वस्योक्तत्वात् तस्य च प्रसिद्धे वरुणेऽयोगान्नात्र वरुणः प्रतिपाद्यः । किन्तु केवलो विष्णुरेवेति मन्तव्यम् । यथोक्तं भाष्ये - 'एवमन्या अयोग्या या अन्यदेवेषु सम्यक्' इति ॥ ६ ॥

(ऋ.म-२६०)

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥ ७ ॥

(ऋगर्थोद्धारः) - अबुध्ने राजेति ॥ पूतदक्षः पूता दक्षा अनेनेति पूतदक्षो वरुणो राजा भगवान् अबुध्ने 'बुध अवगमने' तत्प्रतिषेधो बुध्नं, नञः परनिपातः। नलोपाभावश्च छान्दस इत्यवगन्तव्यम् । अन्यथा अबुधेति स्यात् । तस्यापि प्रतिषेधोऽबुध्नम् । तृतीयार्थे सप्तमी । ज्ञानेन, ज्ञानपूर्वमिति यावत् । वनस्य 'वन षण सम्भक्तौ' स्वं सम्भजतः, षष्ठी चतुर्थ्यर्थे । स्वात्मानं सेवमानायोर्ध्वमुच्चैः स्तूपं स्थानं ददते, 'दद दाने' । किञ्च ये नीचीनाः नीचस्थाः नीचस्थानस्थाः पुरुषा मानुषाद्यास्तेऽपि वरुणप्रसादाद् उपरि ऊर्ध्वगाः स्वर्गलोकगाः स्युः तस्थुः । बभूवुः । ते पुरुषा मानुषाद्या कथं नीचीनाः नीचस्थानस्थाः ? नीचस्थानत्वं तेषां कथमिति यावत् । इति शङ्कायामुच्यते- **बुध्न एषामिति** । एषां तेषां स्वर्गं गमिष्यतां मानुषाद्यानां बुध्नः बुध्नशब्दोऽधोभागवाची । देवलोकापेक्षयाऽधोभागो नीचलोको भूरादिर्ह्यावासः, अतो नीचस्थानत्वेन नीचीना इत्यर्थः । यद्वा, ये नीचीनाः नीचा मानुषाद्यास्तेऽपि वरुणस्य प्रसादाद् उपरि स्युर्मुक्तिगा बभूवुः । कुतस्ते मानुषाद्या नीचास्तेषां नीचत्वं कथमिति यावदिति शङ्कायामुच्यते- **बुध्न एषामिति ॥** एषां तेषां मानुषादीनां बुध्नः बुध्नशब्दोऽर्वाक्तनत्वमाह । देवापेक्षयाऽर्वाक्तनप्रकारः ज्ञानभक्त्यादयो गुणा नीचा इत्यर्थः । अतो नीचगुणत्वेन तेषां

नीचत्वमित्याशयः । अथवैषां मानुषादीनां बुध्नोऽप्रकाशोऽज्ञानमस्ति । न तु देवानाम् । अतस्ते देवापेक्षया नीचा इत्यर्थः ।

यद्वा, समग्रतृतीयपादस्येत्थं योजना । अस्य वरुणस्याऽज्ञया य एव जीवा मनुष्यगन्धर्वाद्याः किञ्चिदपेक्षया नीचीना देवगन्धर्वाद्यपेक्षया नीचा इति यावत् । त एव किञ्चिदपेक्षया मनुष्योत्तमाद्यपेक्षयोपरि तस्थुः । किमेतन्नीचोच्चतारतम्यं [1]कुत्राप्यपर्याप्तम् ? नेत्याह - **बुध्न एषामिति** । एषां जीवानां बुध्नः मूलवाच्ययं शब्दः, मूलभूतः कश्चिदस्ति विरिञ्चः । तथा च अधिकारिवर्गे विरिञ्चस्यैव सर्वोपरिस्थितत्वेन तत्रायं [2]नीचोच्चतारतम्यक्रमः पर्याप्त इति भावः । यथोक्तम् **'इयदामननात्'** (ब्र.सू-३-३-३५) इति । तथा चैतादृशमहिम्नो वरुणस्य प्रसादादस्मे अस्माकं अन्तर्हृदये केतवो ज्ञानानि नित्यं निहिताः सन्निहिताः सन्निहितानि स्युर्भूयासुः, ज्ञानिनो वयं भूयास्मेत्यर्थः ।

ननु ज्ञानादीनां स्वरूपत्वाद् ज्ञानानि सन्त्येवेत्येतत् कथं प्रार्थना । अतोऽधिकप्रार्थने चायोग्यप्रार्थनया च कथं नानर्थप्राप्तिरित्याशङ्कायामप्युच्यते- **अस्मेति** ॥ ये केतवोऽस्मेऽस्माकमन्तर्निहिता भवितुमर्हा योग्या भवन्ति विद्यमाना वा निगूढाः सन्ति । ते त एव नत्वयोग्या वरुणस्य प्रसादात् स्युरधिकव्यक्ताः स्युरित्यर्थः । पदकारेणात्र स्युरिति स्युरित्येवं द्विरुच्चारणं क्रियते । तेनेयं[3] प्रार्थना आधिक्यरूपार्थद्योतनाय भवति । अथ एवाधिकव्यक्ता स्युरिति व्याख्यातमित्यवगन्तव्यम् । अत्रापि ऊर्ध्वं स्तूपं ददत इति मुक्तिदातृत्वोक्तेस्तस्य च 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया', 'ज्ञानिनां मोक्षदश्च सः' इत्यादिप्रमाणबलेन भगवल्लिङ्गत्वावगमनेन प्रसिद्धे वरुणेऽयोगान्न सोऽत्र प्रतिपाद्यः । किन्तु भगवानेवेति ज्ञातव्यम् ॥ ७ ॥

१. 'कुत्राप्यपर्यायत्वम्' घ. । २. 'नीचोच्चक्रमः' घ. । ३. 'तेनयप्रार्थना' इति क. ।

(ऋ.म-२६१)

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उं ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ८ ॥

(ऋगर्थोद्धारः)- उरुं हि राजेति ॥ रञ्ज रागे । भक्तानां स्वस्मिन्ननुराग-जननात् 'राजृ दीप्तौ' राजनाद् दीपनाद्, प्रकाशनाद्वा राजा वरुणः अनु स्वाज्ञानुसारेण । उशब्द एवार्थे । तस्याध्याहृतेन सदेत्यनेन सम्बन्धः । सदैव एतेनैव गमनाय सूर्याय, तादर्थ्ये चतुर्थी । सूर्यार्थम् उरुं विस्तीर्णं पन्थां पन्थानं चकार । सूर्यसञ्चाराय मूर्तान्तरप्रतिघात-रहितमन्तरिक्षं चकार । अपदे अपदाय पुरुषाय प्रतिधातवे 'धावु गतिशुद्ध्योः' गन्तवे गन्तुं पादा पादौ अकः अकरोत् । यद्वा, स वरुणः प्रतिधातवे आत्मानं प्रति गन्तुम् अपदे 'पद गतौ' गतिर्ज्ञानम् । न विद्यते पद् ज्ञानं यस्य तस्मै अज्ञानिने पादौ **'विज्ञानमात्मयोग्यं स्याद् ज्ञानं साधारणं स्मृतम्'** इत्युक्तविज्ञानज्ञाने अकरकरोत् । उत = किञ्च, वरुणो विष्णुः हृदयविधः, हृदयं = बुद्धिः, तां विशेषेण धत्त इति हृदयविध्, तस्य हृदयविधः = बुद्धिमतः सर्वज्ञस्य, शङ्करस्य चित्= अपि, अपवक्ता चतुर्मुखपञ्चममुखछेदकत्वप्रयुक्तब्रह्महत्यादि-रूपदोषान् सूक्ष्मदृष्ट्या ज्ञात्वा त्वयेदमवद्यमाचरितमिति तच्छिक्षणाय वक्ता, दायकः न दुर्जनतयेत्यर्थः । अत्रापि स्वाज्ञानुसारेण सदागमनाय सूर्याय वरुणः पन्थानं चकारेत्युक्तस्य सूर्याय मार्गकरणस्य सूर्यान्नीचे वरुणेऽ-योग्यत्वात् । तथा शिक्षणाय रुद्रं प्रति दोषवक्तृत्वोक्तेस्तस्यापि रुद्रादतिनीचे वरुणेऽयोगाद् भगवानेवात्र प्रतिपाद्य इत्यवगन्तव्यम् ॥ ८ ॥

(ऋ.म-२६२)

शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ॥ ९ ॥

(ऋगर्थोद्धारः)- शतं ते राजन्निति ॥ हे राजन् ईश ! ते तव शतम् अनन्तानि सहस्रं प्रत्येकमनन्तधाभूतानि, भिषजः = रक्षकत्वगुणयोगाद् जगद्रक्षासाधनानि उपायजातानि सन्ति यतोऽतो मम, उर्वी= महती, गभीरा = अगाधरूपा, सुमतिः = शुभा मतिः, ते तव त्वद्विषय इति यावत् । सदाऽस्तु । तथा च मम त्वद्विषयकबुद्ध्यनन्तरं रक्षासाधनोपा-यैर्मां रक्षेत्युक्तं भवति । किञ्च, मम त्वद्विषयकबुद्ध्यनन्तरं, निर्ऋतिं, निर्निषेधे । ऋतिर्ज्ञानं, भावे क्तः । तत्प्रतिरूपत्वहेतोर्निर्ऋत्याख्यां दुर्मतिं दूर एव । बाधस्व । बाधृ लोडने । ननु दुर्मतिलोडनं कथम्? तत्प्रेरकाणां दैत्यजनानां बहूनां सत्त्वादित्यत उक्तम् - **पराचैरिति** ॥ पराकृत्ये पराकृत्य दुर्ज्ञानप्रेरकं दैत्यजनं स्वर्गादिस्थानान्निरस्य नरके क्षिप्त्वेत्यर्थः । ननु दुर्मतिप्रेरकदैत्यानां तमसि पातेन तत्प्रवृत्यभावेऽपि पूर्वार्जितपापेनैव तत्प्रवृत्तिः स्यादित्यत उच्यते - **कृतं चिदिति** ॥ मयेति शेषः । मया कृतम् एनश्चित् पापमपि, अस्मत् = अस्मत्तः, प्रमुमुग्धि = प्रमोचय ॥ ९ ॥

(ऋ.म-२६३)

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति
॥ १० ॥ १४ ॥

(ऋगर्थोद्धारः) - अमी य ऋक्षा निहितास इति ॥ ये अमी ऋक्षाः यान्यमूनि ऋक्षाणि नक्षत्राणि, तानि उच्चावचैरन्तरिक्षे निहितासो निहितानि, त्वयैवेति शेषः । यच्च तानि नक्तं रात्रौ ददृश्रे ददृशिरे दृश्यानि भवन्ति । दिवा कुहचित् कदाचिदेव सूर्योपरागसमये खग्रासदशायां महारिष्टकाले वा ईयुः, प्रतीयुः प्रतीयन्ते । दिवा सर्वदा न प्रतीयन्ते, कदाचिदेव प्रतीयन्ते, तदपि त्वयैव वरुणस्य परानन्दतनोर्विष्णोस्तवैव व्रतानि अन्तरिक्षे

नक्षत्रस्थापनादीनि उक्तानि कर्माणि, अदब्धानि = अनिरोधितानि, अप्रतिहतानि ।

किञ्च चन्द्रमाश्चन्द्रो विचाकशत् 'काशृ दीप्तौ' दीप्तिर्दर्शनं, पश्यन् सन्, समस्तमिति शेषः । प्रकाशयन्निति यावत् । नक्तम्, उपलक्षणमेतत्। नित्यमेति याति प्रवर्तते । तच्च त्वयैव । यद्वा, वरुणस्य अदब्धानि कर्माणि विचाकशत् पश्यन्, ध्यायन्निति यावत् । चन्द्रमा नक्तं नित्यमेति इति यत् तदपि त्वयैवेत्येकवाक्यतया योज्यम् । यद्वा ,चन्द्रमा नक्तं रात्रौ विचाकशत्= दीप्यमानः, सर्वैर्दृश्यमानतयेति यत् तदपि त्वयैवेति । अथवा यो विचाकशत् स्वयं दीप्यमानः चन्द्रमाः स त्वयैव सम्प्रेरितः सन् नक्तं रात्रिमेति । रात्रावेव प्रवृत्तिमान् भवतीति योज्यम् । उपलक्षणमेतत् । एवमन्येऽपि देवाः त्वयैव सम्प्रेरिताः सन्तः स्वस्वव्यापारान् कुर्वन्तीति द्रष्टव्यम् । अत्रापि वरुणस्य प्रसादाद् विचाकशत् चन्द्रमा नक्तमेतीत्युक्तत्वादस्य चन्द्रमसः सकाशादवरे प्रसिद्धे वरुणेऽयोगाद् भगवानेवात्र प्रतिपाद्य इत्यवगन्तव्यम् ॥१०॥१४॥

(ऋ.म-२६४)

तत्त्वां यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ ११ ॥

(ऋगर्थोद्धारः) - **तत्त्वा यामीति** ॥ यद् यस्मात् त्वं पूर्वोक्तगुणजातविशिष्टः तत् तस्मात् त्वा त्वां शरण्यं यामि = सदा शरणं व्रजामि । कथं ? ब्रह्मणा वेदवाचा वन्दमानः, 'वदि अभिवादनस्तुत्योः' । स्तुवन् अभिवादयंश्चेत्यर्थः । किञ्च, यजमानः, उपलक्षणमेतत् । मत्तोऽन्यो विद्वान् हविर्भिः हविप्रदानादिभिः तदेवाऽऽशास्ते । अत्र तच्छब्देन यामीत्युक्तधात्वर्थः परामृश्यते । तथा च तच्छरणप्राप्तिमेवाऽऽशास्ते वाञ्छति । हे वरुण देव इह अस्मासु, अहेलमानोऽवज्ञामकुर्वन्, नरमात्रोऽयमिति बुद्ध्या

शरणं प्राप्तानस्मान् अनिन्दन्निति यावत् । बोधि = सम्बोधय । हे शुनःशेप श्रान्तोऽसीति हे उरुशंस ! उरुभिः पुरुषैः शंस्यत इति उरुशंसः स्तुत, नोऽस्माकमायुः मा प्रमोषीः मा च्छेत्सीः ॥ ११ ॥

(ऋ.म-२६५)

तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आविचष्टे ।
शुनःशेपो यमह्वद्गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ॥ १२ ॥

(ऋगर्थोद्धारः) - **तदिन्नक्तमिति** ॥ हे वरुण विष्णो ! नक्तं रात्रौ मह्यं तदित् तदेव एतदेव 'ब्रह्मणा वन्दमानः' इति प्रकृतं त्वदीयं स्तोत्रमेवाऽर्याः आहुः । सुकार्यमिति शेषः । दिवा च दिवसे च तदैव कार्यमाहुः । किञ्च हृदः हार्दः हृदिस्थः । अणि वृद्ध्यभावश्छान्दसः । यद्वा, हृदः ल्यब्लोपनिमित्ता पञ्चमी । हृदधिष्ठाय स्थितः मद्हृदिस्थः केतः ज्ञानरूपः । तव रूपान्तरभूतोऽयं नारायणः तदेव कर्तव्यमाविचष्टे । 'चक्षिङ् व्यक्तायां वाचि' इति धातोः । सम्यग् वक्ति । यद्वा, 'चक्ष दर्शने' इति धातोः सम्यक् पश्यति । अनेन तदीयं प्रत्यक्षमत्र प्रमाणमिति सूचयति । एवं स्तुवन् गृभीतः गृहीतः **'हृग्रहोर्भः छन्दसि'** (वार्तिकम्) । शुनःशेपोऽहमिति यावत्। यमह्वत् समाह्वत समाह्वयत समाह्वयामीति यावत् । स राजा ईशो वरुणो नोऽस्मान् यूपबन्धनसञ्ज्ञपनोद्यमनादिरूपाद् यूपात् साम्प्रतमुपस्थिताद् अग्र्यदुःखात् संसारदुःखाद्वेति शेषः । मुमोक्तु मोचयतु ॥ १२ ॥

(ऋ.म-२६६)

शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो विमुमोक्तु पाशान् ॥ १३ ॥

(ऋगर्थोद्धारः) - शुनःशेपो ह्यह्वदिति ॥ त्रिषु द्रुपदेषु द्रोः वृक्षस्य तद्विकारस्य यूपस्य पदानि मूलं मध्यमग्रं चेति स्थानानि तेषु बद्धः । यद्वा, द्रु द्रुतं शीघ्रं कर्मानुसारेण पद्यन्ते प्राप्यन्त इति द्रुपदानि विक्रययूपबन्ध-सञ्ज्ञपनोद्यमरूपाणि तेषु, तृतीयार्थे सप्तमी । तैर्बद्धो युक्तः । यद्वा 'द्रु द्रवणे' द्रोःजीवानां द्रवणस्य संसरणस्य पदानि स्थानानि, निमित्तानीति यावत् । सत्वरजस्तमांसि, तैर्बद्धः शुनःशेपः आदित्यं आदिकाले संस्थित-त्वादादित्यनामकं यं वरुणमह्वत् आह्वत्= आह्वयति हि प्रसिद्धम् । स वरुणो राजा एनं शुनःशेपम् अवससृज्याद् अवसृजतु । संसृतेरवसृष्टं करोतु । ननु कथं संसृतेरवसृष्टं करिष्यति ? तदापादकानां कर्मपाशानां सत्त्वादित्यत उच्यते । विद्वान् अस्मदाह्वानं जानन् तेन प्रसन्न इति यावत् । अदब्धोऽप्रतिबद्धः पाशाद् विमुमोक्तु अस्मान् कर्मपाशाद् विशेषेण मोचयत्वित्यर्थः । नहि ते क्षत्रमित्यादाविवात्र बाधकाभावाच्छुनःशेपोऽयमित्यादिकेन प्रसिद्धो वरुणोऽपि शुनःशेपेन स्तूयत इत्यङ्गीकारे न विरोध इति ज्ञातव्यम् ॥ १३ ॥

(ऋ.म-२६७)

अव॑ ते॒ हेळो॑ वरुण॒ नमो॑भि॒रव॑ य॒ज्ञेभि॑रीमहे ह॒विर्भिः॑ ।
क्षय॑न्न॒स्मभ्य॑मसुर प्रचेता॒ राज॒न्नेनां॑सि शिश्रथः कृ॒तानि॑

॥ १४ ॥

(ऋगर्थोद्धारः) -अव ते हेळो वरुण इति ॥ अत्र क्रियापदस्यैकत्वाद् द्वावप्यवशब्दौ नोपसर्गार्थौ युक्तौ । किन्त्वेकोऽवशब्दोऽवगमत्वार्थक इति ज्ञातव्यम् । हे वरुण ! वयं ते नमोभिस्त्वद्विषयैर्नमस्कारैः तथा हविर्भिः हविर्युक्तैस्ते यज्ञेभिः त्वद्विषयकैर्मखैः त्वन्नमस्कारत्वन्मखसमुत्पन्नात् त्वत्प्रसादादिति यावत् । ते हेळः = हेळनं त्वन्निन्दाम्, अवईमहे =

अवगच्छामः । ननु कथमेतत् मुमुक्षोर्भगवन्निन्दायाः ज्ञातुमयोग्यत्वाद् इत्याशङ्कापरिहारायोक्तम् - **अवेति** ॥ उपादेयत्वेन ज्ञातुमयोग्यामपि ते निन्दां अव अवमां अवाग्गतिहेतुभूतां अवगच्छाम इत्यदोषः । तथा च

'निन्दां भगवतः शृण्वन् तत्परस्य जनस्य च ।
ततो नापैति यस्सोऽपि यात्यधः सुकृताच्युतः' ।

इत्यादिप्रमाणैर्भगवन्निन्दा अवाग्गतिहेतुभूतेति ज्ञात्वा तां परित्यजाम इति यावत् । हे असुर ! असवः प्राणा इन्द्रियाणि, तेषु स्थित्वा रमते तैर्वा रमत इत्यसुरः । तत्सम्बुद्धिः हे असुर ! प्रचेतः, = प्रकृष्टं स्वपरगताखिल विषयं चेतो ज्ञानं यस्येति तथोक्तस्तस्य सम्बुद्धिः हे प्रचेतः = सर्वज्ञ ! राजन् वरुण एवम् अवाग्गतिहेतुभूतनिन्दाविषयत्वेन अस्माभिरवगतस्त्वं अस्मभ्यं क्षयन्, क्षि निवासगत्योः, अस्माकम् आश्रयो [1]भवन् सन् अस्मत्कृतानि एनांसि अघानि शिश्रथः अशिश्रथः । यद्यप्यत्र शुनःशेपेन प्रार्थनायाः क्रियमाणत्वेन प्रार्थनायां च लोटो विहितत्वादेनांसि श्रथयेति वक्तव्यम्, न त्वशिश्रथ इति भूतार्थको लुङ् । तथाऽप्येनोवियोजनरूपैष्यदर्थस्य निश्चितत्वात् **'एष्यत्तु निश्चितं यत्तद् अतीतत्वेन भण्यते'** इति वचनात् [2]लोडर्थे लुङिति ज्ञातव्यम् । उक्तं च भाष्ये - **'अतिनिश्चितेऽर्थे भूतशब्दश्चेत्याह सूत्रं परेशः'** इति ॥ १४ ॥

(ऋ.म-२६८)

उदु॑त्त॒मं व॑रुण॒पाश॑म॒स्मदवा॑ध॒मं वि म॑ध्य॒मं श्र॑थाय ।
अथा॑ व॒यमा॑दित्य व्र॒ते तवाना॑गसो॒ अदि॑तये स्याम

॥ १५ ॥ १५ ॥ २४ ॥

(ऋगर्थोद्धारः) - उदुत्तममिति ॥ हे वरुण ! परानन्दतनो विष्णो ! त्वं

---

१. 'भगवन्' घ. । २. 'लडर्थे' घ. ।

मम त्वदपरोक्षज्ञानं दत्त्वा उत्तमं पाशं बन्धकत्वसाम्यात् पुण्यमस्मत् उच्छ्रथय अस्मत्सुहृद्भ्यो दत्त्वाऽस्मत्तो वियोजय। अधमं पाशं पापमप्रारब्धमवश्रथय द्विषद्भ्यो दत्त्वाऽस्मत्तो वियोजय। मध्यमं पाशं मिश्रं पुण्यं पापमिति यावत्। विश्रथय उदासीनेभ्यो दत्त्वा वियोजयेत्यर्थः। नन्वत्रापरोक्षज्ञानिना सुहृद्भ्यो दीयमानं पुण्यं कीदृशमिति चेदुच्यते। अपरोक्षज्ञानात् पूर्वं सम्पादितं यत् काम्यं पुण्यं स्वस्यानभीष्टं तदिति वदामः। काम्यमपीष्टं चेन्न नश्यति। अन्यथेष्टविघातित्वेन ज्ञानस्यापुरुषार्थत्वप्रसङ्गात्। न च काम्यपुण्यस्य [1]पापमिश्रितत्वेन उदासीनानामेव तद्योग्यतया सुहृद्भ्यो दानायोग इति वाच्यम्।

अस्त्यत्र काम्येऽपि विशेषः। अहमुत्तरजन्मनि राजा भविष्यामी-त्यादीच्छया कृतं पुण्यं राजभूतम्लेच्छादिजन्मसम्पादनद्वारा [2]गोहत्यादि-महापापसम्पादकमेकम्। अपरं चाहमुत्तरजन्मनि शुद्धो ब्राह्मणः स्यां, तत्र [3]शुद्धं धनं मे भूयात्। [4]तेन देवान् ब्राह्मणान् चाऽराधयिष्ये इत्यादीच्छया कृतं शुद्धं पापाद्यसम्पादकं काम्यम्। तत्राऽद्यं काम्यपुण्यं पुण्यमिश्रं पापं चेत्यत्र विवक्षितम्। तद्भागिन उदासीनाः। द्वितीयकाम्यपुण्यमपि स्वस्यापेक्षितं चेत् स्वस्यैव फलदं भवति। नो चेत् तद्भागिनः सुहृद इति विवेको द्रष्टव्यः। अत्र सुहृदश्चरमजन्मकालीना इत्यन्ये। अपरोक्षज्ञान-जन्मकालीना इति सम्प्रदायविदः।

इदमुपलक्षणम्। अप्रारब्धपुण्यस्यापि ज्ञानेन विनाशो द्रष्टव्यः। अथाप्रारब्धानभीष्टकाम्यस्याप्रारब्धपापस्य च अपरोक्षज्ञानेन वियोजनानन्तरं

१. 'पापमिश्रत्वेन' घ.।
२. 'गोहत्यादिपापसम्पादकम्' घ.।
३. 'महाधनिकः स्याम्' घ.।
४. तेन च देवब्राह्मणाराधनं करिष्यामि' घ.।

प्रारब्धपुण्यपापयोश्च भोगेन क्षपणानन्तरं, हे आदित्य! आदिकालस्थित वरुण! तव व्रते त्वद्विषये कर्मण्यनुष्ठिते सति। त्वद्विषयककर्मनिष्ठयेति यावत्। अनागसो निर्दोषाः संसृतेर्मुक्ताः भिन्नलिङ्गशरीरा वयं तव त्वदीयायाः त्वद्भार्यायाः अदितये 'अहल्यायै जार' इतिवत् षष्ठ्यर्थे चतुर्थी। अदितेः = देशतः कालतश्चाखण्डितत्वेन तच्छब्दवाच्याया महालक्ष्म्याः स्याम, पुत्रा इति शेषः। लिङ्गभङ्गानन्तरं लक्ष्मीनारायणयोर्युवयोः समीपं प्राप्य ज्ञानोत्तरकृतनिवृत्तकर्मणा महानन्दानुभववन्तः स्यामेति तात्पर्यार्थः।

एतादृगुक्तप्रमेयस्य प्रसिद्धवरुणेऽयोगात् केवलं विष्णुरेवात्र प्रतिपाद्य इत्यवगन्तव्यम्। यथोक्तं भाष्ये - 'एषार्ग् विष्णोः केवलेति'। केवला प्रतिपाद्यान्तररहितेति तदर्थः। इदमप्यस्या ऋच उक्तरीत्या योजनायामेव। [1]पाशादिशब्दस्य [2]प्रसिद्धपाशादिपरतामङ्गीकृत्य योजनायां तु प्रसिद्धवरुणस्य प्रतिपाद्यत्वाङ्गीकारेऽपि न दोषः।

तत्प्रकारस्तु - हे वरुण! उत्तमं पाशं यूपाग्रभागस्थं मद्बन्धकं पाशमस्मत् उच्छ्रथय अस्मत्तो वियोजय। अधमं यूपमूलभागस्थं मद्बन्धकं पाशं अवश्रथय। मध्यमं यूपमध्यभागस्थं मद्बन्धकं पाशं च विश्रथय। अथ पाशवियोजनानन्तरं, हे आदित्य आदिभव! तव व्रते त्वत्कर्मणि त्वदुद्देश्यके कर्मणि स्थिता अनागसो यूपबन्धापादकदोषशून्या वयं पाशबन्धान्मुक्ताः सन्तस्तवादितये त्वद्भार्यायाः पातिव्रत्यादिगुणैरखण्डितत्वेनादिति-शब्दवाच्यायाः भागीरथ्याः पुत्राः स्याम। त्वदुद्देशेनाऽलम्भनाय क्लृप्ता वयं त्वदनुग्रहेण मुक्तास्तव पुत्राः सन्तः सुखेन यत्रकुत्रचिद् वसामेति॥ १५॥ १५॥ २४॥

१. 'पाशादिति' घ.।
२. 'प्रसिद्धपाशादितिपरतां' घ.

सूक्तम् - २५,
आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरात ऋषिः ।
वरुणो देवता । गायत्री छन्दः ।

(ऋ.म-२६९)
यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् ।
मिनीमसि द्यविद्यवि ॥ १ ॥

(ऋगर्थोद्धारः) - यच्चिद्धीति ॥ वरुणदेवतानाम् एकत्रिंशत्सङ्ख्याकानामृचां मध्ये आद्यं दशर्चं सूक्तं व्याख्यातम् । इदं त्वेकविंशत्यृचं सूक्तमिति ज्ञातव्यम् । हे वरुण ! देव विशः = प्रजाः, सुजना देवादयो यथा त्वत्सेवात्मकं कर्म कुर्वन्ति तथैव वयं = यच्चित् यदपि, ते व्रतं = त्वत्सेवात्मकं कर्म, तिष्ठति तत्सर्वं, द्यविद्यवि = दिवसेदिवसे, प्रमिनीमसि कुर्मः । धातूनामनेकर्थत्वात् ॥ १ ॥

(ऋ.मन्त्र-२७०)
मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।
मा हृणानस्य मन्यवे ॥ २ ॥

(ऋगर्थोद्धारः) - मा नो वधायेति ॥ हे वरुण ! हत्नवे, हन्तीति हत्नुः, तस्मै नृशंसाय पुरुषाय, चतुर्थी षष्ठ्यर्थे । तस्य जिहीळानस्य हिलतिस्त्यागार्थः । धर्ममिति शेषः । धर्मं त्यजतः पुरुषस्य वधाय तत्कर्तृकवधाय, नः = अस्मान्, मा रीरधः = मा साधय, तस्य वशान्मा कार्षीः । तथात्वे स हनिष्यतीति भावः । किञ्च हृणानस्य हरतः,

'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणेशापहारिणा' ॥

इति वचनादीशमपहरतश्चोरस्य मायावादिनः पुरुषस्य मन्यवे कोपाय च मा रीरधः अस्मान् तत्कर्तृककोपविषयान् मा कार्षीरित्यर्थः ॥ २ ॥

(ऋ.म-२७१)
वि मृळीकाय ते मनो रथीरश्वं न सन्दितम् ।
गीर्भिर्वरुण सीमहि ॥ ३ ॥

(ऋगर्थोद्धारः) - वि मृळीकायेति ॥ हे वरुण ! वयं, रथीः = सारथिः, सन्दितं 'दो अवखण्डने' सम्यक् खण्डितं, वियोजितं = रथाद् विप्रयुक्तम्, अश्वं न = अश्वं यद्वत् रथे रश्मिभिर्बध्नाति तथा मनोऽस्मदीयं गीर्भिर्वेदवाग्भिः, तच्छ्रवणादिना तद्रूपै रश्मिभिरिति यावत् । मृळीकाय ते, सप्तम्यर्थे चतुर्थी । मृळीके त्वयि, धातूनामनेकार्थत्वात्, मृडधातुरिह रक्षणार्थः । कर्तरीकक् । रक्षके त्वयि, वि अधिकं सीमहि 'षिञ् बन्धने' रक्षके, निबध्नीमः= त्वद्विषयं कुर्म इत्यर्थः । यद्वा, हे वरुण ! ते मनस्तव मनः भक्तेषु कृत्वा कृपारूपां त्वन्मनोवृत्तिं गीर्भिः स्तुतिरूपाभिः मृळीकाय, भावे ईकक्, रक्षणाय, विसीमहि = निबध्नीमः, अस्मास्विति शेषः । बन्धने दृष्टान्तो - **रथीरश्वं न सन्दितमिति** । पूर्ववदर्थः । भक्तेषु कृतां कृपारूपां त्वन्मनोवृत्तिं

'किं वक्तव्यं भगवतो मनो भक्तेषु यत् कृतम् ।
यत् पूर्णार्थोऽपि भगवान् आगतोऽस्मद्दिदृक्षया'

इत्यादिरूपाभिः गीर्भिः स्तुत्वा पश्चाद् ध्यानार्थमन्तःकरणे स्थापयाम इत्याशयः ॥ ३ ॥

(ऋ.म-२७२)
परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।
वयो न वसतीरुप ॥ ४ ॥

(ऋगर्थोद्धारः) - परा हि मे विमन्यव इति ॥ मे = मम, वि अनेकविषयत्वाद् विविधा मन्यवः प्रज्ञाः बुद्धिवृत्तयः, वस्यइष्टये, वस्यःशब्दः

शुभपर्यायः । इष्टिः प्राप्तिः । 'इष गतौ' इति धातोः । तथा च वस्यसः शुभस्य इष्टये प्राप्तये परा पराक् त्वत्पराङ्मुखतया, पतन्ति = गच्छन्ति हि । हा कष्टम् । वैषयिकसुखलाभार्थं मदीया बुद्धयो विषयानेव धावन्ति यतोऽतो धिङ् मामिति तात्पर्यम् । यद्वा, आत्यन्तिकसुखसाधनता-हीनेष्वपि विषयेष्वात्यन्तिकसुखलाभाय, पतन्तीति भ्रान्तोऽस्मीति तात्पर्यम् । किमिव वयः पक्षिणो वसतीरुप नीडानि प्रति, न = यद्वत्, शीघ्रं गच्छन्ति [1]तथेत्यर्थः । यद्वा नेत्यस्याऽवृत्तिः, एको दृष्टान्तार्थः । अपरस्तु निषेधार्थः । तथा च वसतीरुप वसतीः प्रति वयो न पक्षिणो यद्वत् पतन्तीति व्यतिरेके दृष्टान्तः । तथा ते मन्यवः प्रज्ञाः वस्यइष्टये मोक्षादिशुभलब्धये परा दूरतो विद्यमानं त्वां प्रति न विपतन्ति न प्राप्नुवन्ति, न विषयीकुर्वन्ति । हि हा कष्टमिति योज्यम् ॥ ४ ॥

(ऋ.म-२७३)

कदा क्षत्रश्रियं नरमा वरुणं करामहे ।
मृळीकायोरुचक्षसम् ॥ ५ ॥ १६ ॥

(ऋगर्थोद्धारः) - **कदा क्षत्रश्रियमिति** ॥ यतोऽस्मद्बुद्धयो विषयानेव धावन्ति, न वरुणम्, अतस्तं प्रति गन्तुं वयं मृळीकाय रक्षणाय, अस्मदीयमनसेति शेषः । क्षत्रश्रियं क्षत्रशब्दः क्षत्रियधनबलवाची । तन्नामसु पाठात् । तथा च क्षत्रं = क्षत्रियाः, धनं, बलं वा तत् यं श्रयति सः क्षत्रश्रीस्तं क्षत्रियपतिं धनपतिं बलपतिं च नरं, न रिष्यत इति नरम् अविनाशिनम् । उरुचक्षसम्, उरु अशेषविषयकत्वेन महत् चक्षो दर्शनं ज्ञानं यस्यासौ उरुचक्षाः, तमुरुचक्षसं वरुणम्, आ = अञ्जसा, कदा करामहे = आह्वयाम । तथा च वरुणाह्वानकरणे बुद्धीनां तं प्रति गमनसम्भवेन मनसो विषयेषु गमनासम्भवात् तद्रक्षणं भविष्यतीति भावः ।

---

१. 'गच्छतयेत्यर्थः' इति क. ।

(ऋ.म-२७४)

तद् वित्समानमाशाते वेनन्ता न प्रयुच्छतः ।
धृतव्रताय दाशुषे ॥ ६ ॥

(ऋगर्थोद्धारः)- **तदित्समानमिति** ॥ तत्= तस्मात् वरुणात् परानन्दतनोर्विष्णोस्तत्प्रसादादिति यावत् । वेनन्तौ= विजानन्तौ, समानमित्= सममेव, आशाते 'अशू व्याप्तौ' विशेषेणाऽप्तिर्गतिर्व्याप्तिः गत्यर्थाश्च ज्ञानार्थाः। अवगच्छतः । कौ तौ ? इत्याकाङ्क्षायां, ब्रह्मवायू इति वक्तव्यम् । किं तत्र ज्ञापकमिति चेद् इदमेव विशेषणमिति वदामः । तथा हि । ब्रह्मवायू एव हि ज्ञानिवरत्वाद् विशेषेण जानन्तौ 'असाधारण्येन व्यपदेशा भवन्ति' इति न्यायात् । कथम्भूतौ ? यौ तौ धृतं व्रतं येनासौ धृतव्रतस्तस्मै धृतव्रताय दाशुषे यजमानाय न प्रयुच्छतः न प्रयच्छतः । यथार्थज्ञानं कर्मणः प्रयोगं च योग्यतातिरेकेण न कुरुत इत्यध्याहारेण व्याख्येयम् । यद्वा, 'युच्छ प्रमादे' । यौ तौ ब्रह्मवायू धृतव्रताय, दाशुषे यथार्थज्ञानकर्मणः प्रयोगं च न प्रयुच्छतः। विभ्रष्टं न कुरुतः । विभ्रंशः प्रमादः । तद्युक्तं न कुरुतः । एवं विष्णुपक्षे योजना ।

प्रसिद्धवरुणपक्षे तु, ब्रह्मवायू तत् तस्माद् वरुणात् तत्प्रसादात् सममेवावगच्छत इत्यस्य प्रमाणबाधितत्वाद् आशात इति क्रियायां कर्तारौ, अश्विनौ ग्राह्यौ । तथा च वेनन्तौ स्वावरापेक्षया विशेषेण जानन्तावश्विनौ तत् तस्मात् प्रसिद्धाद् वरुणात् तत्प्रसादात् समानमित् एवाऽशाते । यौ तावश्विनौ धृतव्रताय दाशुषे ज्ञानं प्रयोगं च विभ्रष्टं न प्रयुच्छत इति योज्यम् ॥ ६ ॥

(ऋ.म-२७५)

वेदा यो वीनां पदमन्तरिक्षेण पतताम् ।
वेद नावः समुद्रियः ॥ ७ ॥

(ऋगर्थोद्धारः) - वेदा यो वीनां पदमिति ॥ योऽसौ वरुणः प्रसिद्धः, अन्तरिक्षेण, सप्तम्यर्थे तृतीया। अन्तरिक्षे आकाशे। यद्वा, [१]कांस्यपात्रेण भुङ्क्ते इत्यादाविवाधिकरणस्य करणत्वविवक्षया यथास्थितैव तृतीया। पततां = गच्छतां, वीनां = पक्षिणां पदं स्वरूपं स्थितिं वा वेद, सूक्ष्मज्ञानित्वादिति भावः। तथा च यश्च, समुद्रियः = समुद्रे भवः जलाभिमानित्वेन समुद्रगः सन्, नावः = उत्तरणसाधनस्य नौकस्य पदं वेद। अत्र यच्छब्दस्य, तत् तस्माद् वरुणात् तत्प्रसादाद् अश्विनौ समानमाशात इति पूर्वेण तच्छब्देन सम्बन्धो द्रष्टव्यः।

भगवत्पक्षे तु, यः समुद्रियः समुद्रे भवः। क्षीराब्धिशयनो विष्णुः, अन्तरीक्ष्यत इत्यन्तरिक्षं परं ब्रह्म, तेन पततां तत्प्रसादात् संसाराद् उत्पततां वीनां विशिष्टानां मुक्तानां पदं स्थितिं वेद। नावः - नयतीति नौर्ज्ञानं, तस्य ज्ञानस्य च पदं - पद्यत इति व्युत्पत्त्या मुख्यविषयं स्वस्वरूपं च, वेद। तत् तस्माद् वरुणात्। परानन्दतनोर्विष्णोः प्रसादाद् ब्रह्मवायू समानमाशात इति पूर्वेण सम्बन्धः ॥ ७ ॥

(ऋ.म-२७६)

वेदं मासो धृतव्रंतो द्वादंश प्रजावंतः।
वेदा य उंपजायंते ॥ ८ ॥

(ऋगर्थोद्धारः) - वेद मास इति ॥ धृतं व्रतं समस्तं कर्म येनासौ धृतव्रतो वरुणः प्रजावतः प्रकर्षेण जायन्त इति प्रजाः कार्याणि तद्वतः तद्युक्तान्। द्वादश मासान् वेद। तत्तत्कालोद्भवैः कार्यैः सः सकलं कालं च वेदेति यावत्। यश्च उप आत्मनः समीप एव जायते न तु व्यवधानेन नाभिपद्मोत्पन्नत्वादिति भावः। तं पद्मजं चतुर्मुखं वेद। यद्वा, आत्मनः उप

१. 'कांस्या पात्र्या' घ.

समीपे जायते प्रवर्तते सामीप्यादिरूपमुक्तिमान् भवति तं मुक्तम्। जातावेकवचनम्। वेद ॥ ८ ॥

(ऋ.म-२७७)

वेद वातंस्य वर्तनिमुरोर्ऋष्वस्यं बृहतः।
वेदा ये अध्यासंते ॥ ९ ॥

(ऋगर्थोद्धारः)- वेद वातस्येति ॥ अत्र बृहत इत्येतद् उरोरित्यनेन [१]पर्यायताप्रयुक्तपौनरुक्त्यपरिहाराय ऋष्वस्येत्यस्य विशेषणतया व्याख्येयम्। ऋष्वशब्दो बलवत्प्रकाशस्यापि वाचकः। प्रकाशवतो विशेषणं भवदिदं प्रकाशरूपं विशेषणमुपसङ्क्रामति। तथा च बृहतो ऋष्वस्यातिप्रकाशिनः, पूर्णदेहकान्तिमत इति यावत्। यद्वाऽभिज्ञाख्यप्रकाशवत इत्यर्थः। अथवा उरोरित्यस्य परिमाणादिगुणैर्महत्त्वं तावदर्थः। तथा च उरोरित्युक्ते परिमाणादिगुणैरुपचारेणापि महत्त्वं शङ्क्येत तन्मा शङ्कीति बृहत इत्यनेनोरुत्वं विशेषणीयम्। इदमपि विशेषणोपसङ्क्रान्तं विशेषणम्। तथा च परिमाणादिगुणैर्महत्त्ववतो बृहत्त्वोक्त्य परिमाणादिगुणानां पूर्णत्वापरपर्यायबृहत्त्वलाभात् तैर्महत्त्वं नौपचारिकमिति ज्ञातव्यम्। तथा च स वरुणः उरोः परिमाणादिगुणैर्महतः बृहतो ऋष्वस्य अतिदेहकान्तिमतोऽतिज्ञानप्रकाशवतो वा। यद्वा, बृहतः उरोः पूर्णपरिमाणादिगुणैर्महतो वातस्य मुख्यप्राणस्य वर्तनिं वर्तनां प्रवृत्तिं वेद। ये देवाः, अधीत्यस्याऽवृत्तिः। अधि = अधिकानि पदानि, अधि = अधिकृत्य आसते तिष्ठन्ति तानपि वेद ॥ ९ ॥

(ऋ.म-२७८)

निषंसाद धृतव्रंतो वरुंणः पस्त्यां३ स्वा।
साम्रांज्याय सुक्रतुंः ॥ १० ॥ १७ ॥

१. 'पर्यायप्रयुक्त' घ.।

(ऋगर्थोद्धारः) - निषसादेति ॥ सुक्रतुः = सुज्ञानः, धृतव्रतः स वरुणः साम्राज्याय = सकलपरिपालनाय, पस्त्यासु, प्रजासु, आनिषसाद प्रजाः विभूतिरूपेणाधिष्ठितवान्। एवं प्रजानां गृहाण्यप्यधिष्ठितवान् इत्यपि द्रष्टव्यम् ॥ १० ॥ १७ ॥

(ऋ.म-२७९)

अतो विश्वान्यद्भुता॒ चिकि॒त्वाँ अ॒भि प॑श्यति।
कृतानि॒ या च॒ कर्त्वा॑ ॥ ११ ॥

(ऋगर्थोद्धारः) - अतो विश्वानीति ॥ अत इति तसिः सप्तम्यर्थे। अत्र पूर्वस्यामृचि पस्त्याशब्दोक्तप्रजासु गृहेषु च वर्तमान इति शेषः। चिकित्वान् कर्ता स वरुणो विश्वानि सर्वाण्यप्यद्भुतानि आश्चर्याणि अभिपश्यति। किञ्च या च यानि च वस्तूनि कृतानि स्वेन कृतानि अतीतानीति यावत्। या च यानि च कर्त्वा कर्तव्यानि, भविष्याणीति यावत्। तानि च पश्यति। अतीतानागतज्ञानत्वोक्त्या वर्तमानज्ञानस्यापि लाभः। तथा चासौ सर्वज्ञ इत्याशयः ॥ ११ ॥

(ऋ.म-२८०)

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत्।
प्रण॒ आयूं॑षि तारिषत् ॥ १२ ॥

(ऋगर्थोद्धारः) - स नो विश्वाहा सुक्रतुरिति ॥ स प्रसिद्धः सुक्रतुः सुज्ञानः आदित्यः आदिभवो वरुणो विश्वाहा विश्वा विश्वानि सर्वाणि अहा अहानि दिनानि नोऽस्माकं सुपथा सुपथानि, निर्विघ्नानीति यावत्। करत् करोतु। नोऽस्माकमायूंषि प्र प्रकर्षेण निरन्तरं मुक्तौ वा तारिषत्। तरतिर्दानार्थः। ददातु सर्वेषामप्यह्नां निर्विघ्नतायाः नित्यायुष्मत्त्वस्य च प्रदानप्रार्थनं मुक्तावेव मुख्यमन्यदा तूपचारत इति ज्ञातव्यम् ॥ १२ ॥

(ऋ.म-२८१)

बिभ्र॑द् द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म्।
परि॒ स्पशो॒ नि षे॑दिरे ॥ १३ ॥

(ऋगर्थोद्धारः) - बिभ्रद् द्रापिमिति ॥ वरुणः परानन्दतनुर्विष्णुः द्रापिं द्रुतं शीघ्रमरीन् आप्नोतीति द्रापिः, 'द्रु गतौ, आप्लृ व्याप्तौ' इति धातोः तमतिद्रुतभ्रमणवन्तं हिरण्ययं हितं च रमणीयं चेति हिरण्ययम्। हितशब्दस्य हि इत्यादेशे वा तकारलोपे वा सति रमणीयमित्यत्र मकारलोपे, ईकारस्य यकाररूपे वर्णविकारे च सति हिरण्ययमिति भवति। अथवा हिरण्ययं हिरण्मयं हिरण्यविकारम्। अत्र हिरण्यशब्दाद् विकारार्थे प्राप्तस्य मयटो मकारस्य [1]ऋत्रयव्याख्यानात् 'हिरण्ययानि छन्दसि' इति सूत्रेण लोपनिपातनाद् हिरण्ययमिति युक्तम्। एतादृशं सुदर्शनचक्रं बिभ्रद् अबिभ्रत्। किञ्च निर्णिजं, 'णिजिर् शौचे' शुद्धं वस्त्रमिति शेषः। वस्त अवस्त, आच्छादितवान्। स्पशः 'स्पशाज्ञातदृशौ' इति धातोः। अविज्ञातचरा देवाः परि वरुणस्य परितो निषेदिरे सेवार्थं निषण्णाः प्रसिद्धो वरुणोऽपि द्रापिम्। उक्तरीत्या द्रुतबन्धनं पाशम् अबिभ्रत् पाशस्य हिरण्ययत्वमपि हितत्वरमणीयत्वाभ्यां द्रष्टव्यम्। किञ्च, निर्णिजं वस्त्रं वस्त। परि तस्य वरुणस्य परिस्पशो निषेदिरे सेवायै निषण्णाः तदवरा देवा इति योज्यम् ॥ १३ ॥

(ऋ.म-२८२)

न यं दिप्स॑न्ति दि॒प्सवो॒ न द्रुह्वा॑णो॒ जना॑नाम्।
न दे॒वम॒भिमा॑तयः ॥ १४ ॥

---

१. 'ऋत्यवाख्यमाध्व्य' इति क.। 'ऋक्षवाख्यमाध्वीः' इति घ.।

(ऋगर्थोद्धारः)- न यं दिप्सन्तीति ॥ यं वरुणं जनानां दिप्सवो दम्भितुमिच्छवः, इच्छया करणमुपलक्ष्यते। स्तम्भकाः वीरा अपि राक्षसा इति यावत्। न दिप्सन्ति न दम्भितुमिच्छन्ति। अत्रापीच्छया करणमुपलक्ष्यते। न स्तम्भयन्ति स्तम्भनं न कुर्वन्तीत्यर्थः। किञ्च, प्रजानां द्रुह्वाणो द्रोहिणः 'द्रुह जिघांसायां' इति हन्तारो दैत्या अपि यं न दिप्सन्ति धातूनामनेकार्थत्वात् न जिघांसन्तीत्यर्थः। यद्वा, जनानां द्रुह्वाणो दैत्या यस्मै न द्रुह्यन्तीति योग्यक्रियामध्याहृत्यान्वयो द्रष्टव्यः। किञ्च अभिमातयः, अभिमातिशब्दः शत्रुपर्यायः। राक्षसेभ्यो दैत्येभ्यश्चान्ये शत्रवो दानवाद्याश्च यं देवं न दिप्सन्ति धातूनामनेकार्थत्वात्। यं देवं प्रति अपकारं न कुर्वन्तीत्यर्थः। यद्वा, अपकुर्वन्तीति योग्यक्रियाध्याहारो वा। अत्रत्ययच्छब्दस्य तस्य वरुणस्य परि स्पशो परितो निषेदिरे इति वा, तदित्समानमाशात इति वा पूर्वेण तच्छब्देन, स यामिनीत्युत्तरेण वा तच्छब्देन सम्बन्धो द्रष्टव्यः ॥१४॥

(ऋ.म-२८३)

उत यो मानुषेष्वा यशश्चक्रे असाम्या।
अस्माकमुदरेष्वा ॥ १५ ॥ १८ ॥

(ऋगर्थोद्धारः) - उत यो मानुषेष्विति ॥ यो वरुणः, असामि, सामिशब्दः समशब्दपर्यायः। न विद्यते सामि समं यस्य तदसामि। यद्वा, सममस्यास्तीति समि, सम्येव सामि, न सामि असामि, असममात्मनो यशोऽस्माकमुदरेषु सामीप्याद्धृदयेषु आ समन्तात् सर्वस्मिन् काले चक्रे अस्मान् सदा स्वयशोविदश्चक्र इत्यर्थः। न केवलमस्मासु, किन्तु अस्मदन्येषु असमीचीनेषु मानुषेषु आसमन्ताद् यशश्चक्रे, तानपि स्वयशोविदश्चक्र इत्यर्थः। उतशब्दः कैमुत्यार्थः। यदा [1]अज्ञानिनोऽपि मानुषानस्मदादीन् स्वयशोविदश्चक्रे तदा

१. 'अज्ञानपि' घ.।

देवान् ज्ञानिनः स्वयशोविदश्चक्र इति किमु वक्तव्यमित्यर्थः। अत्रत्यस्यापि यच्छब्दस्योक्तरीत्या पूर्वेण परेण वा तच्छब्देन सम्बन्धो द्रष्टव्यः ॥ १५ ॥ १८ ॥

(ऋ. म- २८४)

परा मे यन्ति धीतयो गावो न गव्यूतीरनु।
इच्छन्तीरुरुचक्षसम् ॥ १६ ॥

(ऋगर्थोद्धारः)- परा मे यन्तीति ॥ मे मम धीतयः = बुद्धिविशेषाः, इच्छन्तीः = इच्छन्त्यः, निःश्रेयसमिति शेषः। परा = पराकृत्य, सर्वं विषयजातं परित्यज्य, उरुचक्षसं महाज्ञानं, परेशानं त्वामेव यन्ति = यान्ति, विषयीकुर्वन्ति। यद्वा, इच्छन्तीरित्यत्र निःश्रेयसमिति शेषो न कार्यः। किन्तु यो वरुणः परानन्दतनुः विष्णुः पूर्वोक्तगुणकः, तमेवेति शेषः। तथा च एतादृशं वरुणं परानन्दतनुं विष्णुमेवेच्छन्तीरिच्छन्त्यो मम धीतयः परा सर्वं परित्यज्योरुचक्षसं परेशानमेव यन्ति यान्ति विषयीकुर्वन्ति। एकान्तभक्ताभिप्रायेणैतत्। सर्वं परित्यज्य यान्तीत्यत्र दृष्टान्तः गव्यूतीः। गवामूतयः = आह्वाने साधनानि गव्यूतयः, ताः गव्यूतीः शृङ्गस्वरान् अनु प्रति गावो यद्वद् यथा गावः शृङ्गस्वरान् श्रुत्वा सर्वं परित्यज्य यान्ति तथैवेत्यर्थः ॥ १६ ॥

(ऋ.म - २८५)

सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्।
होतेव क्षदसे प्रियम् ॥ १७ ॥

(ऋगर्थोद्धारः) - सं नु वोचावहै पुनरिति ॥ यतस्त्वं होतेव अग्निवद् अग्निर्यथौदनादिकं पचति तथा मे मदीयम् आभृतम् आपूर्णं, मोक्षस्थमिति यावत्। मधु सुखं क्षदसे पचसि, व्यक्तीकरोषीति यावत्। यतो यस्माच्च त्वं

मम सदा प्रियं प्रियस्तस्मात् नु इदानीं पुनर्भूयोभूयः आवां सुवचावहै सम्भाषणं करवावहै ॥ १७ ॥

(ऋ.म - २८६)

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि ।

एता जुषत मे गिरः ॥ १८ ॥

(ऋगर्थोद्धारः) - दर्शं नु विश्वदर्शतमिति ॥ अहं, नु = इदानीं, विश्वदर्शतं, विश्वं = सर्वविषयकं दर्शो = दर्शनं, तेन, तः = ततः, सर्वज्ञमित्यर्थः । तं वरुणं, दर्शम् = अदर्शम् = अद्राक्षम् । अधिक्षमि = क्षमां भूमिमधिकृत्य विद्यमानमधिक्षमम् । अकारापेक्षया तृतीय इकारोऽतिशये । भुवि स्थितं तदीयं रथं चादर्शम् । स एवं दृष्टो वरुणः, एताः = वेदरूपा मे मदीया गिरः स्तुतिरूपाः, जुषत = जुषतु । आकर्णयतु । यद्यपि अधिक्षमीति द्वैपद्येन शाकल्याः पठन्ति । तदुल्लङ्घ्यैकपद्यमङ्गीकृत्याव्ययीभावाभिप्रायेण सर्वज्ञाचार्यैर्भाष्ये भुवि स्थितमिति व्याख्यातमिति मन्तव्यम् ॥ १८ ॥

(ऋ.म - २८७)

इमं मे वरुण श्रुधी हवमद्या च मृळय ।

त्वामवस्युरा चके ॥ १९ ॥

(ऋगर्थोद्धारः) - इमं मे वरुण इति ॥ हे वरुण इमं हवमिदमाह्वानं श्रुधि शृणु । अद्य च = अद्यैव, मां, मृळय = सुखय, रक्षस्व । यतोऽवस्युः = अवनेप्सुः, अहं, त्वा त्वाम् आचके 'चक तृप्तौ' इति धातोः । चकधातुर्यद्यपि तृप्त्यर्थः । तथाऽपीह तस्यासङ्गतत्वाद् दर्शनार्थो ग्राह्यः । धातूनामनेकार्थत्वात् । तथा चाऽचके पश्येयं दृष्टवानस्मि । अतो मृळयेति (मृलयेति) सम्बन्धः ॥ १९ ॥

(ऋ.म - २८८)

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि ।

सयामनि प्रति श्रुधि ॥ २० ॥

(ऋगर्थोद्धारः) - त्वं विश्वस्येति ॥ हे मेधिरः ! मेधा अस्यास्तीति मेधिरः, मत्वर्थे इरः । मेधावान्, तस्य सम्बुद्धित्वे मेधिरः हे मेधावान् यस्त्वं विश्वस्य कृत्स्नस्य जगतस्तस्यैव प्रपञ्चः दिवश्च स्वर्गस्य च ग्मश्च, यद्यपि भूमिवाचिनो ग्माशब्दस्य षष्ठी ग्माया इति भवति । तथाऽपि छान्दसमाकारलोपमङ्गीकृत्य, ग्म ग्मौ ग्मः इति हलन्तस्य ग्मशब्दस्येयं षष्ठीति ज्ञातव्यम् । तथा च ग्मश्च पृथिव्याश्च राजसि राजा भवसि । सः त्वं यामिनि कालेऽस्माकमापत्काल एव प्रतिश्रुधि विज्ञापनमाकर्णय । यद्वा, मोचयामि त्वामिति प्रतिजानीहि । तथा सति अहं स्वस्थो भविष्यामीत्याशयः ॥२०॥

(ऋ.म - २८९)

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत ।

अवाधमानि जीवसे ॥ २१ ॥ १९ ॥ २५ ॥

(ऋगर्थोद्धारः) - उदुत्तमं मुमुग्धीति ॥ हे वरुण ! एवं विज्ञापितस्त्वं नोऽस्माकमुत्तमं पाशं सत्त्वगुणाख्यं तज्जन्यं शुद्धं काम्यं पुण्यं, यदनभीष्टं तदिति यावत् । उत् = अञ्जसा, मुमुग्धि = सुहृद्भ्यो दत्त्वाऽस्मत्तो वियोजय। मध्यमं रजोगुणात्मकं पाशं, तज्जन्यं पापमिश्रितपुण्यमिति यावत् । विचृत 'चृती हिंसायाम्' उदासीनेभ्यो दत्त्वा वि= अञ्जसा, चृत= छिन्धि । अधमानि बन्धनानि तमोगुणवृत्तिरूपाणि तज्जन्यान्यप्रारब्धपापानीति यावत् । जीवसे तुमर्थे, जीवितुं मुक्त्यर्थमिति यावत् । मुक्तावेव हि मुख्यं जीवनम् । अवचृत= द्विषद्भ्यो दत्त्वा छिन्धीति । अप्रारब्धमपि पुण्यं ज्ञानेन दाहय । अनन्तरं

भोगेन प्रारब्धं क्षपयित्वा मुक्तो भविष्यामीत्याशयः। अत्र काम्यादिपुण्यविषये विवेकः उदुत्तमं वरुणपाशमित्येतदृगर्थानुवादसमये कृतो बोद्धव्यः।

अस्या ऋचो भगवत्परत्वपक्ष एवेदं व्याख्यानम्। प्रसिद्धवरुणपरत्वपक्षे तु, हे वरुण ! एवं विज्ञापितस्त्वं नोऽस्माकमुत्तमं पाशं यूपाग्रभागगं मद्बन्धकं पाशम् उत् अञ्जसा मुमुग्धि। मध्यमं पाशं यूपमध्यभागगं मद्बन्धकं पाशं विचृत अञ्जसा छिन्धि। अधमानि यूपमूलभागगान् मद्बन्धकान् पाशान् जीवसे अवचृत छिन्धीति व्याख्येयम्॥ २१ ॥ १९ ॥ ६ ॥२५॥

(सूक्तम् - २६)

आजीगर्तिः शुनःशेपः सकृत्रिमो वैश्वामित्रो देवरात ऋषिः।

अग्निर्देवता। गायत्री छन्दः।

(ऋ.म - २९०)

वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते।

सेमं नो अध्वरं यज ॥ १ ॥

(ऋगर्थोद्धारः) -वसिष्वेति दशर्चं सूक्तम्। अश्वं नेति। त्रयोदशर्चं सूक्तम्। ' तं वरुणमुवाचाग्निर्वै देवानां मुखं सुहृदयतमस्त्वं नु स्तुहि। अथवोत्स्रक्ष्याम इति सोऽग्निं तुष्टाव तमुत्तराभिर्द्वाविंशत्या' इति ब्राह्मणोक्तेर्द्वाविंशदृचोऽग्निदेवताः। 'तमग्निरुवाच। विश्वान्नु देवान्नु स्तुहि। अथ वोत्स्रक्ष्याम इति स विश्वान् देवान् तुष्टाव नमो महद्भ्यो नमो अर्भकेभ्य इत्येतयर्चा' इति ब्राह्मणवचनाद् अन्त्या दैवीति विवेकः।

वसिष्वा हीति॥ सेमं न इत्यत्र सः, इममिति पदच्छेदः। हे मियेध्य! यकारो यत्राधिकः स च नित्येत्यर्थद्योतकः। तथा च नित्यमेध्य सदा पवित्र, यद्वा, मेधे भव यज्ञे पूज्यतया स्थित ! ऊर्जां पते ! 'ऊर्ज बलप्राणनयोः'

ऊर्क्शब्दस्य षष्ठीबहुवचनमेतत्। ऊर्जां करणे क्विप्। बलादिकरणानां भोग्यानां, 'ऊर्जं देवान्नमुद्दिष्टम्' इति वचनाद् देवान्नानामिति यावत्। पते स्वामिन् ! यद्वा, कर्तरि क्विप्। ऊर्जामूर्जितानां बलादिमतां जनानां पते हरे देव ! अग्न्यन्तर्गतेन रूपेण सर्वदेवानां पूजायै प्रोद्यतो भवन्निति शेषः। वस्त्राणि वसिष्व। नग्नस्याऽगमनासम्भवेन वस्त्राच्छादनस्य प्रार्थनया विनाऽपि स्वत एव सिद्धत्वाद् उत्तमवस्त्रा ण्याच्छादयेत्यर्थः। इदमुपलक्षणम्। भूषणैरप्यात्मानमलङ्कुरु। स एवमत्यन्तमुत्सवं कुर्वन् त्वं नोऽस्मदीयमिमम् अध्वरम्= अध्वनि शुभे स्वर्गादिमार्गे पुरुषं रमयतीति वा, 'कर्मणा ज्ञानमातनोति' इति श्रुतेः शुभे वैकुण्ठादिमार्गभूते ज्ञाने पुरुषं रमयतीति वा अध्वरशब्दवाच्यम् अस्मदीयं मखमिति शेषः। क्रियारूपस्य मखस्य दानासम्भवात् तदङ्गभूतानां हविरादिद्रव्याणामुपलक्षणमेतत्। स्वस्मिन्नेव यज देहि अग्न्यन्तर्गतेन रूपेण हविरादिकं गृहीत्वा सर्वान्तर्गताय स्वकीयरूपायैव देहीत्याशयः। नोऽध्वरमिति- प्रकृतिभावश्छान्दसः॥ १ ॥

(ऋ.म - २९१)

नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः।

अग्ने दिवित्मता वचः ॥ २ ॥

(ऋगर्थोद्धारः) - नि नो होतेति॥ 'उषा स्वाहा च पर्जन्यो मित्रोऽग्निर्वरुणो विधुः। प्रवहोऽनिरुद्ध इन्द्रोमे रुद्रो वाणी च मारुतः॥' इत्युक्तेषु अग्न्यादिमारुतान्तेषु दशदेवेष्वग्नेरवमत्वात् तस्य युक्तं यविष्ठत्वम्। भगवतस्तु यवीयसि तिष्ठतीति अग्निगतयविष्ठतायास्तदधीनत्वाद्वा यविष्ठत्वं मन्तव्यम्। तथा च यविष्ठ अवम अग्ने होता वरेण्यस्त्वं मन्मभिः 'मन ज्ञाने' करणे मनिन्। तत्साधनैर्बुद्धिवृत्तिभिः सह नोऽस्मदीयं वचः दिवित्मता दिवीति तत्रत्याशेषदेवोपलक्षणम्। तस्मिन् सप्तम्यन्ते उपपदे 'तनु विस्तारे' इति

धातोर्मतुप्प्रत्यये सति निष्पन्नोऽयं शब्दो व्याप्त्यर्थकः। स च भावप्रधानः। दिवित्मत्वेनेति। तथा च दिविस्थदेवताव्याप्ततया तद्व्यापनं यथा स्यात् तथा, सर्वदेवविषयकत्वेनेति यावत्। सदा नि अत्यन्तं नय प्रवर्तयेति योग्य-क्रियाध्याहारः। उपसर्गमात्रश्रवणाद् अस्मदीया बुद्धिवृत्तयो वचश्च, उपलक्षणमेतत्। समस्तेन्द्रियाणि यथाऽशेषदेवताविषयकाणि स्युः, तथा तद्विषये प्रवर्तयेत्याशयः ॥ २ ॥

(ऋ.म-२९२)

आ हि ष्मा॑ सू॒नवे॑ पि॒ताऽऽऽ पिर्यज॑त्या॒पये॑।

सखा॑ सख्ये॒ वरे॑ण्यः ॥ ३ ॥

(ऋगर्थोद्धारः) - आ हि ष्मेति ॥ वरेण्यो मम पिता एषोऽग्निः सूनवे मह्यं मदर्थे मम फलार्थं, यद्वा मम सखा एषः सख्ये च मह्यमथवा आपिः 'आप्लृ व्याप्तौ' कर्मणीकारः। प्राप्यः, मम स्वामीति यावत्। एषः आपये कर्तरीकारः। प्राप्यभृत्यायेति यावत्। मह्यमायजति स्म हि, देवताः प्रतीति शेषः। अग्निस्तदन्तर्गतो हरिश्च देवतोद्देशेन मया दत्तं हविरादिकं मत्फलार्थमेव देवताभ्यो ददातीत्यर्थः। पिता सूनवे, सखा सख्ये, आपिः आपये इति विशेषणत्रयेण अग्नेः स्वस्य च पितापुत्रभावसखित्वस्वामिभृत्यभावरूपो नानाविधः सम्बन्धः उच्यत इति द्रष्टव्यम् ॥ ३ ॥

(ऋ.म - २९३)

आ नो॑ ब॒र्ही रि॒शाद॑सो॒ वरु॑णो मि॒त्रो अ॒र्य॒मा।

सीद॑न्तु॒ मनु॑षो यथा ॥ ४ ॥

(ऋगर्थोद्धारः) -आ नो बर्हिरिति ॥ हे अग्ने ! वरुणो मित्रो अर्यमा इत्येवमादयो रिशादसोऽनूनसुखभोक्तारो देवाः नो बर्हिः देवस्थानं बर्हिस्तृणीत च इति भाष्योक्तेः, घृतस्थानात् पश्चिमतो विद्यमानं यद्देवोपवेशनयोग्यं स्थानं तद्बर्हिरित्युच्यते। तत्प्रति त्वत्प्रेरिताः सन्त आगत्य सीदन्तु उपविशन्तु मनुषो मनुष्या यथा प्रत्यक्षभूताः सन्तः उपविशन्ति तथा प्रत्यक्षभूताः सन्त उपविशन्त्वित्यर्थः ॥ ४ ॥

(ऋ.म-२९४)

पू॒र्व्यं होत॒रस्य॑ नो॒ मन्द॑स्व स॒ख्यस्य॑ च।

इ॒मा उ॒ षु श्रु॑धि॒ गिरः॑ ॥ ५ ॥ २० ॥

(ऋगर्थोद्धारः) - पूर्व्य होतरिति ॥ उष्वित्यत्र उ इति सु इति पदच्छेदः। हे पूर्व्य पूर्वकाले भव होतः अग्ने ! अस्य एवं स्तुवतः सख्यस्य भावभवित्रोरभेदात् सख्युश्च नः मे अर्थे मन्दस्व मदं कुरु कर्मन्यूनतां क्षमित्वा सन्तोषं प्राप्नुहि। अथवा, मन्दस्वेति णिजन्तम्। अस्य नः सख्यस्येति षष्ठ्यो द्वितीयार्थाः। तथा च हे पूर्व्य होतः अस्य एनं सख्यस्य सखाऽयं नः मां मन्दस्व मादयस्व सुखिनं कुर्वित्यर्थः। यद्वा मन्दस्वेत्येतत् णिजन्त-मेव। अस्य नः सख्यस्येति षष्ठ्यो यथास्थिता एव न द्वितीयार्थाः। अत्र देवानित्यध्याहारः। तथा च हे पूर्व्य होतरस्य सख्यस्य नोऽर्थे देवान् हविरादिना मन्दस्व मादयस्वेत्यर्थः। इमा मदीया गिरश्च सुश्रुधि उ सम्यक् शृण्वेवेति ॥ ५ ॥ २० ॥

(ऋ.म-२९५)

यच्चि॒द्धि शश्व॑ता॒ तना॑ दे॒वं दे॑वं॒ यजा॑महे।

त्वे इद्धू॑यते ह॒विः ॥ ६ ॥

(ऋगर्थोद्धारः) - यच्चिद्धि शश्वतेति ॥ शश्वता शश्वत् सर्वकालेषु तना विस्तरतः सर्वदेशेषु चिदपि यत् यदा देवं देवं सर्वान् देवान् यजामहे। सर्वे

वयं यजमानास्तदा त्वे इत् त्वय्येव हविर्हूयते हि। 'अग्निर्वै देवानां मुखम्' इति प्रसिद्धत्वादित्यर्थः ॥ ६ ॥

(ऋ.म-२९६)

प्रियो नों अस्तु विश्पतिर्होता मन्द्रो वरेण्यः।
प्रियाः स्वग्नयों वयम् ॥ ७ ॥

(ऋगर्थोद्धारः) - प्रियो नोऽस्त्विति ॥ विश्पतिः विशां प्रजानां पतिः मन्द्रः सुखार्थकात् मन्दधातोः कर्तरि रः। तथा च मन्दं सुखं करोतीति मन्द्रो वरेण्यः। 'वृञ् वरणे' इति धातोः कर्मणि एण्यप्रत्यये वरणीयो भजनीयो होता अग्निर्नः प्रियोऽस्तु। स्वग्नयः शोभनोऽग्निः पूज्यो येषां ते तथोक्ता आहिताग्नय इव वयमपि तस्याग्नेः प्रिया आसाम। तथा चाऽवयोः परस्परं प्रीतिरस्त्विति भावः ॥ ७ ॥

(ऋ.म-२९७)

स्वग्नयो हि वार्यं देवासों दधिरे चं नः।
स्वग्नयों मनामहे ॥ ८ ॥

(ऋगर्थोद्धारः) - स्वग्नयो हीति ॥ स्वग्नयो गृहस्थाश्रमवन्त इति यावत्। देवासो देवा नोऽस्मभ्यं वार्यं वरणीयं वित्तं दधिरे च दत्तवन्तः। चोरादिभयपरिहारेण दत्तं वित्तं पालयाम्बभूवुश्चेति चशब्दार्थः। स्वग्नयो वयं च तान् देवान् मनामहे मन्यामहे ध्यायेम। अस्मदीयं देवताभिपूजनं देवानां चास्मभ्यं वित्तदानादिकं सर्वमग्निनिमित्तकमेव। अन्यथा देवतापूजाऽकरणे वित्तालाभेन यज्ञाद्यसिद्ध्याऽग्निपूजा न सिद्ध्येदित्यग्नेरेव प्राधान्यमुपपाद्यास्या ऋचोऽग्निदेवताकत्वं मन्तव्यम् ॥ ८ ॥

(ऋ.म - २९८)

अथां न उभयेषाममृत मर्त्यानाम्।
मिथः सन्तु प्रशस्तयः ॥ ९ ॥

(ऋगर्थोद्धारः) - अथा न उभयेषामिति ॥ हे अमृताग्ने अथ अन्यच्च प्रार्थ्यते। उभयेषां उभयवर्गिणां स्त्रीणां पुंसां च नोऽस्माकं मर्त्यानां मिथः परस्परं प्रशस्तयः प्रशंसाः स्तुतयः सन्तु। स्त्रियोऽस्मत्प्रशंसां कुर्वन्तु। वयं च तत्प्रशंसां कुर्मः। आवयोः स्त्रीपुरुषयोस्त्वदनुग्रहेण परस्पर सम्प्रीतिरस्त्विति भावः ॥ ९ ॥

(ऋ.म - २९९)

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः।
चनों धाः सहसो यहो ॥ १० ॥ २१ ॥ २६ ॥

(ऋगर्थोद्धारः) - विश्वेभिरग्न इति ॥ हे अग्ने! त्वं,

'त एवैकोनपञ्चाशत् साकं पितृपितामहैः।
आग्नेय्य इष्टयो यत्र निरूप्यन्तेऽग्नयः स्तुताः'

इति भागवतेऽग्नीनाम् एकोनपञ्चाशत्त्वोक्तेः विश्वेभिः सर्वैरग्निभिः सह [1]इममस्मदीयं यज्ञम् इदं स्तुतिरूपं वचश्च स्वीकुर्विति शेषः। हे सहसो यहो 'प्राणं वाव महान् सह ओजो बलमित्याचक्षते' इति श्रुतेः सहसो वायोः, यहो = पुत्र ! यहुशब्दस्यापत्यनामसु[2] पाठात्। अग्ने च नः सुखं धाः अधाः धेहि। अस्मास्विति शेषः। भगवतस्तु वायुना व्याख्यानादिना व्यञ्जयत्वात् तत्पुत्रत्वं द्रष्टव्यम् ॥ १० ॥ २१ ॥ ७ ॥ २६ ॥

१. 'इमं मदीयं' घ.। २. 'पुत्रनामसु' घ.।

सूक्तम् - २७

आजीगर्तिः शुनःशेपः सकृत्रिमो वैश्वामित्रो देवरात

ऋषिः । १-१२ अग्निर्देवता । १३ देवाः देवताः ।

१-१२ गायत्री छन्दः । १३ त्रिष्टुप् छन्दः ॥

(ऋ.म - ३००)

अश्वं न त्वा वारवन्तं वन्दध्यां अग्निं नमोभिः ।
सम्राजन्तमध्वराणाम् ॥ १ ॥

(ऋगर्थोद्धारः) - अश्वं न त्वेति ॥ अध्वराणां सम्राजन्तं सम्यगीशानं वारि उदकानि अवति प्रविशतीति वारवान् तं वारवन्तम् । यद्वा, वारां समूहो वारं, तद्वान् वारवान्, अप्समुदायाश्रय इत्यर्थः । समुद्रमध्यग इति यावत् । तं वारवन्तं वडवामुखमग्निं, अग्निं प्रसिद्धं तदन्तर्गतं श्रीनृसिंहं च समुद्रे भागीरथ्याद्यनेकमहानदीसङ्गतिप्राप्ताधिकजलभस्मीकरणाय वडवाग्न्यन्तर्गततया वडवामुखश्रीनृसिंहावस्थानस्य

'भूतादिभूताम्बुनिधानमध्ये भूत्वा हरिः सर्वहरोऽतिधाम्ना ।
अगाधमम्भो विदधाति भस्म यो स वाडवाग्निर्नृहरिर्विचिन्त्यः ॥'

इति । 'आयत्पतन्त्येन्य' इत्यत्र कर्मनिर्णयोदाहृतविष्णुपुराणवाक्येन प्रमितत्वात् । त्वामश्वं न= अश्वं त्वामिव, श्रीहयवदनरूपं, लोकाः यथा नमस्कुर्वन्ति तथाऽहमपि नमोभिर्नमस्कारात्मकैर्वाक्यैर्वन्दध्यै वदिधातोरुत्तम-पुरुषार्थे अध्यैप्रत्ययः । वन्द इत्यर्थः । यद्वा, 'तुमर्थे सेसनसे' (पा.सू. ३-४-९) इत्यादिसूत्रेण तुमर्थ एवाध्यैप्रत्ययः । तथा च वारवन्तमग्निं त्वां वन्दध्यै वन्दितुं प्रारभ इति क्रियाध्याहारः । अत्र वारवतोऽग्नेः [1]श्रीनृसिंहत्वे अश्वं नेति स्वदृष्टान्तः। नह्यन्यपुरुषमिव, त्वां स्तोतुमुचितम्। किं नाम? त्वामिवैवेति। वडवानलाग्नेः प्रसिद्धत्वे अश्वं नेत्यधिकदृष्टान्त इति ज्ञातव्यम् ॥ १ ॥

१. 'श्रीनरसिंहत्वे' घ. ।

(ऋ.म-३०१)

स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।
मीढ्वाँ अस्माकं बभूयात् ॥ २ ॥

(ऋगर्थोद्धारः) - स घा नः सूनुरिति ॥ शवसा, तृतीया षष्ठ्यर्थे । शवसो बलरूपस्य वायोः सूनुरुक्तरीत्या व्यङ्ग्यत्वपुत्रत्वाभ्याम् । पृथुप्रगामा, पृथु विस्तृतं बह्वर्थविषयकत्वात्, प्र प्रकृष्टम् इतरविलक्षणत्वात्, गाम 'गम्लृ गतौ' इति धातोः भावेऽनिण् । णित्त्वादादिवृद्धिः । ज्ञानं यस्यासौ तथोक्तः। पृथुज्ञानवाचकः प्रगामन्शब्दोऽयम् । सोऽग्निर्भगवान् प्रसिद्धश्च नोऽस्माकं सुशेवः शोभनं शेवं सुखं यस्माद् भवति सतयोक्तः, सुखकृदिति यावत् । बभूयात् यवेत् । किञ्च, सघ सावास्माकं मीढ्वान् अभिलषितस्य सेचको दातेति यावत् । स्वामी च बभूयात् । पूर्वोत्तरार्धयोर्नोऽस्माकमिति पदद्वयसद्भावात् तदनुसारेण वाक्यभेदेन योजना कृता । तत्र च सुशेव इत्यस्य बभूयादिति क्रियाविधेयतया सम्बन्धः कृतः । अथवा न इत्येतत् सूनुशब्देन सम्बद्ध्यते शवसेत्येतत् यथास्थितं तृतीयान्तमेव । सुशेव इत्येतत् सुसुखात्मक इत्यर्थकम् । सत्सूनुत्वादिवद् अग्नेर्विशेषणत्वेन सम्बद्ध्यते। तथा च शवसा वायुना सार्धं नोऽस्माकं सूनुः पृथुप्रगामा पृथुज्ञानः सुशेवः सुसुखात्मकः सोऽग्निर्भगवान् प्रसिद्धश्चास्माकं मीढ्वान् अभिलषितसेचको बभूयात् घ भवेदेव, न काचिदप्यन्यथेत्यर्थः । अत्र भगवद्वाय्वग्नीनां नः सूनुरित्युक्तम् । शुनःशेपाख्यर्षिसूनुत्वं च ज्ञानादिना तद्व्यङ्ग्यत्वेनैवेति ज्ञातव्यम् ॥ २ ॥

(ऋ.म-३०२)

स नो दूराच्चासाच्च नि मर्त्यादघायोः ।
पाहि सदमिद्विश्वायुः ॥ ३ ॥

(ऋगर्थोद्धारः) - स नो दूराच्चासाच्चेति ॥ विश्वायुः विश्वं पूर्णमायुर्यस्येति तथोक्तः । नित्य इति यावत् । सोऽग्निस्त्वं नोऽस्मान् सदं सीदन्त्यस्मिन् इति सदस्तम् । सदःशब्दपर्यायोऽयं सदशब्दः । अध्याहृतकर्मप्रवचनीय-प्रतिशब्दयोगे द्वितीया । स च प्रतिशब्दो वीप्सायाम् । इच्छब्दो वा प्रति-शब्दार्थः । तथा च प्रतिप्रति सदं सर्वेष्वपि स्थानेष्विति यावत् । दूराच्च दूरस्थाच्च आसाच्च समीपस्थाच्च । अन्तिकनामसु पाठात् । अघायोः अघकरं पापकरमेव यस्याऽयुरायुष्यं सोऽघायुः । 'आयुर्वै घृतम्' इतिवत् तादर्थ्ये ताच्छब्द्यम् । आयुःशब्दसमानार्थोऽयमुकारान्त आयुशब्दः इति ज्ञात-व्यम् । यद्वा, अय पय गताविति धातोः भावे उण्प्रत्यये सति आयुरिति गमनमुच्यते । गमनं प्रवृत्तिः । अत्रापि तादर्थ्ये ताच्छब्द्यम् । अघकरप्रवृत्तिमतो मर्त्यात् नि निश्चितं पाहि । पूर्वप्रार्थनासमुच्चयार्थश्चशब्द इति द्रष्टव्यम् ॥ ३ ॥

(ऋ.म-३०३)

इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् ।
अग्ने देवेषु प्रवोचः ॥ ४ ॥

(ऋगर्थोद्धारः) - इममू षु त्वमिति ॥ उ इति सु त्वमिति पदच्छेदः । हे अग्ने ! त्वमस्माकमिमं स्तवमिति शेषः । इमं स्तवं सनिं दानरूपम् । 'षण् दाने' देहीत्युपलक्षितं देहीति पदघटितमिति यावत् । गायत्रं गायत्रीछन्दोरूपं तच्छन्दोबद्धं वसिष्वाहीत्यादिरूपं नव्यांसं नवतरम् अत्यन्तापूर्वं स्तुतिषु श्रेष्ठं देवेषु सुप्रवोचः । उ, उशब्दश्चशब्दार्थे । स च पूर्वप्रार्थनासमुच्चयार्थः । सु सादरं प्रवोचश्च व्यत्ययेन वदस्व ब्रूहीत्यर्थः । देवान् प्रापयेति यावत् । हे देवाः शुनःशेपो वः स्तौतीति देवान् प्रति विज्ञापयेत्याशयः ॥ ४ ॥

(ऋ.म-३०४)

आ नो भज परमेष्वा वाजेषु मध्यमेषु ।
शिक्षा वस्वो अन्तमस्य ॥ ५ ॥ २२ ॥

(ऋगर्थोद्धारः) -आ नो भजेति ॥ हे अग्ने! त्वं परमेषु वाजेषु अन्नेषु नोऽस्मान् आभज । तथा मध्यमेषु वाजेषु नः आभज । अत्र परम-मध्यमग्रहणमधमानामप्युपलक्षकम् । तथा वाजग्रहणं सर्वभोगानाम् । ततश्चोत्तमाधममध्यमेषु भोगेष्वस्माभिर्भुज्यमानेषु सत्सु त्वमस्मान् आभज रक्षकत्वेनाऽप्नुहि । त्वद्रक्षिता वयं सर्वभोगभोक्तारो भूयास्मेत्युक्तं भवति। एवं सत्यग्नेः प्राधान्यप्राप्त्यैतदृचोऽग्निदेवताकत्वसिद्धिरिति द्रष्टव्यम् । तथा अन्तमस्य, अन्ते = संसारस्यान्ते मोक्षे । तादर्थ्ये सप्तमी । मोक्षार्थं, तत्साधनतयेति यावत् । मितत्वेन प्रमितत्वेनान्तमं ज्ञानं, तल्लक्षणस्य वस्वो वसुनः, चतुर्थ्यर्थे षष्ठी । ज्ञानवस्वर्थं ज्ञानलक्षणधनप्राप्त्यर्थं चास्मान् शिक्ष प्रेरयेति यावत् ॥ ५ ॥ २२ ॥

(ऋ.म - ३०५)

विभक्ताऽसि चित्रभानो सिन्धोरूर्मा उपाक आ ।
सद्यो दाशुषे क्षरसि ॥ ६ ॥

(ऋगर्थोद्धारः) - विभक्ताऽसीति ॥ चित्राः अद्भुताः उत्तमाः भानवो रश्मयो यस्यासौ तथोक्तस्तस्य सम्बुद्धिः हे चित्रभानो अग्ने भगवन् ! त्वं सिन्धोः क्षीरसमुद्रस्य ऊर्मौ, सप्तमी षष्ठ्यर्थे । जातावेकवचनम् । ऊर्मिणां उपाके अन्तिकनामैतत् । समीपे । श्वेतद्वीप इति यावत् । स्थितः सन्निति शेषः । आ विभक्ताऽसि तत्तद्योग्यतानुसारेण आ सम्यग् विभक्ता **'आदद्मास उपकक्षासः'** इत्युक्तप्रकारेण विभज्य मुक्तभोगदाताऽसि । दाशुषे यजमानाय

सद्योऽविलम्बेन क्षरसि 'क्षर विनाशसन्ततदानयोः' इति धातोः सततं ददासि। नित्यं ददासि अखिलमीप्सितमिति शेषः ॥ ६ ॥

(ऋ.म-३०६)

यमंग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः।
स यन्ता शश्वतीरिषः ॥ ७ ॥

(ऋगर्थोद्धारः) - यमग्ने पृत्स्विति ॥ हे अग्ने ! विष्णो ! त्वं यं मर्त्यं, पृत्सु= युत्सु, अध्यात्मं - ज्ञानाज्ञानकर्तृकेषु युद्धेषु, अवाः = रक्षसि ज्ञाना- ज्ञानयोर्युद्धे प्रसक्ते ज्ञानं दत्वाऽज्ञानं विनाश्य यं सज्जनं रक्षसीत्यर्थः । यमपि = यं च, वाजेषु = अन्नेषु, तत्सम्पादनविषय इति यावत् । जुनाः 'जुन गतौ' गमयसि प्रेरयसि । स एव मर्त्यः शाश्वतीर्नित्याः इषोऽन्नानि मुक्तिगतनित्यसत्सुखरूपान्नानि यन्ता, यमिरत्र गत्यर्थः । गन्ता प्राप्ता भवतीत्यर्थः । यद्वा, शश्वतीरिषः = मुक्तिगान्, नित्यान् भोगान्, यन्ता गतेत्यर्थः । प्रसिद्धाग्निविषये कथमिति चेदुच्यते । हे अग्ने यं मर्त्यं पृत्सु प्रसिद्धेषु युद्धेष्ववाः, यमपि, वाजेषु = प्रसिद्धेषु अन्नेषु, जुनाः, स मर्त्यः शश्वतीरिषः बहुकालीनत्वेनोपचरितनित्यताकम् ऐहिकसुखं बहुकालीनत्वेनोपचरितनित्यताकान् ऐहिकभोगान् वा यन्तेति व्याख्येयम् ॥ ७ ॥

(ऋ.म - ३०७)

नकिंरस्य सहन्त्य पर्येता कयंस्य चित्।
वाजों अस्ति श्रवाय्यः ॥ ८ ॥

(ऋगर्थोद्धारः) - नकिरस्य सहन्त्य इति ॥ हे सहन्त्य सह इति बलनाम । सहसा बलेन त्यः सन्ततो व्याप्तः । सहःशब्दस्य सकारलोपे

मुमागमे तनोतेर्ड्यप्रत्यये च सहन्त्य इति भवति । तस्य सम्बुद्धिर्हे सहन्त्य! भगवन् सहसो वायोः पुत्रत्वात् प्रसिद्धोऽग्निः सहन्त्यः सहःशब्दादपत्यार्थे त्यप् । हे सहन्त्याग्ने ! अस्य 'यं मर्त्यम्' इति प्रकृतस्य त्वदीयस्य, कयस्य चित्= कस्यचित्, श्रवाय्यः = श्रवणीयः श्रुतिसुखकृत् सुप्रसिद्धतमोऽपि वा बहुलोऽपीति यावत् । वाजो भोगो पर्येता पर्याप्तः परिपूर्णो नकिः नैवास्ति । अत्र नेत्येव वक्तव्ये यत् किरित्यधिकं शब्दरूपं प्रयुक्तं तत् प्रोक्ताधिक्यविवक्षया । यथोक्तं 'नकिर्माकिस्मसीत्यादि प्रोक्ताधिक्य- विवक्षया' इति । अतो नकिर्नैवेति व्याख्येयम् । यतो महाभोगान् पुनः पुनस्त्वद्भक्तस्य ददासि, अतो न कोऽपि भोगस्तेषां समाप्तो भवति । अतस्तेषां न कोऽपि भोगोऽन्तिम इति भावः । अथवाऽस्य त्वदीयस्य भक्तस्य श्रवाय्यो बहुलोऽपि वाजः सांसारिको भोगः पर्येता परिपूर्णः । अनेनैवा- लमित्येवमलम्बुद्ध्यापादको नैव, तुच्छ एवेत्यर्थः । अत्युच्चमोक्षभोगदानेन सांसारिकभोगस्य तदपेक्षया तुच्छत्वादिति भावः ॥ ८ ॥

(ऋ.म-३०८)

स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता।
विप्रेभिरस्तु सनिता ॥ ९ ॥

(ऋगर्थोद्धारः) - स वाजमिति ॥ हे अग्ने ! सः = प्रकृतस्त्वद्भक्तः = विश्वचर्षणिः, विश्वाः समस्ताः चर्षणयः प्रजा यस्यासौ विश्वचर्षणिः सर्वप्रजाधिपो भूत्वा दानेन गवां बलीवर्दानां समाप्तत्वाद् अर्वद्भिरश्वैर्वाजमन्नं धान्यादि तरुता तारयिता । तरतिरत्राऽनयत्यर्थः । आनेताऽस्तु भवेत् त्वद्भक्तश्चक्रवर्ती भवतु । अर्थिभ्यो गाश्च ददातु । यथा दानेन गोसमाप्तौ गोधान्यादिकमश्वैरेव कुर्यात् तथैवेत्यभिप्रायः । किञ्च विप्रेभिर्विप्रैः करणैः सनिता दाताऽस्तु । तावद् विपुलदाता भवतु, यदेकस्य दातुमशक्यत्वेन

दाने विश्वान् करणीकुर्यादित्याशयः। यद्वा, स त्वदीयो विश्वचर्षणिर्भूत्वा अर्वद्भिरश्वैर्वाजं वाजस्य युद्धस्य तरुता पारगोऽस्तु तथा विप्रेभिर्विप्रेभ्यो वाजं सनिता अन्नस्य भोगस्य वा दाता भवेदिति। अथवा स त्वदीयो विश्वचर्षणिर्बहुशिष्यप्रजोपेतो भूत्वा अर्वद्भिः 'इन्द्रियाणि हयानाहुः' इति श्रुतेस्तद्विषयैरिन्द्रियैस्तज्जन्यैः समीचीनज्ञानैरिति यावत्। वाजं तमोगुणकार्याज्ञानेन सह यद्युद्धं तस्य तरुता पारगोऽस्तु। तथा विप्रेभिर्विप्रेभ्यः सनिता ज्ञानदाताऽस्त्वित्यर्थः ॥ ९ ॥

(ऋ.म - ३०९)

जराबोध तद्विविड्ढि विशे विशे यज्ञियाय।
स्तोमं रुद्राय दृशीकम्　　　　॥ १० ॥ २३ ॥

(ऋगर्थोद्धारः) - जराबोधेति॥ जरतिः स्तुत्यर्थः। जरां स्तुतिं बुध्यत इति जराबोधः। हे जराबोध [1]स्तुतिवेत्तर्विष्णो तत् तस्मात् स्तुतिबोद्धृत्वादेव रुद्राय रुजां विद्रावकाय तुभ्यं दृशीकं प्रत्यक्षाम् उच्चैः क्रियमाणां स्तोमं स्तुतिं यज्ञियाय यज्ञे भवाय विशेविशे सर्वस्मै जनाय, तत्प्रयोजनसिद्धय इति यावत्। विविड्ढि विशेषेण विद्धि अवधारय। त्वद्विषयामिमां स्तुतिं त्वमवधारयेत्यर्थः। अत्र सर्वज्ञस्यापि परमेश्वरस्य विशिष्टस्तुतिवेत्तृत्वकथनं तत्फलवेत्तृत्वाभिप्रायेण नित्यज्ञानस्यापि विविड्ढीति प्रार्थनं स्तुतिफल-दानाभिप्रायेणेति मन्तव्यम्। यथोक्तं भाष्ये 'नित्यज्ञानोऽपि दत्वा तत्फलं वेत्तेति कथ्यते' इति।

प्रसिद्धाग्नौ तु - हे जराबोधाग्ने! तत् तस्मात् जराबोद्धृत्वादेव रुद्राय यथायोग्यं रुजां द्रावकायाग्नये तुभ्यं दृशीकं स्तोमं यज्ञियाय विशेविशे

---

१. 'स्तुतिर्वर्त्तः' क.।

विविड्ढीति समानम्। भगवत्पक्षे, रुद्रपदं विष्णुपरम्। अग्निपक्षे तु अग्निपरमित्येव भेदः।

अथवा रुद्रपदं प्रसिद्धरुद्रपरम्। अत्रेतिहासो भवति। अग्निः स्तूयमानः शुनःशेपमुवाच 'रुद्रं स्तुहि। रौद्रा हि पशवः' इति। स तं प्रत्युवाच नाहं जानामि रुद्रं स्तोतुम्। त्वमेव तं स्तुहि' इति। रुद्रं स्तुहीत्यत्र निमित्तं कथ्यते रौद्रा हीति। पशूनां रुद्रदेवताकत्वात्। तवाप्यस्मिन् यज्ञे पशुत्वेन सङ्कल्प्य यूपे बद्धत्वेन रुद्रदेवताकत्वादित्यर्थः। स शुनःशेपस्तमग्निं प्रत्युवाच नाहमिति। रुद्रस्तुतिप्रकारवेत्ता त्वमेव तं रुद्रं मदर्थे स्तुहीत्यर्थः। तदिदमुच्यते - जराबोधेति। हे जराबोध रुद्रस्तुतिप्रकारं वेत्तरग्ने! तत् तस्माद् रुद्रस्तुतिप्रकारवेत्तृत्वादेव यज्ञियाय यज्ञभवाय तत्र पशुत्वेन सङ्कल्प्य यूपे बद्धायेति यावत्। विशेविशे, आदरार्थं द्विर्वचनम्। जनाय मह्यमिति यावत्। मम यूपबन्धाद् विमोचनरूपप्रयोजनसिद्ध्यर्थमिति यावत्। रुद्राय रुद्रस्य पशुभूतस्य मम देवतायाः दृशीकं स्तोमं त्वमेव विविड्ढि कुर्विति यावदित्यर्थः ॥ १० ॥ २३ ॥

(ऋ.म- ३१०)

स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः।
धिये वाजाय हिन्वतु　　　　॥ ११ ॥

(ऋगर्थोद्धारः) -स नो महानिति॥ महान् आपेक्षिकमहत्त्वपरिहारायोक्तं **अनिमान इति**॥ नि नितरां मानो मातो न भवतीत्यनिमानः। अतो महत्त्वं निरवधिकमेवेत्याशयः। धूमकेतुः 'धूञ् कम्पने' इति धातोस्ताच्छील्ये मप्रत्यये पक्षवातादिना वैरिकम्पकस्वभाववत्त्वाद् धूमो गरुडः। स केतुरस्येति धूमकेतुः, पुरुश्चन्द्रः, 'चदि आह्लादने' इति धातोः पूर्णसुखः। पारस्करादित्वात् सुडागमः। एतादृशः सोऽग्निर्भगवान् नोऽस्मान् धिये ज्ञानाय, वाजायान्नाय

च हिन्वतु प्रहिणोतु प्रेरयतु। [1]ज्ञानाय अन्नाय च साक्षात् प्रेरणासम्भवात् कर्मभिर्धीमन्तो वाजवन्तश्च स्याम। तादृशानां सुकर्मणां करणे प्रेरयत्वित्याशयः। प्रसिद्धाग्नेस्तु धूमः केतुरस्येति धूमकेतुत्वं प्रसिद्धम्। अत एव धूमध्वज इत्यग्निनामेति द्रष्टव्यम्। अन्यद् यथायोग्यं योज्यम्॥ ११॥

(ऋ.म-३११)

स रे॒वाँ इ॑व वि॒श्पति॒र्दैव्यः॑ के॒तुः शृ॑णोतु नः।
उ॒क्थैर॒ग्निर्बृ॒हद्भा॑नुः ॥ १२ ॥

(ऋगर्थोद्धारः) - स रेवानिवेति॥ विश्पतिरिव विशां प्रजानां पतिः राजा यथा तथा रेवान् वित्तवान् दैव्यो देवसम्बन्धी केतुः देवानां केतुभूतः यथा केतुः रथाग्रगामी एवमग्निर्देवानामग्रगामी। अग्निद्वारं विना देवानां यज्ञभोक्तृत्वाभावात्। अतोऽग्रगामित्वसाम्यात् केतुभूतो बृहद्भानुः - बृहन्तो भानवो रश्मयस्तेजांसीति यावत्। यस्यासौ तथोक्तः। एतादृशः सोऽग्निः नोऽस्मदीयानि उक्थैः द्वितीयार्थे तृतीया उक्थानि स्तोत्रविशेषानिति यावत्। शृणोतु॥ १२॥

(ऋ.म-३१२)

नमो॑ म॒हद्भ्यो॒ नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्यः॑।
यजा॑म दे॒वान् यदि॑ श॒क्नवा॑म॒ मा ज्याय॑सः॒ शंस॒मा वृ॑क्षि देवाः
॥ १३ ॥ २४ ॥ २७ ॥

(ऋगर्थोद्धारः) - नमो महद्भ्य इति॥ महद्भ्यः नारायणलक्ष्मीब्रह्मसरस्वतीरुद्रेभ्यो देवेभ्यो नमः। एतेषां महत्त्वं नाम अवान्तरपित्रादिसम्बन्धप्रसिद्धिशून्यत्वम्। लक्ष्मीनारायणयोरेतादृशमहत्त्वे न विवादः।

१. 'ज्ञानान्नाय' घ.।

चतुर्मुखसरस्वत्योस्तु लक्ष्मीनारायणेतरावान्तरमातापितृसम्बन्धप्रसिद्धिर्नास्त्येव। रुद्रस्य ब्रह्मजत्वेन तत्पितृकत्वेऽपि तद्व्यतिरिक्तावान्तर पित्रादिप्रसिद्धिः रुद्रत्वावस्थायां नास्तीति वैवक्षिकं द्रष्टव्यम्। अर्भकेभ्यः शिशुभ्यः स्कन्देन्द्रादिदेवेभ्यो नमः। एतेषामर्भकत्वं नामावान्तरपित्रादिसम्बन्धप्रसिद्धिमत्त्वम्। तथा च शिवकश्यपाद्यावान्तरपित्रादिसम्बन्धप्रसिद्धिमतां स्कन्देन्द्रादीनां युक्तमर्भकत्वमिति ज्ञातव्यम्। अथ[1] युवभ्यः स्कन्देन्द्रादिदेवेभ्य एव नमः। तेषां युवत्वं नाम यौवनावस्थोपेतत्वम्। तच्च भरतप्रद्युम्नगाध्यर्जुनादिरूपविशेषेषु द्रष्टव्यम्।

अथ आशिनेभ्यः। आशिनशब्दो वटुवाची। तथा च वटुभ्यस्तेभ्य एवेन्द्रादिदेवेभ्यो नमः। यथोक्तं पञ्चमस्कन्धे रहूगणेन **'नमो महद्भ्योऽस्तु नमःशिशुभ्यो नमो युवभ्यो नम आवटुभ्यः'**। इति। एतेषां स्कन्देन्द्रादीनां वटुत्वं च भरतादिरूपविशेषेषु प्रसिद्धमेव। तेषां क्षत्रियत्वेन तदानीमुपनयनसद्भावादित्यवधेयम्।

अथवा महद्भ्यो नारायणादिरुद्रान्तदेवेभ्यो नमः। एतेषां महत्त्वं नाम महागुणवत्त्वम्। तत्र नारायणस्य महत्त्वमनन्तगुणवत्त्वम्। लक्ष्म्याश्च ब्रह्मापेक्षया कोटिगुणाधिक्याद् ब्रह्मणश्च रुद्रापेक्षया द्विशतगुणाधिक्याद् रुद्रस्य चन्द्रापेक्षया दशगुणोत्तरायाः उमायाः सकाशाद् दशगुणोत्तरत्वेन वैवक्षिकं महत्त्वं द्रष्टव्यम्।

अर्भकेभ्यः स्कन्देन्द्रादिभ्यो नमः। महत्त्वावस्थापेक्षया ह्यत्यल्पावस्था ह्यर्भकावस्था। तथा च स्कन्देन्द्रादीनां नारायणादिभ्योऽत्वल्पगुणविवक्षयाऽर्भकत्वं मन्तव्यम्। युवभ्यः स्कन्देन्द्रादिभ्य एव नमः। महत्त्वार्भकत्वावस्थयोर्मध्यावस्था हि यौवनावस्था। तथा च स्कन्देन्द्रादीनां

१.' अथवा' घ.।

नारायणादिरुद्रान्तदेववन्महागुणत्वाभावादस्मदादिवदत्यल्पगुणत्वाभावान्मध्यमगुणत्वाभिप्रायेण युवत्वं मन्तव्यम् । आशिनेभ्यो वटुभ्यः स्कन्देन्द्रादिभ्य एव नमः । युवावस्थार्भकत्वावस्थयोर्मध्यावस्था हि आशिनत्वावस्था । तथा च नारायणाद्यपेक्षयाऽनन्तगुणवत्त्वाद्यभावेन इन्द्राद्यपेक्षयाऽल्पगुणत्वाभावेन मध्यगुणत्वाद् ब्रह्मादिरुद्रान्तानामपि यूनत्वं विवक्षित्वा ब्रह्मादीन् यूनोऽपेक्ष्याल्पगुणवत्त्वादल्पगुणेभ्योऽस्मदादिभ्योऽधिकगुणवत्त्वविवक्षयाऽऽशिनत्वं स्कन्देन्द्रादीनां मन्तव्यम् । तथा च महदर्भकादिदेवेभ्यो नमोऽस्माभिः कृतमिति शेषः ।

हे देवाः नमस्कृतैर्भवद्भिर्यूपान्मोचिता वयं यदि शक्नवाम भवतां यजने शक्तिमन्तो भवामस्तर्हि देवान् युष्मान् यजाम । यजनेन प्रत्युपकारं कुर्मः । यजने शक्त्यभावे तु, ज्यायसः , एकवचनं समुदायापेक्षम् । ज्यायसां श्रेष्ठानां देवानां भवतां शंसं शंसनं स्तुतिमात्रं मा आवृक्षि 'व्रश्चू छेदने' न लुपामः लुप्तं न करिष्यामः । एतावन्मात्रं वा कुर्मो न प्रत्युपकर्तुं शक्नुम इत्यर्थः । विष्णुमात्रविवक्षायां तु परिमाणभेदोपेतरूपविशेषापेक्षया महत्त्वार्भकत्वादिकमुपपादनीयम् ॥ २४ ॥ २७ ॥

सूक्तम् - २८,

आजीगर्तिः शुनःशेप ऋषिः । १-४ इन्द्रो देवता, ५-६ उलूखलः, ७-८ लके, ९ सोमः । १-६ अनुष्टुप् छन्दः । ७-९ गायत्री ।

(ऋ.म-३१३)

यत्र ग्रावा॑ पृ॒थुबु॑ध्न ऊ॒र्ध्वो भव॑ति॒ सोत॑वे ।
उ॒लूख॑लसुताना॒मवे॒द्विन्द्र जल्गुलः ॥ १ ॥

(ऋगर्थोद्धारः) - यत्र ग्रावेति ॥ नवर्चमिदं सूक्तम् । अत्राऽद्याश्चतस्रः ऐन्द्र्यः । विमुक्तपाशः शुनःशेप एताभिर्जुहावाश्चकार । हे जल्गुलः जरतिः

स्तुत्यर्थः । 'गुर स्वीकारे' इति धातोर्गुरतिः स्वीकारार्थः । उभयत्रापि रेफस्य लः । तथा च जरं स्तुतिं गुरति स्वीकरोतीति जल्गुलाः, तस्य सम्बुद्धिर्जल्गुल= हे स्वीकृतस्तुते इन्द्र ! यत्र यज्ञे पृथुबुध्न इत्याद्येकवचनं जात्यभिप्रायम् । पृथु विस्तीर्णं बुध्नम् अधोभागो येषां ते पृथुबुध्नाः विस्तीर्णाधस्तनभागाः, ऊर्ध्वः = ऊर्ध्वदेशे सम्बद्धाः, सोमाभिषवार्थम् ऋत्विग्भिरुद्धृता इति यावत् । ग्रावाः ग्रावाणः, सोतवे = सोमं स्तोतुं, कण्डितुं भवति = भवन्ति, सन्ति । तत्र यज्ञे उलूखलसुतानां - द्वितीयार्थे षष्ठी । उलूखले सुतान्, अस्मदीयान् सोमानिति शेषः । अवेद्विन्द्रेत्यत्र अव- इत् - उ-इति, इन्द्रेति पदच्छेदः । अवतिरवास्यर्थः । इत्, उ, इति निपातावधारणार्थौ । तथा च अवेदु = सर्वथैवावाप्नुहि ॥ १ ॥

(ऋ.म-३१४)

यत्र॒ द्वावि॑व ज॒घना॑धिषव॒ण्या॑ कृ॒ता ।
उ॒लूख॑लसुताना॒मवे॒द्विन्द्र जल्गुलः ॥ २ ॥

(ऋगर्थोद्धारः) - यत्र द्वाविवेति ॥ आदौ उलूखले ग्राव्णा सोमः किञ्चित् कण्ड्यते । तदपेक्षया यत्र ग्रावेत्याद्या ऋक् । पश्चाद् हस्ताभ्यां काष्ठमये द्वे फलके गृहीत्वा तन्मध्ये आदौ किञ्चिदुलूखले ग्राव्णा कण्डितं सोमं स्थापयित्वा [1]सङ्घर्षणे कृते सति रसः स्रवतीत्यस्ति क्रमः । तदपेक्षयेयम् ऋक् प्रवृत्ता । यत्र यज्ञे द्वौ जघनाविव, स्त्रियो जघनाविव स्थितेऽधिषवण्या अधिषूयते कण्ड्यते सोम एतयोरिति अधिषवण्यौ द्वे फलके कृताकृते । तत्र यज्ञे उलूखलसुतानामिति पूर्ववत् ।

यथा स्त्रियो गमनसमये जघने परस्परसम्बद्धे भवत एवं रसोद्गमनार्थं फलकाभ्यां सोमस्य [2]घर्षणसमये फलके अपि परस्परसम्बद्धे भवत इत्येवं

१. 'सन्धर्षणे' इति घ. । २. 'धर्षणसमये' इति घ. ।

परस्परसम्बद्धत्वेन फलकयोर्जघनसाम्यं द्रष्टव्यम्। अत्र यद्यपि जघनाविवेति सामान्येनोक्तम्। तथाऽप्युत्तरत्र नारीग्रहणादत्रापि स्त्रियो जघनाविवेति व्याख्येयम्। जघनैकदेशयोर्जघनशब्दस्य वृत्तेर्द्वावित्युपपद्यत इति द्रष्टव्यम्। ननु उलूखलसुतानामित्ययुक्तम्। आदौ उलूखले किञ्चित्कण्डितस्य सोमस्य पश्चात् सम्यग्रसागमनाय हस्तधृतफलकाभ्यामेव कण्ड्यमानत्वादस्यैव च प्रमेयस्यैतस्याम् ऋच्युच्यमानत्वात् फलकसुतानवेदिति वक्तव्यमिति चेत्। सत्यम्। फलकयोरेवात्राधिषवणी-शब्दवाच्यतया व्याख्याततत्वेन तत्र सुतानित्येवाभिप्रेतम्। अस्यामृच्युत्तरत्र सर्वत्र चोलूखलसुतानामित्युपचार एवेति द्रष्टव्यम् ॥ २ ॥

(ऋ.म-३१५)

यत्र नार्यपच्यवमुपच्यवं च शिक्षते।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ ३ ॥

(ऋगर्थोद्धारः) - यत्र नारीति ॥ यत्र यज्ञे स्थितयोः फलकयो-रपच्यवमधोगमनमुपच्यवमुपरिगमनं नारी, तज्जघनयुगलमिति यावत्। शिक्षते उपादत्ते हस्तस्थितयोः फलकयोर्दृढतरं सम्बध्यते तथैव स्थिते सति कण्डनासम्भवेन सोमोद्गमनासम्भवात् तयोः संयोगः शिथिलः क्रियते। तथा च प्रहारपर्यायेणैकं फलकमुपरि भवति। अपरं च किञ्चिदध इत्येवं फलकयोरपच्यवोपच्यवयोः सद्भावात् तौ दृष्ट्वा नारीजघनयुगलमपि एतत्सदृशापच्यवोपच्यवौ ममापि स्यातामिति मत्वा तावुपादत्ते स्वीकरोति, अनुकरोतीति यावत्। जघनयुगलस्यापि गमनसमयेऽपच्यवोपच्यव-सद्भावादिति ज्ञातव्यम्।

अध्यात्मम् - उरुः खलश्चेत्युलूखलो देहः। यत्र धान्यादिकं चूर्ण्यते तत्र खलशब्दः प्रसिद्धः। तस्य चोरुत्वं भूमेः सकाशाद् ऊर्ध्वत्वं प्रसिद्धम्।

देहस्यापि भूम्यपेक्षयोर्ध्वं सत्त्वादुलूखलसादृश्यं युक्तम्। ओष्ठौ फलके। फलकसादृश्यं च रसोद्गमप्रयोजकत्वरूपं मन्तव्यम्। ग्रावा वागिन्द्रियम्। वागिन्द्रियस्य मनसा वेदद्वारको योऽभिषवः मनःपूर्वकं वागिन्द्रियेण वेदोच्चारणमेव रसोद्गमहेतुत्वसादृश्यादभिषव इति ज्ञातव्यम्। सोमो मनः। रसाधिकरणसादृश्यात्। ज्ञानं च सोमरसस्थानीयमिति द्रष्टव्यम्। उलूखले ग्राव्णा सोमेऽभिषुते फलकयोः प्रहारपर्याये च सति रसः स्रवति। तद्वद् देहे मनःपूर्वकं ताल्वोष्ठपुटव्यापारपूर्वकं वागिन्द्रियेण वेदव्याख्यानेन मनोविकाररूपं ज्ञानं जायत इत्येवं सोमरसस्थानीयज्ञानोत्पत्तावेतेषामुपयोगो द्रष्टव्यः ॥ ३ ॥

(ऋ.म - ३१६)

यत्र मन्थां विबध्नते रश्मीन्यमितवा इव।
उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ ४ ॥

(ऋगर्थोद्धारः) - यत्र मन्थामिति ॥ सोमकण्डनकाले उलूखलचलनस्य प्रत्यवायापादकतया तस्यैतस्ततश्चलनपरिहारायाऽऽदावुलूखलं सम्यग् रश्मिभिर्बद्ध्वा ते च रश्मयः पुनः कस्मिंश्चित् स्तम्भादौ बद्ध्यत इति प्रसिद्धम्। तदेतदत्रोच्यते। यत्र यज्ञे रश्मीन्, उलूखलस्येति शेषः। चलनपरिहारेण दार्ढ्याय स्तम्भादिरूपद्रव्यान्तरेण विबध्नते ऋत्विजः। किमिव ? मन्थां मन्थानं [1]यमितवेव नियन्तुमिव यथा मन्थरश्मीन् स्तम्भादौ निबध्नन्ति मन्थाशब्दस्याश्वपर्यायतया वैदिकनिघण्टौ पाठात्। मन्थां मथ्नातीति व्युत्पत्त्या प्रतिपक्षमथनशीलत्वान्मन्थानमश्वं [2]यमितवेव नियन्तुमिव यथाऽश्वरश्मीन् स्तम्भादौ निबध्नन्ति तथेत्यर्थः। तत्र यज्ञे,

---

१. 'यमितवै' घ.। २. 'यमितवै' घ.।

उलूखलसुतानामिति पूर्ववत्। अध्यात्मं रश्मयो नाड्यः। नाडीभिर्देहाख्य उलूखले दृढं बद्ध इति द्रष्टव्यः ॥ ४ ॥

(ऋ.म - ३१७)

यच्चिद्धि त्वं गृहे गृह उलूखलक युज्यसे।
इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ ५ ॥ २५ ॥

(ऋगर्थोद्धारः) - **यच्चिद्धि त्वं गृहे गृह इति** ॥ इयमुत्तरा चोलूखल्यौ। हे उलूखलक, स्वार्थे कप्रत्ययः। यद् यस्माद् गृहे गृहे चिदपि यजमानानुष्ठितसमस्तयज्ञगृहेषु, अध्यात्मम् - गृहेगृहे देहेदेहे प्रतिदेहं युज्यसे युक्तो वर्तसे। पूज्यतया तिष्ठतीति यावत्। हि यस्मात् कारणाद् इह यज्ञे यजतां दुन्दुभिरिव यजतां पुंसाम् दुन्दुभिवद् द्युमत्तमं प्रकाशवत्तमम्, उच्चैरिति यावत्। वद ध्वनिं कुरु। अत्राचेतनस्योलूखलस्य प्रार्थनाया अयोगादुलूखलशब्देन उलूखलदेवता सोमामात्यः कश्चिद् देवः, पृथिवी वा पृथिवीगतो विष्णुर्वा ग्राह्यः। तथा च द्युमत्तमम् - प्रतिदेहं पूज्यतया वर्तस इत्याद्युपपन्नमिति ज्ञातव्यम् ॥ ५ ॥ २५ ॥

(ऋ.म - ३१८)

उत स्म ते वनस्पते वातो विवात्यग्रमित्।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥ ६ ॥

(ऋगर्थोद्धारः) - **उत स्म त इति** ॥ अत्र वनस्पतिशब्देनोलूखलदेवते पृथिवी - सोमामात्यौ ग्राह्यौ। हे वनस्पते ! उलूखल पृथिवीसोमामात्यौ वा, वात उत= वायुरपि, तेऽग्रमित् = त्वदग्र एव, उलूखलाभिमानिदेवतयोः पृथिवीसोमामात्ययोरेव वृक्षदेवतात्वात् त्वदभिमतवृक्षाग्र एव विवाति स्म विविधं वाति स्म। यत एवमिन्द्रः स्वकीयेन वातेन प्रवाहेण

त्वदभिमतवृक्षाग्रमेव चालयति, न तून्मूलयति। अथो तस्मादिन्द्रेणोपकृतत्वाद् इन्द्राय प्रसिद्धपुरन्दराय, षष्ठ्यर्थे चतुर्थी। इन्द्रस्य, पातवे = पानाय, सोमं सुनु = सोमकण्डनं कुर्वित्यर्थः।

अध्यात्मं तु, हे वनस्पते = वनानां = प्रसिद्धानां वृक्षसमुदायरूपाणां, भजनीयत्वेन प्रसिद्धानां दिवौकसां वा, पते विष्णो, वात उत = वातोऽपि मुख्यप्राणोऽपि, तेऽग्रमित् = त्वदग्र एव, विवाति स्म = गच्छति स्म, त्वत्सेवक इति यावत्। यत एवं मुख्यप्राणस्वामितया त्वमतिसमर्थः, अथो तस्माद्, इन्द्राय = इन्द्रस्य परमैश्वर्यसम्पन्नस्य स्वस्य, पातवे =पानाय, सोमं = मनः, सुनु त्वद्विषयकवेदार्थविचाररूपेण मनोरूपसोमस्य कण्डनेन जन्यं ज्ञानरसं पिब। त्वद्विषयो भव तेन तृप्तो वा भवेति तात्पर्यार्थः ॥ ६ ॥

(ऋ.म-३१९)

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः।
हरी इवान्धांसि बप्सता ॥ ७ ॥

(ऋगर्थोद्धारः) - **आयजी वाजसातमेति** ॥ इयमुत्तरा चेति द्वे ऋचौ फलकदेवताके। अत्र सोमो वा सोमान्तर्गतो विष्णुर्वा फलकदेवतेति ज्ञातव्यम्। आयजी, कर्मणीकारः,। आयाज्यौ सम्यग् याज्यौ वाजसातमा, वाजमन्नं सनुतः, 'षणु लाभे' लभत इति वाजसौ, अतिशयेन वाजसौ वाजसातमौ अन्नलब्धॄनामुत्तमौ, उच्चा उत्कृष्टौ, ता = तौ, विजर्भृतो हि, सोममिति शेषः। 'जह भक्षणे' विशेषेण भक्षयतो हि। फलकाभ्यां सोमकण्डनकाले फलकयोः रसलेपो भवति। तदपेक्षया भक्षयत इत्युक्तमिति द्रष्टव्यम्। काविव विजर्भृतः ? इत्यत उच्यते - **हरी इवेति** ॥ इन्द्रस्येति शेषः। यथेन्द्रस्याश्वौ, अन्धांसि चणकादिधानानि जीवाद्यान्नानि बप्सन्तौ। अत्तिकर्मायं धातुः। भक्षकौ तथेत्यर्थः ॥ ७ ॥

(ऋ.म-३२०)

तानो॑ अ॒द्य व॑नस्पती ऋ॒ष्वावृ॒ष्टेभिः॑ सो॒तृभिः॑ ।
इन्द्रा॑य॒ मधु॑मत्सुतम्   ॥ ८ ॥

(ऋगर्थोद्धारः) - तानो अद्येति ॥ हे ऋष्वौ = अतिमहत्तरौ, [१]वनस्पतीफलके, ता = तौ आयजीत्यादिनोक्तयाज्यत्वादिधर्मवन्तौ युवां, ऋष्वेभिः = महद्भिः सोतृभिः = सोमकण्डयितृभी ऋत्विग्भिः सहेन्द्राय नोऽस्मदीयं मधुमत् स्वादुरसयुक्तं, सोममिति शेषः । अद्य सुतं = सुनुतं, कण्डयतम् ॥ ८ ॥

(ऋ.म - ३२१)

उच्छि॒ष्टं च॒म्वो॑र्भर॒ सोमं॑ प॒वित्र॒ आसृ॑ज ।
निधे॑हि॒ गोरधि॑ त्व॒चि   ॥ ९ ॥ २६ ॥ २८ ॥

(ऋगर्थोद्धारः) - उच्छिष्टमिति ॥ प्रजापतेर्हरिश्चन्द्रस्यान्त्या चर्मप्रशंसेति केचित् । तदसत् । हरिश्चन्द्रज्ञापकश्रुतिलिङ्गादेरभावात् । सोमस्यैवोत्पवनादि-संस्कारकर्मतया प्राधान्यप्रतीतेश्च सोम एवात्र देवतेति गम्यते । अत एव बृहद्देवताकार आह - 'सोममन्त्या प्रशंसति' इति ।

एतं सोमम्, उत् = उत्पवनरूपसंस्काराय, पवित्रे = द्रोणनामकलशोपरि स्थिते पवित्रे, आसृज = विसृज । सोमकण्डनानन्तरम् ऋजीषादिकं विहाय पात्रान्तः शुद्धरस एव पूरणीयो भवति । तदर्थं पात्रान्तर्यथा शुद्धरस एव पतेत्, न ऋजीषं, तथा शोधनाय सूक्ष्मो वस्त्रविशेषः पात्रोपरि स्थाप्यते। स पवित्रशब्देनोच्यत इति सम्प्रदायविदः। तथा च उत्पवनरूपसंस्कारार्थं द्रोण-कलशोपरि स्थितं पवित्रेण संशोधितं सोमरसं द्रोणकलशे पूरयेत्याशयः ।

१. 'वनस्पतीफलकौ' घ. ।

शिष्टं सोमं सोमरसं चम्वोश्चमसयोर्भर पूरय, उत्पवनाय चमसपात्रद्वयेऽपि पवित्रमवस्थाप्य, तेन सोमरसं संशोधयित्वा, तदपि [१]पात्रद्वये पूरयेत्यर्थः । गोस्त्वचि = तत्सम्बन्धिचर्मणि, अधि = तदुपरि, निधेहि = स्थापय । सोमरसस्य चर्मणि निधानस्य यज्ञे प्रसिद्धत्वाद् ऋजीषमिति शेषः । सोमकण्डनानन्तरं निस्सारं यद् वल्कलमवशिष्यते तदृजीषमित्युच्यते ।

अत्र भर, आसृज, निधेहीति शुनःशेपः स्वात्मानं स्वान्तर्यामिणं विष्णुं वा प्रति वक्तीति ज्ञातव्यम् । यद्यप्यस्याम् ऋचि एतं द्रोणोपरीति च पदद्वयं नास्ति । तथाऽपि 'अथैतं द्रोणकलशमभ्यवनिनीयोच्छिष्टं चम्वोर्भरेत्येतयर्चा' इति ब्राह्मणे सोमरसस्य द्रोणकलशं प्रत्यानयने उच्छिष्टमिति मन्त्रस्य विनियुक्तत्वात् तदनुसारेणैतं द्रोणोपरीति पदद्वयं प्रक्षिप्य व्याख्येयम् । तथा च ब्राह्मणवाक्येनापि सोम एवात्र देवतेति सिद्ध्यतीति द्रष्टव्यम् ।

अध्यात्मम् 'एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इति श्रुतेरर्वाग्बिलोर्ध्व-बुध्नत्वादिसाम्येन शिरोभेदौ चमसौ हृदयं द्रोणपात्रस्थानीयं सोमाधि-करणत्वसाम्यात् । तत्र हि सोमशब्दवाच्यस्य मनसः प्राचुर्येण वृत्तिः । यथोक्तं - 'हृदयं मनसः पदम्' इति सूक्ष्मवस्त्राख्यपवित्रस्थानीया बुद्धिः, सोमशुद्धिहेतुत्वसाम्यात् । बुद्ध्या हि मनःशुद्धिर्भवति । 'जीवेन बुद्ध्या हि यदा मनो जितम्' इति वचनात् । गोशब्दवाच्या वाङ् मुखेऽस्यास्तीति मुखचर्मैव गोचर्म । एतेषु सोमस्थानीयस्य मनसो निधानं नाम चमस-द्रोणगोचर्मस्थानीयेषु शिरोभेदहृदयमुखचर्मरूपेष्वाधारेषु स्थिते विष्णौ धारणमेवेत्यवगन्तव्यम् ।

बाह्ये - 'निधेहि गोरधि त्वचि' इत्यत्र सोमस्य चर्मणि निधानस्यासम्भवाद् ऋजीषमिति शेषपूरणेन व्याख्यातम् । अध्यात्मं तु मनोलक्षणस्य सोमस्य

१. 'पात्रद्वयं' घ. ।

मुखचर्मस्थिते विष्णौ निधानसम्भवेन अनुपपत्त्यभावाद् भरणासर्जनयोरिव निधेहीत्युक्तनिधानक्रियायामपि सोमस्यैव साक्षात् कर्मत्वमिति ज्ञातव्यम् ॥ ९ ॥ २६ ॥ २८ ॥

सूक्तम् - २९

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरात ऋषिः । इन्द्रो देवता । पङ्क्तिश्छन्दः ।

(ऋ.म - ३२२)

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुविमघ ॥ १ ॥

(ऋगर्थोद्धारः)- यच्चिद्धीति ॥ सप्तर्चमिदं सूक्तम् । आव इन्द्रमिति द्वाविंशत्यृचं सूक्तम् । आवो ह्यधिविंशादित्यनुक्रमणिकोक्तेः । आद्येन सप्तर्चेन सूक्तेन आव इन्द्र इत्युत्तरस्य द्वाविंशत्यृचस्य सूक्तस्य मध्ये पञ्चदशभी ऋग्भिरिन्द्रं तुष्टाव शुनःशेपः । यथोक्तं ब्राह्मणे 'तं विश्वेदेवा ऊचुरिन्द्रो वै देवानामोजिष्टो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णु -तमस्तंनुस्तंह्यथ त्वोत्स्रक्ष्याम इति । स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः' इति । हे सत्य सद्गुण हे सोमपाः ! हे तुविमघ! तुवीति बहुनाम । मघशब्दो मखवाची । तथा च सर्वमखार्चनीयत्वात् सर्वमखवन् इन्द्र ! यत् चित् यस्मादेव कारणाद् वयमिदानीं यूपे पशुत्वेन बद्धतयाऽनाशस्ता इव अप्रशस्ता इव अस्तुत्या इव स्मसि स्मः । अत्यन्ताप्रशस्तान् ईश्वरोऽपि न प्रशस्तान् करोति । अत आतून इन्द्र शंसयेति तं प्रति त्वत्प्रार्थनं व्यर्थमित्यतः सर्वथाऽप्रशस्तत्वं नास्तीति ज्ञापनाय इवशब्दः । अस्मात् कारणात्, तुशब्दात् तत्पूर्वं, त्वमिति शेषः । त्वं तु त्वमेव, नोऽस्मान्, शुभ्रिषु शुभ्रेषु, शुद्धेषु, सहस्रेषु सहस्रसङ्ख्याकेषु, गोष्वश्वेषु

च तद्विषये आशंसय लोकेन प्रशंसय । बन्धादस्मान्मोचयित्वा कालान्तरे गवाश्वादिसम्पदं दत्वा शुनःशेपोऽयं धन्यः सभाग्यः इति लोकेऽस्मान् स्तुत्यान् कुर्वित्यर्थः ।

अध्यात्मं - गौर्वाक्, अश्वा मनआदिज्ञानेन्द्रियाणि, एतेषां शुभ्रत्वं नाम शुद्धत्वं, परमात्मगुणक्रियादीनां बहूनां वाच्यानां सत्त्वात् तत्प्रतिपादिकाया वाचः सहस्रत्वम्, बहूनां परमात्मगुणादीनां ज्ञेयानां सत्त्वात् तद्विषयक-ज्ञानजनकतया मनआदिज्ञानेन्द्रियाणां च सहस्रत्वं बहुवाच्यबहुज्ञेयद्वारेणोप-पादनीयम् । तथा च शुभ्रवाङ्मनआदीनां विषयेऽस्मान् लोकेन प्रशंसये-त्यर्थः । भगवत्प्रतिपादकवाग्युक्तत्वाद् भगवज्ज्ञानसाधनमनआदीन्द्रिय-वत्त्वाच्चायं शुनःशेपो धन्य इति [1]लोकेन प्रशंसयेति यावदित्याशयः ॥ १ ॥

(ऋ.म-३२३)

शिप्रिन् वाजानां पते शचीवस्तव दंसना ।
आतू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ २ ॥

(ऋगर्थोद्धारः) - शिप्रिन् वाजानां पत इति ॥ हे शिप्रिन् सुखिन् ! वाजानामन्नानां पते हे शचीवः, शचीति वाङ्नाम । तद्वत्त्वं तत्प्रयोगादि-ज्ञत्वेन । तथा च वाग्ज्ञ ! दंसना = दंसनानि = लोकस्य सर्वकर्माणि, तव= त्वत्प्रेरितानि त्वद्विषयाणि च, स एवंविधस्त्वम् आतून इत्यादि पूर्ववत् ॥ २ ॥

(ऋ.म-३२४)

नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आतू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३ ॥

---

१. 'लोके' क. ।

(ऋगर्थोद्धारः) - नि ष्वापयेति ॥ हे इन्द्र ! ईश्वर मिथूदृशां मिथू इति निपातो मिथ्यार्थे। मिथ्यादृशौ दैत्यरक्षोरूपे प्रजे सस्तां 'षस स्वप्ने' अज्ञानिन्यौ भवताम् । यद्यपि मिथ्यादृशोस्तयोरज्ञानस्य सिद्धत्वात् तत्प्रार्थनं व्यर्थम् । तथाऽपि पुनः बह्वज्ञानप्रार्थने तात्पर्यम् । कथम् ? सस्तां यथा सर्वदाऽबुध्यमाने भवतस्तथा तान्, निष्वापय = नितरां स्वापय, अज्ञानमोहितान् कुरु । किञ्च । आतूनः । अत्र पूर्वार्धे क्रियान्तरसद्भावेन पूर्ववदेकवाक्यतायोगाद् आतून इत्यादिकं प्रार्थनान्तराभिप्रायेण योज्यम् । एवमुत्तरत्रापि ॥ ३ ॥

(ऋ.म-३२५)

ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आतूनं इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुविमघ ॥ ४ ॥

(ऋगर्थोद्धारः) - ससन्तु त्या इति ॥ हे शूर ! त्याः = ताः, व्यत्ययेन ते= प्रसिद्धाः, अरातयो मित्रविरुद्धास्तव शत्रवः । यद्वा, त्याः ताः अरातयः तद्रूपाः प्रजाः, ससन्तु = स्वपन्तु, सर्वदाऽज्ञानमोहिताः भवन्तु । किञ्च, रातयस्तव मित्राणि बोधन्तु बोधयन्तु । जानन्तु तव रूपमिति शेषः । शूरेति सम्बोधनसामर्थ्यात् सुनिर्भयं तव रूपं जानन्त्विति लभ्यते । तथा च तव शूरत्वेन भयाभावात् त्वद्रूपस्यापि भयं नास्तीति सम्बोधनाभिप्रायः । तव शूरत्वेन त्वद्रूपं जानतां भयाभावात् सुनिर्भयं यथा भवति तथा रूपं जानन्त्विति वा शूरेति सम्बोधनाभिप्रायो द्रष्टव्यः । किञ्चातूनः ॥ ४ ॥

(ऋ.म-३२६)

समिन्द्र गर्दभं मृण नुवन्तं पापयाऽमुया ।
आ तूनं इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ५ ॥

(ऋगर्थोद्धारः) - समिन्द्र गर्दभमिति ॥ हे इन्द्र ! प्रभो गर्दभं

दुर्वाक्त्वादिसाम्यात् मायावाद्याख्यगर्दभं सम्मृण । हिंसार्थोऽयं धातुः । तमस्येव क्षिप्त्वा तप्ताश्मभिः सदा चूर्णयेति यावत् । यथोक्तम्-

'अथ च दैत्यहतिस्तमसि स्थिरा [1]नियतसंस्थितिरेव न चान्यथा ।
तनुविभागकृतिः सकलेष्वियं नहि विशेषकृता सुरदैत्यगा' इति ॥

'वव्राम् अनन्ताम् अवसापदीष्टग्रावाणो घ्नन्तु रक्षस उपब्दैः' इति च श्रुतिः । कथम्भूतं नुवन्तं त्वां स्तुवन्तमपि स्तुवतो हि साऽनुपपन्ना इत्यत उक्तम् - **पापयेति** ॥ पापसाधनभूतयाऽमुया माययेति शेषः । अत्र मायाशब्दो [2]गूढद्वेषापरपर्यायशाठ्यपरः । अनेन 'दयाशील देव प्रसीद' इत्यादिस्तुतेः शाठ्यमूलत्वमुक्तं भवति । तथा चानेनापि दयाशीलेत्यादिना सगुणतयैव स्तुतिः कृतेति लोकानां बुद्ध्युत्पादनाय गूढद्वेषेणैव स्तुवन्तमित्यर्थः ।

यद्वा, पापयाऽमुया मायया निर्वचनीयाविद्यया, तामाश्रित्येति यावत्। 'मायामयस्तव गुणा न सन्ति परमार्थतः' इत्याशयेन स्तुवन्तमित्यर्थः । अनेन निराकारमोङ्कारगम्यमित्यादि[3]वर्णनस्यास्तुतित्वमुक्तं भवति । गुणप्रतिपादकवचनं हि स्तुतिः । निराकारमित्यनेन देहाद्याकाराभावोक्त्या ज्ञानानन्दादिगुणाभाव एवोक्तः स्यात् । साकार एव वस्तुनि तेषां सम्भवात् । तथा च निराकारमित्यादेरर्थाद् गुणाभावप्रतिपादकत्वेनास्तुतित्वमिति ज्ञातव्यम् ॥ ५ ॥

(ऋ.म-३२७)

पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आतूनं इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ६ ॥

(ऋगर्थोद्धारः) - पतातीति ॥ किञ्च, वातो वायुदेवः, एतानिति शेषः ।

१. 'नियतसंसृतिरेव' घ. । २. 'गूढद्वेषपर्यायशाठ्यपरः' घ. ।
३. 'वचनस्य' घ. ।

एतान् प्रकृतान् त्वन्निन्दकान्, वनात् 'सुपां सुलुक्' (पा. सू. ७-१-३९) इत्यादिना सप्तम्याः आत् - इत्यादेशः । वने । वनतिः सम्भजनार्थः । सम्भजनं दृढग्रहः । वियोगाभाव इति यावत् । तथा च वने दृढबन्धे स्वस्मादवियोजके। लिङ्गव्यत्यासेन वनायां कुण्डृणाच्या, सप्तम्या आकारः। कुण्डृणाच्याम् । कुण्डकुम्भशब्दयोः पर्यायत्वात् कुण्डः = कुम्भः, कुम्भीपाक इति यावत् । तस्मादपि नीचायां गतावित्यर्थः । तर्हि कुण्डनीचेति स्यादिति चेत्, सत्यम् । कुण्डशब्दे विद्यमानस्य डकारस्थस्य अकारस्य व्यत्ययेन ऋकारो जातः । तथा च कुण्डृ इति जाते, नीचेत्यत्र नीत्यत्रत्यस्य ईकारस्य चकारोपरि व्यत्ययेन सम्बन्धे चकारस्थस्य अकारस्य व्यत्ययेन नकारोपरि सम्बन्धे नाचीति जाते, नस्य च णत्वे कुण्डृणाचीति भवतीति द्रष्टव्यम् ।

एवम् ऋकारस्वरव्यत्ययस्य किं प्रयोजनमिति चेत्, कुम्भीपाकाख्यनरकपतितप्राणिवेदनापेक्षया तामिस्रादिपतितमायावादिनां [1]वेदनायाः यन्नीचत्वं तदतीवाधिकमिति ज्ञापनार्थम् । यथोक्तं भाष्ये -

'रेफः स्वरव्यत्ययश्च तदाधिक्यार्थमीरितौ' इति । प्रमाणप्रसिद्धं चैतत् ।

यथोक्तम् - **'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा ।**
कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि तु ।
तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ सम्प्रकीर्तितौ ।
इति सप्तप्रधानानि [2]बलीयो ह्युत्तरोत्तरम् ॥
महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम् ।
श्रवणेनैव मूर्च्छादिरघरस्य यतो भवेत् ।
तस्मान्न विस्तरेणैतत् कथ्यते राजसत्तम ॥' इति ।

उक्तं चैतद् भगवता सूत्रकारेण **'तृतीये शब्दावरोधः संशोकजस्य'** (ब्र.सू-

१. 'जायमानाया वेदनायाः' क. । २. 'बलीयस्तूत्तरोत्तरम्' घ. ।

३-१-२२) इति - तथा च वने वनायां दृढबन्धिकायां कुण्डृणाच्यां कुम्भीपाकादपि आधिक्येनात्युल्बणवेदनापादकत्वेनातिनीचायां गतौ कुम्भीपाकादप्यधस्तने, महातमसीति यावत् । दूरं दूराद् अधिपताति, अन्तर्णीतण्यर्थोऽयं धातुः । पातयतु । किश्वातूनः ॥ ६ ॥

(ऋ.म - ३२८)

सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आतूनं इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ
॥ ७ ॥ २७ ॥ १० ॥ २९ ॥

(ऋगर्थोद्धारः) - सर्वं परिक्रोशमिति ॥ हे इन्द्र ! परिक्रोशं परिक्रोशकरं त्वन्निन्दकं सर्वं पापिनं जनं जहि हन, तमसि पातयेति यावत् । अनन्तरं जम्भय श्वादिभिर्नित्यं दंशय । कथं दशनम् ? कृकदाश्वं । लुप्तोपमा । कृकाः क्रकचाः दारुविपाटनाय निर्मितायोमयपदार्थविशेषाः, तैर्दाश्वं दशनं छेदनं, दारुण इति शेषः । क्रकचैर्दारुणो दशनं यथा तथा जम्भयेत्यर्थः । किश्वातूनः ॥ ७ ॥ २७ ॥ १० ॥ २९ ॥

सूक्तम् - ३०

आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरात ऋषिः ॥
१- १६ इन्द्रः । १७- १९ अश्विनौ, २०-२२ उषाः देवताः ।
१-१०, १२ - १५, १७ - २२ गायत्री छन्दः ।
११ पादनिचृद् गायत्री, १६ त्रिष्टुप् छन्दः ।

(ऋ.म - ३२९)

आव इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥

(ऋगर्थोद्धारः) - आव इन्द्रमिति ॥ हे वाजयन्तः ! वाजं युद्धं तत्

कुर्वतः, तत्करोतीत्यर्थे स्वार्थे णिच् । योद्धारो देवाः । यद्वा, वाजमन्त्रं सर्वभोगोपलक्षणमेतत् । वाजं सर्वभोगान् भुञ्जत इति वाजयन्तः प्रातिपदिकाद् यत्किञ्चिद्धात्वर्थविवक्षायां स्वार्थे 'प्रातिपदिकाद् धात्वर्थे. . '[१] इति णिचो विधानात् । भोगिनो देवा इति यावत् । वो युष्माकं स्वामिनं शतक्रतुं मंहिष्ठं पूज्यतममिन्द्रमिन्दुभिः सोमैरहमासिञ्चे । कमिव ? क्रिविं पालनादेः कर्तृत्वेन क्रिविशब्दवाच्यं नृपं सार्वभौमं यथा यद्वद् ऐन्द्रे महाभिषेकेऽभिषिञ्चति तथे-त्यर्थः । यद्वा, क्रिविं जगत्कर्तारं विष्णुं यथाऽभिषिञ्चति तथेत्यर्थः । अत्र यदेन्द्रः प्रसिद्धस्तदा तस्य नृपविष्णुन्यूनाधिकदृष्टान्तौ भविष्यतः । यदा त्वत्रेन्द्रो भगवान् विष्णुर्विवक्षितस्तदा क्रिविं त्वामिव त्वामासिञ्च इति स्वदृष्टान्तोऽयमिति ज्ञातव्यम् ॥ १ ॥

(ऋ.म- ३३०)

श॒तं वा॒ यः शुची॑नां स॒हस्रं॑ वा॒ समा॑शिराम् ।
एदु॑ नि॒म्नं न री॑यते ॥ २ ॥

(ऋगर्थोद्धारः) - शतं वा यः शुचीनामिति ॥ योऽयमिन्द्रः शुचीनां शुद्धानां समाशिरां सङ्गताशिराणां, अत्र संशब्दः सङ्गतार्थः । अहोरात्रान्तरितं दध्याशिरं सं सङ्गतं मिश्रितम् आशिरं येषु ते तथा तेषां सोमानामिति शेषः । यथोक्तं मीमांसकैः

'अहोरात्रेणान्तरितं दध्याशिरमुदाहृतम् ।
तदाशिरं सोमरसे मिश्रं कृत्वैव शोधिते ।
जुहुयादग्नये नो चेन्महदेनो भविष्यति' इति ।

शतं वा शतेन वा सहस्रं वा सहस्रेण वा । एदु - इत्यत्र आ, इत्, उ इति पदच्छेदः । उ इत्यस्य नेत्यनेन सम्बन्धः । नेत्येतत् निम्नपदेन, रीयत इत्यनेन

१. . . . . बहुलमिष्टवच्चेति पाणिनीयधातुसूत्रम् ।

च सम्बद्ध्यते । निम्नपदेन सम्बद्धस्य नेत्यस्य, एवार्थत्वं, रीयत इति क्रियापदेन सम्बन्धस्य निषेधार्थत्वं मन्तव्यम् । उत् = क्वचित्, न उ = नैव, आरीयते= आलीयते, निलीनो भवति । अलम्बुद्धिमान् न भवतीति यावत् । युगपदनेकैर्दीयमानैरपि सोमैर्न तस्य पूर्णत्वापरपर्यायालम्बुद्धिर्भवतीति बहुभोगशक्तिमानिति भावः । किमिव ? निम्नं न पाताल इव । युगपदनेकै-रधिष्ठितोऽपि पातालो यथा बह्वकाशवानेव भवति । न तस्य पूर्णत्वापर-पर्यायालम्बुद्धिस्तद्वदित्यर्थः । तमिन्द्रमहमासिञ्च इति पूर्वेणान्वयः । यद्वा, नेत्यस्य निम्नपदेनैवान्वयो न तु रीयत इति क्रियापदेन । तथा च, य इन्द्रः शुचीनां समाशिरां सोमानां शतं वा सहस्रं वा, द्वितीयेयम् । सोमान् आरी-यत । उत् उ = सर्वथा रीयत एव । अन्तर्णीतण्यर्थोऽयम् । विलापयत्येव स्वस्मिन्नन्तर्भावयत्येव । किमिव ? निम्नं न निम्नं पातालं यथा बह्वपि जलं स्वस्मिन्नन्तर्भावयति तथैवेति । तमिन्द्रमहमासिञ्च इति पूर्वेणान्वयः ॥२॥

(ऋ.म-३३१)

सं यन्मदा॑य शु॒ष्मिण॑ ए॒ना ह्य॑स्यो॒दरे॑ ।
स॒मु॒द्रो न व्यचो॑ द॒धे ॥ ३ ॥

(ऋगर्थोद्धारः) - सं यन्मदायेति ॥ यद् यस्माद् एना एतानि, विश्वानि महदादीनि अस्येन्द्रस्योदरे प्रविष्टानि शुष्मिणे बलिनेऽस्मै इन्द्राय, षष्ठ्यर्थे चतुर्थी । बलिनोऽस्येन्द्रस्य मदाय तृप्तये, व्यचो न दध इति वक्ष्यमाणमर्थ-वशाद् बहुवचनान्तमत्रापि सम्बद्ध्यते । संहिशब्दयोस्तेन सम्बन्धः । हिशब्दश्चावधारणे । व्यचो व्यचांसि= व्यक्तीः = प्रभावान्, अलम्बुद्धिकरण-सामर्थ्यानीति यावत् । न हि सन्दधे नैव सन्दधुर्न धृतवन्तः । महदादीनि विश्वान्यस्योदरं प्रविष्टान्यप्यस्यालम्बुद्धिजननसमर्थानि न भवन्तीत्यर्थः ।

किञ्च, समुद्रः समुद्रेकात् कारणात् समुद्राख्या प्रकृतिश्च व्यचो

व्यक्तिमिन्द्रस्यालम्बुद्धिजननसामर्थ्यं नहि नैव सन्दधे। कुत इति चेदस्येन्द्रस्य महत्त्वादिति भावः। तस्मात् कारणादिन्द्रः सोमानां शतेन सहस्रेण वा नैव रीयत इति पूर्वेणान्वयः। प्रकृतिसहितानि महदादीनि विश्वान्युदरं प्रविश्य विष्णोस्तृप्तिं जनयितुं नालम्। किमुत सोमा इति ऋगभिप्रायः ॥ ३ ॥

(ऋ.म-३३२)

अयमु ते समतसि कपोत इव गर्भधिम्।
वचस्तच्चिन्न ओहसे ॥ ४ ॥

(ऋगर्थोद्धारः) - **अयमु त इति** ॥ हे इन्द्र! अयं प्राकृतिको महदादिप्रपञ्चः ते तवैव त्वदधीन एव। किञ्च गर्भधिं, गर्भो धीयतेऽत्रेति गर्भधिः गर्भस्थानं, अण्डमिति यावत्। कपोत इव कपोतो यथा सम्यग् व्याप्नोति तथा समतसि 'अत सातत्यगमने' सम्यग् व्याप्नोषि, सप्रकृतिकं विश्वमिति शेषः। पक्षिमात्रस्याण्डजत्वेन तत्रस्थत्वेऽपि कपोते इतरपक्ष्यपेक्षया सम्यगण्ड-व्याप्तित्वरूप[1]वैलक्षण्यसद्भावात् तद्दृष्टान्तोक्तिरिति ज्ञातव्यम्। तत् तस्मात् चिद् एव प्रपञ्चस्वामित्वविश्वव्यापित्वाभ्यामपरिमितप्रभावत्वप्राप्त्या तद्रूपान्निमित्तादेव नः ऋषीणामस्माकं वचो वेदवाक्यम् ओहसे वहसि। 'वह प्रापणे'। प्रतिपाद्यत्वेन प्राप्नोषि, वेदप्रतिपाद्यो भवसीत्यर्थः। नहि परिमितप्रभावस्य वेदमुख्य-प्रतिपाद्यत्वं सम्भवतीति भावः ॥ ४ ॥

(ऋ.म- ३३३)

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते।
विभूतिरस्तु सूनृता ॥ ५ ॥ २८ ॥

(ऋगर्थोद्धारः) - **स्तोत्रमिति** ॥ हे राधानां पते,

१. 'व्यापित्वरूपं' इति क.।

'स्वर्गापवर्गयोः पुंसां रसायां भुवि सम्पदाम्।
सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्॥'

इति वचनात् मोक्षादिसिद्धीनां पते! गिर्वाहः गिरां वेदानां देवानां वाहक प्रवर्तक गीर्वाह इति भाव्ये ह्रस्वः छान्दसः। वीर विक्रान्त! यस्य ते तव स्तोत्रम् अखिलं वेदवैदिकवाक्यजातमिति शेषः। इयं च मदीया सूनृता अर्थाव्यभिचरिततया सत्यभूता वाक् तस्य तव विभूतिरस्तु। विभूतेरैश्वर्यस्य प्रतिपादिकाऽस्तु। भक्तस्यास्य शुनःशेपस्येयं वाक् मम विभूति-प्रतिपादिकेत्येवं त्वया मनसा सङ्कल्प्यतामित्यर्थः।

ननु 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' (पूर्वमीमांससूत्रम्) इति वेदानामर्थसम्बन्धप्रतिपादकत्वस्य स्वाभाविकत्वावगमान्मदीया वाग् विभूतिप्रतिपादिकाऽस्त्विति कथं प्रार्थ्यत इति चेत्, सत्यम्। मदीयया सूनृतया वाचा प्रसन्नो भूत्वा फलं देहीत्येवं फलदानाभिप्रायेण विभूति-प्रतिपादिकाऽस्त्विति लक्षणयोच्यत इति न दोषः। शब्दार्थसम्बन्धस्य स्वाभाविकत्वेन विभूतिरस्त्वित्यत्र मुख्यार्थबाधः स्फुट एव। फलदाने लक्षणायां च प्रसादद्वारको जन्यजनकभावसम्बन्धो द्रष्टव्यः ॥ ५ ॥२८॥

(ऋ.म - ३३४)

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो।
समन्येषु ब्रवावहै ॥ ६ ॥

(ऋगर्थोद्धारः) - **ऊर्ध्वस्तिष्ठेति** ॥ हे शतक्रतो! विष्णो! नोऽस्माकम्, ऊतये अभिप्रेतार्थस्य ज्ञानादेः सिद्ध्यर्थमस्मिन् अनुभवसिद्धे वाजे ज्ञानाज्ञानमये युद्धे ज्ञानाज्ञानहेतूनां प्रमाणतदभासादीनां[1] सङ्घर्षे इति यावत्। ऊर्ध्वः तिष्ठ, ऊर्ध्वः = उत्तमः, अस्मदीयज्ञानप्रतिपक्षस्याज्ञानादेर्जेता

१. 'तदभासानां' घ.।

सन् सर्वदा मयि तिष्ठ सन्निहितो भव । एवं ज्ञानोद्दीपकतया तव मयि संस्थितत्वादेव मत्स्थितस्त्वमहं चेत्युभौ त्वामन्येषु शिष्येषु सम्ब्रवावहै सम् सम्यग् ब्रवावहै उपदिशावहै 'न ऋते त्वत्' इति श्रुतेः । शिष्येषु त्वदुपदेशे मम सामर्थ्याभावात् मत्स्थितस्त्वमहं च सम्ब्रवावहै इत्युक्तमवगन्तव्यम् ॥ ६ ॥

(ऋ.म-३३५)

योगेयोगे तवस्तरं वाजेवाजे हवामहे ।

सखाय इन्द्रमूतये ॥ ७ ॥

(**ऋगर्थोद्धारः**) - **योगेयोग इति** ॥ हे सखायो देवाः ! वयं, तवस्तरं= तव इति बलस्येव तेजसोऽपि नाम । अन्तर्णीतमतुबर्थं च । तवस्तरं= तेजस्वितमं, तमिन्द्रं, योगेयोगे= सर्वेषु ध्यानयोगेषु, वाजेवाजे= ज्ञाना-ज्ञानात्मकेषु सर्वेषु युद्धेषु, मनवरूपेष्विति यावत् । ऊतये = अस्मद्रक्षायै, हवामहे= आह्वयामः । त्वया मद्रक्षणे कृते सति निर्विघ्नेन मम योगादि-सम्पूर्तिर्भविष्यतीति भावः ॥ ७ ॥

(ऋ.म-३३६)

आ घा गमद्यदि श्रवत् सहस्रिणीभिरूतिभिः ।

वाजेभिरुप नो हवम् ॥ ८ ॥

(**ऋगर्थोद्धारः**) - **आ घा गमदिति** ॥ दीर्घः सांहितः । अत्र यदि श्रवदिति परमेश्वरस्य श्रवणं पाक्षिकं प्रतीयते । तदर्थं 'सोपस्कराणि वाक्यानि भवन्ति' इति न्यायेन यद्यस्माभिरागच्छेत्युक्तं स्यात् तदा स इन्द्रः शृणोत्येवेत्यध्याहारः कर्तव्यः । यदि श्रवत् शृणुयात् भक्तोक्तं श्रुतं चेत् श्रुत्वा चेति यावत् । तर्हि सहस्रिणीभिः सहस्रवतीभिरूतिभिरभिप्रायैर्बह्वर्थयुक्ताभिप्रायैर्वाजेभिरित्य-

न्नानां पृथगुक्तेस्तदन्यान् बहून् पुरुषार्थान् दातुमिति यावत् । वाजेभिरन्नैरपि सह अन्नानि च दातुमिति यावत् । नोऽस्माकं हवमाह्वानं श्रुत्वा उप आ गमत् 'घा = उपागच्छेदेव । आगमिष्यत्येवेति यावदित्यर्थः ॥ ८ ॥

(ऋ.म - ३३७)

अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।

यं ते पूर्वं पिता हुवे ॥ ९ ॥

(**ऋगर्थोद्धारः**)- **अनु प्रत्नस्येति** ॥ अहं प्रत्नस्य पुरातनस्या-नादेर्विष्णोरोकसः स्थानस्य वैकुण्ठादेरर्थे, तत्प्राप्त्यर्थमिति यावत् । तुविप्रतिं, तुवीति बहुनाम । महानिति यावत् । प्रतिरयमुपसर्गः । उपसर्गाश्च सति क्रियावचने तदर्थस्यातिशयद्योतका भवन्ति । असति तु क्रियावचने सकारकां क्रियामाहुः । अतोऽत्र क्रियावचनाभावात् कर्तृकारकसहितक्रियावाची । तथा च, प्रतिस्थः = वैरिणः प्रति तिष्ठतीति तदर्थः । तुविश्चासौ प्रतिश्चेति तुविप्रतिस्तं नरमक्षयं विष्णुं त्वामनु आनुकूल्येन, हुवे = आह्वयामि । कथम्भूतं यं ते त्वां पूर्वं पूर्वस्मिन् काले पिता 'यस्तद् वेद स पितुष्पिताऽऽसत्' इति श्रुतेर्व्यञ्जकत्वेनैव पिता, न तु जनकः, एतादृशो ब्रह्मा हुवे आह्वयामास। यद्वा, ते त्वदीयस्त्वद्भक्त इति यावत् । पिता, विश्वस्येति शेषः । ब्रह्मा यं ते त्वां हुव इत्यर्थः ॥ ९ ॥

(ऋ.म-३३८)

तं त्वा वयं विश्ववारा शास्महे पुरुहूत ।

सखे वसो जरितृभ्यः ॥ १० ॥ २९ ॥

(**ऋगर्थोद्धारः**)- **तं त्वा वयमिति** ॥ हे विश्ववार ! सर्वैर्वरणीय ! पुरुहूत!

---

१. 'अघा' घ. ।

पुरुभिराहूत, सखे ! वसो सर्वत्र वसतीति वसुस्तस्य सम्बुद्धिर्वसो ! वयं तम् उक्तरूपं त्वा त्वाम् आशास्महे इच्छामः । अस्माक-मभीष्टप्रदानाय यज्ञे त्वदागमनं कामयामह इत्यर्थः । न केवलमस्मदर्थे त्वामाशास्महे । किन्तु अन्येभ्योऽपि जरितृभ्यः स्तोतृभ्यः अस्मद् येऽन्येऽपि त्वां स्तुवन्ति तेभ्योऽप्यर्थे, तदभीष्टदानायापीति यावत् । त्वया तद्यज्ञं प्रत्यागन्तव्यमिति तदागमनं वयमेवाऽशास्महे ॥ १० ॥ २९ ॥

(ऋ.म - ३३९)

अस्माकं शिप्रिणीनां सोमंपाः सोमपाव्नाम् ।
सखें वज्रिन् सखीनाम् ॥ ११ ॥

(ऋगर्थोद्धारः) - अस्माकमिति ॥ हे सोमपाः ! सखे ! वज्रिन् ! इन्द्र! शिप्रिणीनां, शिप्रं सुखं, तदेषामस्तीति शिप्रिणस्तेषां शिप्रिणामिति भाव्ये शिप्रिणीनामिति स्त्रीलिङ्गं छान्दसम् । सुखिनां, सोमपाव्नां= सोमपातॄणां, तव सखीनामस्माकं भद्रं भवत्विति शेषः ।

ननु सोमपातॄणामस्माकमित्यनुपपन्नम् ।

'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु ।
सोमाधिकारो वेदोक्तो ब्रह्मणी द्वे शताधिके ॥'

इति परापरब्रह्मद्वयाधिकशतसङ्ख्याकदेवानामेव सोमपानार्हत्वेन ऋषीणां तदभावात् कथं सोमपातॄणामस्माकमिति शुनःशेपेनोक्तं चेत्, उच्यते । अत्रेन्द्रावराणामपि बृहस्पत्यादिदेवतानामप्यृषित्वेन विवक्षितत्वात् तेषां च सोमपातृत्वात् तदभिप्रायेणेदमिति न दोषः ।

यद्वा, सोमपातृशब्दो भावप्रधानः - सोमपातृत्वानामिति । अर्शआद्यजन्तं चेदं सोमपातृत्ववतामिति । तद्वत्त्वं च तत्प्रार्थयितृत्वेन । 'मंहिष्ठं सिञ्च इन्दुभिः' इत्याद्युक्तरीत्या देवानां सोमपातृत्वप्रार्थयितॄणामस्माकमित्यर्थो द्रष्टव्यः ।

अथवा सोमाजादिहविषां पातृदेवानामग्निद्वारैव न साक्षाद्, 'भिषजाविति यत् पूर्वं सोमाहुत्यां बहिष्कृतौ' इति भागवतवचनेन सोमस्याऽहुतित्वोक्त्या अग्नावेव देयत्वावगमात् । तथा च यथा चरुपुरोडाशादिकमग्नौ हुत्वाऽवशिष्टं यजमानप्रभृतिभिर्भक्ष्यते, एवं सोमाहुतिं हुत्वा पात्रावशिष्टो यः सोमरसः सोऽपि यजमानपुरःसरैः पीयते । शुनःशेपादिऋषीणामपि यज्ञकर्तृत्वेन यजमानत्वात् सोमाहुतिदानानन्तरं पात्रावशिष्टसोमरसपानसम्भवात् तदभिप्रायेण सोमपातॄणामित्युक्तमित्यवगन्तव्यम् । एवं च सति सोम्य सोमार्हेति षट्प्रश्नटीकोक्तमप्युपपन्नम् । अत एव 'सोममर्हति यः' (पा. सू. ४-४-१३७) इति सूत्रे सोमशब्दादर्हार्थे यत्प्रत्ययमुक्त्वा सोम्येति रूपनिष्पत्तिमुक्त्वा सोममर्हन्तीति सोम्याः ब्राह्मणाः इत्युदाहृतं तदपि समाहितमिति मन्तव्यम् । अस्माकमिति एकस्मिन्नपि ऋषौ बहुवचनं 'गुरावात्मनि वैकेषाम्' इति सूत्राद् युक्तमिति द्रष्टव्यम् ॥ ११ ॥

(ऋ.म-३४०)

तथा तदंस्तु सोमपाः सखें वज्रिन् तथां कृणु ।
यथां त उश्मसीष्टयें ॥ १२ ॥

(ऋगर्थोद्धारः) - तथा तदस्त्विति ॥ हे सोमपाः सखे वज्रिन् ! 'वज गतौ' इत्यस्माद् भावे रप्रत्यये गत्यर्थानां ज्ञानार्थत्वाद् वज्रो ज्ञानं तदस्यास्तीति वज्री, तस्य सम्बुद्धिः वज्रिन् ! इन्द्र हरे वयं ते, सकाशादिति शेषः । यथा समस्तकालावस्थायित्वादिना येन प्रकारेण यच्च ऐश्वर्याद्यभीष्ट-मिष्टये, गत्यर्थोऽयम् । प्राप्तुमुश्मसि । 'वश कान्तौ' । कान्तिरिच्छा । इच्छामः । तदभीष्टं तथा तेन प्रकारेणास्तु । कथं तद् भविष्यतीति न वाच्यम् । तद् यथा भविष्यति तथा त्वं कृणु कुर्वित्यर्थः ॥ १२ ॥

(ऋ.म-३४१)

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

क्षुमन्तो याभिर्मदेम ॥ १३ ॥

(ऋगर्थोद्धारः) - रेवतीर्नः सधमाद इति ॥ सधमादे, सीदन्त्यस्मिन्निति सदः आश्रयः । दस्य च धः । 'मदी हर्षे' इति धातोर्मादः सुखम् । मादसध इति भाष्ये मादशब्दस्य परनिपातः । सधमादे सुखाश्रये इन्द्रे त्वयि, अस्माकं स्वामितया स्थिते सतीति शेषः । रेवतीः, धनवाचिरैशब्दपर्यायो रेशब्दः । तद्वतीः = धनसंयुताः, धनसंयुतानीति यावत् । तुविवाजाः, तुविशब्दोऽयं बहुपर्यायः ।

वाजशब्दोऽन्नवाची । स्त्रीलिङ्गं छान्दसम् । बह्वन्नानि धनानि, महान्नानि चेति यावत् । सन्तु । यद्वा 'पशवो वा रेवत्यः' इति श्रुतेः रेवतीशब्दः पशुपर्यायः। रेवतीः रेवत्यः पशवः, तुविवाजा बह्वन्नानि च सन्तु । अध्यात्मं तु - ज्ञानस्यैव मुख्यवित्तत्वात् सुखस्यैव मुख्यान्नत्वाद् रेवतीर्ज्ञानाख्यवित्तसंयुताः, तुविवाजाः = महासुखानि, ज्ञानानि महासुखानि चेति यावत् । सन्तु भवन्तु । कथम्भूताः ? वयं याभी रेवतीभिर्धनैः पशुभिर्ज्ञानैः, याभिस्तुविवाजाभिर्महान्नैर्महासुखैश्चेति यावत् । क्षुमन्तः, क्षुः = निवासः। 'क्षि निवासगत्योः' इति धातोर्डुः । स्थितिरिति यावत् । स एषामस्तीति क्षुमन्तः = देहादिस्थितिमन्तः, देहादिदार्ढ्यवन्तः सन्त इति यावत् । मदेम सुखिनो भवेमेत्यर्थः ॥ १३॥

(ऋ.म - ३४२)

आ घ त्वावान् त्मनाऽऽप्तः स्तोतृभ्यो धृष्णवियानः।

ऋणो रक्षं न चक्र्योः ॥ १४ ॥

(ऋगर्थोद्धारः) - आ घ त्वावानिति ॥ हे धृष्णो ! प्रगल्भ ! त्वावान् त्वद्वान् ! त्वत्स्वामिकस्त्वद्भृत्य इति यावत् ॥ पुरुषो न केवलमन्नादिमान्। किन्तु त्मना 'मन्त्रेष्वाङ्यादेरात्मनः' (पा.सू. ६-४-१४१) इति स्मरणात् आकारलोपः । आत्मना त्वया, घ = एव, त्वयैवाऽऽप्तः = प्राप्तः स्यात् । त्वत्सन्निधानपात्रं स्यादिति यावत् । न केवलमेतावत् । किन्तु स्तोतृभ्यः, चतुर्थी तृतीयार्थे । स्तोतृभिः शिष्यैर्ज्ञानाद्यर्थम्, आ = समन्ततः, इयानः = 'इण् गतौ' गम्यमानः प्राप्यश्च स्यात् । यद्वा स्तोतृभ्य इति चतुर्थी षष्ठ्यर्थे । स्तोतॄणां भृत्यानामियानः, आश्रय इति यावत् । स्यात् । किमिव ? ऋणोः= ऋणतोः 'ऋण शब्दे' शब्दं कुर्वतोः, चक्र्योः = चक्रपर्यायोऽयं चक्रिशब्दः, चक्रयोः, अक्षं न = अक्षमिव, यथाऽक्षमाश्रयभावेन वर्तते तथेति । दार्ष्टान्तिके स्तोतृभ्य इत्युक्तत्वाच्छब्दवत्त्वेन तत्साम्यप्रदर्शनाय चक्रयोरपि ऋणोरिति विशेषणमुक्तमिति ज्ञातव्यम् ॥ १४ ॥

(ऋ.म -३४३)

आ यद् दुवः शतक्रतवा कामं जरितॄणाम् ।

ऋणो रक्षं न शचीभिः ॥ १५ ॥ ३० ॥

(ऋगर्थोद्धारः) - आ यद् दुव इति ॥ हे शतक्रतो ! ऋणो रक्षं न - आश्रयत्वमात्रे दृष्टान्तः । न तु कामदोग्धृत्वे, जडत्वेनासम्भवात् । चक्रयोरक्षं यथाऽऽश्रयभावेन वर्तते तथा स्तोतॄणामाश्रयभूतस्त्वमिति यावत् । शचीभिः= वेदवाग्भिः, जरितॄणां, आकाममयमुपसर्गभूत आङ् क्रियासम्बन्धाभावात् सकारकक्रियावचनः सन् काममित्यनेनैव सम्बद्ध्यते । आ समन्तात् स्थितम् ऐहिकं पारत्रिकं च सर्वमिति यावत् । कामं काम्यं यद् यस्माद् आदुवः = आदुहः = अधुक्षः, दुग्धवानसीत्यर्थः । यद्वा, आङ्यस्यापि दुव इति क्रिययैव

सम्बन्धः । तथा च आ आदुवः, अत्याधिक्येन दुग्धवानसीत्यर्थः। तस्मान्ममाप्यैहिकं पारत्रिकं च सर्वं कामं देहीति शेषः ॥ १५ ॥वर्ग३०॥

(ऋ.म-३४४)

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान् स नः सनिता सनये स नोऽदात्
॥ १६ ॥

(ऋगर्थोद्धारः) - शश्वदिन्द्र इति ॥ 'तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय शश्वदिन्द्र इति' इति ब्राह्मण-वाक्यम् । तस्यायमर्थः । स्तूयमानः स इन्द्रः तस्मै शुनःशेपाय आरोहणार्थं हिरण्यरथं मनसा ददौ= दास्यामीति सङ्कल्पितवान् । शुनःशेपस्तद् ज्ञानदृष्ट्या विज्ञाय तमिन्द्रं शश्वदिन्द्र इत्येतयर्चा प्रतीयाय दृष्टवान् । अस्तुवत् । 'यद्वा तं मनसेन्द्रेण दत्तं रथं 'शश्वदिन्द्र' इत्येतयर्चा स्वयमपि मनसैव प्रतीयाय= प्रतिजग्राह । अनेन दत्तं चेदहमपि ग्रहिष्यामीति चिन्तितवानिति । इन्द्रः प्रोप्रुथद्भिः 'प्रथ प्रख्यापने' आत्मवीर्यमिति शेषः । तथा चाऽत्मनः स्वस्य परमात्मनो वा वीर्यं पराक्रमं प्रोप्रुथद्भिः = प्रख्यापयद्भिः, नानदद्भिः= अतिशयेन पुनःपुनर्वा नादान् कुर्वद्भिः, शाश्वसद्भिः = क्रोधाद् भृशं भूयोभूयश्च श्वासोच्छ्वासं कुर्वद्भिः सुरैः सह, शश्वत्, सर्वदा, धनानि दैत्यसम्बन्धीनि जिगाय जितवान् । 'सः, नः' इति त्रिवारं सत्त्वाद् वाक्यभेदेन योज्यम् । तथा च, दंसनावान्= धनजयादिरूपकर्मवान्, स इन्द्रो नोऽस्मभ्यं, हिरण्यरथं= स्वर्णमयं रथमिदानीमदात् । सामीप्यादेवं व्यपदेशः । मनसा सङ्कल्पितवानिति वा । किञ्च, स इन्द्रो नोऽस्मभ्यं सनिताऽखिलमैहिकं फलं दाता स्यात् । स इन्द्रो नोऽस्मदीयमखिलं हविरादिकं सनिता लब्धा स्यादिति वा । किञ्च, स इन्द्रोऽस्माकं सनये पारत्रिकलाभाय च स्यादित्यर्थः ॥ १६ ॥

(ऋ.म-३४५)

आश्विनावश्वावत्येषा यातं शवीरया ।
गोमद्दस्रा हिरण्यवत् ॥ १७ ॥

(ऋगर्थोद्धारः) - आश्विनावश्वावत्येति ॥ तृच आश्विनः । यथोक्तं ब्राह्मणे 'तमिन्द्रवाचाऽश्विनौ नु स्तुहि । अथ त्वोत्स्रक्ष्याम इति साश्विनौ तुष्टाव त उत्तरेण तृचेनेति' । आ, अश्विनौ, अश्ववत्या - इति पदच्छेदः । हे दस्रौ = अश्विनौ ! आशुगमनवन्तौ, अश्ववत्या = अश्वयुक्तया, शवीरया = शं सुखं, वीरः पुत्रः । द्वन्द्वान्मत्वर्थे अर्शआद्यजन्तः । सुखपुत्राभ्यां युक्तया, इषा - ईठ् इषौ इष इति षकारान्तस्त्रीलिङ्गस्येट्शब्दस्येयं तृतीया । [1]अन्नेन सह गोमद्धिरण्यवदिति क्रियाविशेषणम् । युवयोरागमनं गोमद् हिरण्यवच्च यथा स्यात् तथैव नोऽस्मान् प्रत्यायातम् । अश्वसुख-[2]पुत्रान्नगोहिरण्यानि दातुमिति यावत् ।

अध्यात्मं तु, हे दस्रावश्विनौ ! भगवद्रूपविशेषौ ! अश्ववत्या = अश्वा इन्द्रियाणि, तत्पाटवोपलक्षणमेतत् । तद्युक्तया, शवीरया = शं सुखं वीरं वीर्यमविद्याजये पराक्रमः । [3]तदुपयुक्तया, इषा 'ईश ऐश्वर्ये' ऐश्वर्यं मनोजयः, तेन सः गोमद्धिरण्यवदिति क्रियाविशेषणम् । गौर्वाक् । तत्पाटवोपलक्षण-मेतत् । हितं च रमणीयं चेति हिरण्यं परं ब्रह्म । यद्वा हिरण्यमिव हिरण्यम्। यथा अयस्ताम्रकांस्यरजतहिरण्याख्यानां पञ्चलोहानां मध्ये हिरण्यं श्रेष्ठं, तथा सर्वतोऽपि गुणोच्छ्रितत्वात् परं ब्रह्म हिरण्यमित्यर्थः ।

यद्वा, युवयोरागमनं गोमद् वाक्पाटववत् यथा स्यात् तथैव नोऽस्मान् प्रति आयातम् । तथाचेन्द्रियपाटवसुखाविद्याजयपराक्रममनोजय-

---

१. 'अनेन' घ. । २. 'पुत्रान् गोहिरण्यानि' घ. ।
३. 'तदुभययुक्तया' घ. ।

वाक्पाटवानि दातुमायातमिति यावत् । तथा युवयोरागमनं हिरण्यवच्च परब्रह्मवत् सन्निधानवद् यथा स्यात् तथा नोऽस्मान् प्रत्यायातम् । युवयोरागमने परब्रह्मसन्निधानमस्मासु भविष्यतीति यावदिति द्विरूपभगवन्तं प्रति प्रार्थ्यत इति ज्ञातव्यम् ॥ १७ ॥

(ऋ.म - ३४६)

समानयोजनो हि वां रथो दस्रावमर्त्यः ।
समुद्रे अश्विनेयते ॥ १८ ॥

(ऋगर्थोद्धारः) - समानयोजनो हीति ॥ हे दस्रावश्विनौ ! समानयोजनः, युज्यतेऽत्रेति योजनावश्वौ समानतया योजनं रथे बन्धनं ययोस्तौ समानयोजनौ अश्वौ तद्वान् अमर्त्यो अलौकिको वां युवयोः रथः समुद्रे ईयते आसमुद्रगामी, अप्रतिबद्धगतिमानिति यावदित्यर्थः ।

भगवत्पक्षे तु, हे दस्रौ ! अश्विनौ ! भगवद्रूपविशेषौ ! वां युवयोर्भक्तानामिति शेषः । समानयोजनः मोक्षस्य यावता प्राप्तिस्तावान् योगो ध्यानयोगः समानयोजनशब्देनोच्यते । तथा च समानो मोक्षाय पर्याप्तो योजनं ध्यानयोगो यस्य देहाख्यरथस्यासौ समानयोजनः । देहस्य समानयोगयुक्तत्वं च तत्कारणकत्वेन । स्वयोग्यध्यानयोगे परिपक्वे सत्यपरोक्षज्ञानद्वारा लिङ्गभङ्गानन्तरं [१]चिद्देहस्यापि व्यज्यमानत्वाद् ध्यानयोगकारणत्वं चिद्देहस्यास्तीति समानयोगयुक्तत्वमुपपादनीयम् ।

अमर्त्यः ज्ञानानन्दात्मकत्वान्मरणरहितो रथः स्वरूपदेहाख्यो रथः समुद्रे क्षीरसागरे वसति । 'महाज्ञाना गच्छन्ति क्षीरसागरम्' इति वचनात् । स च ईयते ज्ञायते, नारदचतुर्मुखादिभिरिति शेषः । युष्मद्ध्यानाभिव्यक्त-

१. 'चिद्देहस्याभिव्यज्यमानत्वात्' घ. ।

चिदात्मकस्वरूपदेहवान् मुक्तस्त्वद्भक्तः क्षीरसागरे वसमानो नारदादिभिर्ज्ञायत इत्याशयः । यथोक्तं गीताभाष्ये 'दृष्टाश्च ते भगवतो भिन्ना नारदादिभिः' इति । व्याख्यातं च टीकाकारैः - 'ते श्वेतद्वीपवासिनो मुक्ताः' इति । उक्तं च सूत्रे 'दर्शनाच्च' (ब्र.सू. ३-१-२१) इति । व्याख्यातमेतद् भाष्ये -

'नारायणप्रसादेन समिद्धज्ञानचक्षुषा ।
अत्यन्तदुःखसंलीनान् निःशेषसुखवर्जितान् ॥
नित्यमेव तथाभूतान् विमिश्रांश्च गणान् बहून् ।
निरस्ताशेषदुःखांश्च नित्यानन्दैकभागिनः ॥
अपश्यत् त्रिविधान् ब्रह्मा साक्षादेव चतुर्मुखः'

इति दर्शनवचनाच्च पाद्म इति ॥ १८ ॥

(ऋ.म - ३४७)

न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः ।
परिद्यामन्य दीयते ॥ १९ ॥

(ऋगर्थोद्धारः)- न्याघ्न्यस्येति ॥ दीर्घः सांहितः । नि, अघ्न्यस्येति पदच्छेदः । हे अश्विनौ ! भवन्तौ ! सौरस्य रथस्यैकं चक्रं, अघ्न्यस्य, पर्वतनामैतत् । मानसोत्तरगिरेर्मूर्धनि मूर्ध्नि युवां नियेमथुः नियमितवन्तौ स्थः । युवाभ्यां [१]नियमितं वर्तत इति यावत् । अन्यदपरं चक्रं 'सप्त युञ्जन्ति रथमेकचक्रम्' इति श्रुतेः सूर्यरथस्यैकचक्रत्वावगमाद्[२] द्वितीयचक्राभावाच्चक्रस्थानीयोऽक्षप्रदेश इति व्याख्येयम् । विभक्तिव्यत्ययेन दिवः मेरोः 'पृथिव्यां द्यौर्महामेरुः' इति वचनात् । परि = उपरि मेरुपर्वतोपरि भगवन्नियमनेन स्थिततया ईयते ज्ञानिभिर्ज्ञायत इत्यर्थः । यद्वा, हे अश्विनौ ! भवन्तौ ! रथस्य

१. 'नियतं' घ. । २. 'अवगमेन' घ. ।

जगदाख्यस्यैकं चक्रं = प्रसिद्धरथचक्रयोः रथप्रवृत्तिहेतुत्ववत् पुण्यपापाभ्यां प्रेरितस्यैव पुरुषस्य प्रवृत्तिदर्शनेन जगत्प्रवृत्तिहेतुत्वसाम्याद् एकं चक्रं पापम्, अघ्नयस्य अः = विष्णुः, तेन हन्यत इति घ्नः तस्य दैत्यजनस्य, मूर्धनि, नियेमथुः = युवां स्थापितवन्तौ स्थः। युवां दैत्यजनं पापभागिनं कुरुत इति यावत्। अन्यच्चक्रं = प्रवृत्तिहेतुत्वसाम्यात् पुण्यं, द्यां परि = दिवः स्वर्गस्योपरि जडलोके, पुण्यस्थानस्य बाधितत्वाल्लक्षणया तत्रत्यस्य जनस्य सुजनस्येति यावत्। उपरि ईयते = भवद्भ्यामेव स्थापिततया ज्ञानिभिर्विज्ञायते, युवां सुजनं पुण्यभागिनं कुरुत इति तात्पर्यम्॥ १९ ॥

(ऋ.म-३४८)

कस्तं उषः कधप्रिये भुजे मर्तो अमर्त्ये।
कं नक्षसे विभावरि ॥ २० ॥

(ऋगर्थोद्धारः) - कस्त उषः कधप्रिय इति ॥ उषस्योऽयं तृचः। यथोक्तं ब्राह्मणे 'तमश्विना ऊचतुरुषसं नु स्तुह्यथ त्वोत्स्रक्ष्याव इति। स उषसं तुष्टाव त उत्तरेण तृचेन' इति। हे कधप्रिये! कधशब्दः किमपीत्यर्थे निपातः सर्वमपीत्यर्थः। 'सर्वं वाक्यं सावधारणम्' इति [1]न्यायेन सर्वं प्रियमेव यस्य पूर्णानन्दत्वात्, न त्वप्रियं किमपीति कधप्रियः। स्त्रीरूपस्य भगवतः सम्बुद्धिः हे कधप्रिये! अमर्त्ये मरणशून्ये विभावरि वि विशिष्टा अनन्याधीनेति यावत्। भाः कान्तिर्विभा तया वृणोति जगद् आवृणोति व्याप्नोतीति। वरी। वृणोतेरकारस्त्रियामीकारः। तत्सम्बुद्धिर्हे विभावरि! प्रकाशरूपत्वादुषाः तत्सम्बुद्धिर्हे उषः! को मर्तो मर्त्यः ते तव भुजे भोगाय भोगसम्पादनाय भवति। पूर्णानन्दत्वेन कधप्रियत्वादमर्त्यत्वाच्च तव भोगः कथं मर्त्याधीनः स्यादिति भावः। एवं तवाऽप्तकामत्वात् कारणात्, स्वार्थहेतुत इति शेषः।

१. 'न्यायं' क.।

स्वस्याऽनन्दादिभोगनिमित्तं त्वं कं नक्षसे 'णक्ष गतौ' कमेव प्रतिगच्छसि न कश्चन प्रतीत्यर्थः॥ २० ॥

(ऋ.म-३४९)

वयं हि ते अमन्मह्यान्तादा पराकात्।
अश्वे न चित्रे अरुषि ॥२१॥

(ऋगर्थोद्धारः) - वयं हि त इति ॥ नन्वत्राश्वायारुपमानत्वेन[1] अश्वावदित्येव वक्तव्यम्। न तु हे अश्वे न - इत्युपमानपदे सम्बुद्धिर्युक्ता। कुत्राप्यदर्शनात्। उपमेयपदे तद्विशेषणपदे वाऽसौ। अतो दृष्टान्तः कथमेतदिति चेद् उच्यते।

'नञिव युक्तमन्यसदृशाधिकरणे' इति परिभाषासूत्रम्। तस्यायमर्थः। नञा युक्तमिवयुक्तं चोपमानं तदन्यस्मिन् तत्सदृशे चाधिकरणे पदार्थे वर्तते, तत्र विशेषणसमर्पकमिति यावत्। यथाऽनश्व इत्युक्ते अश्वभिन्नोऽश्वसदृशाश्च रासभो लभ्यते। यथा वा गौरिवेत्युक्ते गोभिन्नो गोसदृशो लभ्यते। एवमिहापि अश्वे नेत्यत्र नेत्यस्येवार्थकतया अश्वान्याश्वसदृशी उषेत्यर्थः प्राप्नोति। एवं चेदमश्वे नेत्युपमानपदं चित्रे अरुषीति पदद्वयमिवोपमेयभूतायामुषसि अश्वान्यत्वाश्वसदृशत्वरूप-विशेषणसमर्पकत्वेन वर्तत इत्युपमेयविशेषणमेव जातम्। सति चैवं यथोपमेयविशेषणभूते चित्रादिपदे सम्बुद्धिस्तथोपमान-पदेऽपि सम्बुद्धिर्युक्तेति न कश्चिद्दोष इति ज्ञातव्यम्।

तथा च हे अश्वे न जात्यश्ववत् स्थिते तद्भिन्ने सदृशे च चित्रे सर्वदा भद्रे अरुषि वर्णतोऽरुणे उषः स्त्रीरूपभगवन्! आन्तादापराकात् - इत्यत्र आ अन्ताद् आ पराकाद् इति पदच्छेदः। तत्रैकस्याऽङः आरभ्येत्यर्थः। अपरस्य

१. 'उपमात्वेन' क.।

मर्यादापरपर्यायं पर्यन्तत्वमर्थः । परम् उत्कृष्टम् आ सम्यक् कं सुखं यस्येति व्युत्पत्त्या परमसुखत्वात् पराकः श्रीः । पुल्लिङ्गश्च पुंसामर्थ्योपेतत्वात् 'कूटस्थोऽक्षर उच्यते' इतिवद् युक्तम् । 'पुल्लिङ्गेनोच्यते श्रीश्च पुंवच्छक्तिमती यतः' इति वचनात् । अन्तः कलिः सकलजीवान्त्यत्वात् । तथा च वयं आपराकात् पराकं लक्ष्मीमारभ्य आ अन्तात् कलिपर्यन्तं विद्यमानं, विश्वमिति शेषः । ते तव एकस्याधीनमिति शेषः । इति अमन्महि चिन्तितवन्तो हि । कालव्यत्ययेन सर्वदा चिन्तयाम इत्यर्थः ।

अस्यार्थस्य प्रसिद्धायामुषस्यश्विभार्यायामसम्भवात् तस्याः प्रतिपाद्यत्वपक्षे इत्थं योजना । हे अश्वे न चित्रे अरुषि उषः वयं आ अन्तात् आ पराकात् अन्तो विनाशः दुःखं नरकः, भूम्याद्यपेक्षया परमसुखत्वात् पराकः स्वर्गः । तथा च आपराकात् पराकं स्वर्गमारभ्य आ अन्तात् नरकपर्यन्तं विद्यमानं विश्वं ते तवाधीनमिति अमन्महि चिन्तितवन्तो हि ॥ २१ ॥

(ऋ.म-३५०)

त्वं त्येभिरागंहि वाजेभिर्दुहितर्दिवः ।
अस्मे रयिं निधांरय ॥ २२ ॥ ३१ ॥ ३० ॥ ६ ॥

(ऋगर्थोद्धारः) - त्वं त्येभिरिति ॥ 'द्यौर्वाव विद्युत्' इति श्रुतेर्मुख्यप्राणेन भारत्यामुत्पन्नत्वाद् अश्विभार्या उषाः दिवोदुहिता । स्त्रीरूपस्य भगवतस्तु द्युशब्दवाच्यभारतीव्यङ्ग्यत्वाद् दिवोदुहितृत्वं ज्ञातव्यम् । हे दिवोदुहितः उषः ! इति भगवतोऽश्विभार्यायाश्च सम्बुद्धिः । त्वं त्येभिस्तैः प्रसिद्धैः वाजेभिः वाजैरन्नैः, अन्नानि दातुमिति यावत् । अस्मान् प्रत्यागहि आगच्छ । न केवलमन्नादिदानमेव त्वदागमनप्रयोजनम् । किं तर्हीत्यत उच्यते- अस्मे अस्मासु रयिं धनं नि निश्चितं धारय स्थापय ॥ २२॥ ३१ ॥ ३० ॥ ६ ॥

सूक्तम् - ३१,

हिरण्यस्तूपः आङ्गिरसः ऋषिः ।

अग्निर्देवता । जगती छन्दः । ८,१६,१८, त्रिष्टुप् छन्दः ।

(ऋ.म-३५१)

त्वमंग्ने प्रथमो अङ्गिंरा ऋषिर्देवो देवानांमभवः शिवः सखां ।
तवं व्रते कवयों विद्मनापसोऽजांयन्त मरुतो भ्राजंदृष्टयः ॥ १ ॥

(ऋगर्थोद्धारः) - व्याख्याताः शुनःशेपदृष्टा ऋचः । उत्तराभी ऋग्भिः हिरण्यनामकभगवत्स्तोत्रकर्तृतया[1] यो हिरण्यस्तूप इति प्रसिद्ध आङ्गिरसः सः अग्नीन्द्रादिगतं पृथक् स्थितमप्यच्युतं स्तौति । यथोक्तं भाष्ये -

'अग्नीन्द्रादिगतं पृथक् स्थितमपि स्तौत्यच्युतं भक्तितः
स्वर्णस्तूप इति प्रसिद्धमगमद् यः संस्तुवन् सूर्यगम् ।
विष्णुं स्वर्णसमानचारुवपुषं स्वर्णाभिधं शाश्वतं
तं दृष्ट्वा परतोऽभवच्च महितः सुज्ञानमप्याप्तवान्' इति ।

त्वमग्ने प्रथमो अङ्गिरा ऋषिरिति ॥ अष्टादशर्चमिदमाग्नेयं सूक्तम् । हे अग्ने ! त्वं प्रथमः सर्वोत्तमोऽसि । तथा अङ्गिराः अङ्गिनामङ्गे शरीरे नियामकतया स्थितानां देवानां सकाशात् रः सारः श्रेष्ठ इति भगवान् अङ्गिराः। 'एतमु एवाङ्गिरसं मन्यन्ते अङ्गानां यद् रसस्तेन' इति श्रुतेः । प्रसिद्धाग्निस्तु अङ्गिरस्पुत्रत्वाद् अङ्गिराः । यथोक्तं भाष्ये 'अङ्गिरा अङ्गिरस्पुत्रो यतोऽ-ग्निरभवत् कश्चित्' इति । ऋषिः 'ऋष ज्ञाने' इति धातोः सर्वज्ञत्वाद् ऋषिः । दिव् क्रीडेत्यादिधातोः सृष्ट्यादिरूपक्रीडादि-गुणसम्पन्नत्वाद् 'देवः शिवः सुखात्मकत्वेन' इति वचनात् सुखात्मकत्वाच्छिवः देवानां प्रियत्वात् सखाऽभवः सर्वदा भवसि । किञ्च, भ्राजदृष्टयः भ्राजन्त्यः ऋष्टयः

---

१. 'कर्तृत्वेन' घ. ।

शक्त्यादिरूपायुधविशेषा येषां ते भ्राजदृष्टयो मरुतोऽतीतवर्तमानाः वायवस्तव व्रते। सप्तमी तृतीयार्थे। भावप्रधानश्च निर्देशोऽर्शआद्यजन्तश्च। त्वद्विषयकश्रवणादिव्रतवत्त्वेनैव निमित्तेन विद्मनापसः, तृतीयाया अलुक्। विद्मना विद्यया, सहितमिति शेषः, अपः कर्म येषां ते विद्मनापसो निवृत्तकर्मानुष्ठातारः सन्त इति यावत्। 'निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते' इति वचनात् कवयो महाविज्ञाना अजायन्त अपरोक्षज्ञानिनो बभूवुरित्यर्थः॥ १॥

(ऋ.म - ३५२)

त्वम॑ग्ने प्रथ॒मो अङ्गि॑रस्तमः क॒विर्दे॒वाना॒ं परि॑ भूषसि व्र॒तम्।
वि॒भुर्विश्व॑स्मै॒ भुव॑नाय॒ मेधि॑रो द्विमा॒ता श॒युः क॑ति॒धा चि॑दा॒यवे॥ २॥

(ऋगर्थोद्धारः) - त्वमग्ने प्रथमो अङ्गिरस्तम इति॥ हे अग्ने त्वं, प्रथमः= सर्वोत्तमः, अङ्गिरस्तमः अतिशयेनाङ्गानां रसः, त्वं कविः सर्ववेदनात् इति वचनात्। कविः = सर्वज्ञः, देवानां व्रतं कर्तरि षष्ठी। देवकर्तृकं त्वद्विषयकं कर्म, परिभूषसि= परिभूषयसि, फलदानेनेति शेषः। सफलं करोषीति यावत्। किञ्च, विश्वस्मै = भुवनाय, विभुः विश्वस्य समस्तस्य भुवनस्य विभुर्व्यापी, मेधुरः मतुबर्थे इरप्रत्ययः।

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः'

इति वचनात्, मेधा ज्ञानम् अतिशयेन नित्यमस्यास्तीति मेधिरः। द्विमाता द्वे जडाजडे माति वेत्तीति द्विमाता शयुः पयोब्धिशायी।

प्रसिद्धाग्निपक्षे तु आमाशयो जलाशयः इतिवत् शेतिः स्थानार्थः। तथा च, शयुः = आहिताग्नेर्यजमानस्य [१]गेहे स्थातेत्यर्थः। एवम्भूतस्त्वमायवे

१. 'गृहे' घ.।

मनुष्यनामैतत्। चतुर्थी षष्ठ्यर्थे। प्रजानां, कतिधाचित् = कतिभिरनेकैरपि प्रकारैर्युक्तः 'स्वामी गुरुर्नित्यसखा पिता च' इत्यनेकप्रकार इति यावत्। भवतीति शेषः॥ २॥

(ऋ.म - ३५३)

त्वम॑ग्ने प्रथ॒मो मा॑त॒रिश्व॑न आ॒विर्भ॑व सुक्र॒तू॒या वि॒वस्व॑ते।
अरे॑जेता॒ं रोद॑सी होतृ॒वूर्येऽसघ्नोर्भा॒रमय॑जो म॒हो व॑सो॥ ३॥

(ऋगर्थोद्धारः) - त्वमग्ने प्रथमो मातरिश्वन इति॥ हे अग्ने! विष्णो त्वं विवस्वते = विविधेषु पदार्थेषु वासाद् विवस्वान् तस्मै विवस्वते, मातरिश्वने प्रथम आविर्भव। प्रथम इत्येतत् सामर्थ्याद् आविर्भावरूपक्रियाविशेषणम्। तथा च प्रथमं मुख्यतः इतरापेक्षयाऽतिशयेनेति यावत्। आविर्भव। लोड् भूतार्थे। आविर्बभूविथ। अनेन मातरिश्वानं प्रति भगवदाविर्भावानन्तरं शतकल्पानां[१] जातत्वात् कथमाविर्भवेति प्रार्थनार्थकलोडुक्तिरिति शङ्कानवकाश इति ध्येयम्।

कस्मान्निमित्तान्मातरिश्वानं प्रत्याविर्बभूविथेत्यत उक्तम्- **सुक्रतूयेति॥** मातरिश्वन इति शेषः। शोभनः क्रतुर्ध्यानापरपर्यायं ज्ञानमस्येति सुक्रतुः। दीर्घश्छान्दसः। भावप्रधानात् सुक्रतुशब्दात् परतः स्थितायास्तृतीयाविभक्तेर्यादेशः। तथा च सुक्रतुया सुक्रतुत्वेन सुबोधवत्त्वेन निमित्तेनेत्यर्थः। यद्वा, सुक्रतुयेति क्यजन्तम्। 'क्यचि च' (पा.सू. ७-४-३३) इति क्यचि परे पूर्वदीर्घविधानात् सुक्रतू इति दीर्घो युक्तः। तथा च शोभनः क्रतुः सुक्रतुः। तमात्मन इच्छतीति सुक्रतुया। ज्ञानेच्छाभावप्रधानं चेदमिच्छया तत्प्राप्तिर्लभ्यते। तर्हि सुक्रतूययेति स्यादिति चेन्न। सुक्रतूयाशब्दात् परतः

१. 'शतब्रह्मकल्पानां' क.।

स्थितायास्तृतीयाविभक्तेः आकारादेशे सुक्रतुया आ इत्यत्र सवर्णदीर्घे सति सुक्रतूयेति जातत्वात्। तथा च सुक्रतूया सुबोधप्राप्तिमत्त्वेन निमित्तेनेत्यर्थः। तथा च ध्यानरूपनिमित्तसद्भावेन तं प्रत्याविर्भावो युक्त इत्याशयः।

किञ्च, रोदसी = रोदस्यौ, 'रद विलेखने' विलेखनं विदारणम्। नखमुखविलेखितदितितनयोरा इति प्रयोगात् एकैकमूलप्रकृतिः श्रीभूरिति विदीर्णा सती द्विविधा बभूव। यतोऽतो रद्येते दीर्येते विभज्येते इति व्युत्पत्त्या रोदसी श्रीभूम्यौ अरेजेताम्। रेजतिरत्र शोभनार्थः। अशोभेताम्। कथम्भूते? होतृवूर्ये होत्रा सर्वेन्द्रियेषु विषयहोतृत्वाद्धोताऽग्निः परमेश्वरः, तेन निमित्तेन, तदनुग्रहरूपान्निमित्तादिति यावत्। वूर्ये वर्ये सर्वोत्कृष्टे इत्यर्थः। यद्वा, होता परमेश्वर एव वूर्यो वर्यो याभ्यां ते होतृवूर्ये इत्यर्थः। योजनाद्वये [1]प्रगृह्यत्वाभावश्छान्दसः। अथवा होतृवूर्ये इत्येतत् प्रथमाद्विवचनं सद् रोदसी इत्यस्य विशेषणम्। किं नाम ? रोदस्योः रेजने निमित्तकथनाय सप्तम्यन्तम्। सप्तमी निमित्तार्था। वूर्यशब्दो भावप्रधानः। तथा च होतुर्भगवतः वूर्ये वरत्वे पतित्वे सति अरेजेताम्। भगवत्पत्नीत्वेन निमित्तेन अरेजेतामिति यावदित्यर्थः। नास्यां योजनायां प्रगृह्यत्वशङ्का, द्विवचनान्तत्वाभावादिति ज्ञतव्यम्।

किञ्च, हे वसो ! सर्वत्र वसतीति वा वसत्यस्मिन् सर्वमिति वा वसुः। तस्य सम्बुद्धिर्वसो ! भगवन् ! त्वमसघ्नोः 'षह मर्षणे' सघ्नुः सह्यः, न सघ्नुरसघ्नुः। तस्य प्रतिभटैरसह्यस्य महो महतः, षष्ठी चतुर्थ्यर्थे। असघ्नवे = महते, तस्मै मातरिश्वने, विरिश्वाय भारं विश्वस्येति शेषः। अयजः = 'यज देवपूजासङ्गतिकरणदानेषु' इति धातोः, प्रतिदिष्टवान् प्रत्येकं दत्तवानसीति शेषः ॥ ३ ॥

---

१. 'प्रगृह्यताभावः' घ.।

(ऋ.म - ३५४)

त्वम॑ग्ने॒ मन॑वे॒ द्याम॑ वाशयः पु॒रूर॑वसे सु॒कृते॑ सु॒कृत्त॑रः।
श्वा॒त्रेण॒ यत्पि॒त्रोर्मुच्य॑से॒ पर्या॒त्वा पूर्व॑मनय॒न्ना प॑रं॒ पुनः॑ ॥ ४ ॥

(ऋगर्थोद्धारः) - **त्वमग्ने मनव इति**॥ हे अग्ने ! देवा सुकृत्तरः अतिशयेन सत्कर्मणां कर्ता त्वं पुरूरवो अस्यास्तीति पुरूरवाः, तस्मै। दीर्घः सांहितः। सुकृते, सत्कर्मणां कर्त्रे मनवे, मनु अवबोधने, 'असाधारण्येन व्यपदेशा भवन्ति' इति न्यायेन विशिष्टबोधान्मनुशब्दवाच्याय वायवे, द्यां दिवं स्वर्गमुपलक्षणमेतत्। स्वर्गादिस्वाम्यमवाशयः प्रादाः। यद्वा, मनवे = वायवे, द्यां= ज्ञानम्, अवाशयः = प्रादाः। अथवा, मनवे = वायवे, द्यां = द्युदेवतां भारतीं तन्नाम्नीं भार्यां चावाशयः प्रादाः। नन्ववाशय इत्येतत् कथं प्रादा इत्यस्य प्रतिपादकमिति चेद्, उच्यते। 'वाशृ शब्दे' इति हि पठ्यते। तस्य णिजन्तस्येदं रूपम्। तत्र स्वतन्त्रकर्त्रपेक्षायां लोकेनेत्येतदध्याह्रियते। मनव इत्याद्या चतुर्थी षष्ठ्यर्थे। ततश्च द्यां मनोः सम्बन्धिनीं, लोकेनावाशयोऽशब्दयः। प्रदानाभावे तथाऽवाशना-सम्भवात् प्रादा इति तात्पर्यतो लभ्यत इत्यवगन्तव्यम्।

यद्वा, सुकृते = सत्कर्मणां कर्त्रे, मनवे = स्वायम्भुवाय, द्यां ज्ञानं स्वर्गं चावाशयः प्रादाः। सुकृते पुरूरवसे तन्नामकाय राज्ञे द्यां ज्ञानं स्वर्गं चावाशयः प्रादाः। किञ्च, यत् यस्मात् त्वं श्वात्रेण, श्वा वायुः। छान्दोग्ये 'अथात शौव उद्गीथः' इति खण्डे, तस्मै श्वा श्वेतः प्रादुर्बभूवेति वायोः श्वरूपप्रसिद्धेः।

यद्वा, 'श्वस प्राणने' श्वसनात् प्राणनाद् जगच्चेष्टनात् श्वा वायुः। तथा च [1]योगरूढियोगाभ्यां श्वानं श्वन्शब्दवाच्यं वायुं त्रायत इति श्वात्रः। तेन श्वात्रेण, भावप्रधानं चैतत्। श्वात्रत्वेन निमित्तेन वायुसंरक्षकत्वेन निमित्तेन

---

१. 'रूढियोगाभ्यां' घ.।

पित्रोर्जगतो मातापितृभ्यां प्रकृतेः पुरुषाच्च परिमुच्यसे नित्यं मुक्तो वर्तसे। तत्कर्तृकबन्धात्यन्ताभाववानसीति यावत्। तथा च 'जालाजालं मातरिश्वानमेकम्', 'तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिः', 'प्राणो निरभिमानित्वाच्छरीर्यप्यशरीरवान्' इत्यादिना विद्यमानस्यापि बन्धस्याकिञ्चित्करत्वावगमेन [1]'प्रकृतिपुरुषकृतबन्धातीतत्वरूपमहामहिमवतो वायोः संरक्षकस्य हरेः प्रकृत्यादिबन्धस्य दूरोत्सारितत्वाच्छ्वात्रं पित्रोर्मुच्यस इत्यत्र हेतुर्भवत्येवेति भावः ।

पर्यात्वेत्यत्र परि आ त्वा इति पदच्छेदः । अनयन्नापरमित्यत्र अनयन् आ परमिति पदच्छेदः । तथा च आ तेनैव कारणेन तव बन्धातीतत्वेनैव कारणेनेति यावत्। त्वा, नित्यमुक्तं त्वां= पूर्वं = पूर्वे सन्तः, आ= सम्यक् सुभक्त्या, परि= सम्यग्, अनयन् मोक्षार्थमुपदेशेन शिष्यान् प्रति नीतवन्तः। एवं पूर्वं पूर्वैः सद्भिः शिष्यान् प्रत्युपदिष्टं त्वा त्वां पुनरपि अपरम् अपरे अधुनातना अपि सन्तः मोक्षार्थं स्वशिष्यान् प्रत्यनयन् । नहि बद्धं बन्धध्वंसायोपदिशन्तीति युक्तमतो बन्धध्वंसाय शिष्येषूपदेशो हरेर्नित्यमुक्तत्वं हेतुरिति ज्ञायत इति भावः ॥ ४ ॥

(ऋ.म - ३५५)

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।
य आहुतिं परिवेदा वषट्कृतिमेकायुरग्रे विश आविवाससि
॥ ५ ॥ ३२ ॥

(ऋगर्थोद्धारः) - त्वमग्ने वृषभ इति ॥ हे अग्ने ! वृषभः = वर्षणस्य भक्ताभिलषितसेचनस्य कर्ता, भक्तानां ज्ञानादिपुष्टिवर्धनः । एकं मुख्यमायुर्यस्येत्येकायुर्नित्यायुः, एतादृशस्त्वं, यो यजमानः, आहुतिं =

१. 'प्रतिपुरुष' घ. ।

आहूयत इत्याहुतिस्तं सर्वैराहूयमानं, ह्रस्वश्छान्दसः । वषट्कृतिम् । ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्यरूपाः षड्गुणाः यस्मिन् वर्तन्तेऽसौ वषट्, वषडित्याक्रियत इति वषट्कृतिस्तं, त्वां, परिवेद = सम्यग् वेद। तेन उद्यतस्रुचे, चतुर्थी तृतीयार्थे। होमाय उद्यता स्रुक् येनासौ उद्यतस्रुक् तेन उद्यतस्रुचा यजमानेन, श्रवाय्यः = नित्यं श्रोतव्यश्च, भवसि।

षड्गुणमध्ये ऐश्वर्यं नाम मनोजयः । वैराग्यं नाम अमन्दानन्दपूर्णत्वेन विषयेष्वलम्बुद्धिमत्त्वाद् विषयरागोपहत्यभाव एवेति ज्ञातव्यम् । यथोक्तं रामायणे

'अमन्दमानन्दमनिन्दनीयं [1]निरन्तरं यन्निजमेव भुङ्क्ते।
स्त्रीराज्यकोशादिषु तस्य तेन न रागरोगोपहता मनीषा' इति।

अत्र षाड्गुण्ये सर्वगुणान्तर्भाव इति द्वितीयाध्यायगीताभाष्य[2]टीकोक्त्या ऐश्वर्याद्याः षड्गुणा यत्र वर्तन्तेऽसौ वषडित्यत्र षाड्गुण्ये सर्वगुणान्तर्भावो द्रष्टव्यः। यथोक्तं यादवगिरिमाहात्म्ये -

'विश्वान्तर्यामिबालस्य यथा हि जठरे जगत्।
षाड्गुण्योदरमाश्रित्य वर्तन्ते गुणकोटयः' इति।

किञ्च, हे अग्ने त्वमनादिकालत एव विशः प्रजाः आविवाससि। समन्ताद् विशेषेण वससि, तासु प्रविष्टो वर्तस इत्यर्थः ॥ ५ ॥ ३२ ॥

(ऋ.म - ३५६)

त्वमग्ने वृजिनवर्तनिं नरं सक्मन् पिपर्षि विदथे विचर्षणे ।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः
॥ ६ ॥

१. 'निरञ्जनं' घ. । २. 'टीकोक्तरीत्या' घ. ।

(ऋगर्थोद्धारः)- त्वमग्ने वृजिन वर्तनिमिति ॥ विचर्षणे वि विविधाः नानाप्रकाराः देवाद्याश्चर्षणयः प्रजाः यस्याधीनाः असौ विचर्षिणिस्तस्य सम्बुद्धिः हे विचर्षणे ! अग्ने देव यस्त्वं धने परितक्म्ये परितक्म्यशब्दस्य गतिकर्मसु पाठाद् अधिगन्तव्ये, निमित्तसप्तम्येषा । तथा चाधिगन्तव्य-धननिमित्तेन तन्निमित्तं क्रियमाणे इति यावत् । शूरसाता = शूरसातौ = युद्धे, शूरसातिशब्दस्य युद्धनामसु पाठात् । यद्वा, सातिशब्दो लाभे वर्तते । तथा च शूराणां युद्धस्यैव लाभरूपत्वाद् योगेन शूराणां सातौ लाभरूपे, युद्धे दभ्रेभिरित्युक्तत्वाद् दभ्रा अपीति शेषः । यदि दभ्राः शक्त्या सङ्ख्यया वा अल्पा अपि योद्धारस्त्वां, समृताः, सं = सम्यक्, ऋताः = गताः, शरणमिति शेषः । तर्हि दभ्रेभिश्चित् शक्त्या सङ्ख्यया वा अल्पैरपि तैः भूयसः शक्त्या सङ्ख्यया बहूनपि प्रतिभटान् हंसि । णिजन्तमेतत् । हननं कारयसि । स त्वं वृजिनवर्तनिं वृजिनं पापं पापकरं वर्तनिर्वर्तनमाचरणं यस्येति वा वृजिनं पापं वर्तनिर्वर्तनं नरकप्राप्तौ मार्गो यस्येति वा वृजिनवर्तनिस्तं दुस्सङ्गतिवशात् पापाचारमपि नरं सज्जनपुरुषं, विदथे = यज्ञनामैतत् । सद्विद्याख्ये यज्ञे । यद्वा, विद् ज्ञान इति धातोर्भवेऽथप्रत्यये कृते विदथशब्देन सद्विद्यैवोच्यते । तथा च दुस्सङ्गतिपरित्यागेन सत्सङ्गतिवशाद् व्याख्यानरूपे ज्ञानयज्ञे सज्ज्ञाने वा तेन सम्पादिते सतीति शेषः । सक्मन् दकारस्य ककारः । सद्मन् सद्मनि स्वकीये गृह एव वसन्तमपि, नतु तत्पापपरिहाराय तीर्थयात्राद्युद्देशेन बहिर्गच्छतीति यावत् । पिपर्षि 'पृ पालनपूरणयोः' दुरितपरिहारेण पालयसि। समस्तकामैः पूरयसि च ।

अथवा दुस्सङ्गत्या पापाचरणवता तत्परित्यागेन सत्सङ्गत्या सद्विद्यासम्पादने कृते सति मोक्षं दत्वा सद्मन् वैकुण्ठादिरूपे सद्मनि पालयसि कामैः पूरयसि चेत्यर्थः । यथोक्तं-

'अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं स गच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' ॥ इति ।

प्रसिद्धाग्निपक्षे तु, सद्मन् स्वर्गरूपे सद्मनि पिपर्षीति योज्यम् ॥ ६ ॥

(ऋ.म - ३५७)

त्वं त॑म॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वेदि॑वे ।
यस्ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मय॑ः कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑
॥ ७ ॥

(ऋगर्थोद्धारः) - त्वं तमग्न इति ॥ हे अग्ने त्वं तं श्रवस इति वक्ष्यमाण-त्वाद् योग्यतया तव स्तोतारं मर्तं मर्त्यमुत्तमे मुख्येऽमृतत्वे, भवितृप्रधानो निर्देशः । अमृते मोक्षे दधासि, मुक्तं करोषीति यावत् । किमर्थम् ? दिवेदिवे= दिनेदिने, सदेति यावत् । श्रवसे = श्रवणाय, तत्कृतस्तुतेरिति शेषः । तत्स्तुतिं श्रोतृकाम इति यावत् । मुक्तो हि सदा समीपस्थः सन् स्तौति । कथम्भूतः? यस्त्वं तातृषाणः ततृषाणः प्रीत्याधिक्यादेनं सुखिनं करिष्यामीति तृष्णातिशयवान् उभयाय द्विविधाय जन्मने जन्मवते, चतुर्थी षष्ठ्यर्थे । एकवचनं बहुवचनार्थे । मनुष्या देवाश्चेति प्रकारद्वयेन उत्पत्तिमतां मनुष्याणां देवानां चेत्युभयेषां न तु दैत्यानामिति यावत् । अज्ञानित्वावस्थायां कृतेन, काम्यकर्मणेति शेषः । मयः सुखं स्वर्गाख्यं कृणोषि तेष्वपि मानुषेषु देवेषु च सूरये च ज्ञानिने तु आ प्रयो मयः कृणोषि । आ समन्तात् नित्यमिति यावत् । प्रयः = प्रियं, मयः = मोक्षाख्यं सुखं, करोषि । यद्वा, सूरय इत्यत्रापि तातृषाण इत्येतदनुवर्तते। आ इत्यस्य सम्बन्धः । तथा च सूरये

ज्ञानिने तु आ अज्ञान्यपेक्षया विशेषात् ततृषाणः सन् प्रयो मयः कृणोषीति स त्वममृतत्वे दधासीति सम्बन्धः ॥ ७ ॥

(ऋ.म - ३५८)

त्वं नो॑ अग्ने स॒नये॑ धना॑नां य॒शसं॑ का॒रुं कृ॑णुहि॒ स्तवा॑नः ।
ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर्द्या॑वापृथिवी॒ प्राव॑तं नः ॥ ८ ॥

(ऋगर्थोद्धारः) - **त्वं नो अग्ने सनये धनानामिति** ॥ हे अग्ने ! स्तवानोऽस्माभिः संस्तूयमानस्त्वं नोऽस्मान् धनानां प्रज्ञाख्यानां धनानां, सनये= लब्धये= प्राप्त्यर्थे, समर्थानिति शेषः। कृणुहि= कृधि= कुरु। किञ्च, नोऽस्मान् यशसं यशस्विनं, एकवचनं बहुवचनार्थे। यशस्विनः कृणुहि। कारुं= कारिणं च= कारिणश्च, ज्ञानदानिति यावत्। कृणुहि। ननु करोतेरुणि कृते कारुरिति भवति। तथा च करोतीति कारुरिति कारित्वमेव कारुशब्दप्रवृत्तौ निमित्तम्। तथा च यज्ञादिकारित्वमेवार्थः किं न स्यात् न ज्ञानदत्वमिति चेदुच्यते। ब्रह्मापरोक्षज्ञानपर्यन्तम् उपासनादिकारित्वेन कारणेन तत्त्वदर्शी कारुरित्युच्यते। 'मुख्यामुख्ययोर्मध्ये मुख्ये सम्प्रत्ययः' इति न्यायात्। यज्ञादिकार्यपेक्षयोपासनादिकारिणो [1]मुख्यत्वात्।

ननु तथाऽपि कारुमित्यस्य ज्ञानिनमित्यर्थो भवेत्। न ज्ञानदमिति। ज्ञानिनमित्यर्थाङ्गीकारेऽपि प्रज्ञाधनानां लब्धये समर्थान् कुर्वित्यनेनैव ज्ञानिनं कुर्वित्यर्थस्य लब्धत्वात् कारुमिति पुनरुक्तिरिति चेत् सत्यम्। अत एव ज्ञानित्वार्थकेन कारुशब्देन ज्ञानिनां कार्यं ज्ञानदानं लक्ष्यत इत्यदोषः। यदा तु धनानां सनय इत्यत्र धनशब्देन प्रसिद्धधनविवक्षा तदा कारुमुक्तरीत्या तत्त्वदर्शनं कुर्विति व्याख्यानेऽपि न पुनरुक्तिदोष इत्यवगन्तव्यम्।

---

१. 'मुख्यत्वम्' घ.।

किञ्च, वयं नवेन नूतनेनेदानीन्तनेन अपसा कर्मणा कर्म पूर्वतनं कर्म ऋध्याम समृद्धं करवाम। प्राक्तनस्य कर्मणः समृद्धिं साफल्यं प्राप्नुमः।

इदमुक्तं भवति। प्राचीनाचीर्णपुण्योच्चयेन इदानीं भगवत्सेवादिरूपं कर्म सम्पद्यते। तथा चेदानीं भगवत्सेवारूपकर्माख्यफलसम्पत्त्या प्राचीनाचीर्णपुण्यं सफलं भवतीत्यभिप्रायेण नूतनेन कर्मणा पूर्वतनं कर्म ऋध्यामेत्युक्तमिति। किञ्च, हे द्यावापृथिवी द्यावापृथिव्यौ देवैः सहिते ! युवां नोऽस्मान् तथैव प्रावतं यथा वयमग्नेः स स्यामेति शेषः। अस्माभिः कर्तव्यायामग्निसेवायां प्राप्तान् विघ्नान् युवां परिहरतमित्याशयः। अनेन सेव्यतया अग्नेरेव प्राधान्यप्राप्त्या तस्यैव देवतात्वसिद्धिर्न द्यावापृथिव्योरित्यवगन्तव्यम्॥ ८॥

(ऋ.म - ३५९)

त्वं नो॑ अग्ने पि॒त्रोरु॒पस्थ॒ आ दे॒वो दे॒वेष्व॑नवद्य॒ जागृ॑विः।
त॒नू॒कृद् बो॑धि॒ प्रम॑तिश्च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒मोपि॑षे ॥ ९ ॥

(ऋगर्थोद्धारः)- **त्वं नो अग्ने पित्रोरुपस्थ इति** ॥ हे अग्ने नोऽस्माकं सर्वेषां प्राणिनां पित्रोर्मातापित्रोः प्रकृतिपुरुषयोः, सरस्वतीब्रह्मणोरिति यावत्। उपस्थे= उपतिष्ठन्तेऽत्रेत्युपस्थं समीपदेशः। तत्र वर्तसे, सदैव तयोर्नियन्तेति यावत्। हे अनवद्य निर्दुष्ट देव! त्वं देवेषु, निर्धारणे सप्तमी। आजागृविः, आ सम्यक्, नित्यमिति यावत्। जागृविर्वेत्ताऽसीति शेषः। त्वं तनूकृत्= सर्वशरीराणां कर्ता, प्रमतिश्च = प्रकृष्टा मतिरस्येति प्रमतिः। प्राज्ञवर्यश्चासि। एवम्भूतो नोऽस्मान् बोधि बोधय। ज्ञानिनः कुरु। ननु ज्ञानित्वकरणं किमर्थं प्रार्थ्यत इत्यत उच्यते। हे कल्याण ! भद्र ! त्वं कारवे उक्तरीत्या ज्ञानिने विश्वं समस्तं वसु मोक्षादिकं, आ, उपिषे = ओपिषे आपयसि प्रापयसि यस्मात् तस्मान्नोऽस्मान् बोधीत्यर्थः। यद्यपि ओपिषे

इत्येतत् 'टु वप् बीजतन्तुसन्ताने' इत्यस्य रूपम् । तथाऽपि धातूनामनेकार्थत्वात् प्रापणार्थत्वमिति द्रष्टव्यम् ॥ ९ ॥

(ऋ.म- ३६०)

त्वमग्ने प्रमतिस्त्वं पिताऽसि नस्त्वं वयस्कृत् तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य
॥ १० ॥ ३३ ॥

(ऋगर्थोद्धारः) - **त्वमग्ने प्रमतिरिति** ॥ हे अग्ने ! त्वं प्रमतिः प्रकृष्टज्ञानोऽसि । त्वं नोऽस्माकं पिताऽसि । शरीरकर्तृत्वात् । त्वं वयस्कृत्, कालकृता शरीरावस्था वयः, तया आयुरुपलक्ष्यते । आयुष्करः । न केवलं नः पिता, किन्तु वयं ते तव जामयो भ्रातरश्च भवामः । 'अङ्गिराः अङ्गिरस्पुत्रो यतोऽग्निरभवत् कचित्' इति वचनादङ्गिरसो ज्येष्ठपुत्रोऽग्निः, त्वम् अग्ने 'अध्यूना हिरण्यस्तूप आङ्गिरसः' इति अनुक्रमणिकावचनाद् हिरण्यस्तूप आङ्गिरसः कनिष्ठः पुत्रोऽतोऽग्निर्हिरण्यस्तूपस्य भ्राता । ज्येष्ठत्वात् पिता च 'ज्येष्ठो भ्राता [1]'पितृसमः' इति वचनादित्यवगन्तव्यम्।

परमेश्वरस्य तु हिरण्यस्तूपं प्रति पितृत्वं सर्वजगज्जनकत्वाद् युक्तम् । भ्रातृत्वं चैकगर्भस्थितप्राणिद्वयवद् जीवेश्वरयोरेकस्मिन् देहे वासादित्यवगन्तव्यम् । किञ्च, हे अदाभ्य अहिंस्य ! सुवीरमतिविक्रान्तं व्रतपां व्रतानां कर्मणां रक्षक त्वं शतिनः शतसङ्ख्यावत्यो रायो धनानि संयन्ति प्राप्नुवन्ति सन्तीति यावत् । न केवलं शतिनः, किन्तु सहस्रिणः सहस्रसङ्ख्यावत्यश्च रायः संयन्ति । वयं पुत्रत्वेन भ्रातृत्वेन त्वत्सम्बन्धिनः, त्वं च धनिकः, अतोऽस्मान् धनवतः कुर्विति ऋगभिप्रायः ॥ १० ॥३३॥

१. 'पितुः समः' घ. ।

(ऋ.म-३६१)

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ।
इळामकृण्वन् मनुषस्य शासनीं पितुर्यत् पुत्रो ममकस्य जायते
॥ ११ ॥

(ऋगर्थोद्धारः)- **त्वामग्ने प्रथममायुमायव इति** ॥ हे अग्ने देवाः पञ्चमहाभूताद्यभिमानिनः प्रथममायुम् 'अय पय गतौ' इति धातोर्गमनाद् गमनकर्तृत्वाद् गत्यर्थानां ज्ञानार्थत्वेन ज्ञानवत्त्वाच्च प्रथमं, मुख्यवृत्त्येति यावत् । आयुशब्दवाच्यं त्वां, आयवे, चतुर्थी षष्ठ्यर्थे, नहुषस्येत्यादिप्रायपाठात् । आयोरौर्वशेयस्य राज्ञो हृदये स्थित्वा प्रेरकमकृण्वन् । किञ्च, त्वां नहुषस्य राज्ञो विश्पतिमकृण्वन् । विश्पतिशब्दोऽधिपतिमात्रार्थः । अधिपतित्वं च हृदये प्रेरकत्वेन विवक्षितम् । ननु देवा अकृण्वन्निति कथम् ? नहीश्वरीयं प्रेरकत्वं देवाः कृतवन्तः । अनादिकालसिद्धत्वात् । इति चेद् उच्यते ।

आय्वादिशरीरप्रेरकत्वं ह्यत्र विवक्षितम् । अत एव भाष्ये हृदये प्रेरकत्वादिति समग्रशरीरोपलक्षको हृदयशब्दः प्रयुक्तः । शरीरप्रेरणं चासति शरीरे न सम्भवति । अतः शरीरं सृष्टवन्तो देवाः [1]'प्रेरकं सृष्टवन्त इत्युपचारेणोच्यन्त इति ज्ञातव्यम् ।

अपि च त्वां मनुषस्य शासनीमिळामकृण्वन् । 'कर्तृकर्मणोः कृति' (पा.सू.२-३-६५) इति कृद्योगे कर्तरि कर्मणि च षष्ठी स्मर्यते । तथा 'कृत्यल्युटो बहुलम्' (पा.सू. ३-३-११३) इति कर्तरि कर्मणि च ल्युट् । तथा चात्रेळा यदा वैवस्वतस्य मनोः पुत्री विवक्षिता तदा मनुषस्येति कर्तरि षष्ठी, शासनीति कर्मणि ल्युट् । एवं च मनुषस्य वैवस्वतमनुना शासनीं शास्यां शिक्षणीयां तत्पुत्रीमिळां तदन्तर्यामिणं तत्प्रेरकं तद्देहसृष्ट्याऽकृण्वन्निव । यदा चेळाशब्देन

१. 'प्रत्येकं घ. ।

स्त्रीरूपो भगवान् विवक्षितस्तदा मनुषस्येति कर्मणि षष्ठी । शासनीमिति कर्तरि ल्युट् । तथा चेड्यत्वाद् इळाशब्दवाच्यपृथिवीवत् सर्वेषामुपजीव्यत्वाच्च इळाशब्दवाच्यं यज्ञनामकं त्वां, मनुषस्य = अत्र मनुषशब्देन स्वायम्भुवो मनुर्विवक्षितः । तथा च तस्य शासनीं शिक्षकं च, तदीयदेहसृष्ट्याऽकृण्वन्निव ।

कथम्भूत इळाशब्दवाच्यो भगवान् यज्ञनामा वासुदेव इत्युच्यते । यत् या इळा = ममकस्य ममत्ववाचिविभक्तिप्रतिरूपकाव्यये ममशब्दे उपपदे करोतेर्डप्रत्यये सति ममकेति हि रूपम् । तथा च ममकस्य ममत्वं कर्तुः ममापत्यभावं कुर्वाणस्येति यावत् । पितुः स्वायम्भुवस्य मनोः पुत्रो जायते पुत्रत्वेन लोके व्यपदिश्यत इत्यर्थः । ममताकस्येत्युक्त्या पितृत्वं जनके तद्भिन्ने च पालकादौ पितरि ममताकर्तृत्वरूपगुणयोगाद् गौण्या वृत्त्यैव विवक्षितम् । न तु जनकत्वमित्युक्तं भवति । स्वायम्भुवो मनुः, पुत्रिकापुत्रन्यायेन आकूतिसूनुं यज्ञनामकं भगवन्तं स्वगृहमानीय मदीयः पुत्र इत्यभिमानं कृतवानित्येतत् **'आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम् । स्वायम्भुवो मुदा युक्तः ॥'** इति भागवते, **'स्वायम्भुवः स्वदौहित्रं विष्णुं यज्ञाभिधं मनुः'** इति पुराणे च प्रसिद्धमित्यवगन्तव्यम् । आय्वादिराजहृदयेऽन्तर्यामितया तत्प्रेरकत्वेन तव स्थितत्वादेव हि तेषां राज्ञां पुराणादिप्रसिद्धो जगत्पालकत्वादिरूपो महाप्रभावोऽस्ति । अन्यथा स न स्यात् । तथा च सर्वेषामाय्वादीनामतिसामर्थ्यादिप्रेरकमहामहिमोपेतस्त्वमिति ऋक्तात्पर्यं द्रष्टव्यम् ॥ ११ ॥

(ऋ.म-३६२)

त्वं नों अग्ने तवं देव पायुभिर्मघोनों रक्षतन्वंश्च वन्द्य ।

त्राता तोकस्य तनंये गवांमस्यनिंमेषं रक्षंमाणस्तवं व्रते ॥ १२ ॥

(ऋगर्थोद्धारः)- त्वं नो अग्ने तव देव पायुभिरिति ॥ हे वन्द्य ! स्तुत्याग्ने देव ! त्वं नोऽस्मदीयस्य मघोनो धनवतो, यजमानस्येति यावत् । तन्वः द्वितीयार्थे षष्ठी । तनुं, तनुशब्दस्य हस्तपादादिशरीरावयववृत्तितामभ्युपेत्य द्वितीयाबहुवचनं वा । तथा च तन्वः, विभक्तिव्यत्ययेन तनूः शरीरावयवान् हस्तपादादीन् तव पायुभिः रक्षासाधनभूताभिः शक्तिभी रक्ष । तन्वश्चेति चशब्देन यजमानानुष्ठितं यद् ज्ञानभक्त्यादिसाधनजातं तदपि रक्षेति समुच्चिनोति ।

ननु तन्व इति द्वितीयार्थे षष्ठी कथं व्याख्यायते । तनूः, तन्वौ, तन्वः इति ऊकारान्तस्त्रीलिङ्गस्यापि तनूशब्दस्य षष्ठ्यैकवचनं तन्वाः इत्येव भवति । तथा तनुः, तनू, तनवः, इत्युकारान्तस्त्रीलिङ्गस्यापि तनुशब्दस्य षष्ठ्यैकवचनं तनोरित्येव भवति । अतः कथं तन्व इति षष्ठी ? येन सा द्वितीयार्थे व्याख्यायत इति चेद् उच्यते । दीर्घान्तात् ह्रस्वान्ताच्च तनुप्रातिपदिकात् ङसुप्रत्यये ङलोपे यणादेशे सस्य रुत्वे विसर्गे च सति तन्व इति षष्ठ्यैकवचनं युक्तमेव । अत एव स्वरप्रक्रियायां 'ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम' इति ऋग्वेदे, तथा 'तनुवं पुषेम' इति यजुर्वेदे । तन्वं - तनुवम् इत्यादिप्रयोगसिद्ध्यर्थं 'छन्दसि तन्वादीनां विकल्पेन यणुवङौ' इति वार्तिकेन पाक्षिकयणादेशस्य विहितत्वेन षष्ठ्यैकवचनत्वसम्भवादुक्तं युक्तमित्यवगन्तव्यम् । अत एवास्वरसाद् द्वितीयाबहुवचनान्तत्वेन व्याख्यातमित्यवधेयम् ।

यद्वा, नोऽस्माकं तन्वो रक्ष मघोनो यजमानस्य तन्वो रक्षेति व्याख्येयम् । यद्यपि यावदायुरवस्थानं स्वत एव सिद्धं, अतो रक्षेति प्रार्थनं व्यर्थमेव । तथाऽप्यपमृत्युपरिहारेणाऽभयादिपरिहारेण च रक्षेति तात्पर्यम् । किञ्च, त्वं तोकस्य [1]अस्मत्पुत्रस्य त्राताऽसि, भवेति यावत् । न केवलं पुत्रस्य,

१. 'मत्पुत्रस्य' घ. ।

किन्तु 'तनये' सप्तमी षष्ठ्यर्थे। तनयस्य तोकशब्दोक्तपुत्रस्य सूनोः पौत्रस्यापीति यावत्। त्राताऽसि भव।

ननु तनयशब्दः पुत्रनाम। स कथं पौत्रार्थतया व्याख्यायत इति चेदुच्यते। न तनयशब्दः पुत्रस्यैव नाम। किन्तु 'तनु विस्तारे' इत्येतद्धातुरूपत्वात् सन्ततेर्वाचकः। पौत्रस्यापि सन्ततित्वाद् युक्तं पौत्रार्थत्वेन व्याख्यानम्। नन्वथापि तनयस्येत्येतत् पौत्रस्येति कुतो व्याख्यायते। पुत्रस्यापि सन्ततित्वात् तदर्थतया कुतो न व्याख्यायत इति चेन्न। पुत्रवाचकतोकशब्दस्य पृथक् सत्त्वेन पुनरुक्तिप्रसङ्गात् पौत्रार्थत्वेन व्याख्यातः। ननु तथाऽपि तनयशब्दवत् तोकशब्दस्याप्यपत्यसामान्यनामत्वेन सन्ततिवाचकत्वात् पुनरुक्तिः स्यादेव। अतो भिन्नविषयत्वे वाच्ये तनयशब्द एव पुत्रवाचकोऽस्तु। तोकशब्दस्तु पौत्रार्थक इति चेत् सत्यम्। पुनरुक्तिपरिहाराय तोकतनयशब्दयोर्भिन्नविषयता तावदवश्यं वाच्या। तत्रोक्तरीत्या तोकशब्द एव पुत्रार्थो वाच्यः। तोकस्य तनय इत्यत्र तोकशब्दस्य प्रथमप्राप्तत्वात् पुत्रपौत्रयोश्च मध्ये [1]पुत्रस्यैव प्रथमप्राप्तत्वाद् द्वितीयस्तनयशब्दो द्वितीयप्राप्तपौत्रार्थ एव व्याख्येय इत्यवगन्तव्यम्।

किञ्च, गवां चास्मत्सम्बन्धिनीनां धेनूनां च त्राता रक्षिता असि भवेति यावत्। कथम्भूतः ? यस्त्वमनिमेषम्, एकवचनं बहुवचनार्थे। अनिमेषान् सुरान् च रक्षमाणोऽसि। रक्षसीति यावत्॥ अनेन मया के संरक्षिताः। येनैत्र मां प्रति प्रार्थ्यत इति शङ्का परिहृतेति ज्ञातव्यम्। साधनानुष्ठानहीनान् सुरान् कथं रक्षसीत्यत उच्यते - तव व्रते त्वद्विषये त्वत्पूजात्मके यज्ञादिकर्मणि, देवैरनुष्ठिते सतीति शेषः। 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतेरिति भावः।

अध्यात्मं तोकशब्देन ज्ञानं ग्राह्यम्। तोकशब्दस्य पुत्रवाचित्वात्।

१. 'पुत्रस्यापि' घ.।

ज्ञानं चाऽत्मनो जायत इति पुत्रः [1]'ज्योतिर्ह पुत्रः। परमे व्योमन्' इति श्रुतेः। परमे व्योमन् व्योम्नि व्याप्ते भगवति विषये यद् ज्योतिर्ज्ञानं तत्पुत्र इति प्रसिद्धमिति श्रुत्यर्थः। अतस्तोकस्य आत्मनः पुत्रभूतस्य ज्ञानस्य त्राताऽसि भव। पौत्रवाचिना तनयशब्देन सौख्यमुच्यते। तस्यापि ज्ञानाख्यपुत्रजन्यत्वात्। '[2]**तत् सुखं जायते ज्ञानात् तत् सुखं [3]मुख्यमीरितम्**' इति वचनात्। अतस्तनयस्य पौत्रभूतस्य सौख्यस्यापि त्राताऽसि भव। गावो वाच इति प्रसिद्धम्। अतो गवां वाचां च त्राताऽसि भवेति यावदित्यर्थः॥ १२॥

(ऋ.म-३६३)

त्वम॑ग्ने यज्य॑वे पा॒युरन्त॑रोऽनिष॒ङ्गाय॑ चतुरक्ष इ॑ध्यसे।
यो रा॒तह॑व्योऽवृ॒काय॒ धाय॑से की॒रेश्चि॒न्मन्त्रं॒ मन॑सा व॒नोषि॒तम्॥१३॥

(ऋगर्थोद्धारः) - त्वमग्ने यज्यव इति॥ हे अग्ने! त्वं, यज्यवे चतुर्थी षष्ठ्यर्थे। यज्योः = यष्टुर्यजमानस्य, पायुः = पालकः, अन्तरः = अन्तर्यामी चासि। यतोऽन्तःस्थित्वा प्रेरणेन त्वमेव यज्ञादिरूपाः क्रियाः यजमानेन प्रवर्तयसि। अतस्त्वमेव बहिस्तत्फलदानेन पालक इति भावः। किञ्च, यो यज्युर्यष्टा, अनिषङ्गः = नितरां सङ्गहीनस्तस्मै अनिषङ्गाय, यजनफलतया, स्वर्गादिकमकामयमानायेति यावत्। तादर्थ्ये चतुर्थी। तदर्थं च चतुरक्षः, तृतीयाष्टकेऽष्टमाध्याये 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य' इति वक्ष्यमाणाद् वाक्याद् अग्नेर्द्विशीर्षत्वावगमात् प्रतिशीर्षं व्यक्षत्वाच्च चतुरक्षत्वम्। तदीयभक्त्याऽऽराधितः सन् तस्मै ज्ञानदृष्टिं दत्वा तया इध्यसे। 'इन्धी दीप्तौ' दीप्यसे प्रतीयसे इत्यर्थः।

१. 'ज्योतिर्हि' घ.। २. यत् इति पाठेन भाव्यमिति भाति। ३. 'मुखमीरितम् घ.।

कथम्भूतो यष्टा ? योऽवृकाय, वृक इति क्रूरस्य मनुष्यादिहिंसकस्य चतुष्पादस्य प्राणिविशेषस्य नाम । क्रूरे पुरुषे तदुपचर्यते । तथा च न वृकोऽवृकस्तस्मै अवृकाय अतिसौम्याय तुभ्यं धायसे 'धेट् पाने' पानाय । रातहव्यः रातं दत्तं हव्यं सोमाज्यक्षीरादिकं येनासौ तथोक्तस्तस्य यज्यवे प्रसन्नः सन्निध्यसे इति पूर्वेणान्वयः । न केवलं त्वदीयेन हविषा प्रीयसे, किन्तु कीरेः कर्तुः श्रवणादिरूपत्वत्सेवाया इति शेषः । कर्तरि षष्ठी । तथा च कीरिणा श्रवणादिरूपत्वत्सेवाकर्त्रा यजमानेन तं भक्त्योच्चरितमिति शेषः । मन्त्रं चित् मन्त्रमपि मनसा तुष्टः सन् सम्यगिति वनोषि 'वन षण सम्भक्तौ' सम्भजसि स्वीकरोषीति ॥ १३ ॥

(ऋ.म - ३६४)

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् ।
आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः
॥ १४ ॥

(ऋगर्थोद्धारः) - त्वमग्न उरुशंसायेति ॥ हे अग्ने त्वं, वाघते = वदते = वक्त्रे, अत एवोरुशंसाय, उरुः शंसः स्तोत्रं यस्यासावुरुशंसस्तस्मै = महास्तोत्राय, तत्कर्त्रे इति यावत् । यजमानाय यत् स्पार्हं स्पृहणीयं दृष्टं परमं रेक्णः सकारान्तं नपुंसकं धननामैतत् । सुखमेव च परमं धनमिति सुखं तद् वनोषि, वनतिरत्र दानार्थः । ददासि । कथम्भूतः ? यस्त्वमाध्रस्य चित् **'सप्तस्कन्धगतो लोकान् यो बिभर्ति महाबलः'** इति श्रुतेरासमन्ताद् धारकस्यापि वायोः प्रमतिः प्रकृष्टा मतिर्यस्मादसौ प्रमतिर्ज्ञानप्रदः पिता चेति सद्भिरुच्यसे प्रोच्यसे । अत्राऽङ्पूर्वाद् धृ धारणेऽस्मात् कर्तरि रन्प्रत्यये गुणे, रपरत्वे च आधरस्येति भाव्यं भूधरस्येतिवत् । तथाऽपि आङ्पूर्वाद् धृ धातोः कर्तरि कप्रत्यये कस्य लोपे आ धृ अ इति स्थिते कित्त्वाद् गुणाभावेन यणादेशे आध्रस्येति युक्तम् । महीध्र इतिवदिति द्रष्टव्यम् ।

यश्च त्वं प्रपाकं प्रकृष्टपाकवन्तं परिपक्वाधिकारम् आविर्भूतज्ञान-योग्यतावन्तं पुरुषं प्रशास्ति प्रकर्षेण शिक्षयसि । कुत इत्यत उक्तम् - **प्रदिश इति** ॥ यतः प्रदेशकोऽखिलस्योपदेशक इत्यर्थः । यश्च त्वं विदुष्टरो विद्वत्तरः अखिलं सुवेत्तेत्यर्थः । अखिलवेत्तृत्वादखिलस्योपदेशकः, अखिलस्योप-देशकत्वाच्च तदन्तर्गतस्य परिपक्वज्ञानयोग्यतावतोऽपि पुरुषस्य प्रशासक इति हेतुहेतुमद्भावो द्रष्टव्यः । अत्र वाघच्छब्दोरुशंसशब्दयोः प्रदिश इत्यस्य शास्सीत्यस्य च सामान्यविशेषभावेनापुनरुक्तिरिति द्रष्टव्यम् ॥ १४ ॥

(ऋ.म - ३६५)

त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः
॥ १५ ॥ ३४ ॥

(ऋगर्थोद्धारः) - त्वमग्ने प्रयतदक्षिणमिति ॥ हे अग्ने ! त्वं प्रयतदक्षिणं प्रयतः उद्युक्तो दक्षिणायां यः स प्रयतदक्षिणो यो मखेषु प्रयत्नाद् दक्षिणादानानन्तरं मनुष्यं विश्वतः सर्वस्मिन् काले, नित्यमिति यावत् । परिपासि परितो रक्षसि । किमिव ? स्यूतमनस्यूतं, धृतमिति यावत् । वर्मेव कवचमिव ।

पुनः कथम्भूतम् ? नरं यः स्वदुक्षद्मा स्वाद्विति सुखसाधनत्वमुच्यते । सद्मेत्यत्र सकारात् पुरतः ककारागमे सस्य षत्वे कषयोर्योगे क्षे, क्षद्मेति सद्मोच्यते । तथा च स्वादूनि सुखसाधनानि क्षद्मानि गेहानि यस्मात् परेषां भवति स स्वादुक्षद्मा, सुगृहाणां दातेति यावत् । यश्च वसतौ स्वीये गृहे स्योनकृत् = अतिथीनामन्नदानादिना सुखकरी, यश्च जीवयाजं यजतो जीवस्य जीवतो याजो यज्ञो जीवयाजः जीवनेन व्याप्तो यज्ञस्तं यजते अनुतिष्ठतीत्यर्थः । यावज्जीवं यजने दृढदीक्षो भूत्वा यजत इति यावत् ।

प्रयतदक्षिणाद्युक्तविशेषणविशिष्टस्य नरस्य किमैहिकी रक्षैव प्रयोजनम्? नेति ब्रूमः । किन्तु स्वर्गादिकं पारत्रिकमपि फलं भवति । कुत एतत् प्रतिपत्तव्यमिति चेद् आगमादिति वदामः । तत्प्रामाण्य एव कुतो विश्वास इत्यत उक्तम् - **सोमपा दिव** इति । उक्तविशेषणविशिष्टस्य नरस्य दिवः स्वर्गस्य प्राप्ताविति शेषः । सैवोपमा सेतिका या देहे सत्येव [1]क्षमा या ज्ञानमार्गे निष्ठा वेति स्त्रीलिङ्गान्तशब्दाध्याहारेणाऽकाङ्क्षा पूरणीया ।

इदमुक्तं भवति । आगमोक्ततपआदिसाधनानुष्ठानेन इह जन्मन्येव क्षमा ज्ञानमार्गनिष्ठादिकं फलं तावदुपलभ्यते । तथा च फलसंवादित्वेन आगमप्रामाण्ये सिद्धे तत्र विश्वासः सम्भवति । तथा चैहिकक्षमादिदृष्टान्तेन, अयं यजमानः पारत्रिकस्वर्गादिफललब्धा प्रमाणभूतागमोक्त-साधनानुष्ठातृत्वाद् यः प्रमाणभूतागमोक्तसाधनानुष्ठाता स फललब्धा यथाऽऽगमोक्ततपआदिसाधनानुष्ठानेन ऐहिकक्षमाज्ञानमार्गे निष्ठादि-फललब्धा पुरुष इति सामान्यव्याप्तिमूलकानुमानेन पारत्रिकमपि फल-मनुमेयमिति । यथोक्तं **'दर्शनाच्च तपआदिफलस्य'** इति ॥ १५ ॥३४॥

(ऋ.म-३६६)

इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम्
॥ १६ ॥

(ऋगर्थोद्धारः) - इमामग्ने शरणिमिति ॥ हे अग्ने यैषा त्वमग्ने इत्यादिनोक्ता या भवच्छरणप्राप्तिः इमां तां मे शरणिं भवच्छरणप्राप्तिं मीमृषोऽमीमृषः । व्यत्ययेन मर्षस्व सहस्व । अल्पोऽयमतिमहान्तं मां कथं शरणं यातीति धिया क्रोधं मा कार्षीरिति भावः । कुतः ? इममध्वानमवधारयेति

१. क्षमा = शमः ।

शेषः । दूराद् यं यस्मिन् अध्वनि वयमगाम त्वत्प्राप्त्यर्थं बहुदूरमेवागाम यस्मादनादौ भवाध्वनि परिखिन्ना वयं कथञ्चिदिदानीं त्वां प्राप्तास्त-स्मान्मीमृष इति भावः । कथम्भूतः ? यस्त्वं सोम्यानां सोमपानार्हाणां देवानां, कर्तरि षष्ठी, सोमार्हदेवताभिरापिः प्राप्यः सोम्यानां पिता जनकः प्रमतिः प्रकृष्टा मतिः यस्मादसौ प्रमतिर्ज्ञानप्रदोऽसि । यद्यपि,

'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु ।
सोमाधिकारो वेदेक्तो ब्रह्मणी द्वे शताधिके' इत्युक्तम् ।

तथाऽप्यत्रापि पितेति परब्रह्मणः प्राप्यत्वादिनोच्यमानत्वात् तद्व्यति-रिक्ताश्चतुर्मुखाख्या परब्रह्माधिका एव शतसङ्ख्याकाः सोमपानार्हदेवता ग्राह्याः । ताश्च

'प्रधानवायुर्वसवो रुद्रादित्या मरुद्गणाः ।
बृहस्पतिर्ऋभुर्द्यावापृथिव्यावश्विनौ तथा ।
विश्वेदेवाश्च पितरः शतस्था देवता मताः ॥'

इति प्रमाणानुसारेण ज्ञातव्याः । तत्र प्रधानवायुना सह मरुतः पञ्चाशत्, वसवोऽष्टौ, रुद्रा एकादश, आदित्या उरुक्रमव्यतिरिक्ता एकादश । उरुक्रमस्य प्राप्यत्वेनोक्तत्वात् । बृहस्पतिर्ऋभुर्द्यावापृथिव्यावश्विनौ चेति षट् । विश्वेदेवा दश, पितरस्त्रय इति शतसङ्ख्या द्रष्टव्या ।

पुनः कथम्भूतः ? मर्त्यानां मनुष्याणां भृमिः संसारे भ्रामकश्चासि । तथा ऋषिकृत् 'ऋष ज्ञाने' भावप्रधानो निर्देशः । ऋषित्वकर्ताऽसि, ज्ञानदानेन भक्तान् ऋषीन् करोषीति यावत् ॥ १६ ॥

(ऋ.म-३६७)

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्यावहा दैव्यं जनमासादय बर्हिषि यक्षि च प्रियम्
॥ १७ ॥

(ऋगर्थोद्धारः) - मनुष्वदग्न इति ॥ हे शुचे ! शुद्ध अङ्गिरः ! अङ्गिरसुत्र! अग्ने ! मनुष्वदित्यादिवतिः षष्ठ्यर्थे । 'तत्र तस्येव' (पा. सू. ५-१-११६) इति स्मरणात् । तथा च मनुष्वत् = मनोर्यथा, अङ्गिरस्वत्= अङ्गिरसो यथा, ययातिवत्= ययातेर्यथा, पूर्ववत् = अन्येषामपि पूर्वपुरुषाणां यथा, सदने, सप्तमी द्वितीयार्थे । सदनं प्रत्यागतोऽसि । तथा सदने मदीयसदनम् अच्छयाहि, अभेरर्थे अच्छेति निपातः । अच्छ= अभि = प्रति, आयाहि ।

अथवा विमतं सकर्तृकं कार्यत्वाद् घटवदिति प्रयोगदर्शनेन 'तत्र तस्येव' (पा. सू. ५-१-११६) इति स्मरणस्य प्रायिकत्वात् प्रथमान्तादेव वतिः । तथा च, मनुष्वत् = मनुर्यथा, अङ्गिरस्वत् = अङ्गिराः यथा, ययातिवत् = ययातिर्यथा, पूर्ववत् = अन्येऽपि पूर्वतनाः पुरुषा यथा, सदने = स्वकीये गृहे, त्वां प्राप्ताः, तथा सदने = मदीयं सदनमच्छ अभिप्रयाहि । ममापि त्वत्प्राप्त्यर्थमिति शेषः । आगत्य च, दैव्यं = देवतात्मकं जनं, देवसङ्घमावह आनय, आकारयेति यावत् । आगतं च देवसङ्घं बर्हिषि घृतस्थानात् पश्चिमतो विद्यमानं यद् देवोपवेशनयोग्यं स्थानं तद् बर्हिः । तत्र आसादयोपवेशय । उपविष्टं च तव प्रियं देवसङ्घं यक्षि च यज च । ननु ऋत्विजां कर्मैतत् यद् देवानां यजनं तदहं कथं करोमीति चेन्न तवाखिलजीवप्रेरकतयाऽखिल-जीवान्तर्गतत्वेन ऋत्विक्षु स्थित्वा तवैव यष्टृत्वात् त्वमेव यक्षीत्युक्तमि-त्याशयात् ॥ १७ ॥

(ऋ.म-३६८)

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते च कृमा विदा वा ।
उत प्रणेष्यभि वस्यो अस्मान् सं नः सृज सुमत्या वाजवत्या
॥१८॥ ३५ ॥ ३१ ॥

(ऋगर्थोद्धारः) - एतेनाग्ने ब्रह्मणेति ॥ हे अग्ने ! एतेन ब्रह्मणा वेदवाचा

वावृधस्व अतिशयेन वर्धस्व । अत्र वर्धनं नाम वृद्धिर्न विवक्षिता । भगवतो नित्यवृद्धत्वेन वृद्धिं प्राप्नुहीत्यर्थस्य बाधात् । अतो व्यक्तत्वापरपर्यायं स्पष्टत्वमेवाभिप्रेतम् । तथा च वावृधस्व स्पष्टो भव । व्यक्तो भवेत्यर्थः । कथम्भूतेन ब्रह्मणा शक्ती वा शक्त्या वा विदा वा ज्ञानतो वा यद् ब्रह्म यां वेदवाचं ते त्वद्विषये चकृम । यथाशक्ति यथाज्ञानं च कृतया वैदिक्याऽनया स्तुत्याऽस्माकं प्रीतः सन् प्रत्यक्षो भवेत्याशयः । उत किञ्च अस्मान् वस्यो भद्रमभिप्रणेषि प्रणयसि प्रणय प्रापय । अजां ग्राममनयदितिवद् द्विकर्मता । किं तद्भद्रमित्यतस्तस्यैव विवरणम् - नोऽस्मान् वाजवत्या अन्नवत्या, उपलक्षणमेतत् । समस्तभोगोपेतया सुमत्या संसृज सम्यङ् नित्यमेव सृज योजयेत्यर्थः । यद्वा, शक्ती वा विदा वेत्येतत्र ब्रह्मणा यां चकृमेत्युक्त-वेदस्तुतिविषयम् । किन्त्वध्याहृतस्य कर्मेत्यस्य । यथा च यत् यस्मात् शक्ती वा शक्त्या च विदा वा ज्ञानेन च ते कर्मेति शेषः । त्वदीयं त्वत्प्रीतिकरं सुकर्म चकृम । तस्माद् उत प्रणोषीत्यादिसम्बन्धः । 'कर्मणा ज्ञानमातनोति' इति श्रुतेः ॥ १८ ॥ ३५ ॥ ३१ ॥

सूक्तम् - ३२

आजीगर्तिः शुनःशेपः देवरात ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

(ऋ.म-३६९)

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्रवक्षणा अभिनत्पर्वतानाम् ॥ १ ॥

(ऋगर्थोद्धारः) - इन्द्रस्य नु वीर्याणि प्रवोचमिति ॥ पञ्चदशर्चमेतदैन्द्रं सूक्तम् । नु इति क्षिप्रनाम । इदानीमेवाहम् इन्द्रस्य प्रसिद्धस्य परमेश्वरस्य वा वीर्याणि प्रवोचं प्रावोचम् । लुङ् लडर्थे । आचक्षे कथम्भूतानि ? वज्री अयमिन्द्रो प्रथमानि मुख्यानि यानि वीर्याणि चकार चक्रे । अनन्तत्वेऽपि

तच्चरित्राणां प्रधानानि ब्रवीमीति यावत्। तान्युच्यन्ते इन्द्रः प्रसिद्धो वज्रीत्युक्तत्वात्। वज्ररूपायुधेनाहिं तन्नामकं दैत्यमहन् जघान। किञ्च, वज्री इन्द्रः अन्वपः 'लक्षणेत्थम्भूताख्यान' (पा.सू. १-४-९०) इति लक्षणेऽनुः कर्मप्रवचनीयः। अपः अनु = जलानुसारेण, ततर्द। 'तर्द हिंसायां' हिंसितवान्-मार्गमिति शेषः। मार्गस्य हिंसा नाम खननमेवेति ज्ञातव्यम्। अहिर्नाम दैत्यो लोकोपद्रवाय पर्वतेषु नदीद्वाराणि [१]रुध्वा मेघपतितं चोदकमन्तरिक्षे प्रतिबध्याऽस्थितः। तं हत्वेन्द्रो नदीद्वाराणि विवृत्य प्रवाहायोदकमार्गं खनितवान्।

अपि च, वज्री = इन्द्रः, पर्वतानां वक्षणाः 'वह प्रापणे' गमनसाधनत्वात् पक्षान् प्राभिनत्। पक्षवाचिनो वक्षणाशब्दस्य स्त्रीलिङ्गत्वं तु स्त्रीवाचक-दारादिशब्दे पुल्लिङ्गत्वादिकमिव शब्दस्वाभाव्यादिति ज्ञातव्यम्। अथवा वज्री 'वज गतौ' ज्ञानवानिन्द्रो वासुदेवस्तु, अहिं 'हीति निश्चयवाची स्यात्' इति वचनान्निश्चयरूपज्ञानविरोधिनं भक्तानां संशयं, वज्रीत्युक्तत्वाद् ज्ञानाख्यायुधेन, अहनत् = जघान, विनाशितवानित्यर्थः।

किञ्च, अन्वपः 'अनुर्लक्षणे' (पा.सू. १-४-८४) इति सूत्रेणात्रानुर्हेतौ कर्मप्रवचनीयः। अप्शब्दः कर्मवाची। तथा चापः अपां कर्मणामनु अनुसाराद् भक्तैः कृतानि सत्कर्माणि निमित्तानि कृत्वा ततर्द हिंसितवान्, तदीयान् ज्ञानस्य विघ्नानिति शेषः। अपि च पर्वतानां जीवायुरूपदण्डस्य जन्माद्याः पर्वस्थानीयाः। तथा च मत्त्वर्थे तप्रत्ययमङ्गीकृत्य जन्माख्यपर्ववतां जीवानां योग्यतया कुवादिनां वक्षणाः 'वच परिभाषणे' कुवादिप्रसङ्गात् तदीयानि दुष्टानि वचांसि तत्त्वमस्यादिवाक्यस्यैक्यरूपत्वादिव्याख्यानरूपाणि प्राभिनत्। भक्तेभ्यः उपक्रमोपसंहारादि-विरोधविचाररूपाः सुयुक्तीर्दत्वा ताभिर्निराकृतवानित्यर्थः॥ १॥

१. 'निरुध्य' घ.।

(ऋ.म-३७०)

अहन्नहिं पर्वते शिश्रियाणं त्वष्टाऽस्मै वज्रं स्वर्यं ततक्ष।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमवजग्मुरापः ॥ २ ॥

(ऋगर्थोद्धारः) - अहन्नहिमिति ॥ इन्द्रः पर्वते, एकवचनं बहुवचनार्थे पर्वतेषु शिश्रियाणं नदीद्वारनिरोधेन आश्रितवन्तमहिं दैत्यमहन् हतवान्। केनाऽयुधेन इत्यत उच्यते। यद् यस्मात् त्वष्टा देववर्धकिर्विश्वकर्माऽस्मै इन्द्राय इन्द्रस्यार्थे स्वर्यं 'स्वृ शब्दोपतापयोः' इति धातोः स्वर्यं उपतप्तं शस्त्राणि तापपूर्वं निशितानि भवन्ति। अतो निशितत्वस्योपलक्षणमेतत्। निशितं वज्रं ततक्ष निर्मितवान्। तथा चेन्द्रो विश्वकर्मणा निर्माय दत्तेन वज्राख्यायुधेनाहिमहनदिति भावः। अहौ हते सति किं जातमित्यत उच्यते-**वाश्रा इवेति** ॥ अस्य ऐन्द्रत्वसिद्ध्ये एतदीरिता इत्यध्याहार्यम्। तथा चाहौ दैत्ये हते सति एतेन इन्द्रेण ईरिता आपो नद्य इति यावत्। स्यन्दमानाः 'स्यन्दू प्रस्रवणे' [१]स्रवन्त्यः, अविच्छिन्नप्रवाहवत्य इति यावत्। वाश्राः शिशुवत्साः, शिशुभूते वत्से वात्सल्यवत्य इति यावत्। धेनवो गावः शिशूनिव अञ्जः आर्जवेन, तत्प्रतिबन्धकस्याहेर्हतत्वादप्रतिबन्धेनेति यावत्। समुद्र-मवजग्मुरवाजग्मुर्गतवत्य इत्यर्थः। अथवेन्द्रः परमेश्वरः पर्वते भक्तजीवेषु शिश्रियाणं श्रितवन्तमहिं संशयमहन्।

कथमहन्नित्यत उच्यते - त्वष्टा 'त्विट् प्रकाशे' प्रकाशात्मा विरिञ्चोऽस्मै परमेश्वराय, परमेश्वरविषय इति यावत्। स्वर्यं 'स्वृ शब्दोपतापयोः' इति धातोः शब्दसम्बन्धिवेदजन्यमिति यावत्। वज्रं ज्ञानाख्यमायुधविशेषं ततक्ष निर्मितवान्। तथा च विरिञ्चदत्तज्ञानविषयो भूत्वा परमेश्वरो भक्तानां संशयं विनाशितवानिति भावः। संशये नष्टे सति किं जातमित्यत उच्यते।

१. 'स्रवत्यः' घ.।

संशये नष्टे सति परमेश्वरेणेरिता आपः क्रियाः स्यन्दमानाः, अप्रतिहतवृत्तय इति यावत्। अञ्जः आर्जवेन प्रतिबन्धकस्य संशयस्य नष्टत्वादेवेति भावः। समुद्रमेव जग्मुः सम्यगुद्रिक्तं गुणपूर्णं परमेश्वरं प्रत्येव वाश्रा धेनव इव [१]अवजग्मुः व्रजन्तीत्यर्थः । संशये नष्टे भक्ताः परमेश्वरमेव यजनादि-सत्कर्मभिः आराधयन्तीत्याशयः ॥ २ ॥

(ऋ.म - ३७१)

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य ।
आ सायकं मघवाऽदत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥ ३ ॥

(ऋगर्थोद्धारः)- वृषायमाण इति ॥ मघवा= धनादिमान् इन्द्रः, वृषाय-माणः = वृषेवाऽचरन् सन्, तृषितो वृषा यद्वदुदकं स्वीकरोति तथैवा यद्वा, वृषा वर्षिता ईशः समर्थः स इवाऽचरन् तद्वत् कर्म कुर्वन् सन् सोममवृणीत समीचीनोऽयं सोम इति स्वीकृतवान् । स्वीकृत्य च त्रिकद्रुकेषु त्रिषु [२]त्रिकद्रुकेषु महिषो यवाशिरमित्यादिना प्रसिद्ध्या वा, कं सुखं द्रुतं 'द्रु गतौ' प्राप्तमत्रेन्द्रेणेति योगेन वा सवनानि कद्रुकाणि। तेषु सुतस्य - द्वितीयार्थे षष्ठी। सुतसोममपिबत्। तथा मघवा धनवान् इन्द्रः सायकं 'षो अन्तकर्मणि' इति धातोः, सायं = अन्तं, दैत्यानां विनाशं करोतीति सायङ्करं वज्रम् आ [३]अदत्त सवर्णदीर्घे सति आदत्त = समाददे । तेन च वज्रेणाहीनाम् अहिनामकदैत्यानां मध्ये प्रथमजां प्रथमजं मुख्यम् एनमहिनामकं [४]दैत्यमहन्नित्यर्थः ।

अथवा अध्यात्मम् - मघवा = धनादिमान् परमेश्वरः, वृषायमाणः सन् सोमं मनः अवृणीत भक्तमनः समीचीनमिति स्वीकृतवान् । स्वीकृत्य च

---

१. 'जग्मुः' ध.। २. 'कद्रुकेषु इति समीचीनः पाठः स्यात्।
३. 'आदत्त' घ.। ४. 'आहन्' घ.।

त्रिकद्रुकेषु 'निधेहि गोरधित्वचि' इत्यत्रोक्तरीत्या, हृदयं, मुखं शिरश्चे-त्याधारत्रयेषु विद्यमानं, तत्र हि प्राचुर्येण [१]'मनोवृतः सुतस्य ज्ञानभक्त्यादिना सुतं सोमं मनः अपिबत् स्वविषयं मनश्चकारेति यावत्। तथा मघवा परमेश्वरः सायकं सायमन्तमविद्यादीनां विनाशं करोतीति सायङ्करं वज्रं ज्ञानम् आ आदत्त समाददे। भक्तानां मनस्युत्पादितवान् इति यावत्। तेन च ज्ञानाख्य-युद्धेन अहीनां 'हि गतौ' नञ्समासः । न हयः अहयः ज्ञानविरोधिनः पापादयः, तेषां मध्ये प्रथमजां प्रथमजं मुख्यं 'क्लिश्यत्यन्तरितो जनः', 'संशयात्मा विनश्यति', 'नायं लोकोऽस्ति न परो न सुखं संशयात्मनः' इत्यादिवचनात् पापफलभूतमेनं संशयमहन्नित्यर्थः ॥ ३ ॥

(ऋ.म - ३७२)

यदिन्द्राहन् प्रथमजामहीनामान्मायिनाममिनाः प्रोतमायाः ।
आत्सूर्यं जनयन् द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥ ४ ॥

(ऋगर्थोद्धारः) - यदिन्द्राहन्निति ॥ आन्मायिनामित्यत्र आत्, मायिनामिति पदच्छेदः। प्रोत 'इत्यत्र प्र उतेति पदच्छेदः। हे इन्द्र त्वं यद् यस्माद् अहीनामहिनामकदैत्यानां प्रथमजां प्रथमजं मुख्यमेनमहिमहन् हतवानसि। आत् ततः कारणात् मायिनां मायाविनामन्येषां दैत्यानां माया उत छद्मरूपा मायाश्च प्र अमिनाः प्रामिणाः 'मीञ् हिंसायां' व्यनाशयः। अहिवधानन्तरभावीन्द्रमहिमान्तरमुच्यते। आत् उत तत एव अहिवधादेव त्वं सूर्यं द्यां द्युदेवतामुषसं दिवसानामभिमानिदेवतां च जनयन् उत्पादकः सूर्यद्युदिनादेश्च कर्ता जातोऽसीति यावत् । पुरा सूर्यादिव्यापारा अहिना दैत्येन निरुद्धाः तद्वधेन पुनस्तद्व्यापाराणां कारयिताऽभूरित्यर्थः। ननु तथाऽपि

---

१. 'मनोवृत्तिः' घ.।

अहिवधेन इतरमायानाशः कथं ? तस्य मुख्यत्वेनेतरदैत्याश्रयत्वात्। मुख्यत्वं कुत इति चेत् तादीत्ना तावता बलेनोपेतमिति शेषः। अहिना समानबलमन्यं शत्रुं न विवित्से किल 'विद्लृ लाभे' न लभसे खलु।

अध्यात्मपक्षे, हे इन्द्र परमेश्वर यद् यस्मादहीनां ज्ञानविरोधिनां पापादीनां मध्ये प्रथमजां प्रथमं मुख्यं भक्तानां संशयं त्वं विनाशितवान् तस्मात् मायिनां मायावादिनां मायाः कुटिलोक्तीर्नष्टसंशयैः स्वजनैः [1]मायावादिजयेन प्रमिनाः व्यनाशयः। आत् संशयनाशादेव, संशयनाशानन्तरमिति यावत्। सूर्यं ज्ञानोपदेशहेतुमाचार्यं तत्सङ्गतिमिति यावत्। ननु तथाऽपि संशयनाशेन मायावादिकुटिलोक्तिनाशः कथम् ? ज्ञानविरोधिनां पापानां मध्ये संशयस्य मुख्यत्वात्। मुख्यत्वं कुतः ? तादीत्ना तावता बलेनोपेतं संशयेन समानबलमन्यं शत्रुं न विवित्से किल न [2]लभसे खलु। **'क्लिश्यत्यन्तरितो जनः', 'संशयात्मा विनश्यति', 'नायं लोकोऽस्ति न परो न सुखं संशयात्मनः'** इति वचनादित्यर्थः॥ ४॥

(ऋ.म - ३७३)

अहन् वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन।
स्कन्धांसीव कुलिशेना विवृक्णाऽहिः शयत उपपृक् पृथिव्याः
॥ ५॥ ३६॥

(ऋगर्थोद्धारः) - अहन् वृत्रमिति॥ इन्द्रो महता श्रेष्ठेन वधेन वज्रेण वृत्रं तन्नामकं दैत्यं वृत्रतरं वृत्रादप्यधिकं वृत्रतरनामकं च दैत्यं व्यंसं विगतांससन्धिं कृत्वा, शिरश्छित्वेति यावत्। अहन् प्राणाद् वियोजितवान्। एवं वृत्रं वृत्रतरमहिं चेति त्रीन् दैत्यान् इन्द्रो हतवान्। अनन्तरं विवृक्णा

---

१. 'मायावादिना जयेन' घ.। २. 'लभे' व.।

विवृक्णानि वि विशेषेण वृक्णानि छिन्नानि स्कन्धांसीव तरोः शाखा इति कुलिशेन वज्रेण विवृक्णा विवृक्णाः छिन्नाः सन्तः, अहिः, उपलक्षणमेतत्। वृत्रवृत्रतरौ अहिश्च एवं त्रयो दैत्या पृथिव्या उपपृक्, एकवचनं बहुवचनार्थे। पृथिवीसम्पर्कवन्तः सन्तः शयते अशेरत पृथिव्यां पतिता इति यावत्। अत्र अह्यादीनां दैत्यानां लोकत्रयसञ्चारसद्भावाद् [1]अन्तरिक्षादिसम्बद्धत्वेन पतनशङ्कापरिहारेण पृथिवीसम्बद्धत्वेन पतनस्यासिद्धत्वेन तदेव विधेयमिति ज्ञातव्यम्।

अध्यात्मपक्षे, इन्द्रः परमेश्वरो महता श्रेष्ठेन वधेन वधसाधनेन वज्रेण ज्ञानेन वृत्रं वृणोति आवृणोतीति वृत्रमज्ञानम् 'आवृतं ज्ञानमेतेन' इति। वृत्रतरं वृत्रादप्यधिकं [2]मिथ्याप्रत्ययः। कथम्भूतं वृत्रं वृत्रतरं च ? इत्यत उक्तम् - **व्यंसमिति**॥ प्रत्येकमुभयोर्विशेषणम्। विसंवादनात् व्यंसं, वेदविसंवादाद्यर्थावगाहित्वाद् व्यंसशब्दवाच्यम्। अहन् एवं अहिशब्दवाच्यः संशयो, अज्ञानं, मिथ्याप्रत्ययश्चेति त्रीन् ईश्वरो नाशितवान्। अनन्तरं विवृक्णा स्कन्धांसीव, कुलिशेन = कुलमस्यास्तीति कुली, तस्य कुलिनः ज्ञानिनः, तत्सन्ततेरिति यावत्। शं सुखं यस्माद् ज्ञानाद् भवति, तज्ज्ञानं कुलिश इत्युच्यते। तेन कुलिशेन ज्ञानेन विवृक्णा छिन्नाः। पुनः कथम्भूताः? पृथिव्या उपपृक्, एकवचनं बहुवचनार्थे। प्रथितत्वात् पृथिवी बुद्धिः, तन्नामकमिन्द्रियं तत्सम्पर्कवन्तः, तद्गता इति यावत्। अहिः संशयः, उपलक्षणमेतत्। वृत्रवृत्रतरशब्दवाच्यौ अज्ञानमिथ्याप्रत्ययावपि ग्राह्यौ। एवं त्रयः शयते अशेरत पतिताः नष्टाः ज्ञानेन छिन्ना सन्तः बुद्धेः सकाशाद् वियोजिता इति यावदित्यर्थः। अत्र संशयादीनां पृथिवीशब्दवाच्य-बुद्धिरूपेन्द्रियगतत्वस्य सिद्धत्वेन विधेयत्वासम्भवात् तदनुवादेन शयत इत्येतदेव विधेयमिति ज्ञातव्यम्॥ ५॥ ३६॥

---

१. 'अन्तरिक्षासम्बद्धत्वेन' घ.। २. 'मिथ्याप्रत्ययं' व.।

(ऋ.म-३७४)

अयोद्धेव दुर्मद आहिजुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां संरुजानाः पिपिष इन्द्रशत्रुः॥ ६ ॥

(ऋगर्थोद्धारः) - अयोद्धेवेति ॥ 'अहन् वृत्रम्' इत्युक्तमेवात्र वृत्रसामर्थ्यप्रकटनेन प्रपञ्च्यते । इन्द्रशत्रुः = इन्द्र एव शत्रुः शातयिता यस्यासाविन्द्रशत्रुः वृत्रो अयोद्धेव न विद्यते प्रतियोद्धा प्रतिभटो यस्यासौ अयोद्धा स इव दुर्मदो दर्पोद्रिक्तो महावीरं वीरतमं तुविबाधं तुवीनां महोच्चानां रिपूणां बाधं बाधकमृजीषं सोमे कण्डिते सति योंऽशोऽवशिष्यते स ऋजीष इत्युच्यते। वल्कल इति यावत्। स यथा दृढो भवति तथा दार्ढ्यहेतोर्गौण्या वृत्त्या ऋजीषाख्यं, तद्वददतिदृढमिति यावत्। शक्रमाजुह्वे हि । हिशब्दः किलार्थे । आह्वयामास किल । युद्धायेति शेषः । कृताह्वानश्च वृत्रोऽस्य शक्रस्य वधानां तत्कर्तृकप्रहाराणां समृतिं सं सम्यक् ऋतिं प्राप्तिं नातारीत् न तीर्णवान् शक्रकृतप्रहारवञ्चनक्षमो नाभूत् । किन्तु प्रहारपीडितः सन् पतन् इन्द्रशत्रुर्वृत्रो रुजानाः पूर्वमेव वृत्रकृतपीडाप्राप्तया रुजा रोगेण युक्ताः अत एव दुर्बलाः मानुषीः प्रजाः सम्पिपिषे सञ्चूर्णितवान्। यदा तदीयो देहः प्रजोपरि पतितस्तदा तद्देहेनापि प्रजाश्चूर्णिता इत्यर्थः ।

अध्यात्मपक्षे, अयोद्धेव दुर्मदः इन्द्रशत्रुरिन्द्रः परमेश्वर एव शत्रुः शातयिता यस्यासाविन्द्रशत्रुर्वृत्रोऽज्ञानमिति यावत्। महावीरं तुविबाधमृजीषं परमेश्वरं युद्धायाऽजुह्वे हि आह्वयामास किल। तद्विषयकमभवदिति यावत्। कृताह्वानं च तदज्ञानमस्य विष्णोर्वधानां तत्कर्तृकप्रहाराणां समृतिं सम्प्राप्तिं नातारीत् न तीर्णवान् । परमेश्वरकृतप्रहारवञ्चनक्षमं नाभूत् । भक्तेभ्यः स्वापरोक्षं दत्वा तेभ्यो निष्कासितमिति यावत्। एवमीश्वरेण भक्तेभ्यो निराकृतं तदज्ञानं रुजानाः संसाररोगयुक्ताः, सृतिस्था इति यावत्। प्रजाः सम्पिपिषे बबाध इत्यर्थः ॥ ६ ॥

(ऋ.म-३७५)

अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः ॥ ७ ॥

(ऋगर्थोद्धारः) - अपादहस्त इति ॥ अपात् = पादरहितः, अहस्तः = हस्तरहितः, सञ्छिन्नपादबाहुरपि वृत्रः, केवलेन देहेनेति शेषः। इन्द्रमपृतन्यत्। युयोधैव। युध्यतिकर्मसु पाठात्। आस्येत्यत्र आ + अस्य इति पदच्छेदः। तदा स इन्द्रः, अस्य = तस्य वृत्रस्य, सानौ = गौण्या वृत्त्या गिरेः सानुप्रतिमेऽत्यन्तस्थूले कण्ठदेश इति यावत्। वज्रमध्याजघान = प्रहृतवान्। व्यसृजत्। स वृत्रः एवं वृष्णोः वर्षितुरिन्द्रस्य प्रतिमानं प्रतिरूपं, शत्रुरिति यावत्। बुभूषन् = भवितुमिच्छन्, वध्रिः वध्धातोः कर्मणि रिप्रत्यये वधयोग्यः। अथवा वध्रिशब्दस्य नीचनामसु पाठात्, नीचो वृत्रोऽसुरस्तेनेन्द्रेण व्यस्तो निरस्तः। ताडितो हतः सन् पुरुत्रा बहुषु स्थानेषु अशयत् अशेत अपतत्। वृत्रदेहो बहूनि स्थानानि व्याप्य पतित इत्याशयः।

अध्यात्मपक्षे तु - अपाद् अहस्तो वृत्रः, पादहस्तयोर्गमनादान-प्रवृत्तिहेतुत्वात् सत्तर्कागमयोरपीश्वरे मनःप्रवृत्तिहेतुत्वेन साम्याद् गौण्या वृत्त्या सत्तर्कागमयोः पादहस्तशब्दप्रतिपाद्यत्वात् तर्कागमाभ्यां रहितं तदानुकूल्यरहितमज्ञानमिन्द्रं परमेश्वरमपृतन्यत् । अयुध्यत । तं विषयीचकारेति यावत्। परमेश्वरश्चास्याज्ञानस्य सानौ गिरेः सानुवदुत्कृष्टे स्वरूपे वज्रमध्याजगाम स्वविषयकत्वेन संयुध्यमानमिव स्थितमज्ञानं प्रमाणाख्यवज्रेण प्रहृतवानिति। स एवं वृष्णोः वर्षितुर्विष्णोः प्रतिमानं प्रतिरूपं शत्रुरिति विषयीकरोतीति यावत् । बुभूषन् भवितुमिच्छन् वध्रिर्नीचो वृत्रोऽज्ञानाख्योऽसुरो व्यस्तो निरस्तः। पुरुत्रा बहुस्थानेषु अशयत्। भक्तेभ्यो निराकृतमज्ञानं तमोयोग्येष्वशयदिति यावदित्यर्थः ॥ ७ ॥

(ऋ.म- ३७६)

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः।
याश्चिद् वृत्रो महिना पर्यतिष्ठत् तासामहिःपत्सुतः शीर्बभूव ॥ ८ ॥

(ऋगर्थोद्धारः) - नदं न भिन्नमिति ॥ नदीद्वारनिरोधकत्वेन स्थितममुया 'वृत्रपुत्रा दानुः' इत्युत्तरस्यामृचि वक्ष्यमाणत्वाद् दनुनाम्ना मात्रा सहैवाऽदौ शक्रेण हतं पश्चात् शयानं पतितं वृत्रं भिन्नं नदं न, नदशब्देनात्र तत्तीरमुपलक्ष्यते । भिन्ननदस्य तीरमिव अति अतिक्रम्यैव आपो मनोरुहाणाः मनसोऽपि पूर्वं वेगेनेति यावत् । रुहाणाः आरुहाणाः स्थलान्यारोहन्त्यः उत्तरोत्तरस्थलेषु प्रवाहवत्य इति यावत् । यन्ति प्रापयन्ति । कास्ता आपः वृत्रो याश्चिद् यास्त्वापः पूर्वस्मिन् काले महिना स्वमहिम्ना स्वसामर्थ्येन [1]पुत्रापेक्षया पूर्वस्मिन् स्थाने पर्यतिष्ठत् । परि परीत्य निरुध्यातिष्ठत् । पुनः कथम्भूतायामिति शङ्कायां तत्पुत्रेणापि निरुद्ध इत्युच्यते । वृत्रसुतोऽहिश्च यासां तासां वृत्ररुद्धानामपां गतिं तद्वदेवाभिनिरुध्यन्निति शेषः । पत्सुतः शीः पादशब्दस्य 'पद्दन्नोमास्' (पा.सू. ६-१-६३) इति पद् इत्यादेशः । तस्य सप्तमीबहुवचनं पत्स्विति । सा च पञ्चमी सप्तम्यर्थे । ततस्तसिः ।

ननु तर्हि 'समासप्रत्यययोः' इति पञ्चम्यर्थकसप्तमीविभक्तिलोपे पत्तः पत्त इति स्यादिति चेन्न । [2]छन्दसि विभक्त्यलोपाङ्गीकारात् । तथा च पत्सुतः = पादतः, अनन्तरमिति शेषः । अन्यथा पादतः शीरित्यस्यासङ्गत्यापत्तेः । शीः शेता । 'शीङ् स्वप्ने' इति धातोः । बभूव । वृत्रो हि नदीद्वारेषु शिरो निधायापां मार्गे पतित्वा तासां गतिं निरुणद्धि । अहिस्तु

१. 'पुत्रभूताद्यपेक्षया' घ. ।
२. 'छान्दसविभक्त्यलोपाङ्गीकारात्' घ. ।

तमप्यतिक्रम्यापो यास्यन्तीत्यविश्वासेन तत्पादतोऽनन्तरं शयित्वा निरुणद्धि । तदुभयहनने तु प्रतिबन्धकाभावादतिवेगेन प्रयास्यन्तीत्याशयः ।

अध्यात्मं, वृत्रशब्दवाच्याज्ञानस्य पुत्रः संशयोऽहिरित्युच्यते । स तु ज्ञानभक्त्यादिसर्वशुभनिरोधकत्वेनाज्ञानवदेव स्थितः । सोऽपि भक्तशरीरस्थितेनेश्वरेण हत इति तात्पर्यं द्रष्टव्यम् । पदानां योजना तु पूर्ववदेव । नन्वथापि वृत्रशब्दवाच्याज्ञानस्य पादतोऽनन्तरमहिः संशयः शेता बभूवेत्यसङ्गतम् । अज्ञानस्य पादाभावादिति चेन्न । तत्त्वविषयकाज्ञाने सति पश्चात् संशयो भवतीति संशयस्याज्ञानानन्तर्यमात्र एव तात्पर्याङ्गीकारात् ॥ ८ ॥

(ऋ.म - ३७७)

नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः ॥ ९ ॥

(ऋगर्थोद्धारः)- नीचावया इति ॥ अस्या इति श्रवणाद् येत्यध्याहारः। तथा च याऽपि च वृत्रपुत्रा वृत्रः पुत्रो यस्याः सा वृत्रपुत्रा वृत्रमाता दनुः, स्वार्थे प्रत्ययः । दनुः तन्नाम्नी, नीचावयाः, 'वय बन्धने' नीचे वयति बध्नातीति नीचावयाः अभवत् । नीचस्थाने अहेरप्यनन्तरमपां बन्धनमकार्षीदिति यावत् । अस्यास्तस्याः दनोर्वधः, विभक्तिव्यत्ययेन वधमिन्द्रः अवा अधस्तने काले लोके, एष्यत्कालस्योपरितनकालत्वप्रसिद्धेस्तदपेक्षया अर्वाक्तनः पृष्ठतो विद्यमानः अतीतः, पूर्वतन इति यावत्। यः कालः स अधस्तनकाल इत्युच्यते । कोऽर्थः ? वृत्रवधकालापेक्षया पूर्वकाल इति यावत् । जभार जहार अहरत् । कृतवानिति यावत् ।

ननु वृत्रवधापेक्षया प्रथमं दनोर्वधे किं कारणमित्युच्यते । सूः = सूते इति सूर्माता । सुतमतिक्रम्यापो यास्यन्तीति बुद्ध्या इन्द्र आगत्य सुतं हनिष्यतीति भिया सुतावनार्थं च उत्तरा = सुतस्योपरिस्था आसीत् । पुत्रो

वृत्रस्त्वधर आसीत् । तस्मादिन्द्रः उपरिस्थां दनुं निहत्यैवाधस्तनं वृत्रं जघानेत्यर्थः । ततो दानुर्दनुः सहवत्सा धेनुरिव सपुत्रा शये पतितेत्यर्थः।

ननु दनुः कश्यपस्य भार्या । न च वृत्रः कश्यपस्य पुत्रः । किन्तु त्वष्टुः । तत् कथं वृत्रमाता दनुरित्युच्यते विरोधादिति चेदुच्यते । द्वौ वृत्रौ । तत्रैकः कश्यपाद् दनुजोऽभूत् । अस्यैव क्वचिद् दैत्यत्वोक्तिश्च तामसत्वादेव, न तु दितिपुत्रत्वात् । अपरश्च त्वष्टुर्जात इति न विरोधः । नन्वथापि वृत्रद्वयकल्पना कुतः ? इति चेदुच्यते । असौ कश्यपाद् दनौ जातो वृत्रः पापात्मा श्रूयते **'दीर्घं तम आशयदिन्द्रशत्रुः'** इति । त्वष्टुर्जातो वैष्णवः पुण्यात्मा भागवते च प्रसिद्धः । चित्रकेतुनामको हि राजा सङ्कर्षणानुग्रहेण विद्याधरत्वं प्राप्य गगने चरन् पार्वतीशापात् त्वष्टुर्दक्षिणाग्नौ वृत्रनामकः सन् जज्ञ इति स्पष्टं तत्राभिधानात् ।

'अहं हरे तव पादैकमूलदासानुदासो भविताऽस्मि भूयः ।
मनः स्मरेताऽऽत्मपतेर्गुणांस्तु गृणीत वाक्कर्म करोतु कायः ।
मनोऽरविन्दाक्ष दिदृक्षते मे ममोत्तमश्लोकजनेषु सख्यम् । भूयात्' ॥

इति भागवत एवेन्द्रेण सह सङ्ग्रामसमये त्वष्टृपुत्रभूतासुरवचनाच्च । अतो द्वौ वृत्रौ कल्प्याविति द्रष्टव्यम् ।

अध्यात्मं तु वृत्रशब्दवाच्याज्ञानजनकत्वेन तमोगुणरूपदुर्गाभिन्यमाना जडा मूलप्रकृतिरिह वृत्रमातेत्युच्यते । **'प्रमादमोहौ तमसो भवतोऽज्ञानमेव च'** इति वचनात् । तस्याः [1]दानुत्वं च 'दो अवखण्डने' इति धातोः ज्ञानभक्त्यादिगुणखण्डकत्वेनेति द्रष्टव्यम् । तथा च तमोगुणात्मिका मूलप्रकृतिरज्ञानं, संशयोऽन्ये दोषाश्चेश्वरेण नाशिता इति तात्पर्यम् । ननु तर्हि तमोगुणात्मकमूलप्रकृत्यज्ञानसंशयादेरेकत्वेन तन्नाशे सर्वेषां

१. 'दनुत्वं' घ. ।

मोक्षापत्त्येदानीं पुरुषेषु संसारोपलम्भो न स्यात् । उपलभ्यते च संसारः । अतः प्रकृत्यादिकं न नाशितमेव । अतः 'इन्द्रो अस्या अव वधर्जभार' इति वाक्यं न युक्तमिति चेदुच्यते । न केवलं सर्वत्रानुगतमूलप्रकृतिस्तमोगुणात्मिका एकैवास्ति । किन्तु प्रातिस्विकी चास्ति । तत्प्रयुक्ताज्ञानादिकमपि प्रातिस्विकमेवेति युक्तस्तत्प्रयुक्तः पुरुषेषु संसारोपलम्भ इति युक्तमेवेदं वाक्यमिति द्रष्टव्यम् ।

ननु तथाऽपि दनुशब्दवाच्यतमोगुणात्मकप्रकृतेर्वृत्रशब्दवाच्याज्ञानापेक्षया प्रथमं वधे किं कारणमिति चेदुच्यते । कारणस्यैव नाशे कार्योत्थानायोगस्य प्रसिद्धत्वात् । दनुशब्दवाच्यतमोगुणात्मकप्रकृतिनाशेन तत्कार्यभूताज्ञानाद्युत्पत्तिं भगवान् वारयामासेत्याशयात् । नायमस्ति नियमो यत् सर्वत्र कारणनाशादेव कार्यनाशो भवतीति । किन्तु क्वचित् प्रथमं कार्यनाशोऽपि भवति । ननु तर्हि अज्ञानादेः कार्यस्यापि प्रथमं नाशोत्पत्तौ दनुशब्दवाच्यतमोगुणात्मकप्रकृतेः किमर्थमादौ नाशोऽभिधीयत इति चेत्। सत्यम् । यदाऽऽदौ कार्यनाशो भवति तदा कार्यस्य न निःशेषनाशः । किन्तु कार्याकारस्यैव, कार्याकारनाशेऽपि कारणात्मनाऽवस्थानसद्भावात्। यदा चाऽदौ कारणनाशस्तदा कार्यस्य निःशेषो नाश एव भवति । अतः प्रकृतेरज्ञानादेर्निःशेषनाशं सूचयितुं पूर्वं दानुशब्दवाच्यतमोगुणात्मकप्रकृतेर्नाशाभिधानं युक्तमिति मन्तव्यम् । नन्वथापि उत्तरा सूरित्युक्तमज्ञानजनकदानुशब्दवाच्यतमोगुणात्मकप्रकृतेरुत्तरत्वं कथमुपपद्यते ? उत्तरत्वं हि पश्चात्कालीनत्वम् । नह्यज्ञानापेक्षया प्रकृतिः पश्चात्कालीनाऽतः कथमेतदिति चेन्न । नात्र कालापेक्षयोत्तरत्वं विवक्षितम्। किं नाम ? शक्तितोऽधिकत्वमेव । एतादृशं चोत्तरत्वमज्ञानाद्यपेक्षया प्रकृतौ तिष्ठतीति न काऽप्यनुपपत्तिः ।

नन्वत्र सर्वत्र परमेश्वरस्य अज्ञानादिभिर्युद्धप्रतिपादनेनाज्ञानादिकं भगवत्सम्बन्धीति प्रतीयते । अन्यथा परकीयाज्ञानादिभिः परमेश्वरस्य युद्धोक्त्यसम्भवात् । तद्युक्तम् । सर्वमानविरोधादिति चेदुच्यते । अत्राज्ञानादिभिः परमेश्वरस्य युद्धकरणोक्तेर्भक्तानां मनसि प्रमाणैः स्वविषयकज्ञानादिकमुत्पाद्य तदीयाज्ञानादिप्रयुक्तं संसारं नाशयामासेत्येवं नारायणः संसृतेः पारं प्रापयन् भक्ताननुजग्राहेत्यत्र तात्पर्याङ्गीकारान्न कश्चिन्मानविरोध इत्यवधेयम् ॥ ९ ॥

(ऋ.म - ३७८)

अति॑ष्ठन्तीनामनिवेश॒नानां॒ काष्ठा॑नां॒ मध्ये॒ निहि॑तं॒ शरी॑रम् ।
वृ॒त्रस्य॑ नि॒ण्यं विच॑र॒न्त्यापो॑ दी॒र्घं तम॒ आश॑य॒दिन्द्र॑शत्रुः

॥ १० ॥ ३७ ॥

(ऋगर्थोद्धारः) **-अतिष्ठन्तीनामिति** ॥ मृतस्यास्य वृत्रस्य शरीरमतिष्ठन्तीनां 'ष्ठा गतिनिवृत्तौ' । दिशामनन्तत्वेन देवदत्तस्य तदभावनिमित्ता गतिर्निवृत्तिर्नास्तीत्यतिष्ठन्तीशब्देनोच्यन्ते । तासामतिष्ठन्तीनां स्वभावनिमित्तगतिनिवृत्त्यनापादकानामनिवेशनानां, निविशन्तेऽस्मिन्निति निवेशनं गृहमन्तर्भावकं, आवरकं किञ्चिद् दिशां नास्ति । अनन्तत्वादेव । अतोऽनिवेशना इत्युच्यन्ते । तासामनिवेशनानां काष्ठानां दिशां मध्ये निहितमेवंनाम वृत्रशरीरं स्थूलं यदनन्ता दिशो व्याप्य स्थितमित्यद्भुतोक्तिः । एवं वृत्रशरीरस्य दिक्षु पतनानन्तरं प्रतिबन्धके निवृत्ते सति आपो निण्यं, नीत्यतिशयार्थे । णं सुखम् । स्वार्थे तद्धिते [१]यत्प्रत्यये णमेव ण्यम् । क्रियाविशेषणमेतत् । निण्यं यथा भवति तथाऽतिशयितसुखेनैव, अनायासेनेति यावत् । विचरन्ति व्यचरन् । दीर्घं तमः = दीर्घशब्दो महदर्थकः । महातामस इत्यर्थः । इन्द्र-

१. 'यप्रत्यये' घ. ।

शत्रुः = इन्द्र एव शत्रुर्यस्यासाविन्द्रशत्रुर्वृत्रः, एवम् आ सम्यग् अशयत् अशेत पतितो मृत इत्यर्थः । एवं मृतोऽसाविन्द्रशत्रुर्वृत्रो दीर्घं पुनरावृत्तिरहितं तमोऽन्धन्तम आशयत् । 'अशू व्याप्तौ' स्वार्थे णिजन्तमेतत् । प्रापेत्यर्थः ।

अध्यात्मं तु, इन्द्रशत्रुः - इन्द्रः परमेश्वर एव शत्रुः शातयिता यस्य तदिन्द्रशत्रुभूतं दीर्घं महत् तमो वृत्रसञ्ज्ञकमज्ञानम् एवम् आ अशयत् पतितं नष्टमिति यावदित्यर्थः ॥ १० ॥ ३७ ॥

(ऋ.म-३७९)

दा॒सप॑त्नी॒रहि॑गोपा अतिष्ठ॒न् निरु॑द्धा॒ आप॑ः प॒णिने॑व॒ गाव॑ः ।
अ॒पां बिल॒मपि॑हितं॒ यदाऽऽसी॑द् वृ॒त्रं ज॑घ॒न्वाँ अप॒ तद् व॑वार

॥ ११ ॥

(ऋगर्थोद्धारः) **- दासपत्नीरिति** ॥ इन्द्रयज्ञे सुक्लृप्ता गावः पणिनेव पणिनामदैत्यजातिविशेषेण[१] बलनामकेनेति यावत् । इव यथा निरुद्धास्तथैव दासपत्नीः विष्णोर्दासस्य वरुणस्य पत्नीः पत्न्यः आपो नद्यः अहिगोपाः अहिर्गोपो गोप्ता रक्षको यासां ताः अहिगोपाः, अहिना गुप्ता इत्यर्थः । न केवलमहिगोपाः । किन्तु निरुद्धाः, वृत्रेणेति शेषः । वृत्रः स्वयं निरुध्य रक्षणार्थमहिं स्थापितवानिति भावः । उभावपि निरोद्धारावेवेति तात्पर्यम् । अतिष्ठन् आसन् । तदा शक्रो वृत्रं जघन्वान् सन्, हत्वेति यावत् । इदमुपलक्षणम् । अहिं च जघन्वानिति ग्राह्यम् । कुतोऽनुक्तोऽहिर्ग्राह्य इति चेत् पूर्वार्धोक्तत्वात् । ननु वृत्रं जघन्वानितिवदहिं जघन्वान् इति श्रुत्या कण्ठत एव कुतो नोक्तमिति चेन्न । शक्रेण वृत्रस्यात्यायासेन हतत्वेन बलिष्ठत्वात् श्रुत्या कण्ठतो वृत्र उक्तो न त्वहिः । तस्यानायासेन हतत्वादिति ज्ञातव्यम् । यदपां बिलं वृत्राहिभ्यामपिहितम् आच्छादितमासीत् तद् अपववार अपावृतवान् उद्घाटयामास ।

१. 'विशेषवता' घ. ।

अध्यात्मं तु - दासस्य विष्णोर्भक्तस्य यस्यकस्यचिद् जीवेन महा-वस्थितत्वनिमित्तेन पत्न्य इव पत्न्यः आस्तिक्यादिबुद्ध्यादयो वृत्राहि-शब्दवाच्याज्ञानसंशयाभ्यां निरुद्धा अतिष्ठन् तदा भगवान् भक्तेषु सन्निहितः सन् वृत्रमहिं चाज्ञानं संशयं च जघन्वान् सन्, हत्वेति यावत् । यद् अपां शुभकर्मणां बिलं द्वारं साधनभूतमास्तिक्यबुद्ध्यादिकं ताभ्यामपिहितमासीत्, तदपववार अपावृतवान् उद्घाटयामास । भक्तानां बुद्धावास्तिक्यादिक-मुत्पाद्य तत्पूर्वकं शुभकर्माणि कारयित्वा ज्ञानादिकमुत्पादितवानिति तात्पर्यम् ॥ ११ ॥

(ऋ.म - ३८०)

अश्व्यो वारो अभवस्तदिन्द्र सृके यत् त्वां प्रत्यहन् देव एकः।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून्
॥ १२ ॥

(ऋगर्थोद्धारः) - अश्व्यो वार इति ॥ हे इन्द्र यद् यदि, सृके = आयुधनामैतत् । तत्सम्बन्धाद् युद्धं लक्ष्यते । युद्धनामैव वा । युद्धे एकः प्रधानोऽपि कश्चिद् देवस्त्वां प्रत्यहन् तत् तदानीं त्वम्, अश्व्यो अश्वसम्बन्धी वारो वारकोऽभवः प्रतिभटसम्बन्ध्यश्वानां निवारकोऽभवः । यथा वाली स्वदृष्टिपातमात्रेण परबलापहारं करोति तथा त्वं दृष्टिपातमात्रेण रिपुरथे नियोजितानामश्वानां बलमपहृत्य तेऽश्वाः रथिकमूह्य यथा परावृत्य गच्छेयुस्तथा करोषीति यावत् । यद्वा, अश्व्यो वार इत्यश्ववाहकोऽश्वप्रेरकः सारथिः प्रसिद्धः । तथा च तद्वद् अश्वप्रेरकोऽभव इति यावदित्यर्थः । अत्र पराङ्मुखतयेत्युपस्कारः[१] । तथा च यथाऽश्वाः स्वयमेव पराङ्मुखाः सन्तो रथिकमूह्य गच्छेयुस्तथाऽश्वानां वारो वाहकोऽन्तःप्रेरकोऽभव इत्यर्थः ।

१. कर्तव्यः इति पदेन अधिकेन भाव्यमिति भाति ।

यदि देवोऽपि त्वां प्रत्यहनत् तदा तदश्वनिवारकोऽभव इत्युक्त्या प्रथमं तावत् प्रहारविषयो भवतीति प्राप्नोति । नचैतद् युक्तम् । दृष्टमात्रेण बलापहारित्वात् । तत् प्रतिहन्तुः कस्यापि देवस्याभावात् । अतः प्रत्यहन्नित्यस्य प्रतिहन्तुं मनसैच्छदित्यर्थः ।

किञ्च, हे शूर ! विक्रान्त ! त्वं रिपूणां गाः अजयः । तदीयं हिरण्यमजयः इति शेषः । ननु सोममजय इति सोमस्यैवात्र कर्मत्वं कस्मान्न स्यादिति चेन्न । सोमस्य यजमानेन भगवदर्थमेव निर्मिततत्वेन परकीयत्वात् । परकीयस्यैव जेतव्यत्वाद् हिरण्यस्यैव च तथात्वाद् हिरण्यमिति शेषपूरणेन तस्यैव कर्मत्वमिति ज्ञातव्यम् । तथा सप्त सिन्धून् प्रधाननदीः सोमं सर्तवे, तुमर्थे तवेप्रत्ययः । सर्तुं गन्तुं मिश्रीकर्तुम् अवासृजः अमुचः प्रतिबन्धाद् अमोचयः। नदीजलैः संयोजयितुं नदीः प्रवर्तितवानसीति यावदित्यर्थः । यद्यप्युत्तरत्र 'नव च यन्नवतिं च स्रवन्तीः' इत्येकोनशतं नद्य उक्ताः । तथाऽपि -

'गोदा सरस्वती गङ्गा यमुना नर्मदा तथा ।
कावेरी कृष्णवेणी च नदीनां प्रवराः स्मृताः'

इत्यरण्यपर्वभारतोक्तप्रधाननद्यभिप्रायेण सप्त सिन्धून् इत्युक्तमिति द्रष्टव्यम् ।

अध्यात्मपक्षे गोशब्दो गमे रूपम् । गत्यर्थाश्च ज्ञानार्थाः । अतो गाः ज्ञानानि, भक्तानामिति शेषः । मिथ्याबोधतो जयः । मिथ्या-ज्ञानेनाभिभूतानि ज्ञानानि तदपाकृत्य स्थिराण्यकार्षीरिति यावत् । सोऽयं भक्तानामस्माकं मनश्च शब्दादिकाद् विषयजातादजयः । विषयैरपहृतं विरक्तमकार्षीरिति यावत् । सिन्धून् समुद्रानिव दुस्तरान् सप्त महत्तत्त्वाहङ्कारतत्त्वे पञ्चमहा-भूतानि चेति सप्त अध्यात्मं न्यायमार्गे गन्तुं बहिष्ठमहत्तत्त्वादिप्रेरणस्या-सङ्गतत्वान्महत्तत्त्वांशं चित्तमहङ्कार-तत्त्वांशमहङ्कारं, पञ्चमहाभूतानामंशांश्च

देहस्थान् सर्तवे न्यायमार्गे गन्तुमवासृजः अमुचः, प्रेरितवानसीति व्याख्येयम् ॥ १२ ॥

(ऋ.म- ३८१)

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च।
इन्द्रश्च यद् युयुधाते अहिश्चोतापरीभ्यो मघवा विजिग्ये
॥ १३ ॥

(ऋगर्थोद्धारः) - **नास्मै विद्युदिति** ॥ यद् यदा इन्द्रश्चाहिश्च युयुधाते हे इन्द्र ! यदा तवाहिना युद्धं प्रवृत्तमिति यावत्। तदा विद्युत् तन्नामकमायुधमस्मै अहये न सिषेध। अहेः इन्द्रवधरूपप्रयोजनसिद्धिं न चकार। तन्यतुः वज्ररूपमायुधं च न सिषेध यां मिहं यज्ञवेद्युपमां सुतीक्ष्णां मिहनामिकां हेतिं यं च ह्रादुनिं तन्नामकं वज्रप्रभेदमहिरकिरत् त्वां प्रति क्षिप्तवान्। ते च मिहह्रादुनिनामकायुधे न तस्य प्रयोजनसिद्धिं चक्रतुः। किन्तु अपरीभ्यः अपराभ्यः अपरायां वेलायां पश्चात्काले तदीयायुधानां मोघीभावानन्तरमिति यावत्। मघवोत मघवैव विजिग्ये। त्वमेव तमहिमजय इति यावदित्यर्थः।

अध्यात्मं तु प्रतिवादिनो विपरीता मतिर्विद्युत्। 'द्युत दीप्तौ' इति धातोः द्युत् समीचीना मतिस्तद्विरुद्धत्वाद् विपरीता मतिर्विद्युत्। तन्यतुः स्तन्यतुः, छान्दसः सकारलोपः। प्रतिवादिनां वादिप्रयुक्तप्रमाणानां दूषणभूता ये आभासरूपाः प्रयोगास्ते तन्यतुशब्देनोच्यन्ते। 'मिह सेचने' जन्मान्तर-वासनारूपशक्त्या सिक्तोपोद्बलिता वाक् प्रवर्तते। न त्वभ्यासमात्रेण। अतः प्रतिवादिनां या वक्तृत्वविषये जन्मान्तरवासनारूपा शक्तिः सा मिहशब्देनोच्यते। प्रतिवादिनां सन्तर्जनरूपा या हुङ्कृतिः सा ह्रादुनि-शब्देनोच्यते। ह्रादतेरव्यक्तशब्दवाचित्वाद् विद्युदादिशब्दवाच्यानां प्रतिवादिविपरीतमतिप्रभृतीनां संशयसमूहत्वेनाहिनिसृष्टत्वं मन्तव्यम्। तथा

च परमेशे भक्तानामनुग्राहकत्वे न स्थिते सति एते प्रतिवादिविपरीतमत्यादयो भक्तपराभवरूपं स्वकार्यं न साधयन्तीत्यर्थः। किन्तु, अपरीभ्यः पश्चात्काले एवं प्रतिवादिविपरीतमत्यादीनां मोघीभावानन्तरमिति यावत्। मघवा उत परमेश्वर एव स्वभक्तानां हृदिस्थः सन् प्रमाणैः स्वविषयकं ज्ञानमुत्पाद्य भक्तानामर्थे अहिशब्दवाच्यं संशयं विजिग्ये, विनाशितवानिति यावदित्यर्थः ॥ १३ ॥

(ऋ.म - ३८२)

अहेर्यातारं कमपश्य इन्द्र हृदि यत् ते जघ्नुषो भीरगच्छत्।
नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि
॥ १४ ॥

(ऋगर्थोद्धारः) - **अहेर्यातारमिति** ॥ हे इन्द्र ! अहेरसुरस्य यातारं = तं प्रति यातारं गन्तारं, प्रतियोद्धारमिति यावत्। त्वां विना, कमपश्यः न कमपि। सकललोकवृत्तान्तविदाऽपि त्वया तस्य प्रतिभटो न दृष्टः। किम्वन्ये नेति भावः। कुतस्तस्यैवं महाप्रबलत्वमित्यत उच्यते। यद् यस्मात् तं जघ्नुषस्तवापि हृदि भीर्भयमगच्छत्। गम्लृ गतौ। गतिः प्राप्तिरपि भवति। प्राप्तवत्। त्वन्मनस्यपि पुरा भयमुत्पन्नम्। एवं [1]तन्मनस्यपि भयापादकत्वेन महाप्रबलमप्यहिं त्वं हतवानसीत्यर्थः। अहेरभिगन्ता त्वदन्यो नास्तीत्यत्र निमित्तमुच्यते। यद् यस्मात् त्वं रजांसि भीतः श्येनो न, रज इत्यन्तरिक्ष-नाम। बहुवचनं च प्रदेशाभिप्रायम्। यथा ह्याकाशदेशान् भीतः श्येनोऽति-गच्छेत्। श्येन एव वेगी, भीतस्तु सुतरामिति भयं महावेगोपपादकम्। तथा अहेर्बहुरूपेण वा नानानदीप्रवाहवारकत्वाद् हननाय नव च नवतिं च स्रवन्तीः नदीः नदीनामेकोनशतमिति यावत्। अतरः तीर्णवानसि। अत्र

१. 'त्वन्मनस्यपि' घ.।

नदीतरणं नाम नदीः प्रति शीघ्रगमनमेव विवक्षितम्। अहेर्नानानदीवारकत्वेन नदीः प्रति अतिवेगेनेन्द्रस्य गमनाभावेऽहिहननासम्भवेन नदीतरणस्याहिवधे उपयोगो द्रष्टव्यः । तस्मादहिहननाय नदीः प्रति तर्तुरन्यस्याभावात् त्वदन्योऽहेरभिगन्ता नास्तीत्यर्थः ।

अध्यात्मपक्षे तु, हे इन्द्र परमेश्वर अहेः संशयस्य यातारं गन्तारं तस्य प्रतियोद्धारं विनाशकमिति यावत्। भक्तहृदिस्थं त्वां विनाशकमपश्यः। न कमपि कुतस्त्वदन्यः संशयनाशको नास्तीत्यतः कार्यमेवात्र प्रमाणमित्युच्यते। यद् यस्मात् ते, सावधारणमेतत्। तवैव संशयं जघ्नुषः सतः भक्तहृदि स्थित्वा त्वय्येव त्वदीयसंशयनाशाय प्रवृत्ते सतीति यावत् । हृदि भीः त्वदीयानां भक्तानां हृदि स्थितं संशयप्रयुक्तं भयम् अगच्छत्। व्यपैति। नतु तदन्येषु संशयनाशाय प्रवृत्तेषु सत्स्वित्यर्थः। अहिशब्दवाच्यसंशयस्य हन्ता त्वदन्यो नास्तीत्यत्र हेतुरुच्यते - **नव चेति** ॥ यद् यस्मात् त्वं यथा भीतः श्येनो रजांसि अन्तरिक्षप्रदेशान् तरति तथा संसृत्यपगातरणं कुर्वतो नवनवतिसङ्ख्याकान् देवान् नव च नवतिं च तावत्सङ्ख्याकाः स्रवन्तीः संसारनदीरतरः। **'व्यत्ययोऽभेदकरण-स्वातन्त्र्येषु'**[१] इति सूत्रादत्र देवकर्तृकतरणेऽपि प्रयोजकतया भगवत एव स्वातन्त्र्येण कर्तृत्वस्य विवक्षितत्वाद् अतारय इति व्याख्येयम्। अतस्त्वमेव संशयस्य हन्तेति।

अनेनैतदपि परास्तम्। प्रयोजककर्तारमभिध्याय स्वतन्त्रकर्तोदाह्रियते। अतो दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति। देवानां तरणकर्तृत्वांश एव श्येनस्य दृष्टान्तत्वेन ईश्वरस्य तारकत्वरूपे प्रयोजककर्तृत्वांशे दृष्टान्तत्वानङ्गीकारादिति।

---

१. इदं महाव्याकरणसूत्रं स्यात्।

अयं भावः। यदि त्वं देवानां हृदि ज्ञानादिकमुत्पाद्य तदीयं संशयं न हन्यास्तर्हि तेषां संसृत्यापगातरणं न कुर्याः मुक्तान्न कुर्या इति यावत्। अतस्तेषां संसृत्यपगातरणरूपेण कार्येण तद्धृदि ज्ञानादिकमुत्पाद्य त्वमेव संशयस्य हन्तेति ज्ञायते। अन्यस्यैतादृशकर्मासम्भवादिति। नवनवतिदेवाश्च

'वस्वादित्या मरुतश्चाश्विनौ च बृहस्पतिः शेषविपानिरुद्धाः।
ब्रह्मा ब्रह्माणो ऋभवश्चैव रुद्रा ऊनं शतं देवता संहितोक्तम्'

इति भाष्योक्ता ज्ञातव्याः। वसवोऽष्टौ। आदित्या विष्णुव्यतिरिक्ता एकादश, मरुतः प्रधानेन सहिताः पञ्चाशत्। ब्रह्माणो नव प्रजापतयः। ऋभवस्त्रयः। रुद्रा एकादश। ऊनम् एकोनम्॥ १४ ॥

(ऋ.म - ३८३)

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः।
सेदु राजा क्षयति चर्षणीनामरान्नेमिः परि ता बभूव
॥ १५ ॥ २८ ॥ २ ॥ ३२ ॥

(ऋगर्थोद्धारः) - इन्द्रो यात इति ॥ इन्द्रो भगवान्। यातः 'या प्रापणे' कर्मणि क्तः। भक्तैस्तत्प्रसादात् प्राप्तो ज्ञातो भवति। न तु परोक्तरीत्या सर्वथाऽविदितः। तर्ह्यज्ञेयत्वश्रुतेः का गतिरिति चेत्। अभक्तैरज्ञेयो भक्तैरपि तत्प्रसादेन विना न ज्ञेय इत्यर्थत्वादित्याशयः। अवसितस्य, अवसितशब्दः पारगमनरूपसमाप्तिवाची। तथा च संसारपारङ्गतस्य मुक्तस्य राजा स्वामी, न केवलं प्राप्तमोक्षाणां राजा। किन्तु, शमस्य च मुक्तेरपि मुक्त्यवस्थाया अपि राजा। किञ्च, वज्रबाहुः, बाहुशब्दोऽज्ञान्तरोपलक्षकः। तथा च वज्रं ज्ञानं तदात्मकबाह्वादिमान्। सेदुराजा, इत्यत्र स इत् उ इति पदच्छेदः। तथा च स इत् = स एव, उशब्दोऽप्येवार्थकः तस्य नित्यमित्यध्याहृतेन सम्बन्धः। नित्यमेव शृङ्गिणः शृङ्गशब्दः प्रकाशवाचकः। शृङ्गं प्रकाश इति

निरुक्तवचनात्। अतः शृङ्गं प्रकाशो ज्ञानमिति यावत्। तद्वतो ज्ञानिसमूहस्य च राजा। चर्षणीनां मुक्तज्ञान्यतिरिक्तानाम् अज्ञानिप्रजानां क्षयति। ऐश्वर्यार्थोऽयं धातुः। ईश्वरो भवति।

मुक्तादिप्रजास्वामित्वं दृष्टान्तेनाऽह - नेमिः, अरान् न = अराणीव। चक्रान्तिमभागीयं परितो विद्यमानं लोहमयं बन्धकं नेमिरित्युच्यते। रथचक्रस्य धाराः अराणीत्युच्यन्ते। एवं च नेमिर्यथा अराणि परिभवति वशीकरोति स्वान्तर्गमयति, तदाधारतया वर्तत इति यावत्। तद्वत्। स इत् = स एवेन्द्रः परमेश्वरः, ताः = तानि भूतानि मुक्तामुक्तसर्वप्राणिजातानि परिबभूव परिभूतवान्, वशीकृतवानित्यर्थः। अवसितादिपदस्योक्तार्थ-विवक्षायामस्याः ऋचः केवलं भगवत्परत्वमेव।

अन्यार्थविवक्षायां तु प्रसिद्धेन्द्रपरत्वेऽप्यविरोधः। तथा हि इन्द्रः प्रसिद्धो यातः, - यान्, यान्तौ, यान्तः इति याच्छब्दस्य षष्ठ्यैकवचनमेतत्। 'या प्रापणे' इति धातोः। प्रापणादिप्रवृत्तिं कुर्वन् जङ्गमो यान् इत्युच्यते। तथा च यातो जङ्गमस्य अवसितस्य स्थावरस्य, तन्नामसु पाठात्। शमस्य शान्तेः, स्वर्गसुखस्येति यावत्। शृङ्गिणः शृङ्गं = प्रकाशः। तद्वतो नक्षत्रादेरिति निरुक्तवचनात्। प्रकाशवतो नक्षत्रादेश्च राजा स्वामी भवति। वज्रबाहुः वज्रमिव दृढौ बाहू यस्यासौ तथोक्तः, वज्रं बाहौ हस्ते यस्येति वा वज्रबाहुः = वज्रहस्तः, स इत् स एवेन्द्रः, नित्यमेव चर्षणीनां स्थावरप्रजानां क्षयति = ईश्वरो भवति। तत्र दृष्टान्तः - नेमिररान् न = अराणीव, ताः = तानि स्थावरभूतानि, परिबभूव = वशीकृतवान् इत्यर्थः॥ १५॥ ३८॥ ३२॥

॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेनैव विरचितश्रीमदृग्भाष्यटीकागतऋगर्थोद्धारे द्वितीयोऽध्यायः॥ २॥

॥ श्री कृष्णार्पणमस्तु॥

अथ तृतीयोऽध्यायः

सूक्तम् - ३३

हिरण्यस्तूप आङ्गिरसः। इन्द्रः। त्रिष्टुप्।

(ऋम.-३८४)

एतायामोपं गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः॥ १॥

(ऋगर्थोद्धारः)- एतायामेति॥ पञ्चदशार्चमेतदैन्द्रं सूक्तम्। आ इत। अयामेति पदच्छेदः। इतेति मध्यमपुरुषप्रयोगाद् 'ये अस्माकं सखायो देवाः' इत्यध्याहारः। तथा बाह्ये येऽस्माकं सखायो देवादयस्ते यूयम् आ इत = यज्ञस्थानं प्रत्यागच्छत। अध्यात्मं - देवा इन्द्रियाभिमानिनः आ इत। त्वरार्थे आङित्युपसर्गः। तथा च त्वरिताः सन्तः आगच्छत। आगत्येन्द्रियादिकं प्रेरयतेति यावत्। तद्व्यतिरिक्ता ये सखायः सज्जनास्तेऽपि आ इत आगच्छत। आगत्यास्माकम् अनुग्रहादिकरणेन ज्ञानयज्ञे सहकारिणो भवतेति यावत्। [1]किमर्थमेते भवद्भिः प्रार्थ्यन्ते इत्यतो भवताम् [2]इन्द्रभृत्यत्वादस्माकं भवत्स्वामिनमिन्द्रं प्रति शरणागतत्वादित्युच्यते। वयमिन्द्रमुपयाम। शरणमिति शेषः। इदानीं क्रियमाणागमनस्याति-निश्चितत्वात्, अतिनिश्चितेऽर्थे भूतार्थकलङो विहितत्वात् न दोषः। कथम्भूता वयम्? गव्यन्तः = गोवदाचरन्तः, यथा गवाद्याः पशवः स्वामिवशास्थास्तथेन्द्रवशस्था वयमिति। कस्मै प्रयोजनाय शरणमयामेत्यत उच्यते। शरणं प्राप्तश्च स इन्द्रोऽस्माकं सु = सुष्ठु यथार्थं प्रमतिं = बह्वर्थविषयकतया प्रकृष्टज्ञानं वावृधाति = पुनःपुनः भृशं वा वर्धयति = ददातीति यावत्। कुतोऽयं ज्ञानं वर्धयतीत्याशङ्कायां प्रतिहतिरहितत्वाद्

१. 'किमर्थमेतेऽतिभवद्भिः प्रार्थ्यते' क. घ.। २. 'इन्द्रप्रभुत्वात्' इति क.।

ज्ञानानामधिपतित्वाच्चेत्युच्यते। अनामृण इत्यादि। कुवित् आत् अस्येति पदच्छेदः। यस्मात् स इन्द्रः कुवित् क्वापि अनामृणः = अभेद्यः क्वापि भेद्यो न भवति। प्रतिहतिरहित इति यावत्। यस्माच्च गवां = वेदवाचां सम्बन्धि तदुत्थं परं = यथार्थत्वेन बह्वर्थविषयकत्वेन चोत्तमं केतं = ज्ञानं 'केतुः केतश्चितिश्चित्तं क्रतुर्मनीषा इति प्रज्ञानामधेयानि' इति वचनात्। एकवचनं बहुवचनार्थे। ज्ञानानि अस्य = तस्य इन्द्रस्यैव रायः = वित्तभूतानि, ज्ञानानामधिपतिरिति यावत्। आत् = तस्मात् नोऽस्मभ्यं ज्ञानानि आवर्जते= यद्यपि त्यागार्थोऽयं धातुस्तथाऽपि दानस्यापि त्यागविशेषत्वाद् ददातीत्यर्थः। ज्ञानानामधिपतिः प्रतिहतिरहितश्च शरणं प्राप्तः सन् कथं तानि ज्ञानानि न दद्यादिति तात्पर्यम् ॥ १ ॥

(ऋ.म.-३८५)

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्
॥ २ ॥

(ऋगर्थोद्धारः) - उपदेहमिति ॥ उप इत् अहमिति पदच्छेदः। अहं धनदां = धनस्य दातारं, अप्रतीतं = स्वप्रतिकैरपि इतो गतो न भवति। वैरिभिरप्रतिहतमित्यर्थः। इन्द्रमित् = ईशमेव उपपतामि = शरणं गच्छामि। शरणं प्राप्नुयां नान्यत्किञ्चित्। क इव ? जुष्टां = सेवितां पूर्वभुक्तां वसतिं = नीडं श्येनो न = श्येनो यथा। कथमुपगच्छामीत्यत उच्यते। उपमेभिः = उपमशब्दः [१]साद्दृश्यार्थे। तथा चेन्द्रसद्दशाभिः ऋग्भिः तद्योग्यर्ग्भिः तदनुकूलाभिः ऋग्भिः, तत्प्रतिपादकाभिः ऋग्भिरिति यावत्। इन्द्रमेव

१. 'साद्दश्यार्थः' घ.।

नमस्यन् = स्तुवन् इति यावत्। कथम्भूतमिन्द्रं ? य इन्द्रो यामान् = यामशब्दः प्रहरापरपर्यायकालविशेषवाची। वीप्साभिप्रायमेतत्। यामेयामे प्रतियामम्। सर्वस्मिन् काल इति यावत्। यद्वा, कालसामान्यवाचक एवायं यामशब्दः। स्तोतृभ्यः = स्तोतृणां हव्य एवास्ति= हव्य इत्यस्य 'हु दानादानयोः' इति धातुजत्वेन जुहोतेरत्रादनार्थतत्वाद्धव्योऽदनीय इत्यर्थः। अद्यत्वश्चोपजीव्यत्वमेव न [१]'चर्व्यत्वम्। तथा च हव्यो अद्यः उपजीव्यः स्तोतृणां सदा हव्यो दत्तावसर एवास्ति। त्वदीयस्तोत्रश्रवणे न ममावकाशोऽस्तीति परिहारं न करोतीति यावदिति भावः॥ २ ॥

(ऋ.म-३८६)

नि सर्वसेन इषुधीरंसक्त समर्यो गा अंजति यस्य वष्टिं।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥ ३ ॥

(ऋगर्थोद्धारः) - नि सर्वसेन इति ॥ सर्वा सम्पूर्णा सेना यस्यासौ सर्वसेनः = अशेषसेनापतिरिन्द्रः अशेष शत्रून् हन्तुमिति शेषः। तः इषुधीन् = तूणान्, नि असक्त = 'षञ्ज सङ्गे' वष्टीति लटः श्रवणाद् भूतार्थकलुङो व्यत्ययः। आत्मनि संयोजयति निबध्नातीति यावत्। यद्वा, अशेषशत्रून् हन्तुमिति न शेषः कर्तव्यः। उपसर्गाणां साधनक्रियावाचित्वान्नीत्युपसर्गबलेनैवाशेषशत्रून् हन्तुमिति लभ्यत इति द्रष्टव्यम्। तथा चेषुधिस्थितैर्बाणैः पणिपूर्वकान् शत्रून् हतवानिति भावः। शत्रून् हत्वा चासौ अर्यः = 'ऋ गतौ', गम्यः शरणं प्राप्तुं योग्योऽधीश्वरः इन्द्रो गाः पणिनामकशत्रुभ्यो हृताः यस्य भक्तस्य वष्टि = वाञ्छति, दातुमिति शेषः। तस्मै समजति = 'अज गतिक्षेपणयोः' सम्यक् क्षिपति। दिशत्येवेति यावत्। परोक्षतः स्तुतमभिमुखीकृत्याऽह। हे प्रवृद्ध = यथायोग्यम् अभिवृद्ध इन्द्र एवं,

१. 'चर्व्यं' इति क.।

भूरि= बहु, वामं = भद्रं गवादिकं भक्तेभ्यः चोष्कूयमाणः = दानार्थोऽयं, अतिशयेन ददमानस्त्वम् अस्मदधि । द्वितीयार्थे पञ्चमी । अस्मान् प्रति कदाचिदपि पणिर्मा भूः 'अतद्भूते तद्भूतत्वव्यपदेशास्तत्सारूप्यं गमयति' इति न्यायेन तद्वत् हिंसको मा भूः । शत्रुहननादिरूपेण महता प्रयत्नेन भक्तानां साध्वेवाऽचरन् त्वम् अस्मान् प्रति भवदभिलषितं न ददामीत्यादि दुर्वाक्यवक्ता, निष्ठुर इति यावत् । मा भूरिति यावदित्यर्थः ।

अथवा सर्वसेनः इन्द्रः = परमेश्वरः, भक्तानां नि= अज्ञानाद्यशेषशत्रून् हन्तुं इषुधीनिव इषुधीन् प्रमाणाख्या इषवो बाणा धीयन्ते येषु ते तथा तान् गुर्वादिनिजसज्जनाख्यान् इषुधीन् असक्त = आत्मनि संयोजयति, तान् स्वविषयकचित्तादिवृत्तीन् करोतीति यावत् । तथा च निजसज्जनानां स्वविषयं बुध्यादिकं दत्वा तैः गुर्वादिसज्जनैः कर्तृभिः प्रमाणरूपैः करणैर्भक्तानाम् अज्ञानादिशत्रून् हतवान् इति भावः । शत्रून् हत्वा चासौ अर्यः = गम्यः शरणं प्राप्यः इन्द्रः गाः = अज्ञानादिशत्रुभ्यो हृताः मतीः सम्यक् ज्ञानदानं यस्य भक्तस्य वष्टि = दातुं वाञ्छति तस्मै समजति = सम्यक् क्षिपति । ददात्येवेति यावत् । परोक्षतः स्तुतमेवाभिमुखकृत्याऽह। हे प्रवृद्ध ! = नित्य प्रवृद्धेन्द्र भूरि = बहु वामं = भद्रं तत्त्वज्ञानं भक्तेभ्यः चोष्कूयमाणः= ददमानस्त्वम् अस्मदधि= अस्मान् प्रति पणिर्मा भूः = निजसज्जनानां स्वविषयचित्तादिवृत्तिसम्पादनारूपेण महता प्रयत्नेन भक्तानाम् अज्ञानादिनाशनादिना साध्वेवाऽचरन् त्वम् अस्मान् प्रति निष्ठुरो मा भूरिति यावदित्यर्थः ।। ३ ।।

(ऋम.-३८७)

वधीर्हि दस्युं धनिनं घनेनं एकश्चरंन्नुपशाकेभिरिन्द्र ।
धनोरधि विष्णुणक् ते व्यायन्नयंज्वानः सनकाः प्रेतिमीयुः ।।४।।

(ऋगर्थोद्धारः) - वधीर्हि दस्युमिति ।। इन्द्र ! एक एव = परापेक्षारहित एव उप = समीपे सर्वस्यान्तरे, उपलक्षणमेतत् । बहिश्च, शाकेभिः = 'शक्लृ शक्तौ' शक्तिभिः चरन् = देवनरादिसमस्तलोकं यमयन् त्वं दस्युं कं धनिनं= धनाढ्यं, तन्मात्रेण कथं दस्युत्वम् ? अयज्वान इति उत्तरार्धे वक्षमाण-त्वात् । अयज्युं चापि सत्यपि धने त्वामयज्वानमिति यावत् । **'तैर्दत्तान-प्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः'** इति वचनात् घनेन = मूर्तेन घटितेन अतिदृढेनेति यावत् । 'मूर्तौ घनः' (पा.सू. ३-३-७७) इति सूत्रेण मूर्तिः काठिण्यं 'मूर्तिः काठिण्यकाययोः' इत्यमरः । तस्मिन् अर्थे घन इति निपात्यते इत्युक्तत्वादिति ध्येयम् । वज्रेणेति शेषः । वधीः = अवधीः । परमेश्वरस्तु घनेन= दृढेन, वज्रेण= ज्ञानेन, दस्युम्= अज्ञानलक्षणं वधीः = अवधीः । अज्ञानाख्यदस्योर्धनित्वं च धनाद्याकाङ्क्षाजनकत्वरूपं द्रष्टव्यम् । पूर्वार्धोक्तं दस्युत्वं वधश्चोत्तरार्धेन विव्रियते । हि = यस्मात् ते दस्युरूपाः पुरुषाः धनोः 'धिनु पुष्टौ' षष्ठी द्वितीयार्थे । धेनुं गुणादिभिरत्यन्तपुष्टं त्वाम् अधिकृत्य उद्दिश्य अयज्वानः = सदैवायजन्तः सन्तः विष्णुक् = विष्वक्, मार्गान्तरेण इति यावत् । व्यायन् = जग्मुः । देवतान्तरं पूजयन्ति स्मेति यावत् । तस्मात् प्रेतिमीयुः = मृतिं प्रापुः । मरणस्य भगवत्पूजकसाधारण्याद् देवतान्तरपूजकानामेवैतत् फलं कथं स्यादिति शङ्कापरिहाराय दुःखबाहुल्यरूपां मृतिमिति व्याख्येयम् । तथा च दुःखबाहुल्योपेतं नरकाद्यनर्थं प्राप्नुवन्तीत्याशयः । ये पुरुषाः विष्णुक् व्यायन् ते कथम्भूता इत्यत उक्तम्- **सनका इति ।।** षणिर्लाभार्थः । ततो ण्वुल् । तस्याकादेशः । ततश्च मोक्षादिलाभे योग्यस्वरूपा अपि स्मेत्यर्थः। तथा च मुक्तियोग्या अपि परमेश्वरं त्यक्त्वा अन्यदेवताः पूजयन्तो नरकाद्यनर्थं प्राप्नुवन्ति किं पुनर्मुक्त्ययोग्या अन्यदेवताः पूजयन्त इत्यभिप्रायः ।। ४ ।।

(ऋ.म-३८८)

परां चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः
॥ ५ ॥ १ ॥

(ऋगर्थोद्धारः) - पराचिच्छीर्षा ववृजुरिति ॥ हे इन्द्र ! पूर्वं सनका इति मोक्षलाभयोग्यस्वरूपा अपि देवतान्तरपूजकत्वेनोक्तास्तेभ्योऽन्ये मुत्त्ययोग्या असुरा इति यावत् । अयज्वानः सन्ति । परमेश्वरं त्यक्त्वा अन्यदेवताः पूजयन्ति ते यज्वभिः = अन्यदेवतापरित्यागेन परमेश्वरमेव यजद्भिः सह स्पर्धमानाः सन्तः शीर्षा = शीर्षाणि चित् = अपि स्वकीयशिरांस्यपि पराववृजुः = सन्तत्यजुः । सद्भिः स्पर्धानिमित्तं स्वशिरस्त्यागमपि न गणयन्ति। सद्भिः सह स्पर्धामात्रेणैव सम्पूरितार्थाः, प्राप्तप्रयोजना इति भावः । ततः किम् ? हे हरिवः ! = हरयोऽश्वाः सहस्रसङ्ख्याकाः रथवाहकतयाऽस्य सन्तीति हरिवान्, तस्य सम्बुद्धिः हे हरिवः । यद्वा, हरयः इन्द्रियाणि अस्य सन्तीति हरिवान्, तस्य सम्बुद्धिः हे हरिवः = इन्द्रियेश । स्थातः = स्थिरस्थैर्ययुक्त ! उग्र = दैत्यानां क्रूरः एतादृशस्त्वं यद्यस्माद् एवम्भूतास्ते तस्माद् अव्रतान् = त्वत्पूजनादिव्रतेन रहितान् तान् पूर्वोक्तान् असुरान् । दिवः = स्वर्गाद् रोदस्योः = रोदसीभ्यां द्यावापृथिवीभ्याम् अन्तरिक्षलोकात् पृथिवीलोकाच्च प्रनिरधमः = प्रकर्षेण निराकृतवानसि । लोकत्रयच्युतान् कृत्वा अन्धे तमसि प्रक्षिप्तवानसीति यावदित्यर्थः ॥ ५ ॥

(ऋ.म-३८९)

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः ।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ॥ ६॥

(ऋगर्थोद्धारः) - अयुयुत्सन्निति ॥ अत्र नवग्वनामका ऋषयोऽसुरेन्द्रैरुपद्रुताः सन्तः इन्द्रं तदन्तर्गतं वासुदेवं च शरणं प्रापुरिति इतिहासश्चाऽदौ वक्तव्यः । तदनन्तरं क्षितयः = नवग्वनामका ऋषिरूपाः प्रजाः इन्द्रमिन्द्रान्तर्गतं च वासुदेवं शरणं प्राप्तास्तदा तच्छरणप्राप्तिसञ्जात-तदनुग्रहेणोद्बलिताः सन्तः तैरसुरेन्द्रैः सहायुयुत्सन् = योद्धुमिच्छन्, योद्धुमिच्छवस्ते मुनयस्तेषामसुरेन्द्राणां वधाय, अनवद्यस्य = निर्दोषस्येन्द्रस्य तदन्तर्यामिणो विष्णोश्च सेनां = हस्त्यश्वरथपदातिरूपचतुरङ्गिणीम्, अयातयन्त = निरयातयन् प्रेरितवन्तः । यदा चायातयन्त तदा वृषायुधो न= वृषशब्दः श्रेष्ठवाची । युध इति धकारान्तयुध्शब्दस्य बहुवचनम् । वृषाश्च ते युधश्चेति कर्मधारयः । दीर्घस्तु सांहितः । न इवार्थे । तथा च सम्प्रतिपन्नसमर्थयोधा इव । वध्रयः = वध्शब्दात् तच्छीले कर्तरि रिप्रत्ययः। तथा च स्वशत्रुवधैकशीला अपि ते असुरा प्रवद्भिः = रलयोरभेदात् प्लवद्भिः आशुगतिभिश्च विष्णोः इन्द्रस्य परिवारैर्निमित्तैः निरष्टाः = निर्नितराम् अतिशयेन अष्टाः 'अशू व्याप्तौ' व्याप्ताः 'दिक्षु' इति शेषः । पलायन्तो दिशो भेजुरिति यावत् । तेषु पलायितेष्वपि इन्द्रस्य तदन्तर्गतस्य विष्णोश्च प्रसादात् चितयन्तः = 'चिती सञ्ज्ञाने' सञ्ज्ञापयन्तः पुनर्द्रावयन्तः सन्तः आयन् = आगच्छन् । पृष्ठतोऽनुद्रुत्यैव गता इति भावः ।

अध्यात्मं तु - नवग्वनामकऋष्युपलक्षिताः सर्वेऽपि सज्जनास्तमोगुणकार्यैः अज्ञानसंशयविपर्ययैरघसङ्घैर्वा पीडिताः सन्तः स्वान्तर्गतं वासुदेवं शरणं प्रापुरिति आदौ वक्तव्यम् । तदनन्तरं क्षितयः = नवग्वनामकऋष्युपलक्षिताः सर्वे सज्जनाः स्वान्तर्गत वासुदेवशरणप्राप्तिसमुत्थतत्प्रसादोपोद्बलिताः सन्तस्तमोगुणकार्यैः अज्ञानादिभिः सहायुयुत्सन् योद्धुमिच्छन् । युद्धमिच्छवस्ते नवग्वप्रभृतयोऽज्ञानादीनां वधाय, अनवद्यस्य = निर्दोषस्य स्वान्तर्गतस्य विष्णोः सेनां = हरिभक्त्यादिकान् गुणान् इति यावत् ।

अयातयन्त = निरयातयन् प्रेरितवन्तः। यदा चायातयन् तदा वृषायुधो न वध्रयः = स्वशत्रुभूतहरिभक्त्यादिगुणवधैकशीला अपि ते अज्ञानादयः प्रवद्भिः= प्लवद्भिः आशुगतिभिः स्वान्तर्गतविष्णुविषयकज्ञानभक्त्यादिगुणैः निरष्टाः = अतिशयेन व्याप्ताः। द्विषत्स्विति शेषः। 'द्विषन्तः पापकृत्यां' इति श्रुतेः विद्राविता इति यावत्। विनाशिता इति तात्पर्यम्। तेषु विनाशितेष्वपि स्वान्तर्गतविष्णुसेनारूपाः ज्ञानभक्त्यादिगुणाः इन्द्रात् स्वान्तर्गतविष्णु-प्रसादात् चितयन्तः = सङ्कालयन्तः पुनर्द्रावयन्तः आयन्= आगच्छन्। पृष्ठतोऽनुद्रुत्यैव गताः समूलनाशाय यत्नमकुर्वन् इति तात्पर्यम् ॥ ६ ॥

(ऋ.म-३९०)

त्वमे॒तान् रु॑द॒तो जक्ष॑त॒श्चायो॑धयो॒ रज॑स इन्द्र पा॒रे।
अवा॑दहो दि॒व आ दस्यु॑मु॒च्चा प्र सु॑न्व॒तः स्तु॑व॒तः शंस॑मावः ॥ ७ ॥

(ऋगर्थोद्धारः) - त्वमेतान् रुदत इति ॥ हे इन्द्र ! रुदतः = त्वयैव सम्पीडितत्वाद्धेतोः रोदनं कुर्वतः जक्षतश्च = 'जक्ष भक्षहसनयोः' मुनीन् भक्षयतश्च, एतान् = नरभक्षकत्वेन प्रसिद्धान् रक्षोगणान् रजसः रजोगुणस्य पारे अन्ते सत्वगुणभिवृद्धिर्यदा स्यादिति यावत्। तदैव अयोधयः = योधितवान् असि। सत्वगुणाभिवृद्ध्या मुनिभक्षकराक्षसनिरसनेन जगत्पालनमकरोरित्याशयः।

किञ्च एकवचनं बहुवचनार्थे। रुदतो जक्षतश्च दस्यून् = दस्युभूतान् तानेव राक्षसान् दिवः = स्वर्गाद् आ सम्यक् अवादहः। धातूनामनेकार्थत्वाद् भस्मीकरणस्य योग्यताभावेनासम्भवात्। दहतिरत्राऽक्षेपार्थः। अवक्षिप्त-वानसि। सङ्ग्रामे हत्वा स्वर्गादपि निराकृतवानसि। स्वर्गभागिनो नाकरोदिति

यावत्। यद्वा, 'ये युध्यन्ते प्रधनेषु शूरासः नाकस्य पृष्टे सुकृतेन भूत्वा' इति सङ्ग्रामे हतानामपि राक्षसानां वीरस्वर्गसद्भावाद् दिवः = स्वर्गान्निराकृत्य स्वर्गभोगानन्तरमिति यावत्। आ = सम्यक् अव = अवमानी। चान्धन्तमसि अदहः = क्षिप्तवानसीति योज्यम्। यथोक्तम् - **'इमं लोकं हीनतरं वा विशन्ति'** इति। हीनतरं तम एवाऽविशन्तीति तदर्थः। एवं यज्ञविघ्नकराणां राक्षसानां विनाशने सुन्वतः = सुन्वतां सोमकण्डनाद्युपलक्षितं यजनादिकर्म कुर्वतां, सवनत्रयात्मकं यज्ञमिति शेषः। स्तुवतः = स्तुवताम् ऋत्विजाम् उच्चावचैः शंसं = स्तुतिं च, प्रावः = प्रकर्षेणारक्षः। विघ्ननिवारणेन हि तदुभयं रक्षितं भवति। यथोक्तम् --

'त्वां सुन्वतां सुरकृता बहवोऽन्तरायाः
तान् को विलङ्घ्य परमं व्रजतात् पदं ते।
नान्यस्य बर्हिषि बलिं ददतः स्वभागं
धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि' ॥ इति।

यद्वा, हे इन्द्र = परमेश्वर ! रुदतः = रोदनादिना शोच्यत्वापादकानिति यावत्। 'तान् शोच्यशोच्यानविदोरुशोचः' इति वचनात्। जक्षतश्च = आनन्दादिगुणभक्षकान्, तदाच्छादकान् इति यावत्। एतान् = अनुभवसिद्धान् पुंदोषान् अज्ञानादीन् रजसः पारे = रजोगुणस्यान्ते सत्वगुणाभिवृद्धौ सत्याम्, आध्यात्मिकसत्वगुणकार्यज्ञानाद्यभिवृद्धौ सत्यामिति यावत्। अयोधयः = सत्वगुणेन भक्तानां ज्ञानभक्त्यादिगुणान् उत्पाद्य ज्ञानादिगुणानाम् अज्ञानादिना युद्धमकारय इत्याशयः।

किञ्च, दस्युं = आनन्दादिगुणाच्छादकत्वेन दस्युभूतान् अज्ञानादि-सर्वदोषान् दिवः = ज्ञानतः, ल्यब्लोपनिमित्ता पञ्चमी। भक्तानां ज्ञानाद्यभिवृद्धिं दत्वा, अभिवृद्धज्ञानादिनेति यावत्। आ = सम्यक् अदहः=

'दह भस्मीकरणे' दग्धवानसि। एवं ज्ञानादिविघ्नकराज्ञानादि-दोषनाशेन सुन्वतः = सुन्वतां ज्ञानभक्त्यादिना मनआख्यसोमस्य कण्डनं सङ्घर्षणं कुर्वताम्। ज्ञानयज्ञमिति शेषः। स्तुवतः = त्वां स्तुवताम् उच्चावचैः शंसं = स्तुतिं च, प्र = प्रकर्षेण आवः = अरक्ष इत्यर्थः ॥ ७ ॥

(ऋ.म-३९१)

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण ॥ ८ ॥

(ऋगर्थोद्धारः) - चक्राणास इति ॥ दैत्यादयः, पृथिव्याः = पृथिव्यां स्थितानां जनानां परीणहं = 'णह बन्धने' परितो बन्धनं, चक्राणासः = चक्राणाः भृशं कुर्वाणाः कुर्वन्ति। निरपराधान् प्राणिनः कारागारेषु प्रतिबध्नन्तीत्यर्थः। एवं [1]प्रतिबद्धेभ्यः प्राणिभ्योऽपहृतेन [2]हिरण्येन= हेम्ना मणिना= मणिरत्नादिभिश्च शुम्भमानाः= शोभमाना भवन्ति। त एवमकुतो-भयम्मन्याः दैत्यादयो हिन्वानासः = 'हि गतौ वृद्धौ च' अन्तर्णीतण्यर्थोऽ-यम्। इतरेतरं गमयन्तः, परस्परं गमनं प्रेरयन्त इत्यर्थः। वर्धयन्तो वा। परस्परं मिलित्वा कार्यकरणे मतिं वर्धयन्त इत्यर्थः। एवं कारागारप्रतिबद्ध-प्राणिसम्बन्धिहिरण्याद्यपहारे परस्पर[3]साहाय्यवन्तोऽपि ते इन्द्रं वासुदेवं कथञ्चिन्न तितिरुः = नैवावतरन्। तमतिक्रम्य न गताः, तद्धस्तान्तर्गता एवेत्यर्थः। यद्यपीह लोके सर्वैर्दुर्दमास्तथाऽपि परमेश्वरेण दण्ड्यन्त इति भावः। नन्वीश्वरस्तद्वृत्तं ज्ञात्वा दण्डयेत्। तज्ज्ञानमेव तस्य कथम्? सर्वज्ञत्वादिति वदामः। किञ्चेन्द्रो वासुदेवो दैत्यानां वृत्तदर्शनार्थं सूर्येण सहितान् स्पशः = 'स्पशाज्ञातदृशौ' इति धातोः अज्ञातत्वेन चरान् देवसङ्घान्, परि = परितः समन्तात्। अदधात् = स्थापितवान्। तथा चोक्तम् --

१. 'प्रतिबन्धेभ्यः' इति क.। २. 'हिरण्ययेन' इति क.। ३. 'सहायवन्तोऽपि' ध.।

'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्' ॥ इति।

तथा

'सूर्योऽग्निः खं मरुद्गावः सोमः सन्ध्याऽहनी दिशः।
कालः स्वयं धर्म इति ह्येते धर्मस्य साक्षिणः' ॥ इति।

यद्वा, अज्ञानसंशयमिथ्याज्ञानादयो ये दृढदोषाः हिरण्येन मणिना शुम्भमाना इति तैस्तैः हिरण्यादिधनैः पुरुषं शुम्भमानाः शोभमानाः, प्रलोभमानाः सन्त इति यावत्। पृथिवीस्थितानां सज्जनानां परीणहं = संसारे बन्धनं चक्राणासः = कुर्वन्ति। एतादृशास्ते दोषान् हिन्वानासः = संसारबन्धने परस्पर[1]साहाय्यवन्तोऽपि इन्द्रं न तितिरुः। भगवद्दत्त-तद्विषयकसज्ज्ञानं नैवातरन् ते न दण्ड्यन्त एवेति भावः। नन्वीश्वरोऽ-ज्ञानादिदोषाणां वृत्तं ज्ञात्वा स्वकीयज्ञानेन तान् दण्डयेत्। तज्ज्ञानमेव तस्य कथम्? सर्वज्ञत्वात्। किञ्च वासुदेवोऽन्तरज्ञानादीनां वृत्तज्ञानाय सूर्येण सहितान् स्पशोऽज्ञातचरान् देवसङ्घान् पर्यदधादिति ॥ ८ ॥

(ऋ.म-३९२)

परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम्।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र ॥ ९ ॥

(ऋगर्थोद्धारः) - परि यदिन्द्र इति ॥ अत्र द्वाविन्द्रशब्दौ। एको यौगिकोऽपरो रूढ इति ज्ञातव्यम्। हे इन्द्र! = परमैश्वर्योपेत इन्द्र! प्रसिद्धवासुदेव! वा। यत् = यस्मात्, महिना = महिम्ना, विश्वतः = सर्वदा सीम् = सकारः सम्यगित्यर्थे। ईमित्येतद् एवार्थे। सम्यगेवानुपचारेणेति

१. 'सहायवन्तोऽपि' घ.

यावत्। रोदसी = द्यावापृथिव्यौ उभे = मिलिते सहैव, एककालमेवेति यावत्। परि अबुभोजीः = पर्यभुङ्क्थाः, 'भुज पालनाभ्यवहारयोः'। अवनम् अकार्षीरित्यर्थः। एवं द्यावापृथिव्योरेककाल एवावनकर्तृत्वेनातिसमर्थत्वात् त्वम्, अमन्यमानान् = त्वामजानतो दस्युं = दस्यून् अभक्तान् अभि = सम्यक् मन्यमानैः = त्वां जानद्भिः ब्रह्मभिः = ब्राह्मणैर्भक्तसङ्घैः निरधमः= निराकृतवानसि। यस्मात् त्वं महासमर्थोऽतस्त्वदीया अपि त्वदाश्रयेण विरोधिनां निरसनेऽतिसमर्था इति ऋकूतात्पर्यम्। आद्य इन्द्रशब्दो यौगिको द्वितीयो रूढ [1]इति विशेषणविशेष्यभावस्याभिप्रेतत्वान्न पुनरुक्तिः। यद्वा, उभावरूढावेव। द्विर्वचनस्याऽदरार्थत्वान्न पुनरुक्तिरिति द्रष्टव्यम्॥ ९ ॥

(ऋ.म-३९३)

न ये दि॒वः पृ॑थि॒व्या अन्त॑मा॒पुर्न मा॒याभि॑र्धन॒दां प॒र्यभू॑वन्।
यु॒जं वज्रं॑ वृष॒भश्च॑क्र॒ इन्द्रो॒ निर्ज्योति॑षा॒ तम॑सो॒ गा अ॑दुक्षत्
॥१०॥ २ ॥

(ऋगर्थोद्धारः) - अत्र पूर्वार्धस्थपदानां य इत्यनेन सम्बन्धे त एवमिति वक्तव्यं नास्तीति न्यूनता स्यात्। अतो ये मायाभिरित्यतः परं द्युपृथिव्योरशेषभोगेच्छव इत्यध्याहार्यम्। धनदामित्यनन्तरं जिगीषव इत्यध्याहारः। यच्छब्दश्रवणात् त इत्यस्याप्यध्याहारः। तथा चैवं योजना। ये = दस्यवो दैत्याः मायाभिः स्वकीयैः छद्मभिरेव द्यावापृथिवीसम्बन्धि-समस्तभोगेच्छवो ये च धनदां = धनस्य दातारं तमिन्द्रमीश्वरं च जेतु-मिच्छवस्ते दिवः = स्वर्गस्य पृथिव्याश्च अन्तं = एकदेशमपि नाऽपुः। तथा स्वमायाभिः कदाऽपि धनदामिन्द्रं न पर्यभूवन् = नाजैषुः। केवलं तथेच्छामेवाकुर्वन् तदनुसारेण कार्यं नावापुरित्याशयः। इन्द्रो बहुभिरपि

१. 'अतः' घ.।

न पराजीयत इत्येतत् किमन्यसहायवत्त्वादित्याशङ्कायां नेत्युच्यते। वृषभः= भक्ताभिलषितवर्षिता सर्वश्रेष्ठो वा इन्द्रः = परमसमर्थो विष्णुर्निरपेक्षः सन्, एक एवेति यावत्। वज्रं = 'वज गतौ'। श्रवणादिद्वारकं स्वापरोक्षज्ञानयुजं चक्रे। जीवस्वरूपज्ञानावरकभावरूपाज्ञानहेतुमिति शेषः। तेन युजं युक्तं सम्बन्धं चक्रे = कृतवान्, तेन तद्विनाशितवान् इति यावत्। नहि दारुसंयोगं विना कुठारेण तच्छिद्यते इति भावः।

किञ्चेन्द्रो निः = निश्चयेन ज्योतिषा = ज्ञानेन स्वविषयं निश्चयात्मकं श्रवणादिद्वारकं वृत्तिरूपमपरोक्षज्ञानमुत्पाद्य तेन गाः = जीवस्वरूप-भूतज्ञानानि, तमस इति वचनसामर्थ्याद् भावरूपाज्ञानाख्यतमसा गूढानीति लभ्यते। एतादृशानि ज्ञानानि तमसः यदग्रं मूलाविद्याख्यं भावरूपमज्ञानं स्वगुणाच्छादकमायाभिधं तदिह तमो विवक्षितं, न ज्ञानाभावः। तेन कथमभावस्याऽवरकत्वमिति चोद्यानवकाशः। तस्मात् तमसो अधुक्षत्= अदुहत्। धातूनामनेकार्थत्वात्। आवरणभूततन्निरासेन व्यक्तानि कृत-वानित्यर्थः। अत एव सिद्धान्ते आवरकत्वान्यथानुपपत्त्यैव भावरूपाज्ञानं साधितमिति द्रष्टव्यम्।

प्रसिद्धेन्द्रपक्षेऽपि प्रथमार्धर्चव्याख्यानं समानम्। तत्कथमन्यसहायवान् बहुभिरपि न पराजीयत इत्याशङ्कायां नेत्युच्यते। वृषभः। देवश्रेष्ठ इन्द्रः गवापहारिपणिनामकदस्यून् हन्तुमिति शेषः। वज्रं = वज्राख्यमायुधं युजं चक्रे = सम्बन्धं कृतवान्। तेन तानवधीदिति यावत्। नहि दारुसंयोगं विना, कुठारेण तच्छिद्यत इति भावः। किञ्चेन्द्रो ज्योतिषा = स्वप्रभावेन, गाः = गिरिगुहान्धकारे यैः पणिभिः निर्बद्धा आसन् तान् हत्वा तमसः = गिरिगुहान्धकारात् निः = बहिर्निष्क्रामयित्वा अधुक्षन् = अदुहत्। यज्ञोपयुक्तक्षीरदोग्ध्रीरकरोदित्यर्थः॥ १० ॥

(ऋ.म.-३९४)

अनु स्वधामक्षरन्नापो अस्याऽवर्धतमध्य आ नाव्यानाम्।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाऽहन्नभि द्यून्
॥ ११ ॥

(ऋगर्थोद्धारः) - अनुस्वधामिति ॥ अत्र पूर्वोत्तरग्रन्थैकवाक्यतासिद्धये यस्येत्यध्याहारः कार्यः। तथा च यस्य = पूर्वं प्रतिपादितस्य, अस्य = इदानीं प्रतिपाद्यमानस्येन्द्रस्य, आपः = कर्माणि व्यापाराः, स्वधां = सौख्यमेव अन्वक्षरन् = 'क्षर विनाशसन्ततदानयोः' इति धातोः सन्ततमदुः, निरन्तरं दत्तवन्त इत्यर्थः। तदीयव्यापारज्ञानादिना परमानन्दावाप्तिर्भवति। स एवम्भूत इन्द्र ईशो यो मिथ्याज्ञानरूपो विरोधी नाव्यानां = स्वार्थे यत्प्रत्ययः। नावां = संसारसागरतरणोपायानां वेदवाचां मध्ये [१]अवर्धत मिथ्याज्ञानमपि अन्यथा व्याख्यातत्वाद् वेदादेव भवतीति प्रसिद्धम्। तं मिथ्याज्ञानरूपं विरोधिनम् ओजिष्ठेन = वीर्यवता हन्मना = करणे मनिन्। हतिसाधनेन मिथ्याज्ञानरूपानर्थनाशनसाधनेनेति यावत्। सध्रीचीनेन = समीचीनेन मनसा 'मनु अवबोधने' = अवबोधनेन आ अहन् = सम्यगहन्। किमर्थम्? अभिद्यून् = अभितो द्यौः प्रकाशः प्रसिद्धिरभिव्यक्तिरिति यावत्। यस्याऽनन्दाद्यात्मकत्वरूप-मोक्षाख्यपुरुषार्थस्यासौ अभिद्युः, तमुद्दिश्य तत्प्राप्त्यर्थमित्यर्थः। एकस्मिन्नपि मोक्षे बहुवचनं व्यत्ययेनेति ज्ञातव्यम्। मोक्षमित्यनुक्त्वाऽभिद्यूनिति प्रकाशपरशब्देन मोक्षोपादाने प्रयोजनम् आनन्दाद्यात्मकत्वरूपमोक्षस्य नित्यसिद्धत्वात् तत्प्राप्तिर्नाम प्रकाश एवेति सूचनमित्युक्तं भवति।

प्रसिद्धेन्द्रपक्षे त्वयमर्थः। यस्यास्येन्द्रस्य, आपः = कर्माणि, स्वधां =

१. अवर्तत' इति क. घ.।

सुखम् अन्वक्षरन्। स एवम्भूत इन्द्रः पुरन्दरो नाव्यानां = नौशब्दात् तात्पर्ये यत्प्रत्ययः। 'वान्तो यि प्रत्यये' (पा. सू. ६-१-७९) इति औकारस्य आव् इत्यादेशः। तथाच नावा तरणीयानाम् अगाधानामिति यावत्। अपामिति शेषः। मध्ये योऽवर्धत। नदीगतिं प्रतिरोधितवान् इति यावत्। तमहिं सध्रीचीनेन समीचीनेन, निर्भयेनेति यावत्। मनसा = हृदयेन ओजिष्ठेन= वीर्यवता हन्मना = हतिसाधनेन वज्राख्यायुधेन आ = सम्यग् अहन्। किमर्थम्? अभिद्यून् = अभितो द्यौः प्रकाशः कान्तिर्यस्य स्वर्गस्यासावभिद्यूः तमुद्दिश्य तत्प्राप्तये इत्यर्थः। एकस्मिन्नपि स्वर्गे बहुवचनं स्थानभेदापेक्षया। 'त्रिः सप्त सख्युः पदम्' इति श्रुतेः। उक्तं च कर्मनिर्णये-

'एकविंशति दिव्यानि स्थानानि दिवि चक्रिणः।
वज्रिणो वाऽपि तद्भक्तैर्भुज्यन्ते तानि याज्ञिकैः' इति।

नदीप्रवाहशातिप्रतिबन्धकेऽहौ हते सति लोकानां नदीस्नानादिना [१]स्वर्गो भवतीति स्वर्गोद्देशेन तद्धननं युक्तमिति द्रष्टव्यम्॥ ११॥

(ऋ.म.-३९५)

न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः।
यावत्तरो मघवन् यावदोजो वज्रेण शत्रुमवधीः पृतन्युम्॥१२॥

(ऋगर्थोद्धारः)- न्याविध्यदिलीबिशस्येति ॥ नि अविध्यदिति पदच्छेदः। इन्द्रः प्रसिद्धः। इलीबिशस्य = इला भूः साऽस्त्येषामाश्रयत इति व्युत्पत्त्या दुर्बुद्धिप्रेरणाय भूस्थितमनुष्येषु प्रविष्टोऽसुर इलीविशः। उपपददैर्घ्यं वस्य बत्वं च छान्दसम्। तस्येलीबिशस्य तन्नामकस्यासुरस्य दृळ्हा = 'अज्मध्यस्थढकारस्य ळ्हकारं बह्वृचा जगुः' इति वचनाद् दृढा दृढानि यानि बलादीनीति शेषः। तानि न्यविध्यत् = न्यहनत् अनाशयत्।

१. 'स्वस्वर्गो' इति क.।

किञ्चेन्द्रः शुष्णं = 'शुषेर्नक्' णत्वं च। शोषकं जनानां दुःखहेतुमिति यावत्। शृङ्गिणं= वृषरूपं च दैत्यं, व्यभिनत्= अहनत्। परोक्षतः स्तुत्वाऽ-परोक्षतः स्तौति- **यावदिति** ॥ अत्र तरस्तुर शब्दपर्यायो वेगवाची। ओजःशब्दस्तु शक्तिविक्रमोभयवाची। तथा च हे मघवन् = इन्द्र यावत् = यावान् तरस्तुरो वेगः स्वस्यास्ति तावता समस्तेन वेगेन यावदोजः = यावती शक्तिः यावान् विक्रमो [१]वीर्यं वा स्वस्यास्ति तावत्या समस्तया शक्त्या तावता समस्तेन विक्रमेण पृतन्युं = युध्यन्तं शत्रुं इलीबिश-नामकासुरवृषदैत्याभ्यामन्यमपि शत्रुं वज्रेण अवधीः = जघन्थेत्यर्थः।

अध्यात्मपक्षे- इन्द्रः परमेश्वरः इलीबिशस्य= इलिनो मनुष्यान् विशति प्रविशति तेषु तिष्ठतीति यावत्। इति व्युत्पत्या इलीबिशमज्ञानं तस्येलीबिशस्य दृळ्हा= दृढा दृढानि बलादीनि संसारेण बन्धकत्वादि-रूपाणि तानि न्यविध्यत्= न्यहनत् अनाशयत्। किञ्चेन्द्रः = परमेश्वरः शृङ्गिणम् अदम्यरूपगुणयोगेन वृष इव स्थितं शुष्णं= कामातुराणां ज्वरादिना देहशोषकत्वात् शुष्णः कामस्तं व्यभिनत्। परोक्षतः स्तुत्वाऽ-परोक्षतः स्तौति। हे मघवन् = धनवन् यशस्विन् मखपते परमेश्वर! यावत्तरः = स्वस्य यावान् वेगोऽस्ति तावता समस्तेन वेगेन यावदोजः = यावती स्वस्य शक्तिरस्ति तया शक्त्या यावान् स्वस्य विक्रमोऽस्ति तेन समस्तेन विक्रमेण वा पृतन्युं = युध्यन्तं शत्रुं अज्ञानकामाभ्याम् अन्यमपि शत्रुं क्रोधादिकं वज्रेण = सुबोधेन अवधीरित्यर्थः।

परमेश्वरपक्षे प्रसिद्धेन्द्रपक्षे च - हे मघवन् = विष्णो इन्द्र वा, यावत्तरः= यावांस्तव वेगोऽस्ति तावता समस्तेन वेगेन यावदोजः = यावती शक्तिस्तवास्ति तया समस्तशक्त्या यावान् विक्रमो वा तवास्ति तेन समस्तेन

१. 'वीर्यं च' घ.।

विक्रमेण शत्रुं = क्रोधादिकमसुरं वाऽवधीरिति योजना। हरेरिन्द्रस्य च शत्रुवधे शक्तिवेगादिसामस्त्यस्य प्रयोगार्थता प्रतीयते। सा चानुपपन्ना। हरेरनन्तशक्तित्वेन यस्मिन् शत्रौ स्वकीयं शक्त्यादिकं प्रयुञ्जीत तादृश-शत्रोरेवाभावात्। तथा विष्णुश्रीब्रह्मवायुसरस्वतीवायुगरुडशेषरुद्र-तत्पत्नीभ्योऽनन्तरं तत्त्वाभिमानिनो महेन्द्रस्य अहङ्कारिकप्राणादि-भ्योप्यधिकशक्तियुक्तत्वेन यस्मिन् शत्रौ स्वकीयं समस्तं शक्त्यादिकं प्रयुञ्जीत तादृशस्य शत्रोरभावात्। अतो यथाशक्त्यभियुध्यमानं शत्रुं जघन्थेत्येव प्रमाणाविरुद्धस्तदनुसारी चार्थ इति द्रष्टव्यम्॥ १२॥

(ऋ.म.-३९६)

अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन
वृषभेणा पुरोऽभेत्।
सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥ १३ ॥

(ऋगर्थोद्धारः)- अभिसिध्म इति॥ सिध्शब्दः क्विबन्तः सिद्धिवाची। ततो मत्वर्थे मप्रत्ययः। तथा च [१]अभितः = सर्वतः सर्वस्मिन् देशे सर्वस्मिन् काले चेति यावत्। सिध् सिद्धिः तद्वान् अभिसिध्मः = परमेश्वरः अस्य = जीवजातस्य शत्रून् = कामक्रोधाद्यरिषड्वर्गान् अजिगात् = अजयत्। स्वज्ञानं दत्वा परिहृतवानिति यावत्। किञ्च, तिग्मेन = विरोधिनः प्रति क्रूरेण वृषभेण = सर्वजीवश्रेष्ठेन प्राणेन उपदेशं कारयित्वेति यावत्। पुरः, सतां प्राणिनामिति शेषः। संसरत्यत्रेति व्युत्पत्त्या संसारशब्दवाच्यानि लिङ्गशरीराणि प्राणिनां पुराणीवातः संसाररूपाः पुरः वि अभेत् = अभिनत्। अत्र वृषभः प्राणो ब्रह्मा मुख्यप्राणो वा। यथोक्तम् -

१. अत्र तथा 'च' इत्यनन्तरं 'अभि' इत्यधिकेन पदेन भाव्यमिति भाति।

'उपदेशो ब्रह्मणस्तु सर्वेषामेव मुक्तये।
ज्ञानं प्राप्य बहुभ्योऽपि नर्ते मुक्तिश्चतुर्मुखात्॥ ज्ञानमप्राप्य'

इति। तथा

'उपास्य वायुं प्रथमं वायौ सुष्ठ्वपरोक्षिते।
अनुज्ञातस्ततस्तद्वं तत्र तत्र हरिं स्मरेत्॥
कृत्वाऽऽपरोक्ष्यं तं चापि काले काले स्मरन् पुनः।
न किञ्चित् कामयेत् पश्चात् स क्षिप्रं मुक्तिमेष्यति॥' इति

किञ्चेन्द्रः परमेश्वरश्च वृत्रमज्ञानं वज्रेण = ज्ञानेन समसृजत् = संयोजयामास। समानविषयं चकार यद्विषयकमज्ञानमभूत् तद्विषयकं ज्ञानमुत्पादितवान् इति यावत्। अमुष्याज्ञानस्य हननायेति शेषः। किञ्च शाशदानः = अतिशयितं शं सुखं शशं तस्य अदनो भोक्ता शशादनः स एव व्यत्ययेन शाशदानः सदैव अतिशयितसुखभोक्ता स इन्द्रः परमेश्वरः स्वां = स्वविषयां मतिं प्रातिरत् = प्रकर्षेणादिशत्। दत्तवान् स्वभक्तजनेभ्य इति शेषः।

प्रसिद्धेन्द्रपक्षे त्वयमर्थः। अभिसिध्मः = यथायोग्यं सर्वसिद्धियुतः इन्द्रः अस्य = लोकस्य शत्रून् = दैत्यान् अजिगत् = अजयत्। किञ्च वृषभेण= वर्षणाङ्गेन तिग्मेन = तीक्ष्णेन वज्रेण पुरः = शम्बरस्य पुराणि व्यभेत् = अभिनत्। वज्रस्य मेघशृङ्खलाच्छेदनद्वारा वर्षणाङ्गत्वमिति द्रष्टव्यम्। यथोक्तं शान्तिपर्वणि-

मेघानां शृङ्खलां छित्वा वज्रेण शतपर्वणा।
सुत्रामाज्ञापयद् वृष्ट्यै तान् लोकहितकाम्यया' ॥ इति॥

किञ्चेन्द्रो वृत्रं वज्रेण समसृजत् संयोजयामास। अमुष्य वृत्रस्य हननायेति शेषः। नहि दारुसंयोगं विना कुठारेण तच्छिद्यते। किञ्च शाशदानः =

आहङ्काकारिकप्राणादिभ्योऽप्यतिशयितसुखी स इन्द्रः स्वां = स्वविषयां मतिं प्रातिरत् = प्रादिशत् दत्तवान्। अहङ्कारिकप्राणादिस्वभक्तजनेभ्य इति शेषः॥ १३॥

(ऋ.म.-३९७)

आवः कुत्समिन्द्र यस्मिञ्चाकन् प्रावो युध्यन्तं वृषभं दशद्युम्।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥ १४॥

(ऋगर्थोद्धारः) - हे इन्द्र परमेश्वर ! प्रसिद्धो वा। चाकन्, करोतेः शत्रन्तस्य रूपमेतत्। तथा च कुर्वन् त्वमित्यर्थः। कुर्वन्निति क्रियाश्रय उच्यते। क्रिया च कर्तरि वर्तते। कर्ता च स्वतन्त्रः 'स्वतन्त्रः कर्ता' (पा.सू.१-४-५४) इति स्मरणात्। अतः स्वतन्त्रकर्ता त्वमित्यर्थः सिध्यति। प्रसिद्धेन्द्रे तु भगवद्दत्तस्वातन्त्र्योपेतस्त्वमिति व्याख्येयम्। यस्मिन् कुत्से स्थित इति शेषः। इन्द्रस्य सर्वत्र स्थितत्वाद् यस्य भक्त्या सुतोषितस्त्वं देहान्तः स्वात्मरूपप्रदर्शनाय यदीये देहे विशेषतः सन्निहित इति यावत्। तं कुत्सं नाम मुनिम् आवः = अरक्षः। युध्यन्तं = प्रतिभटैः सह युद्धं कुर्वन्तं वृषभरूपं दशद्युं नाम नृपं च प्रावः = प्रकर्षेणारक्ष इत्यर्थः। तस्यैव युद्धमुत्तरार्धे प्रपञ्च्यते दशद्युनामकनृपकृतमपि महायुद्धं त्वदधीनमिति सूचयितुम्। श्वैत्रेयः= वायुर्हि श्वा। 'तस्मै श्वा श्वेतः प्रादुर्बभूव' इति वायोः श्वरूपस्य छन्दोग्ये प्रसिद्धत्वात् तेन इता तद्धार्येति यावत्। श्वेता। रमणाद् रा। श्वेता च सा रा च श्वेत्रा भारती तस्याः सुतः श्वैत्रेयोऽयं दशद्युर्नाम नृपो यदा नृषाह्याय= नृणां प्रतिभटानां पुरुषाणां साह्याय = 'सह सहने' अस्मात् छन्दसि ण्यत्प्रत्यये साह्यं सहनमभिभवः तस्मै = युध्यतो जनान् अभिभवितुमिति यावत्। उदित्यस्य तस्थावित्यनेनापि सम्बन्धः। उत्तस्थौ = उदस्थात् स्थित इत्यर्थः। तदा वृषभरूपस्यास्य दशद्युनामकनृपस्य शफच्युतः = खुरोत्थितो रेणुः

द्यां = अन्तरिक्षम् उत् नक्षत, अडभावश्छान्दसः। उदनक्षत = 'नक्ष गतौ' उदगच्छत्। एतादृशमहायुद्धं तेन त्वत्संरक्षणायैव कृतम्। अतस्त्वदधीन-मेवैतदीयं युद्धमित्याशयः।

अध्यात्मपक्षे एवं योजना। हे परमेश्वर कुत्सं, कुदिति निपातः कुत्सि-तार्थः। 'सृ गतौ' अन्तर्णीतण्यर्थात् डः तथा च कुत् कुत्सितं पापं सरति गमयति उत्सारयति इति कुत्सं = भक्तैः क्रियमाणम् अश्वमेधादि क्रियारूपं धर्मं त्वम् आवः। यज्ञतत्साध्यादृष्टयोरुभयोरपि धर्मत्वेन व्यवहाराद् अदृष्टरूपधर्मस्य वृषभशब्दवाच्यत्वेन वक्ष्यमाणत्वाद् अत्र तद्ग्रहणे पुनरुक्तिः स्यादतोऽश्वमेधादिक्रियारूपं धर्ममित्येव व्याख्येयम्। अश्वमेधादिक्रियायाः पापोत्सारणहेतुत्वं च 'अपापे पापशङ्कित्वाद् अश्वमेधैर्यजाच्युतम्' इत्यादिवचनात् सिद्धमित्यवगन्तव्यम्। चाकन् = स्वतन्त्रस्त्वं यस्मिन् जायमानं त्वद्विषयकं ज्ञानं यस्य धर्मस्याधीनं तं युध्यन्तं = पापेन सह युद्धं कुर्वन्तं, तद्विनाशकमिति यावत्। दशद्युं = दशसु दिक्षु द्यौः प्रकाशः प्रसिद्धिः यस्य तम्। 'यथा वृक्षस्य सम्पुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति' इति श्रुतेः। एतादृशं वृषभं = वृषभशब्दस्य धर्मनामसु पाठाद् अश्वमेधादिक्रियाजन्या-दृष्टरूपं धर्मं च प्रावः। अत्र अदृष्टरूपो धर्मोऽपि द्विविधः प्रवृत्तनिवृत्तभेदात्। तत्राऽद्यो रेणुशब्दवाच्यो द्वितीयस्तु वृषभशब्दवाच्यः। तदुभयधर्मस्वरूपमेवोत्तरार्धेन प्रपञ्च्यते। शफच्युतो रेणुः प्रसिद्धवृषभसम्बन्धी एवं रेणुरूपः प्रवृत्तधर्मोऽपि वृषभसम्बन्धी वृषभशब्दवाच्यनिवृत्तधर्मसम्बन्धीति यावदित्येवं वृषभसम्बन्धित्वरूप-सादृश्याच्छफच्युतशब्दः प्रवृत्तधर्मे गौण इति भावः।

ननु कथं रेणुशब्दवाच्यप्रवृत्तधर्मस्य वृषभशब्दवाच्यनिवृत्तधर्म-सम्बन्धित्वम्? अतत्साधनत्वाद् अतत्साध्यत्वाच्चेति चेत्। उच्यते।

प्रवृत्तधर्मस्यापि निवृत्तधर्मजातीयत्वात् तत्सम्बन्धित्वं तज्जातीयत्वं च तन्निष्ठधर्माक्रान्तत्वम्। स च धर्मः क्रियासाध्यत्वरूपो वा अदृष्टरूप-धर्मत्वरूपो वा स्वर्गमोक्षयोरुभयोरपि पुरुषार्थत्वेन व्यवहारात् पुरुषार्थ-साधनत्वरूपो वा द्रष्टव्यः। एवं च शफच्युतो रेणुः स एव उक्तरीत्या वृषभसम्बन्धी प्रवृत्तधर्मो द्यां = स्वर्गम् उन्नक्षत उदनक्षत = उदगच्छत्। स्वर्गमात्राभिगामी स्वर्गमात्रसाधनमभवदित्यर्थः। श्वैत्रेयः = उक्तरीत्या वाणीपुत्रो वेदप्रतिपाद्यो निवृत्तनामको मुख्यधर्मस्तु नृषाह्याय = नृणाम् अपरोक्षज्ञानेच्छूनां ज्ञानजननसाह्याय साहाय्याय तथा नृणाम् अपरोक्षज्ञानानन्तरभाव्यानन्दाद्यभिवृद्धिरूपमोक्षजनने ज्ञानस्य साहाय्याय तस्थौ। उदित्यस्यात्रापि सम्बन्धः उत्तस्थौ। उदस्थात्। स्थित इत्यर्थः। 'ज्ञानात् पूर्वाणि कर्माणि शुभानि ज्ञानसिद्धये' इत्यादिवचनैरपरोक्षज्ञानात् पूर्वं कृतानां निवृत्तकर्मणां ज्ञानजनकत्वावगमात्। तथा लिङ्गभङ्ग-विशिष्टानन्दाभिवृद्धेर्मोक्षत्वेन लिङ्गभङ्गस्यापरोक्षज्ञानमात्रसाध्यत्वेऽ-प्यानन्दाभिवृद्धिरूपमोक्षस्य ज्ञानकर्मसमुच्चयसाध्यतायाः

'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु।
आनन्दो ह्रसतेऽकार्याच्छुभं कृत्वा च वर्धते'

इत्यादिप्रमाणप्रमितत्वादित्यवगन्तव्यम्॥ १४॥

(ऋ.म-३९८)

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम्।
ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः
॥ १९॥ ३॥ १॥ (३३)॥

(ऋगर्थोद्धारः) - आवः शममिति॥ हे मघवन्! अधीश त्वं न केवलं भक्तानां क्रियात्मकमदृष्टात्मकं च धर्ममावः किन्तु शमं = शमात्मकं 'शमो

मन्निष्ठता बुद्धेः' इति वचनात् त्वन्निष्ठबुद्धित्वरूपम् उपलक्षणमेतत् भक्त्यादिरूपं च वृषभं= धर्ममपि त्वमेव आवः = अरक्षः। न केवलं भक्तानामेव शमात्मकधर्ममावः किं नाम ? तुग्र्यास्वपि= अन्नाकाशयज्ञवरिष्ठेषु तुग्रशब्द इति शाब्दिकवचनाद् अत्र तुग्रशब्दो वरिष्ठार्थो गृह्यते। वरिष्ठ इति च विशेष्यापेक्षः। तथा च कालो विशेष्यो विवक्ष्यते। तथा च तुग्रः वरिष्ठो दीर्घ इति वचनात् काल इति योग्यतया लभ्यते। तथा च दीर्घकालः तुग्रः।

अथवा तुग्रशब्दस्य [1]दीर्घकालनामसु पाठाद् दीर्घः कालः साक्षाद् रूढ्यैव तुग्रः। तस्माद् भवार्थे यत्प्रत्यये 'यस्येति च' (पा.सू. ६-४-१४८) इति तुग्रशब्दस्थाकारलोपे तुग्र्या - इति जाते विशेष्याकाङ्क्षायां स्त्रीलिङ्गप्रयोगाद् योग्यतया च सन्ततिर्लभ्यते। तथा च तुग्र्यासु = भक्तानां सन्ततिष्वपि क्रियादृष्टात्मकं शमात्मकं च धर्ममरक्ष इत्यर्थः। किमर्थं भक्तानां तत्सन्ततिषु च धर्ममरक्ष इत्यतः पूर्वानुवादेन प्रयोजनमुच्यते। त्वं श्वित्र्यं = शुना श्वरूपेण वायुना इता, तद्भार्येति यावत्।

श्विता श्विन् इत्यत्र प्रातिपदिकान्तनकारलोपे अकारस्य शकन्ध्वादित्वात् पररूपे श्वितेति भवति। अन्यथा श्वन् इतेत्यत्र नलोपे गुणे च सति श्वेतेति स्यात्। रमणाद् रा। श्विता च सा रा च श्वित्रा। अत्रापि श्वितरेति स्थिते तकारस्थाकारस्य पररूपे श्वित्र् श्वित्रेति भवति। अन्यथा श्वितरेति स्यात्। श्वित्राशब्दात् 'तस्यापत्यं' (पा.सू.४-१-९२) इत्यर्थे तद्धिते घप्रत्यये तस्य इयादेशे 'यस्येति च' (पा.सू. ६-४-१४८.) इति भसञ्ज्ञकस्याकारस्य लोपे श्वित्र् इयेति स्थिते निर्वचनत्वादिकारस्यापि लोपे श्वित्र्येति भवति। तथा च श्वित्र्यं= वायुभार्यायाः वाण्याः अपत्यम्, अपत्यत्वं च तदभिमन्यमानवेदवाणीप्रतिपाद्यत्वनेति ज्ञातव्यम्। एतादृशीं गां = धर्मं गोशब्दस्य

१. 'दीर्घनामसु' घ.।

वृषभपर्यायत्वात्। गोशब्दार्थधर्मापेक्षया श्वित्र्यमिति विशेषणं द्रष्टव्यम्। अन्यथा श्वित्र्यां गामिति प्रयोगः स्यात्। अक्षर इति यत् तत् क्षेत्रजेषे = 'क्षि निवासगत्योः' इति धातोः क्षियन्ति निवसन्ति सर्वदाऽत्रेति क्षेत्रमवस्था। सर्वदा प्राणिवासाधिकरणावस्था मुक्तिरेव। तथा च मुक्तिरूपं यत् क्षेत्रमवस्था तस्याः जेषे = 'जि जये'। तुमर्थे से। जेतुं, विजयाय प्राप्तय इति यावत्। सावधारणमेतत्। मुक्तिक्षेत्रविजयायैव न तु क्षुद्रविषयलाभार्थमित्यर्थः। अत्र श्वित्र्यं गां यदरक्षः तत् क्षेत्रजेषु इति योजना। श्वित्र्यं गामित्यस्यानुवादत्वमनङ्गीकृत्य आवः शममितिवत् श्वित्र्यं गामरक्ष इति विधानाङ्गीकारे पूर्वस्याम् ऋचि वृषभं प्राव इत्युक्तत्वात् पुनरुक्तिः स्यादिति ज्ञेयम्।

किञ्च अत्र त्वयि ये पुरुषाः तस्थिवांसः ज्ञानेन स्थितिमन्तः त्वद्विषयकज्ञाननिष्ठायुक्ता इति यावत्। ते चिदपि= विमुक्ता निजरूपमिति शेषः। ज्योक् अक्रन् = ज्योगिति दीप्तिवचनो निपातः। 'स्वरादि-निपातमव्ययम्' इति वचनाद् इदमव्ययमिति यावत्। यो ज्योग् आमयावी स्यादित्यादौ यो ज्योगाख्यदीप्त्याख्यरोगवान्। उष्णरोगवान् ज्वराख्य-रोगवान् स्यादिति यावत्। 'स नवरात्रेण यजेत' इति ज्योगित्यस्य दीप्त्यर्थकत्वदर्शनात्। तथा च ज्योक् ज्योतिरक्रन् चक्रुः देदीप्यमानमकुर्वन् इत्यर्थः। ये त्वां तत्वतो जानन्ति मुक्ताः सन्तो दीप्तस्वरूपा भवन्ति इति यावत्। त्वां तत्त्वतो जानमानाः सर्वेऽपि मुक्ताः सन्तो दीप्तस्वरूपा भवतिन्त किम् ? ओमिति चेत्, तर्हि त्रिपुरं घ्नता रुद्रेण ये दैत्याः तत्रत्याः दग्धाः सन्तः पृथिवीतले जाताः तेषामपि भगवद्विषयकतत्त्वज्ञानवत्त्वान्मुक्तिप्रसङ्गः। न च तेषां तत्वज्ञानवत्त्वमेवाप्रामाणिकमिति वाच्यम्।

' दग्धाः पुरा ये त्रिपुरं घ्नतैव रुद्रेण जाताः पृथिवीतले ते।
अदर्शनं सर्वमुनीन्द्रवृन्दैः सहैव सज्ज्ञानमहानिधाने।

व्यासे प्रयातेऽपि सुतत्वविद्या तत्सम्प्रदायादपि तैरवाप्ता।
उत्सादितत्वाच्च दुरागमानां तत्सम्प्रदायस्य च नाशितत्वात्।
प्रसारितत्वाच्च सदागमानां पापा अपि [1]'ज्ञानमवापुरेतत्' ॥

इति प्रमितत्वाद् इत्याशङ्कायामुच्यते ॥ शत्रूयतां = शत्रुवदाचरतां शत्रुः शातयिता खण्डयिता। 'शत्रुश्चापि वधादिकृत्' इति वचनात्। नहि भगवतः साक्षान्मुख्यतः शत्रुः शातयिता वधादिकर्ताऽस्ति । अतो भगवतः शातयितुरभावात् शत्रुवदाचरताम् [2]इत्युक्तं। अरीणाम् अयोग्यानामिति यावत्। वेदना = वेदनानि अधरा = अधराणि फलाद् अपभ्रष्टान्येव अकः = अकरोः। बुद्धरूपेण अवातृत्य, तान् मोहयित्वेति शेषः।

प्रसिद्धेन्द्रपक्षे तु -- हे मघवन् इन्द्र ! श्वित्र्यं = भारतीपुत्रं गां = गोरूपं स्त्रीरूपत्ववारणाय तस्यैव विवरणं वृषभं= वृषभरूपं शमं= शमोपेतं दशद्युनामनृपम् आवः। न केवलं किन्तु याः तुग्र्यासु = तदीयसन्ततिषु उत्पन्ना प्रजा इति शेषः। ताश्चावः। किमर्थम् ? क्षेत्रजेषे = तदीयभूमण्डलविजयाय तत्प्राप्त्यर्थम्। यदि तदीयां सन्ततिं त्वं नारक्षः तर्हि नश्येत्। तथा च तदीयभूमण्डलाधिपत्यं प्राप्तः कोऽपि न स्यात्। तदीयसन्ततिस्थं विनाऽन्येन तस्यालभ्यत्वादित्यभिप्रायः। किञ्चात्र त्वयि ये तस्थिवांसः = यज्ञादिकारिणः त्वद्भक्ताः ते ज्योतिरक्रन् = निजं रूपं दीप्यमानमकुर्वन्। त्वां यजन्तः स्वर्गं प्राप्य तेजोमयदेहयुक्ता भवन्तीति यावत्। किं त्वां यजन्तः स्वर्गं प्राप्य तेजोमयदेहयुक्ता भवन्तीति यावत्। किं त्वां यजन्तः सर्वेऽपि निजं रूपं दीप्यमानमकुर्वन् कइति शङ्कायां नेत्युच्यते। शत्रूयतां त्वदरीणाम् अयोग्यानां वेदनानि = तदुपलक्षितकर्मादिसाधनानीति यावत्। अधरा = अधराणि फलभ्रष्टानि अकः = अकरोरित्यर्थः ॥ १५ ॥ ३ ॥ १॥ (३३)॥

---

१. 'ज्ञानमवापिरे तत्' इति क.। २. ' इति युक्तम्' क.।

सूक्तम् - ३४

॥ आश्विनं सूक्तम् ॥

हिरण्यस्तूप आङ्गिरसः। अश्विनौ। जगती। ९,१२, त्रिष्टुप्।

(ऋ.म.-३९९)

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः
॥ १ ॥

(ऋगर्थोद्धारः)- त्रिश्चिदिति ॥ द्वादशर्चमिदमाश्विनं सूक्तम्। हे नवेदसा= नवेदसौ = याभ्यामन्यो वेत्ता नेति नवेदसौ। सर्वतोऽप्यधिकज्ञानिनाविति यावत्। 'नभ्राट्' (पा. सू ६-३-७५) इत्यादिना नलोपाभावस्य निपातितत्वान्नवेदसावित्युक्तम्। अन्यथा अवेदसाविति स्यात्। भगवत्पक्षे इदं मुख्यं, प्रसिद्धाश्विनोस्तु गौणमिति ज्ञातव्यम्। अश्विनौ, अद्याऽरभ्यैवेति शेषः। त्रिश्चित् = त्रिरपि दिवा निशायां सन्ध्ययोश्च, सर्वदेति यावत्। युवां नोऽस्माकमेव भवतम्। सर्वापेक्षयाऽप्यस्मासु कृपां कुरुतमिति यावत्। कथम्भूतौ वां ? युवोः = युवयोः यामः = यान्त्यनेनेति यामो मार्गो विभुः = व्यापी। अशेषदेशेषु गतेः भगवन्मार्गस्य विभुत्वं मन्तव्यम्। रातिरुत = दानमपि विभु अशेषाभीष्टदातृत्वाद् दानस्य विभुत्वं ज्ञातव्यम्। किञ्च, युवोः = युवयोः यन्त्रं = यन्त्र्यन्ते नियम्यन्तेऽनेनेति यन्त्रं नियमनम्। वाससो हिम्येव = 'हि गतौ' ततो म्यक्। हिनोति तन्तुषु गच्छतीति हिम्या तन्तुक्षेपणी तुरीत्यर्थः। यथा हिम्या महाप्रयत्नेन विना वाससो निष्पादिका भवत्येवं भवदीयनियमनम्। अनायासेन सर्वबुद्धिप्रेरकाविति यावदिति भावः। एवम्भूतौ वां मनीषिभिः = ज्ञानिभिः देवैः सह अभ्यायं सेन्या = अभ्यायंसेन्यौ अभि अस्मान् प्रति आयः आगमनं 'अय पय गतौ' इति धातोः,

तस्मै अभ्यायाय। सेन्यौ सेनया युक्तौ। छान्दसो मुमागमः। यद्वा, अभ्यायार्था सेना अभ्यायसेना तया युक्तौ अभ्यायसेन्यौ, मध्यमपदलोपी समासः। तथा च देवैः सहास्मान् प्रत्यागन्तुं स्वसेनोपेतौ भवतमित्यर्थः॥

(ऋ.म.-४००)

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना
दिवा ॥ २ ॥

(ऋगर्थोद्धारः) - त्रयः पवय इति॥ हे अश्विनौ ! भवदीयमधुवाहने मधु सोमं प्रति ऊह्येते भवन्तौ येन तस्मिन् रथे त्रयः पवयः = वज्रः शरः खड्ग इत्यायुधानि। पविशब्दो यद्यपि वज्रवाची। तथाऽपि वधकारणत्वसादृश्याद् गौण्या वृत्त्याऽऽयुधमात्रे प्रयुक्त इति ज्ञातव्यम्। यद्वा पविशब्दो बज्र-वाच्येव। तत्साहचर्याच्छत्रिन्यायेन त्रयाणामपि पवित्वमिति मन्तव्यम्। त्रयः स्कम्भासः = स्कम्भाः स्तम्भाश्च कुन्तं ध्वजो धनुरिति वेणुविकारास्त्रयः पदार्थाः स्तम्भनामानः स्कभितासः = स्कभिताः स्तम्भिताः स्थापिताः सन्ति। ते विश्व इत् = सर्व एव पवयः स्कम्भाश्च सोमस्य वेनां = 'वी गतिप्रजनकान्त्यसनखादनेषु' इति धातोः नप्रत्यये गुणे च सति निष्पन्नो वेनाशब्दः खादनवाची। खादनं च पानं पानक्रिया पीयत इति पानं रसं [1]वामनुविदुः। आयुधानामचेतनत्वेऽपि चेतनाधिष्ठितत्वाद् युक्तमेतत्। एवम्भूतेन रथेन युवाम् आरभे= आरभत् इति क्विबन्तशब्दस्य चतुर्थ्यैक-वचनमेतत्। प्राणिनां यज्ञादिकर्मारम्भार्थं, प्राणिभिः यज्ञादिकर्माणि कारयितुमिति यावत्। यद्वा, कृतयज्ञादिकर्मणां स्वर्गादिलोकारम्भार्थं तत्प्राप्त्यर्थमिति यावत्। नक्तं = निशायां त्रिः = निशाप्रारम्भे तन्मध्ये

१. 'वाऽनुविदुः' क.।

तदन्ते चेति त्रिवारं त्रिर्वश्विनेत्यत्र त्रिः उं इति पदच्छेदः। दिवा च, त्रिः उं= त्रिरेव दिवाप्रारम्भे तन्मध्ये तदन्ते चेति त्रिवारम् अनुयाथः = सर्वदा यज्ञगृहे सन्निहितौ स्थः इत्याशयः। **'पृथग् रूपाणि विष्णोस्तु देवतान्तरगाणि च'** इति वचनात्।

अश्विनदेवतान्तर्गतबहिष्ठविष्णुपक्षे त्वयमर्थः। हे अश्विनौ बहिष्ठौ द्विरूपौ विष्णू उक्तरीत्या मधुवाहने रथे= सैन्यसुग्रीवमेघपुष्पबलाहकाख्यहय-चतुष्टयोपेते स्वीये रथे त्रयः सुदर्शनं चक्रं कौमोदकी गदा शार इत्यायु-धानि। त्रयः स्कम्भासः स्मम्भाः कुन्तादयस्त्रयो वेणव एव स्तम्भनामानः स्कम्भितासः स्कम्भिताः स्तम्भिताः स्थापिताः सन्ति। ते विश्व इत् = सर्व एव पवयः स्कम्भाश्च सोमस्य वेनां = पानं विदुः चेतनाधिष्ठितत्वाद् युक्तमेतत्। यथोक्तम् -

'वराद् रथाङ्गत्वमवाप कामः। गदा तु वायुर्बलसंविदात्मा
पञ्चात्मको मारुत एव बाणः' इति॥

एवम्भूतेन रथेन युवाम् आरभे। त्रिर्नक्तं याथ इत्यादि समानम्।

अध्यात्मं तु - हे अश्विनौ ! देहान्तर्गतौ भगवद्रूपविशेषौ ! भवदीये मधुवाहने, अत्र मधुशब्दो मोक्षार्थः। तथा च मधु मोक्षं प्रति, भक्तानां तद्दानायेति यावत्। ऊह्येते भवन्तौ येन तस्मिन् ज्ञानिनां शरीराख्यरथे त्रयः पवयो वेदास्तदभिमानिनो देवाः सन्निहिताः सन्ति। तथा त्रयः स्कम्भासः= स्कम्भाः स्कम्भनं स्तम्भनं शरीरधारणं तद्धेतुत्वात् स्तम्भनामानः प्राणापानव्याननामकाः मुख्यप्राणरूपविशेषाः स्कभितासः = स्कभिताः स्तम्भिताः स्थापिताः सन्ति। कस्याञ्चिद् धारणायाम् उदानसमानयोः प्राणादित्रिष्वन्तर्भावेन प्राणादयस्त्रय एव शिष्यन्ते। 'त्रित्वे हुत्वाऽथ पञ्चत्वम्' इति वचनात् तदभिप्रायेण त्रयाणामेव प्राणादीनाम् अत्रोक्तिः। यद्वा,

यथा सत्स्वपि वागादीन्द्रियेषु प्राधान्यात् 'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च' (भ.गी.अ. १५) 'हस्तादयस्तु स्थितेऽतो नैवम्' (ब्र. सू. २-४-७) इत्यादौ पञ्चानामेवोक्तिस्तथा सत्स्वपि प्राणादिपञ्चरूपेषु त्रयाणामेवोक्तिरिति ज्ञातव्यम्। पञ्चसु त्रयाणां प्राधान्यं चोदानसमान-व्यापारापेक्षया एतेषां व्यापारस्य बाहुल्याद्वा 'त्रित्वे हुत्वाऽथ' इत्युक्त-रीत्योदानसमानकर्मकहोमाधिकरणत्वाद्वा ज्ञातव्यं नतु स्वरूपापेक्षया। ते विश्व इत् पविस्कम्भशब्दवाच्या वेदाभिमानिनो देवाः प्राणाद्याश्च सोमस्य मनसो वेनां भगवद्विषये गतिप्रकारमनुविदुः। एवम्भूतेन ज्ञानशरीराख्यरथेन युवाम् आरभे = ज्ञानयज्ञादिकर्मारम्भार्थं, ज्ञानयज्ञादिकं कारयितुमिति यावत्। यद्वा, कृतज्ञानयज्ञादिकर्मणां मोक्षाख्यलोकारम्भार्थं, तत्प्राप्त्यर्थमिति यावत्। नक्तं = निशायां त्रिः दिवा च त्रिरेव अनुयाथः = सर्वदा तत्र सन्निहितौ स्थ इत्यर्थः॥ २॥

(ऋ.म-४०१)

समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम्।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम्॥ ३॥

(ऋगर्थोद्धारः) - समाने अहन्निति॥ हे अश्विनौ! भगवद्रूपविशेषौ! समाने= सुखदुःखवत्त्वलक्षणवैचित्र्याख्यवैषम्यहीने किन्तु केवलं सुखदुःखभाजने इति यावत्। अहन् = अह्नि विमुक्तिकाल इति यावत्। स एव हि मुख्याहः। त्रिः= सर्वदा अवद्यगोहना= अवद्यगोहनौ दोषाच्छादकौ, अखिलदोषनाशकौ इति यावत्। युवं= युवाम् अद्य युवयोः भक्तानाम् अस्माकं यज्ञं= ज्ञानयज्ञं, त्रिः= त्रिवारं, मधुना= मधुत्वहेतुना हस्तेन मिमिक्षतं= स्पृशतं, तद्विषयीभवतमिति यावत्। किञ्च युवं = युवां

अस्मभ्यं दोषा= रात्रौ उषसः = उषसि दिन इति यावत्। एवमहोरात्रं त्रिः सर्वदैव वाजवतीः = युद्धवतीः, आध्यात्मिक युद्धजितानीति यावत्। उषः= सुखरूपान्नानि पिन्वतं= दानार्थोऽयम्। अलं दत्तम्। ज्ञानाज्ञानकर्तृका-ध्यात्मिकयुद्धे तत्र ज्ञानेनाज्ञाने नाशिते सति मोक्षसुखानि लभन्त इत्यर्थः।

प्रसिद्धाश्विपक्षे - समाने अहन्। अग्निष्टोमात्यग्निष्टोमोक्थ्य[१]षोडशी-वाजपेयातिरात्राप्तोर्यामाख्यसप्तसंस्थोपेतो ज्योतिष्टोमाख्यो यज्ञः सप्ताहनिर्वर्त्यः प्रसिद्धः। तत्र द्वितीयं चतुर्थं षष्ठं चाहः समानमहरित्युच्यते। आद्यं तृतीयं पञ्चमं सप्तमं चाहो विषममहरिति याज्ञिकप्रसिद्धिः। तत्र समानेऽह्नि त्रिः = सर्वदा अवद्यगोहना क्रियालोपप्रयुक्ताखिलदोषनाशकौ युवां युवयोः भक्तानामस्माकं यज्ञं, यद्यपि यज्ञो नाम देवतामुद्दिश्य परि-त्यागः। तथाऽपि तस्य हस्तेन स्पर्शासम्भवात् परित्यज्यमानं हविरादिद्रव्य-मिह यज्ञशब्देन ग्राह्यम्। तथा च यज्ञं हविरादिद्रव्यं त्रिः = त्रिवारं मधुना= मधुत्वहेतुना स्वादुरसोपेतत्वापादकेन हस्तेन मिमिक्षतं = स्पृशतं हस्तस्पर्शेन शोधयतं पवित्रीकुरुतमिति यावत्। एवमहोरात्रं सर्वदैव वाजवतीः = युद्धवतीः, युद्धजितानीति यावत्। इषोऽन्नानि पिन्वतं = अलं दत्तमित्यर्थः॥ ३॥

(ऋ.म.-४०२)

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम्।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम्॥ ४॥

(ऋगर्थोद्धारः) - त्रिर्वर्तियातमिति॥ हे अश्विना = अश्विनौ! युवं = युवां वर्तिः = अखिलप्राणिभिः क्रियमाणं यद्वृत्तं[२] कर्म, न केवलं सामान्यं

---

१. 'षोळशी' घ.। २. 'वर्तनं' घ.।

किन्तु त्रिः = यत् त्रिकालगं वर्तनं तत्प्रवर्तयितुं यातं याथः । अतीतानागतवर्तमानं सकलप्राणिनां कर्म प्रवर्तयितुं सर्वत्र सन्निहितौ स्थः। सकलप्राणिकर्मजातं प्रवर्त्यतया युवयोरेव सम्बन्धीति यावत्। किञ्च अनुव्रते= मध्यमाधमभक्तजने तद्विषये, त्रिः = सर्वदा, शिक्षतं = शिक्षयतं, सन्मार्गमिति शेषः । सुप्राव्ये = सुष्ठु प्रकर्षेण रक्ष्ये उत्तमभक्ते विषये कथम्भूते ? त्रेधेव = अतीतानागतवर्तमानकालत्रयभाविनि कालत्रयसम्बन्धनिमित्तमेव तस्य त्रैविध्यं न तु वस्तुतः इतीवशब्दः । त्रिः = सर्वदा सुशिक्षतम् = अतिशयेन सन्मार्गं शिक्षयथः । एवम्भूतौ मध्यमाधमभक्तशिक्षकौ युवाम् अस्मे अस्मभ्यं त्रिः = सदा नान्द्यं= नन्दति सुखवान् भवतीति नन्दः तस्य भावो नान्द्यं सुखं वहतं = 'वह प्रापणे' प्रापयेतम्। पृक्षः = पुष्टिं च त्रिः = त्रिकालगां नित्यां पिन्वतं = दत्तम्। तत्र दृष्टान्तः - [१]अक्षरेव = अक्षराणीव वर्णवदेव । अत्राक्षरशब्देन तत्समुदायरूपा वैदिकमन्त्रा ग्राह्याः । तथा च यथा वैदिकमन्त्राः जप्याः सन्तः सर्वमभिमतं ददति तथैवेति ॥ ४ ॥

(ऋ.म-४०३)

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथम्
॥ ५ ॥

(ऋगर्थोद्धारः) - त्रिर्नो रयिं वहतमिति ॥ हे अश्विना ! अश्विनौ = युवं युवां नोऽस्मभ्यं त्रिः = नित्यं रयिं= वित्तं च वहतं= प्रापयतम् । देवताता= देवततिं देवतासमुदायं च त्रिः= नित्यं वहतम्। देवाः सर्वदाऽस्मत्पूजास्वीकाराय आगच्छेयुस्तथा कुरुतम्। उत = अन्यच्च धियः= बुद्धीः, त्रिः = नित्यमेव अवतं= रक्षतम् । चेतनमात्रस्य बुद्धेः सर्वदा सत्वेन

१. 'अक्षरा इव' घ. ।

तत्प्रार्थनाया अयोगाद् भवद्विषयिणीं शुद्धां धियं दत्वा ताः सर्वदा रक्षतमिति तात्पर्यम्। सुभग एव सौभगं तस्य भावः सौभगत्वं = सौभाग्यं नोऽस्मभ्यं त्रिः सदैव अवतम्। श्रवांस्युत कीर्तिं च नस्त्रिः सदैवावतम्। कथम्भूतौ ? युवां, सूरिशब्दस्य षष्ठी सूरेः। सूरेः = सूर्यस्य दुहिता = पुत्री उषाः [१]त्रिष्ठं= कालत्रये भवं वां रथं [२]युश्मदीयरथम् आरुहत्। सूर्यपुत्र्युषारोहाधिकरणभूतरथोपेतौ, उषाख्यस्त्रिया सह एकस्मिन् रथे संस्थिताविति यावत्।

अध्यात्मं तु - हे अश्विना = अश्विनौ ! भगवद्रूपविशेषौ ! त्रिर्नो रयिं = ज्ञानाख्यवित्तं वहतम्। देवताता त्रिः = सदा ज्ञानयज्ञे वहतम्। 'त्रिरुतावतं धियः त्रिः सौभगत्वं त्रिरुत श्रवांसि नः इत्येतत् समानम्। कथम्भूतौ वां भगवतोर्युवयोः प्रसादात् सूरेः = विदुषो गुरोः दुहिता = बुद्धिः, गुरूपदेशेन हि शिष्यबुद्धिर्जायते त्रिष्ठं = त्रिकालभवं भक्तदेहाख्यं रथम् आरुहत् । भक्तदेहे ज्ञानोदयो भवतीत्यर्थः । स्वप्रसादेन गुरूपदेशद्वारा भक्तदेहे ज्ञानोदयसम्पादकौ भगवद्रूपविशेषौ युवां नः पुनः सर्वदा अवतमिति तात्पर्यम् ॥ ५ ॥

(ऋ.म-४०४)

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती
॥ ६ ॥

(ऋगर्थोद्धारः) - त्रिर्नो अश्विनेति ॥ हे अश्विना अश्विनौ ! अद्भ्यः चतुर्थीबहुवचनमेतत् । अप्शब्दः सुखवाची । उशब्दः एवार्थे । सुखेभ्यः

१. 'त्रिस्थं' घ. । २. 'युष्मदीयं रथम्' घ. ।

देहदार्ढ्यादिजनितैकसुखार्थमेव । नोऽस्मभ्यं त्रिः = सर्वेष्वपि कालेषु दिव्यानि= दिवि भवानि भेषजानि दत्तम् । त्रिः पार्थिवानि = पृथिव्यां भवानि च भेषजानि दत्तम् । तथा त्रिः अन्तरिक्ष्याण्यपि भेषजानि, दत्तमिति शेषः । अभिधानाद्यभावेन अप्शब्दस्य लोकवाचकत्वाभावाद् एवं [1]शेष पूरणेन व्याख्येयम् । ये देवासः इत्यस्याम् ऋचि 'अप्सुषदो महिनैकादशस्था' इत्यप्शब्दस्य अन्तरिक्षलोकोपलक्षकत्वदर्शनात् तद्वद् अत्राऽप्यन्तरिक्ष-लोकोपलक्षकत्वाङ्गीकारे तु न शेषपूरणेन व्याख्यानम् । किन्तु अद्भ्यः, अत्र पञ्चमीबहुवचनमेतत् । अन्तरिक्षलोकेभ्यः प्रदेशबाहुल्याभिप्रायं बहु-वचनम् । अन्तरिक्षलोकाज्जातानि भेषजानि दत्तमित्यर्थः । अश्विनोर्भिषक्त्वाद् [2]भेषजदानप्रार्थनं तौ प्रत्युपपन्नमित्यवगन्तव्यम् । न केवलम् ऐहिक-सुखसाधनानि भेषजानि दत्तं, किन्तु शुभस्पती= पारस्कादित्वात् सुट् । युवां शंयोः = शंशब्दात् मत्वर्थे 'कंशंभ्यां' (पा. सू. ५-२-१३८) इति युस्-प्रत्यये सस्य रुत्वे विसर्गे च शंयुरिति भवति । तथा च शं सुखम् अस्यास्तीति शंयुः । तस्य शंयोः । षष्ठी चतुर्थ्यर्थे । भेषजजनितैहिकसुखवते सूनवे = युष्मत्पुत्रकाय । ममकाय, यद्यपि 'तवममौ ङसि' (पा.सू. ७-२-९६) इति अस्मदः षष्ठ्यैकवचनस्यैव ममादेशो विहितो न चतुर्थ्या अतो मह्यं मे इत्येव वक्तव्यम् । न तु ममकायेति । तथाऽपि अस्मदः चतुर्थ्यां ममादेशश्छान्दसः । ममशब्दाद् अल्पार्थेऽकच्-प्रत्ययश्चेत्यवगन्तव्यम् । तथा च ममकाय = अल्पायातिनीचायेति यावत्। मह्यम् ओमानं = ओता मानेषु ज्ञानेषु विषयतया ओतम् अनुभवगोचरं त्रिधातु = त्रिष्वपि कालेषु धीयत स्थीयत इति त्रिधातु नित्यं शर्म सुखम्।

प्रसिद्धाश्विपक्षे - बहुकालीनत्वाभिप्रायेण नित्यं पारत्रिकं स्वर्गसुखं

१. 'शेषरूपेण' इति क.। २. 'भेषजे' इति क.।

भगवद्रूपपक्षे त्वनुपचरितनित्यं मुक्तिगतं सुखं च वहतं = प्रापयतं दत्तमिति व्याख्येयम् । यद्वा, ममकायेत्यस्य मामकायेत्यर्थः । ममकशब्दाद् अणि वृद्ध्यभावश्छान्दसः । तथा च शंयोः = [1]शंयये भेषजजनितैहिकसुखवते ममकाय मामकाय मदीयाय सूनवे पुत्राय त्रिधातु शर्म वहतमित्यर्थः ॥६॥

(ऋ.म-४०५)

त्रिर्नो॑ अश्विना यज॒ता दि॒वेदि॑वे॒ परि॑ त्रि॒धातु॑ पृथि॒वीम॑शायतम् ।
ति॒स्रो ना॑सत्या रथ्या परा॒वत॑ आ॒त्मेव॒ वातः॒ स्वस॑राणि
गच्छतम् ॥ ७ ॥

(ऋगर्थोद्धारः) - त्रिर्नो अश्विनेति ॥ हे अश्विना = अश्विनौ ! यौ युवां त्रिधातु= धाधातोः कर्तरि तुन्प्रत्ययः । तथा च धत्ते जगत्प्रवृत्तिमिति धातुः कालः ततश्च त्रिधातु= त्रिकालं पृथिवीं परि= परितः अशायतं= स्थापितवन्तौ स्थः । तौ युवां दिवे दिवे= दिवसे दिवसे त्रिः= एकैकस्मिन् दिवसे प्रातरादिकालत्रये नोऽस्माकं यजता = यजतौ याज्यौ भवतमिति शेषः । हे नासत्या= नासत्यौ ! परावतः = दूरतोऽपि, आगन्तुमिति शेषः । तिस्रः = लोकत्रयसम्बन्धिन्यो रथ्याः = रथमार्गाः युवयोः सुगमाः सन्तीति शेषः । तस्मात् जगतोऽन्तरात्मा वातः = मुख्यप्राणः स एव स्वसराणि = विभक्ति-व्यत्ययेन सर्वेषु दिनेषु, शीघ्रमिति शेषः । गच्छतं= आगच्छतम् । प्रसिद्धाश्वि-पक्षेऽधिकदृष्टान्तः । ईश्वररूपपक्षे तु नीचदृष्टान्त इत्यवगन्तव्यम् ॥ ७ ॥

(ऋ.म-४०६)

त्रिर॑श्विना॒ सिन्धु॑भिः स॒प्तमा॑तृभि॒स्त्रय॑ आहा॒वास्त्रे॒धा ह॒विष्कृ॒तम् ।
ति॒स्रः पृ॑थि॒वीरु॒परि॑ प्र॒वा दि॒वो नाकं॑ रक्षेथे॒ द्युभि॑र॒क्तुभि॒र्हित॑म्
॥ ८ ॥

१. 'शंयवे' इति पाठेन भाव्यमिति भाति।

(ऋगर्थोद्धारः) - त्रिरश्विनेति ॥ हे अश्विनौ ! युवां सिन्धुभिः= नदीदेवताभिः सप्तमातृभिः = जगन्निर्मातृभिः महदहङ्कारपञ्चभूताभिमानिन्यो देवताः वा 'सप्त शिवासु मातृषु' इत्यत्रोक्तप्रकारेण ऋगादिचतुष्टयभारत-पञ्चरात्रमूलरामायणाभिमानिदेवता वा ।

'ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च महेन्द्राणी चामुण्डा सप्तमातरः ।'

इति वाक्योक्ता वा सप्तमातरः । ताभिः सह तिस्रः पृथिवीः = 'सादयायोनिषु त्रिषु' इत्यत्र 'वेद्युत्तरा सदश्चैव प्राग्वंशो योनयः स्मृताः' इत्युक्तप्रकारेण योनिशब्दवाच्यानि त्रीणि स्थानान्यत्र पृथिवीशब्देनोच्यन्ते। तानि प्रति आगच्छतम् । यतो युवां प्रति त्रयः = सवनत्रयसम्बन्धिनः आह्वावाः = आह्वानानि क्रियन्ते । सवनत्रयेऽप्यस्माभिः भवत्स्तोत्राणि क्रियन्त इत्यर्थः। तत्र त्रेधा सवनत्रयसम्बन्धित्वेन त्रिविधं हविश्च कृतमस्ति। यौ युवां [1]दिवोप्युपरि प्रवा = प्रवौ प्रोषपदाद् वातेः [2]विच् । प्रकृष्टगतिमन्तौ यौ च युवां नाकं = स्वर्गं द्युभिः = दिनैः दिनेषु अक्तुभिः = रात्रिभिः रात्रिषु च हितं = तत्रत्यप्राणिनां हितं यथा स्यात् तथा रक्षेथे = रक्षेथ । भवदुद्देशेन दत्तहविःफलभूतस्वर्गस्य तत्रत्यप्राणिहितकरतया भवद्भ्यां संरक्ष्यमाणत्वस्य स्वर्गसाधनीभूतास्मद्धविःस्वीकारार्थं मुक्तस्थानत्रयं प्रति आगच्छतमिति ऋगभिप्रायः ॥ ८ ॥

(ऋ.म-४०७)

क१॒त्री च॒क्रा त्रि॒वृतो॒ रथ॑स्य॒ क१॒त्रयो॑ व॒न्धुरो॒ ये सनी॑ळाः ।
क॒दा योगो॑ वा॒जिनो॒ रास॑भस्य॒ येन॒ य॒ज्ञं ना॑सत्योपया॒थः ॥ ९ ॥

१. 'दिवोऽप्सुपरि' घ. ।   २. 'व्युन्' इति घ. ।

(ऋगर्थोद्धारः) - कात्री चक्रेति ॥ हे नासत्या = नासत्यौ ! येन रथेनास्मदीयं यज्ञमुपयाथः तस्य त्रिवृतः = त्रीन् लोकान् वृणोतीति त्रिवृत् तस्य त्रिवृतः लोकत्रयसञ्चरणे प्रतिबन्धकशून्यस्य युवयोः रथस्य त्री = त्रीणि चक्राणि क । सूर्यरथस्य एकचक्रवद् एतदीयरथस्य चक्रत्रयमस्तीति ज्ञातव्यम् । तस्य च रथस्य बन्धुरः बन्धुराः उन्नताः त्रयः = प्रदेशाः क ? कथम्भूताः ? बन्धुराः ये सनीलाः = सनीडाः रथे गुप्तिस्थानं नीडशब्देनोच्यते। तस्मिंश्च रथे वाजिनः = वाहकस्य रासभस्य = अश्वतर्याख्यस्य योगः = सम्बन्धः कदा भविष्यति । अश्वेऽपि वाजिशब्दप्रवृत्ताविदमेव निमित्तम् । अत्र यद्यपि नासत्येति सम्बोधनेन युवां तिस्रः पृथिवीः प्रत्यागच्छतम् इत्याद्युक्त्या च गगने तयोः प्रत्यक्षतो दृश्यमानत्वावगतेस्तदीयरथचक्र-बन्धुरनीडरासभानामपि प्रत्यक्षतो दृश्यमानत्वावगमात् केति प्रश्नो न युक्तस्तथाऽपि दृष्टेऽपि वस्तुनि पुनर्दर्शनौत्कण्ठ्यवशात् केति पृच्छतीति मन्तव्यम्[1] ॥ ९ ॥

(ऋ.म-४०८)

आ ना॑सत्या॒ गच्छ॑तं हू॒यते॑ ह॒विर्मध्वः॑ पिबतं मधु॒पेभि॑रा॒सभिः॑ ।
यु॒वोर्हि पूर्वं॑ सवि॒तोषसो॒ रथ॑मृताय॑ चि॒त्रं घृतव॑न्तमिष्य॑ति
॥ १० ॥

(ऋगर्थोद्धारः)- आ नासत्येति ॥ हे नासत्या=नासत्यौ! आगच्छतम् । युवां प्रति अस्माभिः हविरग्नौ हूयते । किञ्च मधुपेभिः = मधु सोमं पिबन्ति एतैरिति मधुपेभिः । भिसः ऐस्त्वाभावः छान्दसः । सोमपानसाधनैः आसभिः= आस्यैः मुखैः मध्वः = मधु सोमं पिबतम् । अश्विनोः द्वित्वाद् आस्याभ्यामिति वक्तव्यं यद्यपि । तथाऽपि 'युवोर्हि' इति उत्तरार्धे उष आख्यस्त्रियोऽपि

१. 'अवगन्तव्यम्' घ. ।

वक्ष्यमाणत्वात् तदीयास्यसाहित्येन बहुवचनमित्यवगन्तव्यम् । युवोः = युवयोः सम्बन्धिनं चित्रं = अद्भुतं घृतवन्तं = 'घृ क्षरणदीप्त्योः' इति धातोः दीप्तिमन्तं रथं सवितोषसः = प्रथमाषष्ठ्योः व्यत्यासेन सवितुरुषाः इति भवति । तथा च सवितुः सूर्यस्य पुत्रीत्वेन सम्बन्धिनी उषाः ऋताय= यज्ञाय 'ऋतो मेधा यज्ञः' इति तन्नामसु पाठात् । यज्ञं प्रति गन्तुमिति यावत् । पूर्वं= भवदपेक्षया प्रथमतः एव इष्यति= गच्छति प्राप्नोति, धातूनामनेकार्थत्वात् । अस्मदीययज्ञं प्रति आगन्तुं भवदपेक्षया प्रथमत एवाऽगत्य रथे उपविष्टाऽस्ति । अतो युवयोः पूर्वमारूढया उषआख्यस्त्रिया सहाऽगत्य सोमं पिबतमित्याशयः ॥ १० ॥

(ऋ.म-४०९)

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा
॥ ११ ॥

(ऋगर्थोद्धारः) - आ नासत्या त्रिभिरिति ॥ हे नासत्या = नासत्यौ ! त्रिभिः = त्रिगुणोपेतैः एकादशैः = त्रयस्त्रिंशद्भिरिति यावत् । देवेभिः= देवैः सह इह = यज्ञे पेयं = पातव्यं मधु = सोमं प्रति, आयातम् । सोमं पातुमागच्छतमित्यर्थः । अत्र यद्यपि 'नवकोट्यो हि देवानां' इति वचनादितोऽपि बहवो देवाः सन्ति । तथाऽपि प्राधान्याभिप्रायेण त्रयस्त्रिंशत्त्वोक्तिः । 'कत्येव देवा याज्ञवल्क्य इति 'त्रयस्त्रिंशदिति होवाच' इति वाक्यव्याख्यानावसरे 'एवं प्राधान्यतो देवास्त्रयस्त्रिंशत् प्रकीर्तिताः' इति भगवत्पादैरुक्तत्वादिति ज्ञातव्यम् । आगत्य च हे अश्विनौ अस्मभ्यमायुः प्रतारिष्टं = प्रायच्छतम् । अस्मदीयानि रपांसि = आयुःक्षीणकराणि पापानि निः मृक्षतं = शोधतं प्रतिषेधतम् । अस्माकं सचाभुवा = सचेत्ययं शब्दः

सहार्थे । तथा च सहभुवौ सहस्थितौ, सखायाविति यावत् । भवतं, तावेव हि सहस्थितौ प्रसिद्धौ ॥ ११ ॥

(ऋ.म.-४१०)

आ नो अश्विना त्रिवृता रथेनाऽर्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वामवसे जोहवीमि वृधे चो भवतं वाजसातौ
॥ १२ ॥ ५ ॥ २ ॥ (३४) ॥

(ऋगर्थोद्धारः) - आ नो अश्विनेति ॥ हे अश्विनौ ! अर्वाञ्चं = अव्ययमेतत् । स्वर्गाद् अर्वागिति यावत् । स्वर्गाद् अर्वाग् भूलोके स्थितानां नोऽस्मभ्यं, दातुमिति शेषः । सुवीरं = पुत्रं रयिं = द्रव्यं च त्रिवृता = लोकत्रयसञ्चारिणा रथेन वहतम् । पुत्रं द्रव्यं च रथे स्थापयित्वाऽस्माकं दातुमायातमिति भावः । किञ्च शृण्वन्ता शृण्वन्तौ = भक्तोक्तं हृदि सम्यगवधारयन्तौ वां= युवाम् अहं अवसे = रक्षायै जोहवीमि = आह्वयामि यस्मात् तस्माद् वाजसातौ = वैरिधनस्य सातिः लाभो यस्मादिति व्युत्पत्त्या वाजसातिः युद्धं तत्र युद्धे नोऽस्माकं वृधे = वैरिपराभवहेतुभूतबलाभिवृद्ध्यै। चशब्दात् अवस इत्युक्तावनसमुच्चयः । तथा च अवसे = रक्षायै भवतमित्यर्थः ॥ १२ ॥ ५ ॥ २ ॥ (३४) ॥

सूक्तम् - ३५

हिरण्यस्तूप आङ्गिरसः १ अग्निः मित्रावरुणौ रात्रिः, सविता च
१- ११ सविता । त्रिष्टुप्, १, ९ जगती ।

(ऋ.म-४११)

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये
॥ १ ॥

(ऋगर्थोद्धारः) - ह्वयाम्यग्निमिति ॥ एकादशर्चमिदं सूक्तम् । तत्राऽद्या ऋक् लिङ्गोक्तदैवतपादा, शेषाः सावित्र्यः । अहं स्वस्तये = सन्ततसौख्याय प्रथमं = प्रधानं, अनलकुलेन्द्रमिति यावत् । वैश्वानराख्यम् अग्निं ह्वयामि= आह्वयामि । मित्रावरुणौ च अवसे = रक्षायै इह = यज्ञे ह्वयामि । जगतो निवेशनीं= जगदाश्रयभूतां रात्रीं= राति ददाति समस्तमभीष्टमिति रात्री । 'रा दाने' अस्मात् कर्तरि ष्ट्रप्रत्यये षकारलोपे रात्रेति जाते 'षिद्गौरादिभ्यश्च' (पा.सू. ४-१-४१) इति षित्वात् ङीषि ईकारमात्रं विहाय सर्वस्य लोपे 'यस्येति च' (पा.सू. ६-४-१४८) इति त्रकारस्थाकारलोपे रात्रीति रूपम् । रतित्वाद्वा रात्रिः । 'रमु क्रीडायां' अस्मात् ष्ट्रप्रत्यये शकारलोपे तस्य प्रत्ययस्य ङित्कार्यकारिताया विवक्षितत्वेन तद्बलाट्टीभूतस्य अम् इत्यस्य लोपे रुत्रेति स्थिते निरुक्तत्वाद् धातोः आकारागमे षित्वात् ङीषि रात्रीति रूपम् । रतं रतिसुखं तद् राति ददातीति वा रात्री । रतशब्दे कर्मण्युपपदे 'रा दाने' अस्मात् कर्तरि कप्रत्यये कित्वाद् धात्वाकारलोपे रतन् इति जाते उपपद-रकारस्थस्याकारस्य दीर्घे तकारस्थस्य च अकारस्य लोपे रात् र् इति जाते प्रत्ययाकारसम्बन्धेन रात्रेति जाते 'यस्येति च' (पा.सू.६-४-१४८) इति त्रकारस्थाकारलपे स्त्रीत्वविवक्षायां निर्वचनत्वाद् ईकारप्रत्यये रात्रीति रूपम् । तथा च रातीति व्युत्पत्त्या सर्वाभीष्टदातृत्वाद्वा रतित्वात् क्रीडा-कर्तृत्वाद्वा रतं रतिः तद्दातृत्वाद् रात्रीशब्दवाच्यो विष्णुः तं ह्वयामि । स्त्रीरूपत्वात् स्त्रीलिङ्गान्तशब्दवाच्यत्वं विष्णोर्युक्तमित्यवगन्तव्यम् । तथा प्रसिद्धां रात्रिदेवतां च ह्वयामि । सवितारं देवं च ऊतये= रक्षायै ह्वयामीत्यर्थः ॥ १ ॥

(ऋ.म-४१२)

आ कृ॒ष्णेन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च ।
हि॒र॒ण्ययै॑न सवि॒ता र॒थेना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न् ॥ २ ॥

(ऋगर्थोद्धारः) - आ कृष्णेनेति ॥ सविता देवः कृष्णेन रजसा = शार्वरेण तमसा, स्वास्तमयेन तत्प्रवर्तकतयेति यावत् । आवर्तमानः सम्यक् वर्तमानः अमृतं = देवजातं मर्त्यं = नृजातं च, उपलक्षणमेतत् । असुरान् पक्ष्यादींश्च प्राणिनो निवेशयन् = निशासु प्रस्वापयन् हिरण्ययेन= हिरण्मयेन रथेन भुवनानि पश्यन्, कथमेते लोकाः सद्धर्ममाचरन्तीति परीक्षां कुर्वन्नायातीत्यर्थः।

ननु स्वर्गस्थानां देवानां सुप्त्यभावस्य 'स्वर्गस्थानां न तु स्वापः' इति प्रमाणप्रमितत्वेन अमृतं देवजातं निशासु प्रस्वापयन्निति कथमुक्तमिति चेद् उच्यते । देवानां मूलरूपेण सुप्त्यभावेऽपि भूम्यादावर्जुनादिरूपेणा-वतारदशायां सुप्तिसद्भावात् तदभिप्रायेणेति केचिदार्याः । सम्प्रदायस्तु - सविता स्वास्तमयेन निशासु मनुष्यान् प्रस्वापयतीति तावत् सिद्धम् । तथा च यदा मनुष्याः सुप्ता भवन्ति तदा तद्देहान्तर्गतानां मुख्यप्राणाति-रिक्ततत्त्वाभिमानिदेवताजातानामपीषत् सुप्तिरस्त्येव तदभिप्रायेणेदम् । यथोक्तमेकादशतात्पर्ये -

'एवं सुप्तावपि स्फुटम् ।
तदन्या देवताः सर्वाः प्राणस्यैव वशे स्थिताः ।
ईषच्च सुप्तिमायान्ति नैव मानुषसुप्तिवत् ।
स्वर्गस्थानां न तु स्वापः' । इत्यादि ।

एवमेव सवित्रन्तर्गतभगवत्पक्षेऽपि योज्यम् । सविता देवः = रविगो जनार्दनः कृष्णेन रजसा = स्वाधिष्ठानसवित्रस्तमयेन, तत्प्रवर्तकतया आवर्तमानोऽमृतादीन् निशासु प्रस्वापयन् हिरण्ययेन रथेन यातीति । सवितृगतत्वं विना केवलस्य विष्णोरप्यत्र प्रतिपाद्यत्वात् तत्परतयाऽप्येषा ऋक् योजनीया । सविता = जगत्प्रसविता विष्णुः कृष्णेन रजसा = विष्णोरेकेन रूपेण समस्तप्राणिहृदयेऽविद्याप्रवर्तकतयेति यावत् । आवर्तमानः = प्रवर्तमानोऽमृतं = मुक्तवर्गं मर्त्यं = संसारिजातं च निवेशयन् = प्रलयकाले

स्वात्मनि सन्निवेशयन् वासयन् हिरण्ययेन = [१]सैन्यसुग्रीवादिहयचतुष्टयोपेतेन स्वीयेन रथेन। यद्वा, हिरण्ययेन शुद्धसात्त्विकेनेति यावत्। ब्रह्मादिशरीराख्येन रथेन भुवनानि पश्यन् लोके धर्मपरीक्षां कुर्वन्नायातीति ॥ २ ॥

(ऋ.म-४१३)

याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम्।
आदेवो याति परावतोऽप विश्वा दुरिता बाधमानः ॥ ३ ॥

(ऋगर्थोद्धारः) - याति देव इति ॥ सविता देव आयातीत्युक्तानुवादेन प्रवतेत्यादि विशेषणानि उच्यन्ते। तथा हि। देवः सविता आयातीति यत् तत् प्रवता = प्रवणेन कचिन्नीचैः प्रदेशैरिति यावत्। आयाति। कचित् उद्वता = उन्नतेन, उच्चैः प्रदेशैरिति यावत्। आयाति नित्यमिति शेषः। तथा चाऽयातीति लट् क्रियासातत्य इति ज्ञातव्यम्। तथा चाऽयातीति लटा वर्तमानकाल एवाऽगमनप्रतीत्या पूर्वं नाऽगतः उत्तरत्र नाऽयास्यतीति शङ्कानवकाशः। किञ्च, यजतः = याज्यः, यजेः कर्मण्यतच्। सविता रथेनायातीति यत् तत् शुभ्राभ्यां हरिभ्यां शुभ्राश्वयुक्तेन रथेनेति शुभ्रौ गत्यादिना रूपेण रमणीयौ चेति शुभ्रौ ताभ्यां शुभ्राभ्यामिति व्याख्येयम्। 'रमु क्रीडायां' अस्माद् डः। टिलोपः शुभशब्दे भकारस्थाकारलोपः। तथा च शुभ्र् इति जाते प्रत्ययाकारसम्बन्धे च सति शुभ्रेति भवति।

ननु शुभ्रशब्दः श्वेतार्थः किं न स्यात् इति चेन्न। सूर्याश्वानां हरिद्वर्णत्वेन प्रमिततया तद्विरोधापत्तेः। यद्यपि सूर्यरथस्य सप्ताश्वाः 'सप्त युञ्जन्ति रथमेकचक्रं' इति श्रुतेः। तत्र द्वयोरेव ग्रहणमनुपपन्नम्। तथाऽपि प्राधान्यात् पुरोगाश्वद्वयाभिप्रायेणेदमिति मन्तव्यम्। शुभ्राभ्यां हरिभ्यामित्यस्य शुभ्राश्वयुक्तरथेन इत्यव्याख्याने पूर्वं रथेनायातीत्युक्तम्। इदानीं शुभ्राभ्यां

१. सैब्य' घ.।

हरिभ्यामायातीत्युक्ते विरोधापत्तेरिति ज्ञातव्यम्। रथेनाऽयातीत्युक्तं किमश्वतर्यादियुक्तेन रथेनाऽयातीति शङ्कायामिदमुच्यत इति द्रष्टव्यम्। अपि च सविता देवः आयातीति यत् तत् प्राणिनां विश्वा = विश्वानि समस्तानि दुरिता = दुरितानि अपबाधमानः = परिहरमाणः सन् परावतः= दूरतः दूरदेशादित्यर्थः ॥ ३ ॥

(ऋ.म - ४१४)

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम्।
आस्थाद् रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ॥ ४ ॥

(ऋगर्थोद्धारः)- अभीवृतमिति ॥ यजतः = याज्यः चित्रभानुः = चित्राः भानवो रश्मयो यस्यासौ चित्रभानुः सविता, कृष्णा = कृष्णानि रजांसि, कृष्णवर्णोपेतानि रजांसि तमांसि तविषीं= तेजश्च दधानः स्वास्तमयेन प्रवर्तयन् कृशनैः = हिरण्यैः तन्नामसु पाठात्। अभीवृतं= आच्छादितं विश्वरूपं विचित्रं हिरण्यशम्यं = हिरण्या हिरण्मया शम्या युगकालं यस्यासौ हिरण्यशम्यस्तं बृहन्तं रथम् आ अस्थात्=अधिष्ठितवान्। परमेश्वरपक्षे तु - यजतः चित्रभानुः परमेश्वरः कृष्णा = कृष्णानि, तमोगुणमिति यावत्। 'अजामेकां' इति श्रुतौ तमोगुणे कृष्णवर्णस्य प्रमितत्वात्। रजांसि = रजोगुणं, तमोगुण-रजोगुणयोरेकैकत्वेऽपि बहुवचनं तत्कार्याभिप्रायेणेति मन्तव्यम्। तविषीं = 'सत्वात् सञ्जायते ज्ञानं' इति वचनेन सत्वगुणस्य प्रकाशापरपर्यायज्ञानहेतुतावगमात् 'आयुर्वै घृतं' इतिवत् तादर्थ्यात् ताच्छब्द्यमिति मन्तव्यम्। तथा च तविषीं = प्रकाशहेतुत्वात् तच्छब्दवाच्यं सत्त्वगुणं च दधानः = प्रवर्तमानस्सन् कृशनैः अभीवृतं विश्वरूपं हिरण्यशम्यं बृहन्तं = [१]सैन्यसुग्रीवाद्यश्वचतुष्टयोपेतं स्वकीयं रथमास्थादित्यर्थः ॥ ४ ॥

१. सैब्य' घ.।

(ऋम-४१५)

वि जनाञ्छ्यावाः शितिपादो अख्यन् रथं हिरण्यप्रउगं वहन्तः।
शश्वद् विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥ ५ ॥

(ऋगर्थोद्धारः) - विजनानिति ॥ श्यावाः = शुक्लनीलसमाहाररूपश्यामवर्णोपेताः, हरिद्वर्णेऽपि किञ्चिच्छुक्लनीलसमाहारसत्त्वान्न सूर्यस्य हरिदश्वत्वविरोधः। शितिपादः = शितिपाच्छब्दस्य प्रथमाबहुवचनमेतत्। नीलपादवन्तः, पादातिरिक्तावयवानां श्यामत्वमेव, पादानां तु केवलं नीलत्वमिति विशेषद्योतनाय इदं विशेषणम्। हिरण्यप्रउगं = हिरण्योपनिबद्धसन्धिं रथं जनान् प्रति तत्प्रवृत्त्यर्थं वहन्तः = सामर्थ्यात् सवितृरथबद्धाः तुरगाः शश्वत् = सर्वदा, विशः = प्रजाः, सर्वजगदिति यावत्। वि अख्यन्= अपश्यन्। यस्याश्वा अपि सर्वदर्शिनः किमुतासौ सवितेति। किञ्च, विश्वा= विश्वानि, भुवनानि = सर्वं जगदिति यावत्। दैव्यस्य = ब्रह्मादिदेवप्रियत्वेन तत्सम्बन्धित्वाद् दैव्यनाम्नः सवितुर्हरेरेव उपस्थे = समीपे तस्थुः। समीपस्थमेव वर्तते। न च वैकुण्ठादिलोकत्रयस्थस्य हरेः समीपे कथं सर्वं जगदस्तीति शङ्कनीयं हरेः सर्वगतत्वात्। तच्च -

'यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥'
'आसीनो दूरं व्रजति शयानो याति सर्वतः'
इत्यादिश्रुतिसिद्धमिति ज्ञातव्यम्।

(ऋम-४१६)

तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट्।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥ ६ ॥

(ऋगर्थोद्धारः) - तिस्रो द्याव इति ॥ यथाऽन्यत्र देवतान्तरपरत्वमविहाय

भगवत्परत्वं व्याख्यायते न तथाऽत्र, किन्तु केवलं भवत्परत्वमेवेति मन्तव्यम्। तिस्रो द्यावः = प्रत्यक्षानुमानागमजन्याः प्रमाः, ज्ञानापरपर्यायद्युत्यर्थस्य, दीव्यतेः रूपमेतत्। यमस्य = सर्वस्य नियमनाद् यमशब्दवाच्यस्य, सवितुः= विष्णोः उपस्था = तद्विषयकतया तन्नियम्यतया च तत्समीप एव वर्तिनौ, एवं भुवने विषये विराषाट् अधीशा= सर्वस्वामिनी, एका= अद्वितीया समद्वितीयरहिता श्रीः यमस्य सवितुः उपस्था= नियम्यतया समीपवर्तिनीत्यर्थः। अत्र द्युत्रयजडाजडवर्गश्रीदेवीनां केवलं तत्समीपस्थत्वोक्त्या [1]सवितुर्नामकस्य श्रीहरेः स्तुत्यलाभेऽपि नियम्यनियामकभावादिरूपान्योन्यसम्बन्धस्यैवेह विवक्षितत्वाल्लाभ इत्यवगन्तव्यम्।

ननु सर्वमपि विश्वं जडाजडवर्गद्वयान्तर्गतमेव। अतः प्रमात्रयस्यापि विश्वान्तर्गतत्वेन जडाजडपदाभ्यामेव ग्रहणसम्भवात्, 'तिस्रो द्यावः' इति किमर्थं पृथक् प्रमात्रयग्रहणमिति चेद् उच्यते। जडाजडशब्दाभ्यां हि यत् केवलं चैतन्यामिश्रं जडं यच्च केवलं जडामिश्रं चैतन्यं तदेव लभ्यते। न तु जडाजडोभयसमाहारात्मकं तथाविधं च प्रमात्रयम्, अतो जडाजडवर्गाभ्यां पृथग् ग्रहणं युक्तमेव।

नन्वथापि प्रमात्रयस्य उभयसमाहारात्मकत्वात् तत्रत्यो जडभागो जडशब्देन चेतनभागश्चाजडशब्देन ग्रहीष्यत इति पुनः पृथक् प्रमात्रयग्रहणं व्यर्थमेवेति चेत् सत्यम्। संसारिणां स्वरूपज्ञानरूपचैतन्यस्य मनोवृत्तिरूपप्रमाणजन्यज्ञानस्य संवलनेनैव प्रवृत्त्या पृथक्करणायोगात्। न चैतदप्रामाणिकमिति वाच्यम्।

' चिन्मात्राणीन्द्रियाण्याहुः मुक्तानामन्यदेव तत्।
तान्येव जडयुक्तानि विभिन्नानि स्वरूपतः ॥'

---

१. 'सविताविता' इति मातृकायाम्।

इत्यादि द्वितीयस्कन्धतात्पर्योदाहृतप्रमाणप्रमितत्वात् । उक्तं चानुव्याख्याने-

'धीर्भीरिति मनस्त्वेवेत्याह च श्रुतिरञ्जसा ।

चिदचिन्मिश्रमेवैतन्मनो यावच्च संसृतिः' इति ।

ननु तर्हि केवलचैतन्यरूपायाः श्रियोऽजडशब्देनैव ग्रहणसम्भवात् 'एका यमस्य भुवने विराषाट्' इति पृथङ् न वक्तव्यमिति चेत्, सत्यं । सामान्यतोऽजडशब्देन लब्धाया अपि श्रियः सर्वस्वाम्यं वक्तुं पृथगुदितत्वात् ।

ननु श्रियः सर्वस्वाम्यं प्रकृतासङ्गतं किमर्थमुच्यत इति चेत् । सवितृनामकस्य हरेरुत्कर्षद्योतनायेति वदामः । यदा सर्वस्वामिनी श्रीः नियम्यतया तत्समीपस्था तदा श्रीपतिः सवितृनामा हरिः, सर्वोत्कृष्ट इति किमु वक्तव्यमिति ॥ न केवलं संसारिणामाश्रयो हरिः, किं नाम ? रथ्यं = रथसम्बन्धि वस्तुजातं रथस्याणिं न= अक्षं सर्वदैवाश्रितं सदास्ति यद्वत् । एवम् अमृता= अमृतानि मुक्तभूतानि अब्जजशेषगरुडेन्द्रपूर्वकाणि अशेषतोऽप्यधितस्थुः = सवितृनामकं श्रीहरिमेवाऽश्रितानि वर्तन्त इत्यर्थः ।

अत्राहुरद्वैतवादिनः- यदेतन्मुक्तामुक्तजडनियामकत्वं हरेरुक्तं तत्प्रशंसामात्रमेव, न पुनस्तत्र तात्पर्यमस्ति । ब्रह्मातिरिक्तस्य सर्वस्य मिथ्यात्वात् । मुक्तौ ब्रह्मचैतन्यातिरिक्तस्य कस्याप्यभावादिति, तन्न । मुक्तामुक्तजडनियामकत्वरूपार्थस्य वेदार्थसारत्वेन मुख्यतो वेदतात्पर्यविषयत्वेन प्रशंसामात्रत्वाभावात् । कुत इति चेत् तत्राऽह - **इहेति** । य उ= य एव मुक्तामुक्तनियामकत्वादिरूपं प्रमेयं चिकेतत्= अभिपश्येत् । अन्यथेति शेषः । मिथ्याभूततया नास्तीति जानीयादिति यावत् । स इह मम पुरतः आगत्योत्तरं ब्रवीतु । मदुक्तार्थस्य प्रमाणप्रमिततया सत्यत्वेन तत्र बाधकाभावादिति भावः । त्वदुक्तं प्रमेयं कालान्तरे कश्चिद् विपरीतं करिष्यतीत्यपि न वाच्यम् । य उ = य एव, तत् मदुक्तं प्रमेयं, चिकेतत् =

धातूनामनेकार्थत्वेन कालान्तरेऽपि विपरीतं कुर्यात् । स इह मम पुरत आगत्योत्तरं ब्रवीत्वित्यर्थः। यद्वा, तत् = सवितृनामकं भगवत्स्वरूपं ममैतावद् ज्ञानं य उ यस्तु मदपेक्षया श्रेष्ठः कश्चिद्देवादिः चिकेतत् मदपेक्षयाऽतिशयेन पश्येत् जानीयात् स आगत्य इह अस्मासु अस्मदर्थे अस्मान् प्रतीति यावत् । अस्मदविदितं तत्स्वरूपं ब्रवीत्वित्यर्थः । अथवा, य उ= य एव विष्णुः, तत् = प्रमाणप्रमितमेतद्विश्वं चिकेतत् चकार, धातूनामनेकार्थत्वात् सः विष्णुरेवाऽगत्य इह नः प्रतीति यावत् । स्वस्वरूपं ब्रवीतु= उपदिशत्वित्यर्थः ॥ ६ ॥

(ऋ.म-४१७)

वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः ।

केदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥ ७ ॥

(ऋगर्थोद्धारः) - वि सुपर्ण इति ॥ यथाऽन्यत्र [1]'देवतान्तरपरत्वमविहायैव भगवत्परत्वं व्याख्यायते न तथाऽत्र, किन्तु केवलं भगवत्परत्वमेवेति द्रष्टव्यम् । सुपर्णः = सु अतिशयेन परः उत्तमो णः आनन्दोऽस्येति सुपर्णो गभीरवेपाः = वेपःशब्दो वेगवाची, गभीरवेगः, असुरः = असौ प्राणे स्थित्वा रमत इत्यसुरः । सुनीथः = सु शुभफलाव्यभिचारिणी नीथो नीतिरस्येति, सुनीथो भगवान् सवितृशब्दवाच्यो विष्णुरन्तरिक्षाणि, ईक्ष दर्शने' कर्मण्यकारो ह्रस्वता च । स्वान्तरिक्षाणि जगन्ति व्यख्यत् अपश्यत् । अन्तर्भावितप्रपञ्चः सर्वज्ञश्चेति यावत् । एवं परमानन्दोऽगाधवेगः प्राणे स्थित्वा रममाणः फलाव्यभिचरितनीतिमान् अन्तर्भावितप्रपञ्चः सर्वज्ञः सूर्यः = सूरिप्राप्यो भगवान् विष्णुरिदानीं क्व तिष्ठति ? अस्य रश्मिः कतमां द्यां कतमस्मिन् अन्तरिक्षप्रदेशे आततान व्याप्त इत्येवं कश्चिकेत = व्यक्ततया को ददर्श ? न कोऽप्येवं, व्यक्ततया द्रष्टुर्दुर्लभत्वादित्यर्थः ।

---

१. 'देवतान्तरमविहाय' घ. ।

एतदुक्तं भवति । सूर्यः तदीया रश्मयश्च गगनाधोभागव्यापिनो लोकेन दृश्यन्त एव अतो न तदपेक्षयाऽयमाक्षेपो युक्तः । किन्तु सूर्ये भगवतः, तदीयरश्मिषु च भगवद्रश्मीनां व्याप्तत्वेऽपि भगवान् तदीया रश्मयश्च प्राकृतैः न व्यक्ततया दृश्यन्त इत्यभिव्यक्तिविषयक एवायमाक्षेप इति । एतेनैतदपि परस्तम् । ननु कथमयमाक्षेपः ? आक्षेपस्य विपर्यये पर्यवसाने सति सूर्यो विष्णुः क्व इदानीं ? न क्वापि इत्यापत्त्या 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणस्थितः' इति श्रुतिविरोधापत्तेः अस्य विष्णोः रश्मिः कतमां द्याम् आततान ? न कतमामपि इत्यापत्त्या 'तमेव भान्तमनुभाति सर्वं' 'तस्य भासा सर्वमिदं विभाति' इति श्रुतिविरोधापत्तेरिति । आक्षेपस्याभिव्यक्तिविषयतया व्याख्यातत्वात् ॥ ७ ॥

(ऋ.म-४१८)

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ ८ ॥

(ऋगर्थोद्धारः) - अष्टौ व्यख्यदिति ॥ यः पृथिव्याः = प्रसिद्धायाः भूमेः अष्टौ ककुभः पूर्वाद्या दिशः, पूर्वादिदिगवच्छिन्नान् भूप्रदेशानिति यावत् । यद्वा पृथुत्वात् पृथिव्याः अव्याकृताकाशस्य प्रदेशभूता अष्टौ ककुभः पूर्वाद्या दिशः तथा त्री= त्रीणि, योजना = योजनानि युज्यन्ते स्वस्थितैः प्राणिभिः सर्वदा दृढं श्लिष्यन्त इति योजनानि । अत एव 'वव्र९ अनन्तान्' इति श्रुतौ वव्रत्वप्रसिद्धिः । 'कृत्यल्युटो बहुलम्' (पा.सू. ३-३-११३) इति बहुलग्रहणात् कर्मणि ल्युट् । धन्वा= निरुदको हि प्रदेशो धन्वशब्देनोच्यते । तेन सुखाभावो लभ्यते । तथा सुखरहितानि केवलं स्वस्थितानां दुःखापादकान्येवेति यावत् ।

'महातमस्त्रिधा प्रोक्तमूर्ध्वं मध्यं तथाऽधरम् ।
श्रवणेनैव मूर्छादिरधरस्य यतो भवेत् ॥'

इति प्रमाणोक्तान्यूर्ध्वमध्याधरसञ्ज्ञकानि तमांसि सप्त सिन्धून् = लवणेक्षुसुरासर्पिक्षीरशुद्धोदकरूपान् सप्तसमुद्रान् महदहङ्कारसहितपञ्चमहाभूतानि वा सप्तसिन्धवः स्यन्दनात् कार्यप्रवाहवत्त्वात् सिन्धुशब्दवाच्याः, तान् व्यख्यत्= अपश्यत् । हिरण्याक्षः स्वर्णाक्षः सविता देवः = श्रीनृसिंहात्मा विष्णुः आ अगात् अस्मान् प्रत्यगच्छतु । कथम् ? दाशुषे = यजमानाय दातुमिति शेषः । वार्याणि वरणीयानि रत्ना रत्नानि, रत्नशब्दो वित्तार्थः । सुवित्तानि हस्ते दधत् । यद्वा वार्याणि रत्नानि दाशुषे दधत् । दस्य धत्वं, ददद्देवागच्छत्वित्यर्थः । पूर्वयोजनायामागमनदानयोः भिन्नकालत्वप्रतीत्याऽऽगमनानन्तरं दाने विलम्ब इति प्राप्नोति । द्वितीययोजनानां तु दधत् = ददद्देव आगच्छत्वित्युक्त्याऽऽगमनदानयोरेककालीनत्वप्रतीतेर्न दाने विलम्ब इति सूचितमिति ज्ञातव्यम् ॥ ८॥

(ऋ.म-४१९)

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति
॥ ९ ॥

(ऋगर्थोद्धारः) - हिरण्यपाणिरिति ॥ हिरण्यपाणिः = रत्नादिना सुपूर्णं हिरण्यात्मकं सुवर्णात्मकं पात्रं पाणौ यस्येति हिरण्यपाणिः । यद्वा, हिरण्यवर्णौ स्वर्णवर्णौ पाणी यस्येति हिरण्यपाणिः । अत्र सर्वेषां पाणिपूर्वाणामङ्गानां हिरण्यवर्णत्वज्ञापनाय उपलक्षणया पाण्योर्हिरण्यवर्णत्वमुक्तमित्यवगन्तव्यम् । विचर्षणिः = विविधाः चर्षणयः ब्रह्माद्याः प्रजाः सेवका यस्यासौ विचर्षणिः । यद्वा, चर्षणिभ्यः प्रजाभ्यो वि विशिष्ट उत्तम इति विचर्षणिः

सविता= तदन्तर्गतो भगवान् विष्णुः उभे द्यावापृथिवी= द्वितीया षष्ठ्यर्थे। उभयोः द्यावापृथिव्योः अन्तः = मध्ये ईयते = प्रतीयते । 'अन्तरान्तरेण युक्ते' (पा. सू. २-३-४) इति सूत्रेणान्तरेणेत्युभययोग एव षष्ठ्यपवादकतया द्वितीयाविधानेनान्तर्योगे द्वितीयाया अविहितत्वात्। यद्वा, अन्तरान्तरेण योग इवान्तर्योगेऽपि द्वितीयोपसङ्ख्यातव्या। किञ्च सविता विष्णुः अमीवा प्राणिनां पापमपबाधते परिहरति । किञ्च; [1]सविता विष्णुः सूर्यं प्रद्धिं सवितारं वेति। वी गत्यादौ पठ्यते गच्छति प्राप्नोति लोकानां ध्यानविषयत्वाय सवित्रन्तर्गतो भवतीत्यर्थः। किञ्च, सविता = विष्णुः कृष्णेन रजसा = तमसा, अन्धकारेणेति यावत् । द्यामन्तरिक्षं स्वास्तमयेनेति शेषः । अभिश्रृणोति सम्पूरयति । धातूनामनेकार्थत्वात् । इयमपि ऋदेवतान्तरं विहाय केवलं भगवत्परैव। सविता सूर्यं वेत्तीति सूर्यसवित्रोः कर्मकर्तृभावश्रवणात् कर्मकर्त्रोश्चोत्सर्गतो भेदावश्यम्भावात्। यथोक्तं - 'कर्मकर्त्रोरुत्सर्गतो भिदा अभेदोऽपि विशेषे स्यात्' इति। प्रकृते च सूर्यसवित्रोरभेदसाधक प्रमाणाभावात्। अपि चात्र हिरण्यपाणिरिति सविता हिरण्यवर्णः कतिथः। हिरण्यवर्णश्च 'हिरण्यश्मश्रुर्हिरण्यकेश आप्रनखात् सव एव सुवर्णः' इत्युपनिषद्भिर्वासुदेव एवोक्तः।

ननूपनिषद्यपि सूर्य एव प्रतिपाद्यः किं न स्यादिति चेन्न। 'य एषोऽन्तरदित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः' इति हिरण्यवर्णत्वादि गुणकस्य सूर्यान्तर्गतत्वोक्तेः सूर्यस्य सूर्यान्तर्गतत्वासम्भवात्। ननु सूर्यान्तर्गतोऽपि भगवदन्य एव किं न स्यात् ?

'सूर्यो जलं मही वह्निर्वायुराकाशमेव च।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात्'

---

१. 'सविताविता' इति घ.।

इति चेन्न। सूर्यान्तर्गतस्य 'तद्यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति रक्तपद्माक्षत्वोक्तेः। रक्तपद्माक्षत्वस्य च भगवल्लिङ्गत्वेन सूर्येऽसम्भवात्।

किञ्च तस्योदिति नामेति हिरण्यवर्णत्वाद्युपेत उदाख्य उक्तः। न च सूर्यादीनामिदं नाम सम्भवति। 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इति सर्वपापराहित्यस्योच्छब्दार्थत्वेनोक्तत्वात् । तस्य च संसारिषु सूर्यादिष्वसम्भवादिति ॥ ९ ॥

(ऋ.म-४२०)

हिरंण्यहस्तो असुंरः सुनीथः सुंमृळीकः स्ववाँ यात्वर्वाङ्।
अपसेधंन् रक्षसों यातुधानानस्थाद्देवः प्रंतिदोषं गृंणानः
॥ १० ॥

(ऋगर्थोद्धारः)- हिरण्यहस्त इति॥ यो देवो रक्षसः= रक्षांसि यातुधानांश्च असुरेष्ववान्तरजातिभेदात् पृथगुक्तिः। अपसेधन्= निराकुर्वन्। प्रतिदोषं = सर्वासु रात्रिषु अर्धरात्रकाले सवितुः गायत्र्या स्तूयमानत्वाभावात् रात्रिवाचिदोषाशब्देन रात्र्युपक्रमरूपसायङ्कालः रात्र्युपसंहाररूपः प्रातःकालश्च लक्ष्यते । तथा च प्रतिदोषं सायङ्काले प्रातःकाले चेति यावत् । गृणानः = सर्वैस्त्रैवर्णिकैर्गायत्र्या स्तूयमानः सन् अस्थात्= स्थितः। गायत्रीप्रतिपाद्यत्वेन गायत्र्या स्तूयमानः सवितृनामा भगवान् गायत्र्या चार्घ्ये दत्ते तदर्घ्याप्सु स्थित्वा सूर्येण सह योद्धुं प्राप्तान् मन्देहनामराक्षसान् निराकरोतीति हि तात्पर्यार्थः। यथोक्तं यजुश्शाखायाम् - 'रक्षाꣳसि ह वा पुरोनुवाके तपोग्रमतिष्ठन्त। तान् प्रजापतिर्वरेणोपामन्त्रयत तानि वरमवृणीताऽदित्यो नो योद्धा इति तान् प्रजापतिरब्रवीद् योधयध्वमिति तस्मादुत्तिष्ठतꣳ हवतमावादित्यं योधयन्ति यावदस्तमन्वगात्तानि हवा एतानि रक्षाꣳसि गायत्र्याऽभिमन्त्रितेनाम्भसा शाम्यन्ति तदु हवा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां

गायत्र्याऽभिमन्त्रिता आप उर्ध्वं विक्षिपन्ति । ता एता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणद्वीपे प्रक्षिपन्ति । यत् प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानम् अवधून्वन्ति उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद' इति । य एवं प्रतिदोषं गृणानोऽस्थात् । स हिरण्यहस्तः = हिरण्यात्मकं रत्नपूर्णं पात्रं हस्ते यस्येति वा हिरण्यवर्णौ हस्तौ यस्येति वा हिरण्यहस्तो असुरः = असुषु इन्द्रियेषु स्थित्वा रमत इति वा असौ मुख्यप्राणे स्थित्वा रमत इति वाऽसुरः सुनीथः = फलाव्यभिचारितया शुभनीतिमान् सुमृळीकः= अधिकं रक्षकः सन् स्ववान् = स्वतन्त्रः, परवानिति शब्दो यथा परतन्त्रे रूढ एवं स्ववानिति शब्दोऽपि स्वतन्त्रे रूढ एव । न तु यौगिकः । तेन स्वस्य स्वेन सम्बन्धाभावात् कथं स्ववानित्युक्तशङ्कानवकाशः । अर्वाङ् = नीचान् अस्मान् प्रति यात्वित्यर्थः । इयमपि ऋक् केवलं विष्णुपरैव । अत्र 'प्रतिदोषं गृणानः' इति गायत्रीप्रतिपाद्यत्वोक्तेः । गायत्र्या चोक्तो वासुदेव एव 'ध्येयःसदा सवितृमण्डलमध्यवर्ती नारायणः' इति पुराणवाक्यादित्यवगन्तव्यम् ॥ १० ॥

(ऋम-४२१)

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव
॥ ११ ॥ ७ ॥ ३४ ॥ ६ ॥

(ऋगर्थोद्धारः) - ये ते पन्था इति ॥ हे सवितः = देव विष्णो ! ये ते = प्रसिद्धाः पूर्व्यासः = पूर्व्याः पूर्वे भवाः, सनातना इति यावत् । यथोक्तम् - **'एते सृती ते नृपवेदगीते त्वयाऽभिपृष्टे च सनातने च'** इति । ये चान्तरिक्षे= देवयानसञ्ज्ञिकानामर्चिरादिमार्गाणामन्तरिक्षादुपर्यपि सत्त्वस्य 'उत्क्रान्तस्तु

शरीरात् स्वात्' इत्यादिप्रमाणप्रमितत्वेनान्तरिक्ष इत्येतदनुपपन्नम् । अतोऽन्तरिक्षशब्दः आमुष्मिकलोकपरः । तथा चान्तरिक्षे= अमुत्र परत्र लोके, साध्या इति शेषः । अधिकारिणो साधनसम्पत्त्या साधयितुं प्राप्तुं योग्या इति यावत् । अरेणवः = अत्र रेणुशब्देन रजःशब्दो लक्ष्यते । तस्य रेणुशब्दलक्षितरजःशब्दस्य रागो वा रजोगुणो वाऽर्थः । '[1]तद्रहितपुरुषसम्बन्धद्वारकं चेदं विशेषणम् । तथा च दुष्टरागरजोगुणशून्यपुरुषप्राप्य इत्यर्थः । सुकृताः = निवृत्तसुकृत[2]लभ्याः परोक्षज्ञानप्राप्याः पन्थाः = पन्थानो देवयानमार्गाः मोक्षसाधनीभूतस्य देवयानमार्गस्य सामान्यत एकत्वेऽपि तदवान्तरभेदानामर्चिरादीनां बहूनां सत्त्वात् तदभिप्रायेणैव बहुवचनं युक्तम् । तेभिः= तैः सुगेभिः = सुगमैः कण्टकादिरहितैः पथिभिः, एतादृशनिष्कण्टकमार्गान् प्रदायेति यावत् । नोऽस्मान् रक्ष, संसारादिति शेषः । मुक्तिं देहीत्याशयः । अन्यच्च प्रार्थ्यते । नोऽस्मान् अधि = अधिकांश्च ब्रूहि । यूयमधिका इति त्वद्वचनमात्रेणैव वयमधिका भविष्याम इत्यर्थः । हीनेभ्योऽधिकत्वस्य सिद्धत्वात् स्वोत्तमेभ्यस्त्वाधिक्यस्य सर्वथाऽप्राप्यत्वात् समेभ्योऽधिकान् ब्रूहीत्याशयः ।

नन्विदमनुपपन्नम् । यथोत्तमेभ्यो आधिक्यं प्राप्तुमयोग्यमेवं समेभ्योऽप्याधिक्यं प्राप्तुमयोग्यमेव । अतः कथमेवं प्रार्थ्यत इति चेत्, उच्यते । इदं हि प्रार्थनं चक्रवर्तिरूपमनुष्यविषयमेव न देवताविषयम् । तथा हि - समावेवापरोक्षज्ञानिनौ चक्रवर्तिनौ तन्मध्ये केनचिदपरोक्षज्ञानान्तरं बहूनि सत्कर्माणि कृतानि, केनचिन्न कृतानि तत्र स्वरूपेण समस्यापि कृतसत्कर्मणो -ऽकृतसत्कर्मापेक्षया मुक्तावानन्दवैचित्र्यमस्तीति नानुपपत्तिः । यथोक्तं बृहद्भाष्ये- मनुष्याणां योग्यतया समेभ्यः प्रयत्नाधिक्यादाधिक्यं मुक्तौ प्राप्तुं शक्यत इति ।

---

१. तद्रहितसम्बन्धद्वारकम्' घ. । २.'लक्ष्याः' घ. ।

ननु ज्ञानोत्तरकालानुष्ठितप्रयत्नाधिक्यान्मुक्तौ प्राप्यमाधिक्यं नाम न तावत् स्वरूपसुखस्यैव पुनराधिक्यं, तस्य क्लृप्तत्वेनानागन्तुकत्वात्। नापि क्लृप्तसुखस्यैवाभिव्यक्तिः। ज्ञानेनाऽवरणभूतलिङ्गशरीराख्याविद्यानिवृत्तौ स्वरूपसुखाभिव्यक्तेः सर्वसाधारण्यात्। नापि पृथगेव सुखं जायते[1] तदनङ्गीकारात्। अतः कथमेतदिति चेत्। उच्यते। नाविद्यैवाऽऽत्मस्वरूपस्याऽवरणं किन्त्वीश्वरेच्छाऽपि। तथा च ज्ञानेनाविद्यायां निवृत्तायामशेषानिष्टनिवृत्तिर्भवति। स्वरूपसुखं च बहुतरं व्यज्यते न तु सर्वम्। एवं च योग्यतया साम्येऽपि येन ज्ञानोत्तरं निवृत्तकर्मानुष्ठानलक्षणं प्रत्यत्नाधिक्यं कृतं तेन तज्जन्येश्वरप्रसादद्वारा यावत्स्वरूपसुखाभिव्यक्तिलक्षणमाधिक्यं प्राप्तुं शक्यते येन तु न तदनुष्ठितं तेन नेति। एतदभिप्रायेणैवाऽऽनन्दवृद्धिह्रासप्रतिपादनं तत्र तत्र क्रियते। इदमपि न देवेषु सम्भवति। देवानां यावत्स्वरूपानन्दाभिव्यक्तेः क्लृप्तत्वेन तत्र वृद्धिह्रासाभावात्। यथोक्तम् - 'सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम्' इति। अतो मनुष्येष्वेवेदं तदीयानन्दस्य च वृद्धिह्रासौ वर्तेत एव। यथोक्तम् - 'वृद्धिह्रासौ विमुक्तिगौ। नृणाम्' इति। यावत्स्वरूपानन्दाभि-व्यक्तिलक्षणानन्दह्रासं प्रति विकर्मवत् भगवत्पूजात्मककर्माकरणं च निमित्तम्। यथोक्तमीशावास्यभाष्ये -

'कृष्णोपास्तिमकुर्वतः।
ज्ञानिनोऽपि यतो ह्रास आनन्दस्य भवेद् ध्रुवम्' इति।

देवानां तु विकर्मकरणेन स्वरूपमतिक्रम्य कृतस्यैव सत्कर्मणो हानिर्न तु क्लृप्तस्येत्यवगन्तव्यम्। यथोक्तम् -

'चन्द्रसुग्रीवयोश्चैव स्वोच्चदारपरिग्रहात्।
प्राप्तहानिरभून्नैव क्लृप्तहानिः कथञ्चन' इति।

---

१. 'ज्ञायते' घ.।

'अयोग्यकं महापदे विधातुरेष हि क्रतुः।
समानयोग्यतागणात् करोति मुक्तिगं वरम्'

इत्येतदपि चक्रवर्तिरूपमनुष्यपरमेव ज्ञातव्यम्। तथा हि वाक्यशेषः। **'अतस्त्रिशङ्कुपुत्रको नृपानतीत्य वर्तते'** इति। अतः समेभ्योऽधि च ब्रूहीत्यस्य मानुषचक्रवर्तिविषयत्वेनोपपन्नत्वान्न कोऽपि दोष इति सम्प्रदायविदः॥११॥

विष्णोरनुग्रहार्थं ज्ञानविस्तारार्थं च शिष्यान् अध्यापयन् कण्वः उत्तरा ऋचो ददर्शेति द्रष्टव्यम्॥

सूक्तम् - ३६

कण्वो घौरः। अग्निः, १३-१४ यूपो वा।

प्रगाथः = विषमा पृहत्यः, समाः सतोबृहत्यः (१३ उपरिष्टाद् बृहती)

(ऋ.मन्त्र-४२२)

प्र वो॑ य॒ह्वं पु॑रू॒णां वि॒शां दे॑वय॒तीना॑म्।
अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते ॥ १ ॥

(ऋगर्थोद्धारः) - प्रवो यह्वमिति॥ विंशत्यृचमाग्नेयं सूक्तम्। तन्मध्ये ऊर्ध्वऊष्विति द्वे ऋचौ यूपदेवताकौ। 'बैलवं यूपं कुरु' इत्युपक्रम्य ऊर्ध्वऊषुण इति ऋग्द्वयस्योक्तत्वादित्येके। हे प्रजा इत्यध्याहारः। व इति श्रवणात्। हे प्रजाः कर्मण्यधिकारिणो[1] जनाः देवयतीनां = यतीत्येतत् 'इण् गतौ' इति धातोः रूपम्। तथा हि - 'इण् गतौ' अस्मात् शतृप्रत्यये शकारऋवर्णयोर्लोपे इ अदिति स्थिते इकारस्य यणादेशे य अदिति जाते अकारस्य पूर्वरूपे यदिति जाते उगित्त्वात् ङीपि यतीति रूपम्। [2]यतिर्यजनम् अनेकार्थत्वाद्धातूनाम्। तथा च देवानुद्दिश्य यजनं कुर्वतां पुरूणां= बहूनां विशां= प्रजानां वो युष्माकं यह्वं यहुं छन्दसि अमि पूर्वरूपमकृत्वा यणादेशाश्रयणात्

---

१. 'कर्माधिकारिणः' घ.। २. 'गतिः' इति क. पाठः।

पुत्रम् अग्निं हुताशनं अग्नेः बहुपुत्रत्वं च बहुभिरग्न्याधानकर्तृभिराधेयत्वादिति द्रष्टव्यम् । वयं सूक्तेभिः = सु सम्यक् उक्तैः प्रयुक्तैः योग्यैर्वचोभिः [३]प्र सदा ईमहे = प्रार्थयामहे । याच्ञार्थकधातुमध्ये पाठात् । कथम्भूतमग्निं ? अन्येति । सन्तो जनाः = यं सीं = सम्यक् इत् = एव, ईळते = स्तुवन्ति ।

भगवत्पक्षे- हे प्रजाः ज्ञानाधिकारिणो जनाः देवयतीनां = देवो विष्णुः तद्विषयकज्ञानवतां पुरुषाणां बहूनां विशां = प्रजानां वो युष्माकं यह्वं यहुं पुत्रम् अग्निं = अगम् अङ्गं नयतीत्यादिनिर्वचनैस्तच्छब्दवाच्यं विष्णुं यं सीमित् अन्य ईळते । बहुभिर्ज्ञेयत्वाद् बहूनां पुत्रो भगवान् 'यस्तद्वेद स पितुष्पितासत्' इत्यादिश्रुतेः । वयं सूक्तेभिः = वचोभिः ईमहे । कथम्भूतमग्निं विष्णुम् ? यं सीमिदन्य ईळते ॥ १ ॥

(ऋ.म-४२३)

जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥ २ ॥

(ऋगर्थोद्धारः) - सहोवृधं = सहसा वायुना एधितं वातसखं हुताशनम् अग्निं जनासः दधिरे = धारयन्ति, आधारं कुर्वन्तीति यावत् । वयं च हविष्मन्तः = हविर्धृतवन्तः सन्तः ते= तव विधेम= सेवारूपं कर्म कुर्मः । परिचरणकर्मसु पाठात् । हे सन्त्य= सम्पूर्वात् तनोतेर्ड्यः । सन्ततमजस्रं धार्याग्ने स एवमस्माभिः पूजितः सुमनाः = अस्मद्विषये शोभनमनस्कः त्वम् इह= लोके अद्य वाजेषु= अन्नेषु विषयेषु नोऽस्माकम् अविता= रक्षिता रक्षको भवेति ।

भगवद्विषये- जनासः = सज्जनाः ज्ञानिनः सहोवृधं = सहसो वायोः वृधं वर्धकम् अभिवृद्धिकर्तारम् अग्निं= भगवन्तं दधिरे= हृदा धारन्ति । वयं

---
३. 'प्र सादा ईमहे' घ. ।

च हविष्मन्तः = ज्ञानाख्यहविष्मन्तः सन्तः ते = तव विधेम = सेवारूपं व्याख्यानादिकर्म कुर्मः । हे सन्त्य = सम्यक् तत ! देशतः कालतः गुणतः त्रिविधततियुक्त ! स एवम् अस्माभिः ज्ञानयज्ञादिना पूजितः सुमनास्त्वम् इहाद्य वाजेषु अविता [१]भवेति ॥ २ ॥

(ऋ.म-४२४)

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥ ३ ॥

(ऋगर्थोद्धारः) - **प्र त्वा दूतमिति** ॥ हे अग्ने ! वयं दूतं = देवानां हविरादिदातृत्वाद् होतारं = विशेषतो होतृसंस्थं विश्ववेदसं = सर्वज्ञं त्वा त्वां प्रवृणीमहे । यस्य महः = प्रथमा षष्ठ्यर्थे । महतः सतः ते अर्चयः = अर्चिषो विष्फुलिङ्गाः विचरन्ति = इतस्ततो विविधं चरन्ति । भानवो रश्मयश्च दिवि दिवं स्पृशन्ति ॥ ३ ॥

(ऋ.म-४२५)

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥ ४ ॥

(ऋगर्थोद्धारः) - **देवास इति** ॥ अग्ने ! वरुणो मित्रो अर्यमा इत्येवमादयो देवाः दूतं प्रत्नं = प्रपूर्वात् 'तनु विस्तारे' अस्माद् अकारे तकारस्थाकारलोपे च प्रत्नेति रूपम् । तथा च प्रत्नं = प्रकर्षेण ततं रूढ्या पुरातनं वा, 'प्रत्नं पुरातनं प्रोक्तं' इत्यभिधानात् । त्वां समिन्धते = आज्यादिहविषा सन्दीपयन्ति= ज्वलितं कुर्वन्ति । 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतेः देवानामपि यज्ञकर्तृत्वात् । किञ्च, यो मर्त्यः ते = तुभ्यं ददाश = 'दाशृ दाने' ददौ,

---
१. 'भवति' इति क. ।

हविरादिकमिति शेषः। स त्वया प्रसन्नेन सदा प्रसन्नेन, त्वत्प्रसादेनेति यावत्। विश्वं = सम्पूर्णं धनं जयति = प्राप्नोति ॥ ४ ॥

(ऋ.म-४२६)

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि।
त्वे विश्वा सङ्गतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥ ५ ॥ ६ ॥

(ऋगर्थोद्धारः) - मन्द्रो होतेति ॥ हे अग्ने ! मन्द्रः = मन्दन्त्यनेन देवा इति मन्दो मखः सोऽस्यास्ति तर्पकत्वेनेति मत्वर्थे रप्रत्ययः। अनुस्वारेन मखस्य महत्त्वं लभ्यते। तथा च मन्द्रो महामखतृप्यः त्वं विशां = प्रजानां यज्ञे होता, तदन्तर्गत इत्यर्थः। गृहपतिः, गार्हस्थ्यापादकत्वात्। दूतश्चासि देवानां हविरादिप्रापकत्वात्। देवा यानि ध्रुवा = ध्रुवाणि अव्यभिचरित-फलानि व्रता = व्रतानि होमादिकर्माणि अकृण्वत अकुर्वत। तानि विश्वा= विश्वानि सर्वाणि ते = त्वयि सङ्गतानि = सर्वकर्मणामग्नावेव क्रियमाणत्वे-नाग्न्यधिष्ठानकान्येवेत्यर्थः। भगवत्पक्षे तु - सर्वकर्माणि त्वय्येव सङ्गतानि त्वद्विषयकाण्येव त्वदुद्देश्यकान्येव, त्वामुद्दिश्यैव कुर्वन्तीति यावदित्यर्थो द्रष्टव्यः ॥ ५ ॥

(ऋ.म-४२७)

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥ ६ ॥

(ऋगर्थोद्धारः) - त्वे इदग्न इति ॥ हे यविष्ठ्य ! यविष्ठ्यशब्देन[1] विष्णुविवक्षायां यवीयस्सु स्थिततत्वेन यविष्ठ्यः। यविष्ठशब्दाद् भवार्थे

१. 'अग्निशब्देन' घ.।

भवेछन्दसि' (पा.सू. ४-४-११०) इति सूत्रेण यत् प्रत्ययः। प्रसिद्धाग्निविव-क्षायां तु ब्रह्माद्यपेक्षया नित्यं यविष्ठतम एव अतिशयेन नीच एवेत्यतो यविष्ठ्यः। 'आधिक्येऽधिकं' इति स्मरणात् यविष्ठशब्दात् परो यशब्दः तमबर्थो ज्ञातव्यः। अग्ने ! विश्वं = समस्तं हविः सुभगे = महैश्वर्योपेते त्वे इत् = त्वय्येव, आ सम्यक् हूयते, अस्माभिरिति शेषः। स एवमस्माभिर्दत्तहविः सुमनास्त्वमद्य= इदानीं नोऽस्मदर्थे अस्माकं तेभ्यः फलप्राप्त्यर्थं सुवीर्या= पञ्चम्येकवचनस्य। 'सुपां सुलुक्' (पा.सू. ७-१-३९) इत्यादिना आकारा-देशः। तथा च सुवीर्यात् कारणाद् देवान् यक्षि = यजसि। 'यज देवपूजा' इत्यादिधातोः। ददासि तान् प्रापयसीति यावत्। अपरमुत आगामिन्यपि काले, यजेति शेषः।

नन्वग्निकर्तृके देवान् प्रति हविःप्रापणे सुवीर्यस्य कथं कारणत्वमिति चेद्, इत्थम्। सुवीर्यं कार्यं ह्येतद् यदेकस्यैवानेकदेवान् प्रति युगपदनेकप्रत्तहविःप्रापणमिति ॥ ६ ॥

(ऋ.म-४२८)

तं घेमित्था नमस्विन उप स्वराजमासते।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥ ७ ॥

(ऋगर्थोद्धारः) - तं घेमित्थेति ॥ तं घा ईं इत्थेति पदच्छेदः। हे अग्ने ! ये मनुषः = सज्जनाः मनुष्याः स्वराजं = विष्णुपक्षे - स्वातन्त्र्येणान्यानपेक्षया राजत इति स्वराजं, अग्नौ तु - स्वेन स्वतन्त्रेण हरिणा राजत इति स्वराजं, तं = देवान् प्रति युगपदनेकप्रत्तहविःप्रापकत्वाद्युक्तगुणमग्निं त्वाम् ईं = एव इत्था = निर्विकारतया, सर्वदेति यावत्। नमस्विनः = नमस्यन्तः सन्त उपासते। होत्राभिः = त्वदाह्वानरूपाभिः, तत्करणभूताभिरिति यावत्। ऋग्भिः समिन्धते च = प्रकाशयन्ति, त्वत्स्वरूपं प्रकटं कुर्वन्तीत्यर्थः। एवं

त्वदुपासनादिकर्तारस्ते सज्जनाः स्रिधः = संसारबन्धनान् अतितितिर्वांसो घ = संसृतेः तीर्णा हीत्यर्थः। अथवा, ये मनुषः = सज्जनाः मनुष्याः इत्था= निर्विकारतया, सर्वदेति यावत्। तं ईं = उक्तगुणं त्वामेव नमस्विनो ते स्वराजं= भावप्रधानो निर्देशः। स्वराष्ट्रं, उत्तमं ब्राह्मण्यमिति यावत्। उपासते= प्राप्नुवन्ति। यथोक्तं शान्तिपर्वणि जनकेन ऋषीन् प्रति - **'अग्निसंसेवया यूयं प्राप्ता ब्राह्मण्यमुत्तमं'** इत्यादि। ब्राह्मण्यं प्राप्य च होत्राभिः = त्वदाह्वान-साधनभूताभी ऋग्भिः स्तुत्वा समिन्धते= 'इन्धी दीप्तौ' दीप्ताः प्रकाशवन्तः विद्वांसो भवन्तीत्यर्थः। परोक्षज्ञानद्वाराऽपरोक्षज्ञानिनो भवन्तीति यावत्। अनन्तरं त्वत्प्रसादेन इह जन्मन्येव स्रिधः दुःखानि अतितितिर्वांसो घ= तीर्णा हीत्यर्थः। दुःखाः, जीवन्मुक्ता भवन्तीति यावत्। अप्रारब्ध-दुःखानां ज्ञानेन नाशात्। प्रारब्धदुःखसद्भावेऽपि तत्राभिमानाभावेनोपमर्देन च जीवन्मुक्तानां [1]तीर्णदुःखवत्त्वं युक्तम्।

'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥' (भ.गी. अ-२ श्लो.)

'न वै जनो जातु कथञ्चनाव्रजेत् मुकुन्दसेव्यन्यवदङ्ग संसृतिं' **'उपमर्दं च'** (ब्र.सू. ३-४-१६) इत्यादिभगवद्वचनादित्यवगन्तव्यम्॥ ७॥

(ऋम-४२९)

घ्नन्तो वृत्रमतरन् रोदसी अप उरु क्षयाय चक्रिरे।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥ ८ ॥

(ऋगर्थोद्धारः) - घ्नन्तो वृत्रमिति॥ उत्तमाः पुरुषाः अपः = कर्माणि, उपलक्षणमेतत्। मनःप्रभृतीन्द्रियजातमपि उरुक्षयाय = उरु पूर्णः त्वमेव

१. तीर्णसुखवत्त्वम्' घ.।

क्षयः आश्रयः, 'क्षि निवासगत्योः'। तस्मै, भावप्रधानो निर्देशः चतुर्थी च तृतीयार्थे। उरुक्षयत्वेनेत्यर्थः। उरुक्षयत्वबुद्ध्येति यावत्। त्वय्येव निष्ठयेति तात्पर्यम्। चक्रिरे = चक्रुः। त्वन्निष्ठया निवृत्तकर्माणि चक्रुः। त्वन्निष्ठया मनआदीन्द्रियजातमपि त्वद्विषयं चक्रुरित्यर्थः। ते वृत्रं = वरणाद् आवरणाद् वृत्रशब्दवाच्यमज्ञानं घ्नन्तः = भगवद्विषयकनिवृत्तकर्मकरणादिना ज्ञानिनो भूत्वेति यावत्। **'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः'** इति वचनात्। यद्वा, वृत्रम्= उक्तनिर्वचनेन तमोऽन्धकारं घ्नन्तः= निवृत्त-कर्मकरणादिनाऽ-परोक्षज्ञानानन्तरं कर्माणि क्षपयित्वोत्क्रम्य अर्चिरादिमार्गेण गमनसमये ज्योतिर्मयदेहप्रकाशेनान्धकारं नाशयन्तः सन्तो रोदसी= द्यावापृथिव्यौ तद्गतान् जनान् अतरन् = अत्यशेरत। सर्वेभ्योऽप्यतिशयिता अभवन्नित्यर्थः। स एवं स्वाराधकान् अतिशयितान् कुर्वन् वृषा= श्रेष्ठो द्युम्नी= द्युम्नं द्युतिः अस्यास्तीति द्युम्नी भगवान् विष्णुः क्रन्ददश्वः= क्रन्ददश्वस्वरूप एव, सर्ववेदानुच्चारयद् यद् हयग्रीवरूपं तेनेति यावत्। यथोक्तं हयग्रीवध्याने- 'नस्तोमुखादपि निरन्तरमुद्गिरन्तं विद्या अशेषतः' इति। कण्वे, मयीति शेषः। आहुतः = आहितः स्थितः भुवत् = अभवत्। किन्निमित्तम्? गविष्टिषु= गो इष्टिषु गोः ज्ञानस्य इष्टिषु अन्वेषणेषु प्रार्थनेषु कृतेषु सत्सु, कण्वेन मयेति शेषः। मम वैदिकज्ञानसम्पूर्तिर्भूयात्। तदर्थं भगवान् मयि सन्निहितो भवत्वित्याशयेन कण्वेन प्रार्थने कृते श्रीहयवदनरूपेण भगवान् तस्मिन् सन्निहितो जातः। अनन्तरं तत्सन्निधानमहिम्ना वैदिकं ज्ञानं तेन लब्धमिति निश्चीयते। किं तत्र ज्ञापकमिति चेत्। यतः कण्वमुखाद् अर्थज्ञानपूर्वकं शुद्धा वेदरूपा गिरो निःसृता इति तत्कार्यस्यैव ज्ञापकत्वादिति द्रष्टव्यम्। यद्वा, गोशब्दो वेदवाक्यपर एव। तथा च गोः = वेदवाच इष्टिषु प्रार्थनेषु कृतेषु सत्स्वित्यर्थः। वेदवाचः सम्यगुच्चारणार्थं ममाऽयान्तु तदर्थं भगवान् मयि सन्निहितोऽस्त्विति कण्वेन प्रार्थने कृते श्रीहयवदनरूपेण भगवान् तत्र

सन्निहितो जातः । तत्र किं ज्ञापकम् ? यतः कण्वमुखाच्छुद्धा वेदगिरो निःसृता इति ज्ञातव्यम् । अस्यां योजनायां न पूर्वयोजनायामिव परम्परेति द्रष्टव्यम् ॥ ८ ॥

(ऋ.म-४३०)

सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ ९ ॥

(ऋगर्थोद्धारः) - सं सीदस्वेति ॥ हे मियेध्यामेध्य 'आधिक्येऽधिकम्' इति सूत्राद् अधिकेन यकारप्रयोगेण अतिशयितपवित्र ! आधिक्येन मे भवेति वाऽर्थः सूचितः । प्रशस्तस्तुत अग्ने यस्त्वं देववीतमः = 'वी गतौ' गतिश्च ज्ञानम् । अतिशयेन वी वीतमः देवेषु वीतमो देववीतमः देवेषु [1]ज्ञानवित्तमोऽसि । अन्यैश्च गुणैर्महानसि । स त्वमिह यज्ञे संसीदस्व = सन्निहितो भव । तथा शोचस्व= धातूनामनेकार्थत्वाद् दीप्यस्व च । सन्निहितो दीप्तश्च त्वं दर्शतं= दृष्टिगोचरम् अरुषं= रुषशब्दो रोषापरपर्यायक्रोधपरः । दोषविशेषवाचिना रुषशब्देन दोषसामान्याभावो लक्ष्यते । तथा चाशुभगन्धस्यापि दोषत्वेन तदभावे लब्धशुभगन्धवत्त्वमेव लक्ष्यते । तथा च अरुषम्= आज्याद्युद्भूतशुभगन्धोपेतं धूमं विसृज = उत्पादयेत्यर्थः ।

विष्णुपक्षे तु - हे मियेध्य = प्रशस्ताग्ने ! तन्नामकविष्णो ! यस्त्वं देववीतमः= देवानां सकाशाद् ज्ञानवित्तमः[1] महांश्चासि । स त्वमिह ज्ञानयज्ञे संसीदस्व शोचस्व च = दीप्यस्व । सन्निहितस्सन् ज्ञानविषयो भवेत्यर्थः । एवं परोक्षज्ञानविषयभूतस्त्वं धूमं= धुनोति कम्पयति, नाशयतीति यावत् । संसारमिति धूमः तं 'धूञ् कम्पने' अस्मात् कर्तरि मप्रत्ययः । संसारनाशकम् अरुषं= रुषो रोषः क्रोध इति यावत् । तद्धीनत्वं नाम तत्सामानाधिकरण्याभावः, यस्मिन् पुरुषे अपरोक्षज्ञानमुत्पन्नं तस्मिन् पुरुषे क्रोधो नास्तीति यावत् । **'वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते'** इति वचनात् । तथा च अरुषं रोषासमानाधिकरणं दर्शतं= तत्साक्षात्कारं विसृज= अस्माकं विशेषेण सृजेत्यर्थः ॥ ९ ॥

१. 'ज्ञानवत्तमः' घ. ।

(ऋ.म-४३१)

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥ ९ ॥

(ऋगर्थोद्धारः) - यं त्वा देवास इति ॥ हे हव्यवाहन ! = हव्यं देवान् वाहयतीति 'वह प्रापणे' प्रापयतीति हव्यवाहन अग्ने ! यं यजिष्ठं = यजि यज्ञे पूज्यतया तिष्ठतीति यजिष्ठः तं 'गविष्ठो युधिष्ठिरः' इतिवत् सप्तम्या अलुक् । त्वाम् इह= लोके देवासः = देवाः मनवे= मनोरर्थे दधुः= आहितवन्तः । देवाः स्वयम्भ्वाद्याः स्वायम्भुवमनुगृहं प्रत्यागत्य मनुनाधानं कारितवन्त इति यावत् । यं च त्वां धनस्पृतं = धतस्पृशं, धनिकमिति यावत् । कण्वः= पितापुत्रयोरभेदोपचारात् कण्वपुत्रो मेध्यातिथिश्च दधौ= आहितवान् । आधानापेक्षितधनदाताऽप्यग्निरेवेति सूचनाय धनस्पृतमिति विशेषणम् । यं त्वां वृषा= तन्नामकः कश्चिद् राजा दधौ यं त्वाम् उपस्तुतो मुनिश्च दधौ । एवं सर्वैराहितस्त्वम् इह यज्ञे संसीदस्व= शोचस्व च । धूमं विसृजेति यच्छब्दस्य पूर्वत्रान्वयो द्रष्टव्यः ॥ १० ॥

(ऋ.म-४३२)

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥ ११ ॥

(ऋगर्थोद्धारः) - यमग्निमिति ॥ यमग्निं कण्वः 'आत्मा वै पुत्रनामाऽसि'

इति श्रुतेः पितृदेहांशानां पुत्रदेहोपादानत्वेन पितापुत्रयोरभेदोपचारात् कण्वस्य मम सुतो मेध्यातिथिः मेधातिथिः ऋतात् = यथार्थाद् वेदात्, ल्यब्लोपनिमित्ता पञ्चमी। फलाव्यभिचरितार्थप्रतिपादकत्वेन ऋतां यथार्थवेदवाचम् अनूच्येति यावत्। अधि सम्यग् ईधे = दीप्तिरहितमग्निं हविरादिप्रदानाय फूत्कारादिना दीपितवान् दीप्तियुक्तं कृतवान्। तस्य तस्मै अग्नये, इषः = अन्नानि प्रदीदीयुः। अस्माभिरपि प्रदेयानीत्यर्थः।

[१]विष्णौ तु- अग्नाविव दीप्तिरहितस्य दीप्त्युत्पादनरूपमिन्धनं न सम्भवति। अग्रे यस्य देववाचम् अनूच्य तया वेदवाचा अग्निं विष्णुं समीधे = दीपितवान् प्रकाशितवान् शिष्येभ्यः प्रज्ञापितवानिति। किञ्च, तमग्निं प्रत्येव इमाः सर्वाः ऋचः प्रवर्तनीयाः प्रतिपादकतया प्रयोक्तव्याः। ततश्च तमग्निं वयं वर्धयामसि = वर्धयामः आज्याहुत्यादिनाऽभिवर्धयामः। विष्णुपक्षे तु - अग्निं विष्णुं वर्धयामः = तदीयां गुणपूर्णतां तत्प्रतिपादकवाग्व्याख्यानादिना शिष्यजनेषु प्रकाशयाम इति व्याख्येयम् ॥११॥

(ऋ.म-४३३)

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम्।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥ १२ ॥

(ऋगर्थोद्धारः) - रायस्पूर्धीति॥ रायः पूर्धीति पदच्छेदः॥ इन्धनं नाम प्रज्ञापनरूपप्रकाश एवेति द्रष्टव्यम्। तथा च ते = तव देवेष्वाप्यं = देवोभ्योऽपि प्राप्यं हविरादिकमस्ति। कुत इत्यत उक्तं- हीति। **'यज्ञेन यज्ञमयजन्त देवाः'** इति श्रुतेः देवप्रदत्तयज्ञभागादिना तव पूज्यतायाः प्रसिद्धत्वादित्यर्थः। यश्च त्वं स्वधावः= द्वितीयान्ते सुखवाचिनि स्वधाशब्दे उपपदे वर्धतेः अन्तर्णीतण्यर्थाद् डः। तथा च स्वधां सुखं वर्धयतीति स्वधावः सुखवर्धक!

१. विष्णुपक्षे तु' घ.।

स त्वं रायः = नः वित्तानि पूर्धि = पूरय पूर्णानि कुरु। यश्च त्वं श्रुत्यस्य= प्रतिपाद्यत्वेन श्रुतिसम्बन्धित्वाच्छ्रुत्यम्। वाजमन्नं, यज्ञभाग इति यावत्। तस्य राजसि = राजा भवसि। यश्च त्वं गुणैर्महांश्चासि। स त्वं नोऽस्मान् मृळ = मृळय सुखय रक्षेत्यर्थः॥ १२॥

(ऋ.म-४३४)

ऊर्ध्व ऊ षु णं ऊतये तिष्ठा देवो न सविता।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ १३ ॥

(ऋगर्थोद्धारः) - ऊर्ध्व ऊषु ण इति॥ ऊर्ध्वः ऊं इति सु नः ऊतये इति पदच्छेदः। सविता = जगत्प्रसविता देवः = क्रीडादिगुणसम्पन्नो विष्णुः नः यथा नोऽस्मान् वाजस्य = अन्नस्य सनिता = सनयिता लम्भयिता प्रापयिता, अस्माकमन्नदातेति यावत्। यथा च नोऽस्माकम् ऊतये = रक्षायै ऊर्ध्वः = उत्थितः उद्यमी सन् वर्तते तथा त्वमपि। ऊ= नित्यं ऊर्ध्वं तिष्ठ अन्नदानेऽस्मद्रक्षायां च तस्य उद्यतो भवेत्यर्थः। अधिकदृष्टान्तोऽयम्। यदाऽत्र प्रार्थ्यतया विष्णुर्विवक्षितः तदा सविता देवो नेति स्वात्मैव स्वस्य दृष्टान्त इति ज्ञातव्यम्। कुतो मया सूद्यतेन भवितव्यमित्यत उच्यते। यद्यस्मात् वाघद्भिः = वदद्भिः स्तुवद्भिः ऋत्विग्भिः युक्ता वयं त्वाम् अञ्जिभिः = 'अञ्ज सङ्गे' भावे इकारः। सङ्गैः स्नेहैः, भक्तिभिरिति यावत्। विह्वयामहे = विशेषेणाऽकारयामः तस्मात् सूद्यतो भवेत्यर्थः॥ १३ ॥

(ऋ.म-४३५)

ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥ १४ ॥

(ऋगर्थोद्धारः) - ऊर्ध्वो नः पाहीति ॥ ऊर्ध्वः = उद्यमी। यद्वा, 'उन्नतो ह्यूर्ध्व उच्यते' इति वचनाद् उन्नतत्वमूर्ध्वशब्दार्थः। उन्नतत्वं चोच्चत्वम्। तच्च गुणेन इत्युच्चगुणः ऊर्ध्व इत्युच्यते। एतादृशस्त्वं नोऽस्मान् केतुना = ज्ञानेन, ज्ञानं दत्वेति यावत्। अंहसः = पापात् नि= नितरां पाहि। तदर्थं च तत्प्रतिबन्धकीभूतं विश्वं = समस्तम् अत्रिणं= एकवचनं बहुवचनार्थे। समस्तान् ज्ञानप्रतिबन्धकीभूतान् अत्रिणः केवलान्धन्तमोभागित्वेन स्वर्गापवर्गमानुष्यरूपमार्गत्रयवर्जितत्वाद् असुराः अत्रिणः, तान् सन्दह= सम्यग् भस्मीकुरु। 'दह भस्मीकरणे' इति धातोः। यद्वा, 'अद भक्षणे' इत्यस्माद् इनिप्रत्यये नकारस्थस्य इकारस्य लोपे 'यस्येति च' इति (पा.सू. ६-४-१४८) दकारस्थाकारलोपे रुक् इत्यागमे कित्वाद्धातोरन्ते जाते उगित्यस्य लोपे आ इर् इत् इति जाते दकारस्य तकाररूपे चर्त्वे च सति अत्र् इत् अत्रिन् इति नकारान्तप्रातिपदिकसिद्धिः। तथा च भक्षणस्य सर्वसाधारण्याद् 'असाधारण्येन व्यपदेशा भवन्ति' इति न्यायेनाधिकं यथा भवति तथा ब्राह्मणादिसर्वभक्षकत्वाद् अत्रिणो ज्ञानप्रतिबन्धका राक्षसाः तान् सन्दहेत्यर्थः।

किञ्च, नोऽस्मान् चरथ चरथाय 'चर गतिभक्षणयोः' गतये ज्ञानाय भक्षणाय, भोगाय चेति यावत्। यद्वा, चरथाय= चरणाय त्वदीयलोके सञ्चरणाय जीवसे = जीवनाय च ऊर्ध्वान् उत्तमान् कृधि= कुरु। ज्ञानविषये भोगविषये त्वदीयलोके सञ्चारणविषये जीवविषये चास्मान् इतरप्राणिभ्योऽतिशयितान् कुर्वित्यर्थः। किञ्च, देवेषु = देवेभ्यः दुवः = दोहनानि काम्यानि, सङ्कोचप्रार्थने कारणाभावादिति महान्ति अखिलकाम्यानि च नोऽस्मान् विदाः = सर्वदा लम्भय, प्रापयेत्यर्थः।

(ऋ.म-४३६)

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य

॥ १५ ॥ १० ॥

(ऋगर्थोद्धारः) - पाहि नो अग्न इति ॥ बृहन्तो भानवो रश्मयो यस्यासौ तथोक्तस्तस्य सम्बुद्धिः हे बृहद्भानो ! यविष्ठ्य अग्ने ! विष्णुविवक्षायां यवीयस्सु स्थितत्वाद् यविष्ठ्यः। यविष्ठशब्दाद् भवार्थे यत्। अग्निस्तु ब्रह्माद्यपेक्षया आधिक्येनातिशयेनेति यावत्। नीचत्वाद् यविष्ठ्यः 'अग्निर्वै देवानामवमः' इति श्रुतेः। यविष्ठशब्दात् परोऽधिको यशब्दः तमबर्थो ज्ञातव्यः। नोऽस्मान् रक्षसः = राक्षसात्, तत्कृतोपद्रवादिति यावत्। पाहि। अराव्णः= दोषारश्छिद्रशब्दानां पर्यायत्वाद् अरान् दुःखादिदोषान् आ सम्यक् वापयति गमयति सज्जनान् इत्यरावा पापपुरुषः। अरशब्दोपपदाद् आङ्पूर्वाद् वातेः अन्तर्णीतण्यर्थाद् अन्प्रत्यये धात्वाकारलोपे पररूपत्वे वा अरावान् इति प्रातिपदिकसिद्धिः। तस्य अराव्णो धूर्तेः = धूत्कृतेः हिंसारूपाद् वचनात्, [१]परुषवचनादिति यावत्। नः पाहि = रक्ष। तथा रिषतः = 'रिषु हिंसायां' हिंसकात् तदुपलक्षितसमस्तदोषयुक्तपुरुषाद् इति यावत्। पाहि। उत वा= अन्यच्च जिघांसतः = अस्मद्धननाय प्रवर्तमानाच्च पुरुषान्नः पाहीति ॥ १५ ॥

(ऋ.म-४३७)

घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक्।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥ १६ ॥

---

१. 'पुरुषवचनात्' घ.।

(ऋगर्थोद्धारः) - घनेव विश्वगिति ॥ तपुर्जम्भ = तपुषा तापेन औष्ण्येनैव जम्भति अत्ति संहरतीति तपुजम्भः तस्य सम्बुद्धिः हे तपुर्जम्भ = अग्ने ! त्वम्। अराण्णः = उक्तरीत्या पापपुरुषाद् विश्वक्= सर्वतः सर्वदिक्षु विजहि= विद्रावयित्वा नाशय हनेत्ति यावत्। कथम् ? घना इव= घनान् मेघान् इव, वायुरिति शेषः। यश्च अस्मध्रुक्= अस्मद्द्रोही तं च विजहि। किञ्च, यो मर्त्यः अति, अक्तुभिः अक्तुभिरतीत्यन्वयः। अतिरतिक्रमणार्थः। अभावार्थ इति यावत्। अक्तुः सङ्गः, स्नेह इति यावत्। तैः, तथा चाक्तुभिरिति स्नेहैरभावैः स्नेहसम्बन्धिभिरभावैरित्यर्थः। सम्बन्धश्च प्रतियोग्यनुयोगिभाव-रूपः। स्नेहप्रतियोगिकैरभावैरित्यर्थः। स्नेहमात्रं परित्यज्येति यावत्। यद्वा, अक्तुभिरित्येकमेव पदम्। अत्राप्यतिरभावार्थ एव। तथा च अतीत्यस्य न विद्यत इत्यर्थः। न विद्यते अक्तुः स्नेहो येषां ते अक्तवो निःस्नेहाः पुरुषाः, तैः सह शिशीते = 'शो तनूकरणे' 'श्लक्ष्णं दभ्रं कृशं तनु' इति [१]कोशात् तनूकरणं नामाल्पीकरणम्। तथा च अस्मान् अल्पान् करोतीत्यर्थः। यद्वा, तनूकरणं नाम शाणसम्बन्धेन नैशित्यकरणं प्रसिद्धम्। निशितः कुठार इव सर्वदा तीक्ष्णो भवति। सर्वदा परुषवाचाऽस्मान् बाधत इति यावत्। स रिपुः = दुरात्मा पापपुरुषो नोऽस्माकं मा ईशत = परुषवाचाऽस्मत्पीडने ईशः समर्थो न भवत्वित्यर्थः ॥ १६ ॥

(ऋ.म-४३८)

अ॒ग्निर्व॑व्ने सु॒वीर्य॑म॒ग्निः कण्वा॑य॒ सौभ॑गम्।
अ॒ग्निः प्राव॑न्मि॒त्रोत मेध्या॑तिथिम॒ग्निः सा॒ता उ॑पस्तु॒तम् ॥ १७॥

(ऋगर्थोद्धारः) - अग्निर्वव्न इति ॥ अग्निरीशः कण्वाय = चतुर्थी द्विवचनार्थे। कण्वं मां सुवीर्यं वव्ने = 'वन षण सम्भक्तौ' अन्तर्णीतण्यर्थः।

१. अमरात्' घ.।

समभाजयत्। अजां ग्राममनयदिति द्विकर्मकर्ता अग्निरेव कण्वाय कण्वं मां सौभगं वव्ने। किञ्च, अग्निरेव मेध्यातिथिम् मम सुतं मेधातिथिम् उतमित्रा= मम मित्राणि च प्रावत्= प्रकर्षेण ररक्ष। न केवलं मदीयपुत्रमित्रादिरक्षणेन ममैवोपकारकः। किन्तु अग्निरेव उपस्तुतं= तन्नामकं मुनिं च सातौ= ऐहिका-मुष्मिकसमस्तलाभविषये प्रावत्= ररक्षेत्यर्थः। 'साता उपस्तुतं' इत्यत्र सातौ इत्येव भवति। इदं लक्षणपदं वेलुक् इति हि वैदिकानां प्रवादः ॥ १७ ॥

(ऋ.म-४३९)

अ॒ग्निना॑ तु॒र्वशं॒ यदुं॑ परा॒वत॑ उ॒ग्रादे॑वं हवामहे।
अ॒ग्निर्न॑यन्नव॑वास्त्वं बृ॒हद्र॑थं तु॒र्वीतिं॒ दस्य॑वे॒ सहः ॥ १८ ॥

(ऋगर्थोद्धारः) - अग्निना तुर्वशमिति ॥ न केवलं पूर्वऋगुक्त एवाग्नेर्महिमा किन्तु वयं तुर्वशं= तुर्वसुं यदुं उग्रदेवं चेत्येतान् तुर्वस्वादीन् राज्ञो परावतः= दूरतः, दूरदेशे विद्यमानानिति यावत्। सत्कारार्थम् अस्मद्गृहं प्रति हवामहे इति यावत्। तच्चाग्निना तद्बलेनैवेत्यर्थः। गृहं प्रत्यागतमहाराजपूजा-साधनीभूतधनादिसम्पत्तेस्त्वया मम दत्तत्वादित्यर्थः। ययातिपुत्रस्य यदो-रनुजस्य तुर्वस्वि तुर्वशेति नामद्वयमस्तीति ज्ञातव्यम्। सोऽग्निरेव नववास्त्वं बृहद्रथं तुर्वीतम् इत्येतान् नव वास्त्वादिकान् राज्ञो दस्यवे= लक्षणया तत्सम्बन्धिने विनिग्रहाय, चतुर्थी विषयसप्तम्यर्थे। दस्युविनिग्रहविषय इति यावत्। सहः= बलं नयत्= प्रापयामास। अजां ग्राममनयदिति यथा। तान् दस्युवधोपयुक्तबलवतोऽकार्षीदिति यावदित्यर्थः।

विष्णुपक्षे तु - वयं तुर्वशं = तुरो वायुर्यद्वशोऽसौ तुर्वशः तं, यदुं = यदस्ति प्रमाणप्रमितं वस्तु तत उच्चत्वाद् यदुः तं, यद्यपि [१]यदस्सुरिति भाव्यम्। (तथाऽपि) मयूरव्यंसकादिवदस्त्यर्थः समासान्तर्गत इत्यर्थः।

१. 'दस्युरिति घ.।

उग्रादेवं= असुरान् प्रति क्रूरत्वादुग्रः । क्रिडादिगुणसम्पन्नत्वाद् देवः, उग्रश्चासौ देवश्चेति उग्रदेवस्तं 'विशेषणं विशेष्येण बहुलम्' इति बहुलग्रहणाद् अवाक्यानादर इतिवद् विशेषणयोरेव समास इति ज्ञातव्यम् । एवं तुर्वशादिशब्दवाच्यं विष्णुं त्वां परावतः = दूरतः, दूरदेशाद् वैकुण्ठस्थानादिति यावत् । सत्कारार्थे अस्मद्वहं प्रति हवामहे= हवामह इति यत् तच्चाग्निनाऽग्निनामकेन त्वयैव त्वत्प्रसादेनैवेत्यर्थः । अन्यथा एतादृशमहामहिमोपेतस्य तव मद्वहं प्रत्याह्वाने मम सामर्थ्याभावादिति भावः । सोऽग्निनामा भगवानेव नव वास्त्वादीन् राज्ञो दस्यवे सहो नयद्दिति ॥ १८ ॥

(ऋ.म-४४०)

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ १९ ॥

(ऋगर्थोद्धारः)- नि त्वामग्न इति ॥ हे अग्ने विष्णो! मनुः=मनुष्यः सन्नहं शश्वते= शाश्वताय जनाय= मुक्तजनाय ज्योतिः = ज्ञानप्रदं त्वां हृदि निदधे । अहो मदीयं धाष्ट्यं यदल्पोऽप्यहं महान्तं त्वां द्रष्टुं हृदि चिन्तयामीति भावः । त्वदीयं कृपालुत्वमप्याश्चर्यम् । कथम् ? यत एवं मया धाष्ट्यचिन्तने कृते त्वया नोपेक्षा [1]क्रियत इत्युच्यते । यं त्वां कृष्टयः= सर्वाः प्रजाः नमस्यन्ति= नमस्कुर्वन्ति । यश्च त्वम् ऋतजातः= ऋताद् अर्थाव्यभिचारिणो वेदवाक्याद् जायते अभिव्यज्यते इति ऋतजातः उक्षितः= सिक्तः सम्बद्धः, सामर्थ्याद् गुणैरिति लभ्यते । सर्वैः स्वगुणैर्युक्त इति यावत् । स एवंगुणकः त्वं [2]कण्वे मयि दीदेथ = सर्वदा दीप्यसे, मद्धृदये स्थित्वा सर्वदा मद्ध्यानविषयो भवसीत्यर्थः । दीप्यस इति वर्तमानार्थकलट्प्रयोक्तव्ये छन्दस्त्वेन व्यत्ययमङ्गीकृत्य दीदेथेति भूतार्थकलट्प्रयोगः कृत इति ज्ञातव्यम् ।

---

१. 'कृता घ. ।   २. 'कण्वमपि' घ. ।

प्रसिद्धाग्नौ तु - शाश्वताय बहुकालीनाय त्वदधीनकर्त्रे जनाय ज्योतिर्ज्ञानप्रदमिति व्याख्येयम् । ऋतजात इत्येतदपि पूर्वावगतवत् सदा स्थितात् परब्रह्मणः सकाशाज्जात इति व्याख्येयम् । 'मुखादिन्द्रश्चाग्निश्च' इति श्रुतेः ॥ १९ ॥

(ऋ.म-४४१)

त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह
॥ २० ॥ ११ ॥ ३६ ॥

(ऋगर्थोद्धारः) - त्वेषासो अग्नेरिति ॥ अग्नेः = पूर्वोक्तमहिमोपेतस्य विष्णोः त्वेषासः = शक्तयः, यद्यपि 'त्विष दीप्तौ' इति धातोः त्वेषासः दीप्तय इति वक्तव्यम् । तथाऽपि अर्चय इति पृथगुक्तत्वाद् अत्र शक्तयो ग्राह्याः । अर्चयः = देहप्रकाशाश्च अमवन्तः = अमावन्तः 'मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यते' इत्यभिधानात् मा मितिः मर्यादा, तद्वन्तो न भवन्तीत्यमावन्तोऽमेया एवेत्यर्थः । न केवलममेयाः । किन्तु भीमासः = भीमाः भयङ्कराश्च । कथं भयङ्करा इत्यत उच्यते - **सदमिदिति ॥** सदशब्दः स्थानवाची । द्वितीयैकवचनं सप्तमीबहुवचनार्थे । इत् इत्यव्ययं सर्वार्थे । तथा च सर्वेषु युद्धस्थानेषु युद्धमण्डलेषु यातुमावतः = 'या प्रापणे' अस्मात् कर्तरि तुन्प्रत्यये नकारलोपे सति निष्पन्नो यातुशब्दो जङ्गमवाची । मा हिंसा 'मीङ् हिंसायां' इति धातोः, 'मानं ज्ञानं लयश्चैव' इत्यभिधानाच्च । तथा च यातूनां जङ्गमानां मा हिंसा यातुमा तद्वान्, तत्करोतीति यावत् । यातुमावान्, तस्य यातुमावतः, सर्वप्राणिहिंस-कस्येत्यर्थः। यद्वा, यातुः यातना, पीडा दुःखमिति यावत् । मा अनुभवः 'माङ् माने' इति धातोः 'मानं ज्ञानं' इत्यभिधानाच्च । तथा च यातोः यातनायाः मा अनुभवो यातुमा तद्वान् यातुमावान् तस्य यातुमावातः = ऐहिकपारत्रिकदुःखानुभववतः रक्षस्विनः=

रक्षांसि अस्य सन्तीति रक्षस्वी तस्य रक्षस्विनः राक्षसपक्षिणः पुरुषस्य प्रति इतये = प्रतिगन्तुं प्रतिस्पर्धितया तदाभिमुख्येन गन्तुमपि, न [1]शक्ता इति शेषः । एवं वैरिभिरप्रतिगन्तव्य-शक्तिरश्मिसम्पन्नस्त्वं विश्वं समत्रिणं तमोमात्रगन्तृस्वर्गापवर्गमानुष्यरूपमार्गत्रयोज्झितम् असुरं ब्राह्मणादिसर्वात्तृ-त्वादत्रिणं राक्षसं वा दह= भस्मीकुरु 'दह भस्मीकरणे' इति धातोरित्यर्थः ।

ननु भगवच्छक्तीनां तदीयदेहरश्मीनां चाऽभिमुख्येन गन्तुमसतां राक्षसानां सतां देवादीनामप्यशक्यत्वाद् रक्षस्विनो न प्रतीतय इति विशेषणं किमर्थमिति चेत् । उच्यते । भगवच्छक्तीनां तदीयरश्मीनां च सज्जनान् [2]प्रत्यानुकूल्यतः स्थितत्वेन सद्भिराभिमुख्येन गन्तुं शक्यत्वात् । यथा हिरण्यकशिपुं निहत्याऽसीनस्यातितीव्रतेजसः श्रीनृसिंहस्य शक्तयो रश्मयश्च सर्वैराभिमुख्येन गन्तुमशक्या अपि प्रह्लादेन गन्तुं शक्या जाताः । यथोक्तं सप्तमस्कन्धे -

'प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके ।
तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥
तथेति शनकै राजन् महाभागवतोऽर्भकः ।
उपेत्य भुवि कायेन च ननाम विधृताञ्जलिः ॥'

इत्यादि । अत्रोपेत्याऽभिमुख्येन गमनोक्तेः । अतो रक्षस्विन इति विशेषणं सार्थकमिति द्रष्टव्यम् ॥ २० ॥

सूक्तम् - ३७

कण्वो घौरः । मरुतः । गायत्री ।

(ऋ.म-४४२)

क्रीळं वः शर्धो मारुतमनर्वाणं रथे शुभम् ।
कण्वा अभि प्रगायत ॥ १ ॥

१. 'शक्याः' घ. । २. 'मत्यनुकूलतः' इति क. ।

(ऋगर्थोद्धारः) - क्रीळं वः शर्ध इति ।। पञ्चदशर्चमिदं मारुतं सूक्तम् । तत्राऽद्या प्रधानमरुद्विषया । एकवचनश्रवणात् । एवमन्यत्रापि । शेषाः साधारणाः । हे कण्वाः मेधातिथिप्रभृतयो मदीयपुत्रमित्राद्याः क्रीळं = क्रीडं जगत्पालनादिक्रीडाशीलं शर्धः = [1]शर्धशब्दः सुखबलवाची । तथा च शेन सुखेन बलेन वा ऋधः ऋधम् आढ्यं, यद्यपि शर्धस्शब्दस्य सकारान्त-नपुंसकलिङ्गत्वेन मारुतविशेषणत्वमनुपपन्नम् । तथाऽपि छान्दसलिङ्गव्यत्यय-माश्रित्य शर्धः शर्धमिति तद्विशेषणं भविष्यति । अनर्वाणं= अर्वन्शब्दो हयपर्यायः । तथा च 'इन्द्रियाणि हयानाहुः' इति श्रुतेरनर्वाणमनिन्द्रियं, यद्यपि वायोः प्राकृतशरीरवत्त्वे तत्सम्बद्धेन्द्रिय-सद्भावाद् अनिन्द्रियत्वम् अनुपपन्नम् । तथाऽप्यत्रेन्द्रियशब्देन तदभिमानिदेवानां विवक्षितत्वेन वायुदेहेन्द्रियाणां तदभिमानिदेवानां च सत्त्वेऽपि तत्प्रेरणाशून्यमिति व्याख्येयत्वात् । यथोक्तम् -

'तत्वाभिमानिनो देवाः ब्रह्मवायुशरीरयोः ।
सन्त्याज्ञाधारकत्वेन न तयोस्ते नियामकाः' इति ।

रथे = 'शरीरं रथमेव च' इति श्रुतेः रथरूपे प्राणिनां देहे स्थित्वा शुभं = शोभावन्तं 'शुभ शुम्भ शोभायाम्' इति धातोः । वो युष्माकं, स्वामिनमिति शेषः । मारुतं = मुख्यप्राणम्, अभिप्रगायत = स्तुत । यद्वा, हे कण्वाः ! मदीयाः क्रीळं शर्धः रथे शुभम् अनर्वाणं प्राकृतविग्रहविधुरत्वादनिन्द्रियं प्राकृतेन्द्रियरहितं वः स्वामिनं मारुतं माभिः प्रमाणैः वेदै रुतत्वेन स्तुतत्वेन मारुतशब्दवाच्यं विष्णुम् अभिप्रगायतेत्यर्थः ॥ १ ॥

(ऋ.म - ४४३)

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः ।
अजायन्त स्वभानवः ॥ २ ॥

१. 'शशब्दः' इति पाठेन भाव्यमिति भाति ।

(ऋगर्थोद्धारः) - ये पृषतीभिरिति ॥ ये स्वभानवः = अनागन्तुकतेजस्काः मरुतः, पृषतीभिः = कृष्णमृगवध्वो हरिण्यः पृषत्यः ताभिर्हरिणीभिः । तदाख्यैर्वाहनैः ऋष्टिभिर्वाशीभिरञ्जिभिश्चेत्येवम् ऋष्ट्यादिसञ्ज्ञकैरायुधविशेषैश्च साकं = सहैव अजायन्त । आजन्मैवंविध[1]वाहनायुधाद्युपेता इत्यर्थः । यच्छब्दस्य 'इहैव' इत्युत्तरेण सम्बन्धः ।

विष्णौ तु स्वभानवः [2]स्वविषयो भानुः प्रकाशो ज्ञानं येषां ते स्वभानवः स्वप्रकाशाः, बहुरूपत्वाद् बहुवचनं मरुतो विष्णुरूपाणि पृषतीभिः वाहनैः ऋष्ट्यादिभिरायुधविशेषैश्च साकम् अजायन्त= व्यक्तान्यभवन्नित्यर्थः ।

ननु गरुडवाहनस्य विष्णोः पृषत्याख्यवाहनोपेतत्वं सुदर्शनाद्यायुधोपेतस्य कथमृष्ट्याद्यायुधोपेतत्वमिति चेत् । उच्यते । पृषत्याख्यवाहनऋष्ट्याद्यायुधोपततया यदा मरुत उत्पद्यन्ते तदा तन्नियामकतया तदन्तर्यामित्वेन विष्णुरपि तल्लिङ्गोपततया व्यज्यत इति तदन्तर्यामिणस्तल्लिङ्गसाहित्यं युक्तमेव । गरुडादिचिह्नं च बहिष्ठस्यैव विष्णोरिति मन्तव्यम् ॥ २ ॥

(ऋ.म-४४४)

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
नि यामन् चित्रमृञ्जते ॥ ३ ॥

(ऋगर्थोद्धारः) - इहेवेति ॥ ये स्वभावतो जायन्ते ते मरुतो यद् वचनं शब्दं वदान् = वदन्ति, मेघैर्वादयन्तीति यावत् । तद्वचनं, इहेत्यनन्तरम् अपिशब्दाध्याहारः । इहापि = [3]पृथिव्यां स्थितैरपि प्राणिभिः शृण्व इव= श्रूयत इव । कथम्? एषां मरुतां हस्तेषु मेघताडनार्थं धृताः कशाः सन्ति । मरुद्भिः हस्तधृतकशाताडनेन मेघैः कारिताः ये नादास्तेषामेवेह श्रूयमाण-

---

१. वाहनाद्युपेताः' घ. । २. 'स्वस्वविषयः' घ. । ३. 'पृथ्व्यां' घ. ।

त्वेन तद्व्यङ्ग्यवर्णानां व्यक्ततयाऽश्रूयमाणत्वादिवेत्युक्तम् । हस्तधृतकशाताडितमेघनादकारयितृत्वमहिमोपेता मरुत इति पूर्वार्धस्य मारुतत्वसिद्धिर्द्रष्टव्या ।

किञ्च, येषां मरुतां यामन् = 'या प्रापणे' अस्माद् यान्त्यस्मिन्नित्यधिकरणे 'आतो मनिन्' (पा.सू. ३-२-७४) इति मनिन्प्रत्यये इनित्यस्य लोपे च सति निष्पन्नो यामन्शब्दो मार्गवाची । तथा च यामनि मार्गे चित्रं = आश्चर्यं नि ऋञ्जते = समधिगम्यत इत्यर्थः । यद्यपि 'रञ्जु रागे' इति पठ्यते । तथाऽपि धातूनामनेकार्थत्वाद् अधिगमनार्थत्वम् । अत्र मार्गस्य चित्रत्वं नाम मरुत्सु गच्छत्सु सत्सु तन्मार्गस्थितरेणुतृणपर्णादिरूपसर्ववस्तूनामपसरणेन नैर्मल्यमेवेति मन्तव्यम् । मार्गशुद्धिकरत्वरूपमहिमोपेता मरुत इत्युत्तरार्धस्य मारुतत्वसिद्धिः ।

विष्णुपक्षे तु - हस्तधृतकशाताडनेन मरुद्वत्तदन्तर्गतभगवानपि यद्वचनं मेघैर्वादयति तदिहापि शृण्व इवेति पूर्वार्धार्थः स्पष्टः । उत्तरार्धस्य तु येषामित्येतद् विभक्तिवचनविपरिणामेनानुवर्तते । अनेन मरुद्गतेन विष्णुना चित्रं नानाविधं, सर्वमिति यावत् । जगत् यामन् = यामनि स्वीये मार्गे नि ऋञ्जते = रञ्ज्यते, धातूनामनेकार्थत्वात् सम्प्रेर्यत इत्यर्थः ॥ ३ ॥

(ऋ.म-४४५)

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे ।
देवत्तं ब्रह्म गायत ॥ ४ ॥

(ऋगर्थोद्धारः) - प्र वः शर्धायेति ॥ हे कण्वाः ! मदीयाः वः = युष्माकं शर्धाय = बलप्रदाय सुखप्रदाय च, घृष्वये = 'घृषु घर्षणे' अस्मात् क्रिप्रत्यये ककारलोपे घृष्वीति रूपम् । यद्यपि ककारवत् 'वेरपृक्तस्य' (पा. सू. ६-१-

६७) इति विकारस्यापि लोपेन भाव्यम्। तथाऽपि जागृवीत्यादिरूपसिद्ध्यर्थं क्विप्रत्ययान्तर्गतस्य वेर्लोपो वैयाकरणैर्नाङ्गीकृत इति ज्ञातव्यम्। घर्षणेन च शुद्धिर्लक्ष्यते। ताम्रादेराम्लादिघर्षणेन शुद्धेर्जायमानत्वेन लक्षणाबीजसम्बन्ध-सद्भावात्। तथा च घृष्वये = शोधकाय, भक्तानां पापशोधकायेति यावत्। शुद्धाय वा त्वेषद्युम्नाय = त्विट् प्रकाशो द्युम्नं द्युतिः, ज्ञानमिति यावत्। सुप्रकाशज्ञानाय, अप्रतिबद्धज्ञानायेति यावत्। शुष्मिणे = वीर्यवते, अतिबलायेति यावत्। मारुतसूक्तत्वाद् वायव इत्येकवचनाच्च प्रधानवायव इति विशेष्यं लभ्यते। प्रधानवाय्वर्थे इति यावत्। देवत्तं = देवशब्दोपपदात् तनोतेः तप्रत्यये, तस्य डित्कार्यकारिताया विवक्षितत्वाट्टिलोपे सति देवत्तमिति रूपम्। देवेषु प्रेरकत्वेन ततं ब्रह्म परं ब्रह्म प्रगायत= प्रकर्षेण स्तुतेत्यर्थः। भक्तकृतविष्णुस्तोत्रेण वायोरत्यन्तं प्रीयमाणत्वाद् विष्णुगानेन वायुं प्रीणयतेति यावत्। अतो वाय्वर्थे विष्णुं स्तुतेति नासङ्गतिरिति ज्ञातव्यम्। यथोक्त-मेकादशतात्पर्ये -

'सर्वदेवोत्तमो वायुरिति ज्ञानान्न चापरम्।
प्रियमस्ति हरेः किञ्चित् तथा वायोर्हरेर्विदः' इति।

विष्णुपक्षे तु - शर्धयेत्यादिपदोदिताय विष्णवे देवत्तं = दैवैरधीयमानत्वेन निमित्तेन देवेषु ततं ब्रह्म वेदाख्यं शब्दब्रह्म प्रगायत वेदगानेन विष्णुं प्रीणयतेत्यर्थः ॥ ४ ॥

(ऋ.म-४४६)

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम्।
जम्भे रसस्य वावृधे ॥ ५ ॥ १२ ॥

(ऋगर्थोद्धारः) - प्र शंसेति ॥ आत्मानं प्रत्येवेदमुच्यते कण्वेन। हे कण्व! योऽसौ रसस्य = सोमरसस्य जम्भे = तादर्थ्ये सप्तमी। भक्षणार्थं, पानार्थमिति यावत्। ववृधे = यज्ञे प्रकटो बभूव। यच्च वस्तु शर्धः = सुखाढ्यं बलाढ्यं वा तम् अघ्न्यं = हन्तुं योग्योऽघ्न्यः न घ्न्योऽघ्न्यः तं बलाढ्यत्वादेवाहन्तव्यमित्यर्थः। गोषु = वेदाभिमानिनीषु धेनुषु भारतीरूपेषु क्रीळं = क्रीडं क्रीडन्तं, वृषभा एव हि धेनुषु क्रीडन्त इति धेनुषु क्रीडमानत्वोक्त्याऽर्थाद् वृषभरूपिणमिति लभ्यते। मारुतं = श्रीमुख्यप्राणं प्रशंस = प्रकर्षेण स्तुहीत्यर्थः।

अथवा, योऽसौ जम्भे रसस्य ववृधे यच्च वस्तु शर्धः तम् अघ्न्यं गोषु = वेदवाक्यमुख्याभिमानिनीषु रमारूपेषु क्रीडन्तं मारुतं = माभिः प्रमाणैः, वेदैरिति यावत्। रुतत्वेन 'रु शब्दे' शब्दितत्वेन परममुख्यवृत्त्या स्तुतत्वेनेति यावत्। मारुतस्तं, यद्वा, मरुतामयं मारुतः। सम्बन्धश्च पितापुत्रभावोऽत्र विवक्षितः। तथा च मारुतं मरुतां पितरं श्रीविष्णुं प्रशंस = स्तुहीत्यर्थः ॥५॥

(ऋ.म-४४७)

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः।
यत्सीमन्तं न धूनुथ ॥ ६ ॥

(ऋगर्थोद्धारः) - को वो वर्षिष्ठ इति ॥ 'नरोऽनाशात् प्रकीर्तितः' इति वचनात् 'तन्नो नशद्यः पितरं न वेद' इति भगवद्ज्ञानिनो नाशोक्तेर्मरुतां च भगवज्ज्ञानित्वेन नाशाभावान्मरुतां नरत्वं युक्तम्। यद्वा, दोषयुक्तपुरुषेषु नष्टशब्दप्रयोगदर्शनात् नरोऽनष्टाः दोषशून्या इत्यर्थः। तथा च हे नरः ! भगवज्ज्ञानित्वेन नाशशून्याः दोषशून्या वा मरुतः ! वो मध्ये 'कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः' इति वचनात् कः = प्रधानो वायुरेव= आ सम्यग् वर्षिष्ठः = कालतो देशतो गुणतश्च वरिष्ठः उत्तमोऽनन्य इत्यर्थः। यद्यपि 'प्रियस्थिर' (पा.सू. ६-४-१५७) इत्यादिना वृधुशब्दस्य

इष्ठन्प्रत्यये परे [1]'वर्षादिशे वर्षिष्ठो वृद्धतमः इति कालज्यैष्ठ्यमेव लभ्यते । तथाऽपि कालज्यैष्ठ्यस्य देशतो गुणतश्च यज्ज्यैष्ठ्यं तदुपलक्षकत्वाददोषः। एवं सर्वोत्तमप्रधानवायुरूपस्वामिसम्पत्त्या यूयमपि महान्त इति आद्यपादस्य मारुतत्वसिद्धिः ॥

किञ्च, यूयं दिवः = स्वर्गस्य ग्मः = पृथिव्याश्च धूतयः = कम्पयितारः स्थः । कथं द्यावापृथिवीकम्पकत्वं मरुतामित्यत उच्यते । यत् = यस्माद् एतदखिलं जगत् अन्तं नाशं प्रतीव, प्रलयं कर्तुमिवेति यावत् । सीं = सम्यग् धूनुथ = कम्पयथ । तस्माद् द्युपृथिव्योरपि सर्वजगदन्तःपातित्वात् तत्कम्पकत्वं युक्तमित्यर्थः ।

विष्णुपक्षे तु - क इत्येतदाक्षेपार्थकम् । तथा च हे नरः = नाशशून्याः निर्दोषा भगवद्रूपविशेषाः ! वः, सकाशादिति शेषः । वर्षिष्ठः = सर्वोत्तमः को भवेत् ? न कोऽपीत्युत्तमनिषेधः । यद्वा, हे नरो वः त्वत्पर्यन्तं वर्षिष्ठः त्वत्साम्येन वर्षिष्ठः, त्वं यावान् वर्षिष्ठः तावान् वर्षिष्ठ इति यावत् । कः ? न कोऽपीति समनिषेधः । किञ्च, दिवश्च आ = सम्यग धूतयः कथं यद् यस्माद् एतदखिलं जगदन्तं न प्रलयं कर्तुं सीं सम्यग् धूनुथ श्रीनृसिंहादिरूपेण तस्मादिति ।

विष्णुपक्षेऽपि आङो धूतय इत्यनेन सम्बन्धमकृत्वा वायुपक्ष इव वर्षिष्ठपदेनैव सम्बन्धकरणे हे नरो वः सकाशाद् आ = सम्यक् समन्ताद् वर्षिष्ठः को भवेत् ? न कोऽपीति योजनायां तदपेक्षया ईषद्वर्षिष्ठसद्भावः कचिद्देशे वर्षिष्ठसद्भावश्च प्रसज्यते । अतोऽस्मिन् पक्षे नाऽङो वर्षिष्ठपदेन सम्बन्धः किन्तु धूतय इत्यनेनैवेति ज्ञातव्यम् ॥ ६ ॥

---

१. 'वृषा' घ. ।

(ऋ.म-४४८)

नि वो यामाय मानुषो दध्र उग्राय मन्यवे ।
जिहीत पर्वतो गिरिः ॥ ७ ॥

(ऋगर्थोद्धारः)- नि वो यामायेति ॥ हे मरुतः ! वः = युष्माकं यामाय= यान्त्यस्मिन्निति व्युत्पत्त्या मार्गाय, मार्गे स्थातुमिति यावत् । मानुषो निदध्रे= नि नीचैः नीचत्वेन धृतः स्थितः, मार्गगमनप्रतिबन्धाय शक्तो न भवतीति यावत् । तथा वः उग्राय= अतितीक्ष्णाय मन्यवे= कोपाय च मानुषो निदध्रे । कोपस्याभिमुखीभवितुं शक्तो न भवति, कुपितानां वः पुरतः स्थातुं शक्तो न भवतीति यावत् । कथम् ? पर्वतः = पर्वशब्दात् मत्वर्थे तः । बहुवर्षावच्छेदेन[1] युतः, अत्युच्च इति यावत् । एतादृशो गिरिः यो मार्गे स्थितः जिहीत = अत्यजत्, मूलमिति शेषः । उन्मूलोऽभवदित्यर्थः । यदेतादृशोऽत्युच्चोऽपि गिरिर्भवन्मार्गे [2]स्थितः समूलः पतति तदा मानुषो न शक्त इति किमु वक्तव्यमिति भावः ॥ ७ ॥

(ऋ.म-४४९)

येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः ।
भिया यामेषु रेजते ॥ ८ ॥

(ऋगर्थोद्धारः) -येषामज्मेष्विति ॥ येषां मरुताम् अज्मेषु = ज्मा पृथिवी तदसम्बन्धिषु अन्तरिक्षाश्रितेषु यामेषु मार्गेषु सत्सु तैर्मार्गैर्मरुत्सु गतेषु सत्स्विति यावत् । पृथिवी = धरा, भिया = भयेन, रेजते = कम्पते। क इव ? जुजुर्वान्= जीर्णः, विश्पतिः = विशां प्रजानां पतिः, राजेवेति यावत् । यथा दुर्बलो राजा परेभ्यो भीतः कम्पते तथेति । यच्छब्दस्य 'स्थिरं हि जानमेषां' इत्युत्तरत्र सम्बन्धः ॥ ८ ॥

---

१. 'बहुवर्षावच्छेदयुतः' - क. । 'बहुवर्षविच्छेदयुतः घ. । २. 'भवन्मार्गस्थितः' घ. ।

(ऋ.म-४५०)

स्थिरं हि जानमेषां वयो मातुर्निरेतवे ।
यत्सीमनु द्विता शवः ॥ ९ ॥

(ऋगर्थोद्धारः)- स्थिरं हीति ॥ हे मरुतः ! येषां धराकम्पकत्वाद्युक्तगुणानां वो जानं जननं स्थिरं, स्थिरत्वेनोत्तमत्वं लक्ष्यते । कथं जननमुत्तममित्यत उक्तम् - हीति । प्रधानवायोः सकाशाद् भारत्यां जातत्वेन विशिष्टमातापितृ-सम्बन्धवत्त्वस्य प्रसिद्धत्वादित्यर्थः । किञ्च, ते मरुतो निरेतवे = निः नितरां, तत्क्षणेनैव जन्मोत्तरक्षण एवेति यावत् । एतवे गन्तुं, सर्वलोकाटनायेति यावत् । मातुर्भारत्याः प्रसादेनेति यावत् । वयः वयोविशेषं, यौवनं प्राप्तेति शेषः । यौवनप्राप्तेः सर्वासाधारण्येन वर्णनीयत्वाद् 'असाधारण्येन व्यपदेशा भवन्ति' इति न्यायेन जन्मारभ्यैव यौवनं प्राप्ता इति भावः । किञ्च, यद्यस्माद् येषां मरुतां अनुमातुः, प्रसादमिति शेषः । मातृप्रसादानुसारेण, [१]तन्निमित्तेनेति यावत् । सीं = सम्यक् द्विताशवः =द्वितया द्वित्वेन उपेतं मध्यमपदलोपी समासः । द्विविधमिति यावत् । प्रज्ञाबलं बाहुबलं चेति । द्विविधं शवो बलमस्तीति शेषः । शव इति सकारान्तनपुंसकलिङ्गस्य शवस्शब्दस्य प्रथमा । द्विताशव इत्युक्ते प्रज्ञाबलबाहुबलाख्यहेत्वोः साध्यनिर्देशः 'उदुत्य' इत्युत्तरस्यामृचि द्रष्टव्यः ॥ ९ ॥

(ऋ.म-४५१)

उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत ।
वाश्रा अभिज्ञु यातवे ॥ १० ॥ १३ ॥

(ऋगर्थोद्धारः) - उदु त्य इति ॥ उत् उ इति त्ये, इति पदच्छेदः ।

---

१. तेन निमित्तेन' घ. ।

यस्माद् दिग्विजयोपयुक्तबाहुबलोपेताः ज्ञानोपदेशादिना लोकोद्धरणहेतुभूत-प्रज्ञाबलोपेताश्च तस्माद् गिरः भारतीदेव्याः सूनवः वाश्राः, यद्यपि वाश्रृशब्दः कुत्सायामिति पठ्यते । तथाऽपि प्रकृते तदयोगाद् धातूनामनेकार्थत्वाद् 'वाशृ शब्दे' इति धातोः ताच्छीलिके रप्रत्यये रवर्णलोपे वाश् र वाश्रेति रूपम् । तथा च वाश्राः = वचनशीलाः, शास्त्रव्याख्यानस्वभावाः त्ये ते मरुतः अज्मेषु उ = अज्मेष्वेव ज्मा पृथिवी तदसम्बन्धिष्वेव मार्गेषु खेचरा एव भूत्वा काष्ठाः = दिशः उदत्नत = उदापिरे । दिग्विजयमकुर्वन् । दिक्षु स्थितान् प्रतिभटान् जितवन्त इत्यर्थः । किमर्थम् ? दिश उदापिरे इति यत् तत् अभिज्ञु = अभिजन्म अनुसृत्येति शेषः । अभिजन्मानुसारेणेति यावत् । सत्कुलप्रसूत्यनुसारेणेत्यर्थः । अभिपूर्वाज्जनेः उड्प्रत्यये ङकारलोपे 'स्तोश्चुना श्चुः' (पा.सू. ८-४-४०) इति ङकारस्य ञकारे जकारस्थाकारलोपे जञयोर्योगे ज्ञेति जाते अभिज्ञु इति भवति । यातवे = यातुं प्राप्तुमेव, गुणानिति शेषः । लोके सत्कुलप्रसूता हि उपदेशादिना लोकानुद्धरन्ति । दिक्षु स्थितान् प्रतिभटान् विजयन्ते । तेन च दिव्यान् कृपालुत्वादीन् गुणान् प्राप्नुवन्ति । तेन च तेषां सत्कुलप्रसूतिः सफला भवतीति प्रसिद्धम् । एते च मरुतो भारतीपुत्राः प्रज्ञाबलोपतत्वेन व्याख्यानसामर्थ्योपेताः बाहुबलोपेत-त्वेन दिग्विजयसामर्थ्योपेताश्च यदि नाम ज्ञानोपदेशादिना लोकोद्धरणाय दिग्विजयं न कुर्युः तर्हि कथं तेषामभिजन्म सफलं स्यात् ? कथं च कृपालुत्वादिसद्गुणोपेताश्च स्युरिति ऋक्तात्पर्यम् ॥ १० ॥

(ऋ.म-४५२)

त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रं
प्रच्यावयन्ति यामभिः ॥ ११ ॥

(ऋगर्थोद्धारः) - त्यं चिद्धेति ॥ मरुतो दीर्घम् आयामवन्तं पृथुं =

विस्तारवन्तं अमृध्रं = नञुपपदात् 'मृध क्लेदने' अस्मात् कर्मणि रप्रत्यये अमृध्रम् अक्लेद्यमित्यर्थः सम्पद्यते । तत्र पर्वतेषु क्लेदनप्रसक्तेरेवाभावेन निषेधायोगाद् अक्लेद्यत्वेन अप्रधृष्यत्वं लक्ष्यते । लोके कृतापराधः कश्चित् केनचिद् बलात् प्रधृष्यते चेत् तदा तद्देहे स्वेदादिजननेन तस्य क्लेदनं प्रसिद्धम् । अतः प्रधर्षणस्य क्लेदनकारणत्वेन कार्यकारणभावरूप-लक्षणाबीज-सम्बन्धसद्भावाद् अतोऽमृध्रमप्रधृष्यम् । मिहोनपातं= 'मिह सेचने' भक्ताभिलषितसेचकत्वात् मिट् विष्णुः तस्य नपातं नप्तारं, पौत्रमिति यावत् । 'पद्भ्यां भूमिरजायत' इति श्रुत्या भूमेर्विष्णुपुत्रीत्वात् पर्वतानां च भूमिजन्यत्वेन हरेर्दौहित्रत्वात् । त्यं तं, चित् अपि, तमपि प्रसिद्ध-मेर्वादिकमपि पर्वतं यामभिः = भावे मप्रत्ययः । गमनैः प्रच्यावयन्ति घा प्रकर्षेण स्वस्थानात् च्युतं कारयन्ति हीत्यर्थः ॥ ११ ॥

(ऋ.म-४५३)

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन ।
गिरीँरचुच्यवीतन ॥ १२ ॥

(ऋगर्थोद्धारः) - मरुतो यद्धेति ॥ हे मरुतः ! यत् = यस्माद् वः = युष्माकं बलं ह अखिलमपि बलमस्ति तस्माद् यूयं जनान् अचुच्यवीतन। गिरींश्च अचुच्यवीतन = स्वस्थानात् च्युतानचीकरत । नन्वेतत्प्रमाणविरुद्धं जनानां पर्वतानां च स्वस्थान एव स्थितत्वस्य इदानीमपि दर्शनादित्याशङ्का-परिहाराय अचुच्यवीतन इत्येतत् स्थानात् च्यावयितुं शक्ताः स्थेति व्याख्ये-यम् । यद्यपि पूर्वार्धस्थाया एव अचुच्यवीतनेति क्रियायाः गिरीनित्यत्रा-प्यनुवृत्तिसम्भवात् पुनरचुच्यवीतनेति क्रियाभिधानं व्यर्थं, तथाऽपि द्विः क्रियाभिधानसामर्थ्यात् सम्यक् स्वस्थानात् च्यावयितुं शक्ताः स्थेत्यर्थो द्रष्टव्यः ॥ १२ ॥

(ऋ.म-४५४)

यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना ।
शृणोति कश्चिदेषाम् ॥ १३ ॥

(ऋगर्थोद्धारः)- यद्ध यान्तीति ॥ अध्वन्नेत्यत्र अध्वन् आ इति पदच्छेदः। मरुतो यद् = यदा यान्ति तदा एषां मरुतां मध्ये केचन अध्वन्= अध्वनि मार्गे सम्ब्रुवते ह = शास्त्रविषयं संवादं कुर्वन्ति हि । कश्चिदित्यादिसमुदाया-पेक्षमेकवचनम् । एषां मध्ये कश्चित् आश्रुणोति ह = केचित् सम्यक् शृण्वन्ति हि । सर्वदा [१]शास्त्राभ्यासतत्परा इति ऋक्तात्पर्यम् ॥ १३ ॥

(ऋ.म-४५५)

प्रयात शीभमाशुभिः सन्ति कण्वेषु वो दुवः ।
तत्रो षु मादयाध्वै ॥ १४ ॥

(ऋगर्थोद्धारः) - प्रयात शीभमिति ॥ तत्रोष्वित्यत्र तत्र, उ इति, सु इति पदच्छेदः । हे मरुतः यूयमाशुभिः शीघ्रगमनवद्भिः वाहनैः, शीघ्रमस्मान् प्रतीति शेषः । प्रयात आगच्छत । आगत्य च, तत्र उ = तत्रैव अस्मद्गृहेष्वेव सु सम्यक् मादयाध्वै मदं कुरुत । सुखिनो भवत । ननु भवद्गृहेऽस्मन्मदहेतूनां विषयाणामभावात् कथं प्रयात, मदं कुरुतेति प्रार्थ्यत इत्यत उच्यते कण्वेषु कण्वस्य मम गृहेषु वो युष्माकमर्थे दुवो दोहनानि, अखिलकाम्यानीति यावत् । सन्ति ॥ १४ ॥

(ऋ.म-४५६)

अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम् ।
विश्वं चिदायुर्जीवसे ॥ १५ ॥ १४ ॥ ३७ ॥

१. 'शास्त्राभ्यासनतत्परा' इति क. पाठः ।

(ऋगर्थोद्धारः) - अस्ति हि स्मेति पदच्छेदः । स्मसि ष्मेत्यत्र स्मसि स्म इति पदच्छेदः । हे मरुतः वो युष्माकं मदाय सुखायास्मद्गृहेषु हविरादि-साधनमस्ति । हि स्म सुप्रसिद्धमेतत् । किञ्च, वयमेषां मरुतां सम्बन्धिनः स्मसि स्म । भवामो हि । ननु कथं यूयमस्मत्सम्बन्धिन इत्यत उच्यते । नोऽस्माकं मरुतां प्रसादाद् जीवसे जीवनाय विश्वश्चित् सम्पूर्णमप्यायुरस्ति हि । तत्प्रसादलब्धायुरय्या वयं कथं तदीया न भवाम इति भावः । एवमस्मद्गृहेषु भवत्प्रीतिकरहविरादिसाधनसद्भावाद् अस्माकं त्वत्सम्बन्धित्वाच्चास्मान् प्रतियातेति पूर्वेण सम्बन्धः ॥ १५ ॥ १४ ॥३७॥

सूक्तम् - ३८

कद्ध नूनमित्यादिपञ्चदशर्चस्य सूक्तस्य
कण्व ऋषिः, मरुतो देवताः, गायत्री छन्दः ।

(ऋ.म-४५७)

कद्धं नूनं कधप्रियः पिता पुत्रं न हस्तयोः ।
दधिध्वे वृक्तबर्हिषः ॥ १ ॥

(ऋगर्थोद्धारः) - कद्ध नूनमिति ॥ एतदपि पञ्चदशर्चं मारुतं सूक्तम् । हे वृक्तबर्हिषः, वृक्तं यजमानेन स्तृतं बर्हिर्यद्विषये ते वृक्तबर्हिषो मरुतो यूयं, मामिति शेषः । कत् कदा हस्तयोर्नूनं निश्चितं दधिध्वे दध्वे । हेत्यास्वादने मद्धस्तौ गृहीत्वा मां संसारादुत्तीर्योद्धरतेति तात्पर्यम् । दधिध्व इत्युक्तं धारणं किमिवेत्यत उच्यते - कधप्रियः पिता पुत्रं नेति । कधेति निपातः । कदाऽपि सर्वदाऽपीत्यर्थे वर्तमानः । प्रियशब्देन समासः । तथा च कधप्रियः सर्वदाऽपि प्रियः । पिता, पुत्रं न = पुत्रमिव, पुत्रं यथा हस्तयोर्गृह्णाति तथेत्यर्थः ॥ १ ॥

(ऋ.म-४५८)

क्वं नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः ।
क्वं वो गावो न रण्यन्ति ॥ २ ॥

(ऋगर्थोद्धारः) - क नूनमिति ॥ हे मरुतो यूयं नूनमिदानीं दिवः स्वर्गात् पृथिव्याश्च निर्गत्य क गन्ता । कापि गच्छथ । न कापि, न गच्छथ वा । गमने च वो युष्माकं कत् कोऽर्थम् = अर्थः ? किं फलमस्ति ? न किमपि । फलं नास्तीत्यर्थः । स्वर्गात् पृथिव्याश्च कचिद् गमनं, गमने च प्रयोजनं किमिति पृच्छति । किञ्च, अन्यं प्रति प्रश्नं विना मरुतः प्रत्येव किमिति पृच्छ्यत इति चेत्, अस्त्यभिप्रायविशेषः । मरुतां गमनं, गमने च प्रयोजनं चेत्येतदुभयं तावदवश्यं ज्ञातव्यम् । पुरुषार्थहेतुत्वात्, तत्प्रसादात् तेभ्य एव चेति ज्ञात-व्यम् । नान्यथा । अन्यस्य तथाविधस्य वक्तुरभावादिति ।

किञ्च, गावो न, यवसार्थिनो गावो यथा [१]अम्भारवादिना यवसदातॄन् आह्वयन्ति तथा मोक्षादिफलार्थिनः साधकाः वो युष्मान् क रण्यन्ति रणन्ति 'रण शब्दे' आह्वयन्तीति यावत् । संसारकूपनिमग्नप्राणिसमुदाये भवदाह्वानकर्तारो दुर्लभाः । अत एतदप्यवश्यं ज्ञातव्यम् । पुरुषार्थहेतुत्वात् तत्प्रसादादत एव च ज्ञायते । नान्यथा । अन्यस्य तथाविधस्य वक्तुरभावादत एतन्मरुतः प्रत्येव पृच्छ्यत इति पूर्ववदाशयः ॥ २ ॥

(ऋ.म-४५९)

क्वं वः सुम्ना नव्यांसि मरुतः क्वं सुविता ।
क्वों विश्वानि सौभगा ॥ ३ ॥

(ऋगर्थोद्धारः) - क वः सुम्नेति ॥ हे मरुतो युष्माकं नव्यांसि स्तुत्यानि

१. 'अम्बारवादिना' इति पाठः समीचीनः स्यात् ।

सुम्ना सुम्नानि सुखानि क । तथा वो युष्माकं सुविता सुवितानि भद्राणि चरितानीति शेषः । क ? तथा वो युष्माकं विश्वानि सम्पूर्णानि सौभगा सौभाग्यानि । बहुवचनमेकवचनार्थे । सम्पूर्णं सौभाग्यं, यस्मिन् सति, जनाः वशा भवन्ति तत् सौभाग्यमित्युच्यते । [1]द्वात्रिंशत्सु लक्षणेष्वेकमेतत् । जनवशीकरणनिमित्तं द्वात्रिंशल्लक्षणेष्वेकं सौभाग्यापरनामकं लक्षणं च कु उ कैवेत्यर्थः । अत्र यद्यपि को इत्येव पठ्यते । तथाऽपि को इत्यत्र क उ इति पदद्वयमस्तीति ज्ञातव्यम् । कम्पस्तु प्रश्नविषयस्याऽधिक्यद्योतनार्थः।

ननु मरुतः प्रत्ययं प्रश्नोऽनुपपन्नः । मरुत्सम्बन्धिसुखचरितसौभाग्यानां मरुद्गतत्वस्य निश्चितत्वादिति चेत्, सत्यम् । सुम्ना चरितानि सौभाग्यं च केत्यस्य कुत्रेति स्वार्थं परित्यज्य कथम्भूतानि केनोपायेन ज्ञातव्यानीति लक्षणयाऽर्थकरणात् । ज्ञातव्यं खलु मरुदीयं सुखादिकं, पुरुषार्थहेतुत्वात् तत्प्रसादत एव ज्ञायते । नान्यथा । अन्यस्य तथाविधस्य वक्तुरभावादिति [2]प्रश्नाभिप्रायः पूर्ववदेव द्रष्टव्यः ।

यद्वा, केत्यस्य कुत्र कस्मिन्निति यावदित्येवं स्वार्थमपरित्यज्य प्रकारान्तरेणार्थः कथ्यते । तथा हि, हे मरुतो वो युष्माकं सुम्नानि चरितानि सौभाग्यं च क कुत्र कस्मिन् आचार्ये निमित्ते सति कमाचार्यं निमित्तीकृत्य तत्र सन्निहितः सन् भगवान् ज्ञापयिष्यतीति यावदित्यर्थः ॥ ३ ॥

(ऋ.म-४६०)

यद्यूयं पृश्निमातरो मर्तासः स्यातन ।
स्तोता वो अमृतः स्यात् ॥ ४ ॥

(ऋगर्थोद्धारः) - यद्यूयमिति ॥ हे पृश्निमातरः, पृश्निर्गीः भारती, वाङ्नामसु

---

१. द्वात्रिंशल्लक्षणेषु घ. । २. 'प्रश्नाशयः' घ. ।

पाठात् । सा माता येषां ते पृश्निमातरो भारतीपुत्रा इति यावत् । मरुतो यूयं यद् यदि मर्तासो मानुषाः पाण्डुराजादिरूपेण मानुषशरीरप्राप्तिमन्तः स्यातन= स्यात । तथाऽपि वः स्तोता अमृतोऽमरो देव इति यावत् । स्यात् । मानुषावतारेऽपि भक्तेभ्यो देवत्वादिकं दातुं समर्था यूयमित्येव तस्या ऋचो मारुतत्वसिद्धिर्द्रष्टव्या ।

विष्णुपक्षे तु, हे पृश्निमातरः 'पृच्छ ज्ञीप्सायाम्' इति धातोः, पृच्छ्यत इति कर्मार्थे निङ्प्रत्यये ङकारलोपे 'छोः शूट्' इति छकारस्य शकारे च सति पृश्नीति रूपम् । तथा च पृच्छ्यत इति व्युत्पत्त्या प्रश्नयोग्यत्वात् । पृश्निर्वेदः । सा माता ज्ञाता येषामिति विग्रहः । 'हन्ता रामशरः' इतिवत् करणे कर्तृत्वोपचारात् पृश्निमातरो वेदेन विज्ञेया इत्यर्थः । यद्वा, पृश्नेर्वेदस्य मातरो ज्ञातरः पृश्निमातरो भगवद्रूपविशेषा इत्यर्थः । ननु ज्ञानिवाचक-मातृशब्दस्य प्रथमाबहुवचनमेव मातर इति भवति । अत्र च बहुव्रीहिषष्ठी-विग्रहपक्षेऽपि मातृशब्दस्य ज्ञातृपर्यायत्वात्, तस्य च तृजन्तत्वेन 'अप्तृन्तृच्' इति (पा. सू. ६-४-११) सूत्रेणोपधादीर्घे सति पृश्निमातार इत्येव स्यान्न तु मातर इतीति चेत्[1] सत्यम् । विग्रहद्वयेऽपि दीर्घाभावस्य छान्दसत्वादित्यव-गन्तव्यम् । तथा च हे पृश्निमातरो मरुतो भगवद्रूपविशेषाः यूयं यद् यदि मर्तासः मानुषाः रामकृष्णव्यासादिरूपेण मानुषवत् प्रतीयमानदेहाः स्यातन स्यात तथाऽपि वः स्तोता अमृतो देवः स्यात् । मानुषावतारेऽपि भक्तेभ्यो देवत्वादिकं दातुं समर्था यूयमित्यर्थः ॥ ४ ॥

(ऋ.म-४६१)

मा वो मृगो न यवसे जरिता भूदजोष्यः ।
पथा यमस्य गादुप ॥ ५ ॥ १५ ॥

---

१. 'पृश्निमातर इत्येव स्यान्न तु मातृ इति' इत्येवं मातृकापाठोऽस्ति ।

(ऋगर्थोद्धारः) - **मा वो मृगो नेति** ॥ हे मरुतो वो जरिता स्तोता कथञ्चित् कृतपातकोऽपि अस्मिन् जन्मनि अजोष्योऽसेव्योऽसंव्यवहार्य इति यावत्। मा भूत् न स्यात्। तत्र व्यतिरेके दृष्टान्तः कथ्यते। यवसे मृगो नेति। यथा यज्ञोपयुक्तपयोदोग्ध्रीभिर्गोभिर्भक्षयितुं योग्ये यवसे तृणादिविषये मृगो व्याघ्रादिरजोष्योऽसेव्यः स्पृष्टत्वेन भक्षयितृत्वेन चानुपादेयो भवति। स्पर्शादावयोग्य इति यावत्। तथा नायं पूजादावसेव्यो भवति। न केवलमिहासंव्यवहार्यो न भवतीत्येव। किन्तु, [१]यमलोके परस्य यथा पन्थानं मार्गं च मा उप गात् मोपगात्। न व्रजेदित्यर्थः।

ननु मरुत्स्तोतुरसेव्यत्वाभावे सेव्यः कश्चिद् दृष्टान्तो वक्तव्यः। व्यतिरेकमुखेनासेव्यो व्याघ्रादिः कथं दृष्टान्तत्वेनोच्यते। अस्यापि याच्ञारीतिविशेषात्। तथा हि यस्माद् यूयं कृतपातकस्यापि त्वद्भक्तस्येह जन्मनि शुचित्वसम्पादकाः, परत्र यममार्गदातारश्च तस्मादस्मानपि युष्मत्स्तोतॄन् कुरुतेति याच्ञायां ह्यत्र तात्पर्यम्। याच्ञा चैवं भवति। तथा हि तद्वदस्मान् कुरु। कृतघ्नवददाता त्वं जात्वस्मान् प्रति मा भवेत्यादियाच्ञायां परनिन्दारूपैकदेशयुक्तताया कृतपुरुषस्तुतिलक्षणैक-देशयुक्ततायाश्च दृष्टत्वेनेहापि निन्दास्तुतिरूपैकदेशाभ्यां युक्ततया याच्ञायाः विवक्षितत्वात्। मरुत्स्तोतुरसेव्यत्वाभावे व्यतिरेकमुखेनासेव्यस्य व्याघ्रादेर्दृष्टान्तत्वोक्तिर्युक्तैवेत्यवगन्तव्यम् ॥ ५ ॥ १५ ॥

(ऋ.म-४६२)

मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्।
पदीष्ट तृष्णया सह ॥ ६ ॥

(ऋगर्थोद्धारः) - **मो षु ण इति** ॥ अत्र मो इति, सु, नः इति पदच्छेदेऽपि

२. ‘परलोके यमस्य’ घ.।

मो इत्यत्र मा उ इति पदद्वयमस्तीति ज्ञातव्यम्। हे मरुतः! भवतां प्रासादादिति शेषः। दुर्हणा, दुःखदा, हणा = हन्त्री चेति दुर्हणा, निर्ऋतिः= तन्नाम्नी काचिद् देवता, मृत्युरिति यावत्। नोऽस्मान् परापरा, परतः = परस्मिन् काले, ततोऽपि परस्मिन् काले, सर्वस्मिन्नपि काल इति यावत्। सु = अत्यन्तम्, क्वचिदिति यावत्। मा वधीत् उ नैव हन्यात्। किन्तु, सा निर्ऋतिः, तृष्णया सह = तानहं हनिष्यामीतीच्छया सह, सु पदीष्ट ‘पद गतौ’ यत्र क्वचन गच्छतु मृत्युः, तस्यास्मद्धननेच्छा चेति द्वयमपि गच्छत्विति यावदित्यर्थः ॥ ६ ॥

(ऋ.म-४६३)

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः।
मिहं कृण्वन्त्यवाताम् ॥ ७ ॥

(ऋगर्थोद्धारः)- **सत्यं त्वेषा इति** ॥ त्वेषाः = दीप्तिमन्तः, अमवन्तः= मा= परिच्छेदः। **‘मानं ज्ञानं लयश्चैव मर्यादा चापि कथ्यते’** इति वचनात्। तद्वन्तो मावन्तः। न मावन्तोऽमावन्तः। अमावन्त एव दीर्घलोपेनामवन्तः। अपरिच्छिन्नाः, सर्वत्र सञ्चारवन्त इति यावत्। यद्वा, न विद्यते मा मर्यादा यस्य सामर्थ्यस्य तत् सामर्थ्यमममम्। तद्वन्तोऽमवन्तः। अपरिमितसामर्थ्यवन्त इत्यर्थः। रुद्रियासः = रुद्रियाः, रुजां विद्रावकत्वाद् रुद्रो वायुः। तत्पुत्रत्वाद् रुद्रियाः। रुद्रशब्दाद् अपत्यार्थे घः। तस्य इयादेशः। मरुतः। सत्यं, क्रियाविशेषणमेतत्। सत्यं यथा भवति तथा, न तु मायया, धन्वन्= धन्वनि, चित्= अपि, धन्वन्यपि= धन्वदेशेऽपि, निरुदक-प्रदेशो धन्वशब्देनोच्यते। ऊषरभूमावपि अवातां= अचेतनवातरहिताम् **‘अमोघाः पूर्ववायवः’ ‘पुरोवातो हिङ्कारः’** इति वचनेनाचेतनवायोर्वृष्टि-सहकारित्वावगमात् तं विनाऽपीति यावत्। मिहं सेचनं, वृष्टिमिति यावत्। आ = सम्यग् उ स्वेच्छयैव कृण्वन्ति। कुर्वन्ति ॥ ७ ॥

(ऋ.म-४६४)

वाश्रेवं विद्युन्मिंमाति वत्सं न माता सिंषक्ति ।

यदेंषां वृष्टिरसर्जि ॥ ८ ॥

(ऋगर्थोद्धारः) - वाश्रेवेति ॥ यत् = यदा, एषां = मरुतां सकाशाद् वृष्टिरसर्जि सृष्टा, यदैते वृष्टिं सृजन्तीति यावत् । तदा विद्युत् मिमाति प्रकाशार्थोऽयम् । भूमिं प्रकाशयेत् । कथम् ? वाश्रेव = वत्सला माता यथाऽपत्यं पश्येत् तथा विद्युत् भूमिं पश्यति, प्रकाशयतीति तात्पर्यम् । किञ्च, माता गौर्वत्सं न = वत्समिव, भूम्यां स्थितान् पदार्थान् सिषक्ति = आलिङ्गति, सम्बद्धा भवति । प्रकाशयतीति यावत् । तथा च न केवलं भूमिमेव प्रकाशयति । किन्तु, तत्र स्थितान् पदार्थांश्च प्रकाशयतीत्यर्थः । एवं भूम्यादिप्रकाशरूपं यद् विद्युतां कर्म तदपि मरुतोऽनुग्रहेणैव भवतीत्याशयः । तथा चास्या ऋचो मारुतत्वसिद्धिः ॥ ८ ॥

(ऋ.म-४६५)

दिवां चित्तमः कृण्वन्ति पर्जन्येनोदवाहेनं ।

यत्पृंथिवीं व्युन्दन्तिं ६७ ॥ ९ ॥

(ऋगर्थोद्धारः) - दिवा चिदिति ॥ मरुतो यत् यदा पृथिवीं भूलोकं व्युन्दन्ति, 'उन्दी क्लेदने' वृष्ट्या सेचनेन द्रवीकुर्वन्ति । वत्सं न मातेत्यत्राप्यनुवर्तते । यथा[1] माता गौर्वत्सं पयसा सिञ्चति तथा तदा उदवाहेन उदमुदकं वहतीत्युदवाहस्तेन, सजलेनेति यावत् । पर्जन्येन मेघमण्डलेन दिवाचित् = दिवाऽपि अह्न्यपि, तमोऽन्धकारं कृण्वन्ति कुर्वन्ति ॥ ९ ॥

(ऋ.म-४६६)

अधं स्वनात् मरुतां विश्वमा सद्म पार्थिवम् ।

अरेंजन्त प्रमानुंषाः ॥ १० ॥ १६ ॥

१. 'तथा' घ. ।

(ऋगर्थोद्धारः) - अध स्वनादिति ॥ अध = अथ, अन्यच्च मरुतां कर्म ब्रूम इत्यर्थः । किं तत् ? एषां मरुतां स्वनात् ध्वनिमात्राद् ध्वनिमात्रेणैव आ समन्ताद् वर्तमानं विश्वं समस्तं पार्थिवं पृथिव्यां भवं सद्म गृहजातं, गृहाणामचेतनानां भयाभावात् तदभिमानिनो देवाः सद्मशब्देन ग्राह्याः । तथा च गृहाभिमानिनो देवाः पृथिव्यां स्थिता मानुषाश्च [1]प्रारेजन्त भीतवन्त इत्यर्थः । यद्वा, प्रारेजन्तेति न भयार्थं किन्तु क्षेत्रादिचलनार्थकमेव विवक्षितम् । तथा च येषां स्वनात् आ समन्ताद् वर्तमानं विश्वं समस्तं पार्थिवं पृथिव्यां भवं सद्म गृहजातं तत्रस्था मानुषाश्च प्रारेजन्त प्रचेलुरित्यर्थः ।

विष्णुपक्षे तु, अध = अथ अन्यच्च पारमेश्वरं कर्म ब्रूमः । किं तत् ? येषां मरुतां परमेश्वररूपाणां स्वनाद् विषयविषयीभावः षष्ठ्यर्थः । परमेश्वररूपविषयकात् स्वनात् स्तुतिरूपात्, स्तुतिजनिततत्प्रसादेनेति यावत् । आ समन्ताद् वर्तमानं विश्वं समस्तं पार्थिवं पृथिव्यां स्थितं तथा सद्म गृहं गृहक्षेत्राद्यभिन्न इतिवत् मानुषाश्च [2]भवितृप्रधानो निर्देशः । कर्मफलरूपं यन्मानुषत्वम् । बहुवचनमाद्यर्थे । कर्मफलरूपं यत् तिर्यक्त्वादि तत्सर्वं प्रारेजन्त । भीतमिति पलायत इत्यर्थः ॥ १० ॥

(ऋ.म-४६७)

मरुंतो वीळुपाणिभिंश्चित्रा रोधंस्वतीरनुं ।

यातेमखिंद्रयामभिः ॥ ११ ॥

(ऋगर्थोद्धारः) - मरुतो वीळुपाणिभिरिति ॥ अत्र यातेमेत्यत्र यात ईम् इति पदच्छेदः । हे मरुतः ! यूयं वीळुपाणिभिः [3]दृढहस्तैः गमनसमये इतस्ततो हस्तानां चालने क्रियमाणे सति तेषु श्रम उत्पद्यते न तथा

१. 'अरेजन्त' घ. । २. ' भावप्रधानो निर्देशः' इति पाठेन भाव्यमिति भाति ।
३. 'दृढस्तैः' घ. ।

मरुद्धस्तानां [1]'हस्तचालनेऽपि श्रमशून्यैरिति यावत्। अस्विद्रयामभिः ईम् 'खिद दैन्ये' अस्माद् भावे रः। तथा च स्विद्रं = दैन्यं दुःखमायास इति यावत्। अस्विद्रैः आयासशून्यैरेव यामैः 'या प्रापणे' इत्यस्माद् भावे मप्रत्यये सति निष्पन्नयामशब्दस्य गमनवाचित्वात्। लोके आयासपूर्वकं गमनं मन्दगमनमेव दृष्टम्। मरुद्गमनस्य चाऽयासाभावोक्त्या वेगवत्त्वं लभ्यते। तथा वेगवद्भिर्गमनैश्चेति यावत्। चित्रा विचित्राः विचित्रदिगभिमुख-प्रवाहवत्यः। 'प्राच्यो नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः' इति श्रुतेः। रोधस्वतीः उभयतीरवतीः नदीः यद् रोधः सु कण्वा वयं तपस्यन्तः स्मः ताः नदीरिति यावत्। अनुयात= प्रतियातेति।। यद्वा, हे मरुतः वीळुपाणिभिरुपेता अस्विद्रयामभिश्च, प्रापणार्थस्य यातेः करणे मप्रत्यये सति निष्पन्नस्य यामशब्दस्य गमनसाधनपदार्थत्वात् [2]'खेदशून्यगमनसाधनैः पादैश्चोपेता यूयमिति शेषः। तथा हस्तपादोपेता यूयं, न त्वचेतनवायुरूपा इत्यर्थः। चित्रा रोधस्वतीरनुयातेति ॥ ११ ॥

(ऋ.म-४६८)

स्थिराः वः सन्तु नेमयो रथा अश्वास एषाम्।
सुसंस्कृता अभीशवः ॥ १२ ॥

(ऋगर्थोद्धारः)- स्थिराः वः सन्त्विति ॥ ननु भवद्भिरागमनं प्रार्थ्यते। अस्माकं चाऽगमनसाधनीभूतदृढाक्षादियुतानां रथानां तद्वाहकाश्वानां चाभावात् कथमागन्तव्यमिति शङ्कापरिहारायोच्यते। हे मरुतः युष्माकं इहास्मत्समीपं प्रत्यागमनाय स्थिराः दृढाः अभेद्याः सुसंस्कृताः दृढाक्ष-बन्धनादिरूपसंस्कारवन्तः अभीशवः अभीशुमन्तः तेजस्विनः, अभीशुशब्दः प्रग्रहवत् तेजोवाच्यपि भवति। रथाः सन्तु सन्ति। येषां रथानां नेमयश्च

१. 'असश्चालनेऽपि' घ।   २. 'स्वेद......' क।

स्थिराः सन्ति। चक्रान्त्यभागीयं परितो विद्यमानमयोमयं बन्धनं नेमिशब्देनोच्यते। येषां रथानाम् अश्वासः अश्वाः रथसम्बद्धास्तुरगाश्च सन्ति। अतस्तैरागच्छेति भावः॥ १२ ॥

(ऋ.म-४६९)

अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्।
अग्निं मित्रं न दर्शतम् ॥ १३ ॥

(ऋगर्थोद्धारः) - अच्छेति ॥ आत्मानं प्रत्येव वक्ति कण्वः। हे कण्व त्वम् अग्निं न अग्निवत्, मित्रं न सूर्यवत्, दर्शतम्। यद्यपि दृश्धातोः कर्मण्यतप्रत्यये गुणे तस्य रपरत्वे च निष्पन्नो दर्शतशब्दो दृश्यमात्रवाची। तथाऽपि अग्निसूर्यदृष्टान्तोपादनसामर्थ्याद् अत्र स्वसामर्थ्येन प्रकाश्यत्वार्थको वर्णनीयः। यथाऽग्निसूर्यौ आलोकान्तरानपेक्षया स्वमहिम्नैव दृश्येते तथैवायमित्यर्थः सूच्यते। यथोक्तम् - 'अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिः' इति। तथा च दर्शतं स्वसामर्थ्येनैव प्रकाश्यं ब्रह्मणस्पतिं ब्रह्मणो हिरण्यगर्भस्य पतिं विष्णुं, ब्रह्मणो वेदवाचः पतिं वायुं च, तन 'तनु विस्तारे' अस्मात् कर्तरि अच्प्रत्यये सति निष्पन्नस्तनशब्दो व्याप्तवाची। ततः स्त्रीलिङ्गात् तनाशब्दात् परतः स्थितायास्तृतीयाविभक्तेः टा इत्येवं-रूपायाः 'सुपां सुलुक्, इत्यादिना डा इत्यादेशे डित्वात् टीभूतस्य नकारस्थस्य आकारस्य लोपे तन् आ तनेति तृतीयाविभक्त्यन्तं पदं निष्पद्यते। तथा च तना तनया व्याप्तया, बह्वर्थविषयेति यावत्। जरायै जराशब्दः स्तुतिवाची, भावप्रधानः। जरात्वाय 'सुपां सुपो भवन्ति' इति चतुर्थी तृतीयार्थे। जरात्वेन, तृतीया चेत्थम्भूतलक्षणार्था। यद्वा, मा भूद् विभक्तिव्यत्ययः। चतुर्थी-विभक्तिरेवेत्थम्भूतलक्षणार्था। सर्वा विभक्तयश्चेत्थम्भाववाचिन्य इत्यर्थ-प्रतिपादकस्य महाव्याकरणसूत्रस्य सद्भावात्। तथा च जरायै जरात्वेन

स्तुतित्वेनोपेतया गिरा अच्छ वद यथावद् वद। अत्र वक्तव्यत्वरूपं प्रकारं प्राप्तायाः गिरः स्तुतित्वं ज्ञापकम्। वक्तव्यायाः गिरोऽनेकविधत्वेन निन्दादि-नाऽपि सम्भवरूपातिप्रसक्ति-परिहाराय स्तुतित्वेनेत्युक्तम्। तथा चेयं वाग् यथा स्तुतिरूपा स्यात् तथा वदेत्येवमित्थम्भूतलक्षणार्थो द्रष्टव्यः। ननु कण्वेन त्वं वदेति स्वात्मानं प्रत्येव कथमुच्यते ? परात्त्वरूपे युष्मद्युपपदे मध्यमपुरुषविधानात्। आत्मनश्च प्रत्यक्त्वेन परात्त्वाभावादिति चेत् सत्यम्। दार्ढ्ये स्वप्रतियोगितेति महाव्याकरणसूत्रम्। दार्ढ्ये विवक्षिते सति स्वस्य प्रतियोगितापरात्त्वरूपा युष्मदर्थता भवतीत्यर्थः। तथा च प्रकृतेऽपि कण्वस्य स्तोतृत्वदार्ढ्यात्। अस्मदर्थस्य कण्वस्य त्वं वदेति परात्त्वरूपा युष्मदर्थतोपपन्नेति द्रष्टव्यम्॥ १३ ॥

(ऋ.म-४७०)

मिमीहि श्लोकमास्ये पर्जन्य इव ततनः।
गाय गायत्रमुक्थ्यम् ॥ १४ ॥

(ऋगर्थोद्धारः) - मिमिहीति॥ अत्राऽत्मानमेवाऽह कण्वः। हे कण्व त्वं प्रकृतस्य ब्रह्मणस्पतेर्विष्णोर्मुख्यवायोश्च श्लोकं कीर्तिमास्ये मुखे मिमीहि निर्मिमीष्व, सदा कुरु। अन्यच्च प्रार्थ्यते। पर्जन्य इव पर्जन्यो मेघो यथा समुद्रादिभ्यो उदकं गृहीत्वा वृष्टिद्वारा जगति विस्तारयति न केवलं स्वस्मिन्नेव जलमन्तर्गतं कुरुते तथा त्वमपि ब्रह्मणस्पतेः कीर्तिं स्वमुख एव स्थायितामकृत्वा जगत्यपि ततनः, विस्तृणीहि, शिष्येभ्योऽप्युपदिशेति यावत्। किञ्च, उक्थ्यं 'प्राणो वा उक्थ्यम्' इति श्रुतेः। ब्रह्मणस्पतिशब्दोक्तो विष्णुर्मुख्यवायुश्च उक्थ्यम्॥ तद्विषयं तत्प्रतिपादकमिति यावत्। गायत्रं साम सामगानमुख्यप्रतिपादकस्य गायत्रसाम्नो गानं कुर्वित्यर्थः॥ १४ ॥

(ऋ.म-४७१)

वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्।
अस्मेवृद्धा असन्निह ॥ १५ ॥ १७ ॥ ३८ ॥

(ऋगर्थोद्धारः) - वन्दस्वेति॥ अत्राप्यात्मानमेवाऽह कण्वः। हे कण्व त्वं त्वेषं प्रकाशवन्तं पनस्युं, पनतिरिह ज्ञानार्थः। ततस्ताच्छीलिकः स्युः। ज्ञानशीलम् अर्किणम् अर्काः ऋचः। ताः अस्य सन्ति ज्ञापका इत्यणम् तं ऋभिर्विज्ञेयमित्यर्थः। यद्वा, 'ऋ गतौ' अस्मात् कर्मणि इनुप्रत्यये धातोः पुरतः ककारागमे ऋवर्णस्य गुणे तस्य रपरत्वे अर्किन्निति प्रातिपदिकं निष्पद्यते। तथा चार्यते ज्ञायते इत्यर्की तम्। अस्मिन् पक्षे ऋग्भिरिति योग्यतया लाभः। एतादृशं मारुतं मरुतामयं मारुतः तं मारुतं मरुत्सम्बन्धिनं गणं सप्तसप्तकसमुदायं वन्दस्व स्तुहि। वदि अभिवादनस्तुत्योः, इति धातोः। न च मरुद्गणं स्तोतुं न जानामीति वाच्यं यतोऽस्माकमिह, निमित्तसप्तम्येव। एतेषु मरुत्सु निमित्तेषु सत्सु तदनुग्रहादिति यावत्। वृद्धाः आर्याः, असन् आसन्, मरुत्स्वरूपज्ञापका इति शेषः। तथा च मरुदनुग्रहलब्धसद्गुरूपदेशेनास्माकं मरुत्स्वरूपज्ञानस्य जातत्वात् स्तोतुं न जानामीति न वाच्यमिति भावः॥ १५ ॥

सूक्तम् - ३९

कण्वः ऋषिः। मरुतः देवताः। प्रगाथाः छन्दः। विषमा ऋचः बृहतीछन्दस्काः। समाः सतो बृहतीछन्दस्काः।

(ऋ.म-४७२)

प्रयदित्था परावतः शोचिर्न मानमस्यथ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतय ॥ १ ॥

(ऋगर्थोद्धारः) - प्रयदित्थेति ॥ एतदपि दशर्चं मारुतं सूक्तम् । हे मरुतो यूयं परावतो दूरतः, हरे स्थानादिति शेषः। हरेः स्थानात् वैकुण्ठादेः सकाशात् दूरतो विद्यमाने स्वलोके स्थित्वैव '[१]भूमिस्थेषु सज्जनेषु शोचिर्न शोचिरिव प्रकाशमानं ज्ञानं प्र अस्यथ 'असू क्षेपणे' । प्रकर्षेण क्षिपथ। यथा सूर्यचन्द्रादयो हरेः स्थानाद् अर्वाग् दूरतो विद्यमानान्तरिक्षलोके स्वमण्डल एव स्थित्वा भूमिष्ठेषु जनेषु शोचिः प्रकाशमस्यन्ति क्षिपन्ति, भूमौ व्याप्तम् कुर्वन्तीति यावत् । एवं मरुतोऽपि हरेः स्थानादर्वाग् दूरतो विद्यमाने स्वलोक एव स्थित्वा स्वसमीपस्थान् ऋषीन् प्रत्युपदिशन्ति । तत्सम्प्रदायेन च भूमिष्ठैः सज्जनैर्ज्ञानमाप्यते । एतदभिप्रायेणैव मरुतो यूयं मानं क्षिपथेत्युच्यते एवं विष्णुरपि भूरादिलोकेभ्यो दूरतो विद्यमाने स्वलोके स्थित्वा ब्रह्मादीन् प्रत्युपदिशति। तत्सम्प्रदायेन च भूमिष्ठैः सज्जनैः ज्ञानमाप्यते । एतदभिप्रायेण विष्णुरपि ज्ञानमस्यतीत्युच्यत इत्यवसेयम्।

किञ्च, यत् यद्यत् पृथिव्यादिरूपं कार्यजातमित्था इत्थं, धारकत्वतर्पकत्व-दाहकत्वादिप्रकारोपेततया प्रमितमिति यावत्। तत्कार्यजातं तत्प्रकारोपेततया मरुतो युष्माकमेव कृतमित्येतावान् शेषः। सप्रकारं कार्यजातं युष्माभिरेव निर्मितमित्यर्थः ।

अन्यच्च मरुतां कर्म ब्रूमः । किं तत् ? यत् यूयं कंयाथा कं किञ्चिद् वस्तु याथा ज्ञानाद् गच्छथ, ज्ञानविषयं कुरुथ जानीथेति यावत् । तत् कस्य किमधीनेन क्रत्वा क्रतुना ज्ञानेनाऽक्षेप्योऽयम् । किन्तु कंयाथ यत् कं किञ्चित् वस्तु याथ ज्ञानाद् गच्छथ। ज्ञानविषयं कुरुथ जानीथेति यावत् । तत् स्वाधीनादेव ज्ञानात् न पराधीनादिति शेषः । तथा यद्यूयं कं याथ कं किञ्चिद् वस्तु याथ बलाद् गच्छथ बलविषयं कुरुथ, बलेन वृक्षादिकं

---

१. 'भूमिष्ठेषु' घ.।

कम्पयथेति यावत् । तत् कस्य किमधीनेन वर्पसा बलेन । किन्तु यत् कन्धूतयः बलात्, कं कस्य चित् धूतयः यूयं किञ्चिद् वृक्षादिकं धुनुथेति यावत्। तत् स्वाधीनादेव बलात् न पराधीनादिति शेषः । इत्येतत् । ह हि प्रसिद्धमित्यर्थः । अत्र विवक्षायां स्वाधीनादेव ज्ञानात् स्वाधीनादेव बलादित्येतद् यथास्थितमेव। तज्ज्ञानबलयोः स्वतन्त्रत्वात् तदितरप्रसिद्ध-मरुद्विवक्षायां तु स्वाधीनादेव ज्ञानाद् बलाच्चेत्येतत् स्वावरानधीनाद् ज्ञानाद् बलाच्चेति व्याख्येयम् ॥ १ ॥

(ऋ.म-४७३)

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥ २ ॥

(ऋगर्थोद्धारः)- स्थिरा वः सन्त्विति ॥ हे मरुतो ! वो युष्माकं पराणुदे, पराणुशब्दस्य क्विबन्तस्येयं चतुर्थी। जगति शत्रूणामपनोदाय, उत प्रतिष्कम्भे, क्विबन्तस्य प्रतिष्कम्भ्शब्दस्येयं चतुर्थी । शत्रूणां स्तम्भनाय च आयुधा आयुधानि सन्तु सन्ति । यान्यायुधानि सन्ति न तान्यदृढानि। वीळू वीळूनि सुदृढान्येव, कुतः ? यतः स्थिराणि बहुकालीनानि। काष्ठजातीयेषु बहुकालीनत्वस्य दार्ढ्यव्याप्यतया दृष्टत्वेनाऽयुधानामपि काष्ठविशेष-निर्मितत्वादित्यवगन्तव्यम्। तथा चैवं स्थिरत्व-वीळुत्वयोर्हेतुहेतुमद्भावस्य विवक्षितत्वेन तयोर्भेदाभावात् पुनरुक्तिरिति शङ्कानवकाशः ।

किञ्च, वो युष्माकं पनीयसी, स्तुत्यर्थात् पनीतेः कर्मणि ईयसुन्, नलोपः। ततः ङीप्। तथा च पन्यते स्तुत्यत इति पनीयसी स्तुत्या स्तुत्यत्वेनोत्तमत्वं लक्ष्यते । उत्तमं तविषी तेजो बलं वा अस्तु अस्ति । युष्माकं तेजो बलं वाऽस्ति तथाऽन्येषां दैत्यादीनामपि सद्भावे भवतां कथं तद्धनने सामर्थ्यं स्यादित्याशङ्कापरिहारायोच्यते। मायिनो मर्त्यस्य समुदायापेक्षमेकवचनम्।

मायिनां छद्मवतां मर्त्यानां मरणशीलानां दैत्यादीनां पनीयसी तविषी उत्तमं तेजो बलं वा मा नास्तीत्यर्थः । तथा च दैत्यानां भवदपेक्षया दुर्बलत्वाद् भवतां च तन्निवारणसाधनभूतदृढायुधोत्तमबलादिसद्भावादस्य तपोविघ्नकरान् दैत्यादीन् हन्तेति भावः । तथा च मारुतत्वसिद्धिरिति ज्ञातव्यम् ॥ २ ॥

(ऋ.म-४७४)

परां ह यत् स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥ ३ ॥

(**ऋगर्थोद्धारः**) - **परा ह यदिति** ॥ हे मरुतो ! भगवद्रूपविशेषाः, प्रसिद्धाश्च यूयं यत् स्थिरं दीर्घकालं भक्तेषु स्थितम् अज्ञानपापादि तच्च परा ह हथ विनाशयथ, युष्मद्भक्तस्येति शेषः । गुरु गुरून्, गुरुस्तु गीष्पतौ श्रेष्ठे, इति कोशात् श्रेष्ठान् उत्तमानिति यावत् । नरः, नृशब्दस्य बहुवचनमेतत् । नरान् पुरुषान् वर्तयथ । सन्मार्गे प्रवर्तयथ । नित्यमञ्जसा सद्गुणान् दत्वेति शेषः । किञ्च, मरुतो भगवद्रूपविशेषाः यूयं वनिनः 'वन षण सम्भक्तौ' अस्मात् कर्मणि इन् । तथा च वननीयान् भजनीयान् सुरान् 'तथा पृथिव्याः महालक्ष्मीरूपभूतायाः भूदेव्याः पर्वतानां जन्माख्यपर्ववतां सुरातिरिक्तानां जीवानां च आशा दिशः पर्यन्तान्, तत्समीपमिति यावत् । वि याथना विशेषेण याथ, तत्तदभीष्टफलदानायेति शेषः । इत्येतत् ह श्रुत्यादिप्रसिद्धमित्यर्थः ।

प्रसिद्धमरुत्पक्षे तु - हे मरुतो यूयं वनिनो वन सम्बन्धिनः तरून् प्रति, तच्चालनायेति यावत् । वि याथन विशेषेण याथ । वनस्थतरुसञ्चालने भवतामतिशयेन प्रीतिरित्याशयः । तथा पर्वतानां पृथिव्याश्च आशा दिशः पर्यन्तान्, तत्प्रान्तभागानिति यावत् । वियाथन, नित्यमिति शेषः । पर्वतपृथिवीप्रान्तभागादिरूपं किमपि वस्तु युष्माकमगम्यं न भवतीति यावदित्येतत् ह प्रसिद्धमित्यर्थः ॥ ३ ॥

(ऋ.म-४७५)

नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥ ४ ॥

(**ऋगर्थोद्धारः**)- **नहि वः शत्रुरिति** ॥ हे रिशादसः ! रमणं रीत्युच्यते । तथा च रि रमणेन सुखेन, धनार्जनाद्यायासेन विनेति यावत् । शं वैषयिकं सुखम् अदन्त्यनुभवन्तीति रिशादसो मरुतो वो युष्माकं द्यविद्यवि स्वर्गे, शत्रुः शातयिता नाधिविविदे नैव लभ्यते । भूमौ च नाधिविविदे । उपलक्षणमेतत् । कचिदप्यन्तरिक्षादौ नैव लभ्यते । अनेन लोकत्रयेऽपि शत्रुशून्यत्वादेव रिशादस्त्वं, भवतामन्यथा तन्न स्यादित्युपपादितमिति ज्ञातव्यम् । कुतो लोकत्रयेऽपि युष्माकं शत्रुर्न लभ्यते इत्यतस्तन्निबर्हणसामर्थ्यसद्भावादित्युच्यते । हे रुद्रासो रुद्राः रुजां द्रावकाः मरुतो युष्माकं नू चित् अद्यापि सर्वदेति यावत् । आधृषे सकलदैत्यनिबर्हणाय तना 'तनु विस्तारे' विस्तारो व्याप्तिः । सा च कालतो विवक्षिता । तथा च तना कालतो व्याप्ता, नित्येति यावत् । युजा योगेन सहितेति शेषः । दैत्यविमुखीकरणोपायेन सहिता । यद्वा योगाभ्यासेन सहिता प्राप्तेति यावत् । तविषी बलं तेजो वा अस्तु अस्ति हि प्रसिद्धमित्यर्थः ॥ ४ ॥

(ऋ.म-४७६)

प्रवेपयन्ति पर्वतान् विविञ्चन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥ ५ ॥ १८ ॥

(**ऋगर्थोद्धारः**) - **प्रवेपयन्तीति** ॥ प्रो आरतेत्यत्र प्रो इति, आरतेति पदच्छेदः । प्रो इत्यत्र प्र, उ इति पदद्वयमस्तीति ज्ञेयम् । मरुतो देवासो देवाः पर्वतान् प्रवेपयन्ति प्रकर्षेण कम्पयन्ति, वनस्पतींश्च विविञ्चन्ति विभिन्दन्ति, मूलतः पृथक् कुर्वन्ति ।

विष्णुपक्षेऽयमर्थः । देवासो देवाः क्रीडादिगुणसम्पन्नाः मरुतो यन्ति वनस्पतीन्, वनाः वननीयाः भजनीयाः इन्द्राद्यास्तेषां पतीन् । यद्वा, वनाः भजनीयाश्च सर्वेषां पतयश्चेति वनस्पतयः, पारस्करादित्वात् सुट् । चतुर्मुखपुरस्सराः देवाः तान् वनस्पतीन् विविश्वन्ति । तारतम्येन फलदानतः सम्यग् विवेचयन्तीति । किञ्च, मरुतो भगवद्रूपविशेषाः प्रसिद्धाश्च देवाः, सर्वया विशा, एकवचनं बहुवचनार्थे, सर्वाभिः प्रजाभिः प्रो आरत प्रकर्षेण सहेति यावत् । उ एव सहैव युगपदेव प्रजाः यदोत्पन्नाः तदैव न तु कालविलम्बेनेति यावत् । आरत प्राप्ताः, सङ्गताः, प्रेरणाय सर्वप्रजास्वतिष्ठन्तेति यावत् ।

किञ्च, मरुतो भगवद्रूपविशेषाः दुर्मदा इव = उन्मत्ता इव, स्वप्रयोजनानुसन्धानहीना एव सन्त इति यावत् । नरान् शुभाशुभकृतौ प्रेरयन्तीति वाक्यशेषः । यथोक्तं - **'लोकवत्तु लीलाकैवल्यम्'** (ब्र.सू. २-१-३४) इति ॥ ५ ॥ १८ ॥

(ऋ.म-४७७)

उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
अवो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥ ६ ॥

(ऋगर्थोद्धारः) - उपो रथेष्विति ॥ उपो इति रथेष्विति पदच्छेदः । हे मरुतः ! यूयं रथेषु पृषतीः पृषत्याख्यवाहनानि उपायुङ्ध्वं सदा उपयोजितवन्त एव । रोहितः तन्नामको मृगश्च, प्रष्टिः पृष्टं रथपृष्ठभागं वहति 'वह प्रापणे' प्राप्तो भवति । सम्बद्धो भवति । रोहितं रथपृष्ठे योजितवन्त इति यावत् । पृषत्याख्यवाहनोपेतेन पृष्ठनियोजितरोहितमृगवता रथेन यदा यूयमागच्छथेति यावत् । तदा वो युष्माकं यामाय 'या प्रापणे' प्रापणं गमनमपि भवति । ततो भवेम गमनाय गमनं सोढुमिति यावत् । पृथिवीचिद् धरादेव्यपि, दाढ्यर्येति

शेषः । आ अश्रोत् पुनरतिशयेन आश्रयत्, स्वाधारभूतं शेषदेवमिति शेषः । किञ्च, मानुषाः मनुष्याश्चाबीभयन्त, स्वार्थे णिच्, अबिभयुः भीतिमापुरित्यर्थः ॥ ६ ॥

(ऋ.म-४७८)

आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥ ७ ॥

(ऋगर्थोद्धारः) - आ वो मक्ष्विति ॥ हे रुद्राः ! रुजां विद्रावकाः मरुतः! वयं वो युष्माकं सकाशात् कं सुखं, द्वितीया षष्ठ्यर्थे । सुखस्य तनाय, तनोतिरत्र प्राप्त्यर्थः । प्राप्तये, मक्षु क्षिप्रं च इत्येतदत्राप्यनुवर्तते । वो युष्माकं अवो रक्षां युष्मत्कर्तृकामावृणीमहे सम्यक् प्रार्थयामहे । एवं युष्मदवनप्रार्थयितृत्वेन अस्माकं युष्मत्सम्बन्धित्वाद् यथा यूयं पुरा बिभ्युषे भीतियुक्ताय कण्वाय, मह्यमिति यावत् । गतवन्तः **'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ'** (पा. सू. २-३-१२) इत्यादिसूत्रेण कर्मणि चतुर्थी । पूर्वकाले भीतियुक्तं मां यथा संरक्षणाय भवद्भिरागतमिति यावत् । इत्था तथैव नूनम् अद्यापि नोऽस्मान् प्रति, अवसा = रक्षणेन सह, रक्षणं कुर्वन्त एवेति यावत् । गन्त आगच्छतेत्यर्थः ॥ ७ ॥

(ऋ.म-४७९)

युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥ ८ ॥

(ऋगर्थोद्धारः) - युष्मेषित इति ॥ हे मरुतो यो दुरात्मा युष्मेषितः युष्माकं सर्वनियन्तृत्वान्मुख्यतो युष्माभिरेवेषितः प्रेरितः, अथवा मर्त्येषितः बाह्यदृष्ट्या मर्त्येण मानुषेण राजादिना प्रेरितः स च नोऽस्माकं, अभ्वः,

अभूः। अभ्वौ। अभ्वः। अभ्वं। अभ्वौ। अभ्वः। इत्यभूशब्दस्य द्वितीया-बहुवचनमेतत् । अभूतीः ऐश्वर्याभावमिति यावत्। आ ईषते सम्यगिच्छति। तं दुरात्मानं यूयं, शवसा = सुखेन, वियुयोत 'युयु वियोगे' वियोजयत, ओजसा = बलेन च, वियोजयत। तथा युष्माकाभिः = युष्मत्सम्बन्धिनीभिः युष्मत्कर्तृकाभिः, ऊतिभिः= रक्षाभिः, वियुयोत= अस्मदैश्वर्याभावे इच्छावन्तं दुरात्मानं सुखबलवियुक्तं कृत्वा मा रक्षथेत्यर्थः ॥ ८ ॥

(ऋ.म-४८०)

असामि हि प्रयज्यवः कण्वं दद प्रचेतसः।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥ ९ ॥

(ऋगर्थोद्धारः)- असामि हीति॥ अत्र उत्तरऋगुक्तं सुदानवः इत्येतद्विशेषणमपि ददेत्यत्र हेतुत्वेन योज्यम्। तथा च हे सुदानवः! सुष्ठु दानशीलाः, हे प्रयज्यवः! यजने कर्मणि युः। प्रकर्षेण मखेज्याः, प्रचेतसः = प्रकृष्टं चेतो येषां ते तथा प्रकृष्टचित्ताः, मरुतो यूयं, कण्वं, द्वितीया चतुर्थ्यर्थे। कण्वाय, असामि = असमं, समशब्दः उत्तमस्याप्युपलक्षकः। तथा च न विद्यते समं सदृशमुत्तमं वा यस्मात् तद् असममसदृशमनुत्तमं चेति यावत्। अभीप्सितमिति शेषः। क्षिप्रमित्याङोऽर्थः। दद = दत्त। किञ्च, असामिभिरसमैरसदृशैरनुत्तमैश्चेति यावत्। ऊतिभिरभिप्रायैः, युक्ता इति शेषः। अस्मद्रक्षाविषयकानुत्तमाभिप्रायवन्तो यूयमिति यावत् । अस्मद्रक्षणमुद्दिश्येति तात्पर्यम्। विद्युतो वृष्टिं न= वृष्टिमिव 'अमोघा चोत्तरा विद्युत्' इति वचनाद् वृष्टिमुद्दिश्य वृष्टिं, कर्तुमिति यावत्। आगन्त क्षिप्रमागच्छत ॥ ९ ॥

(ऋ.म-४८१)

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः।
ऋषिद्विषे मरुतः हरिमन्यव इषुं न सृजत द्विषम् ॥ १० ॥

(ऋगर्थोद्धारः) - असाम्योज इति॥ हे सुदानवः सुष्ठु दानशीलाः धूतयः रिपूणां कम्पकाः मरुतो यूयमसामि असममनुत्तममोजो बलं बिभ्रथ। असामि असदृशमनुत्तमं च शवः सुखं च बिभ्रथ। अत एवमनुत्तमादिबलयुक्तत्वाद् यूयं परिमन्यवे परितः समन्तात् सर्वदा चास्मद्विषये गतः स्थितो मन्युः कोपो यस्यासौ परिमन्युस्तस्मै, अत एव, ऋषिद्विषे = ऋषेः कण्वस्य मम द्विषे द्वेषिणे दैत्याय, तं हन्तुमिति यावत्। इषुं न = शरमिव स्थिरं, तत्स्थानीयमिति यावत्। तीक्ष्णं वा प्रतिद्विषं सृजत। अस्मद्वैरी साक्षाद् भवद्भिः वधायायोग्यः। अतस्तत्स्थानीयं किञ्चित् प्रतिद्विषं सृष्ट्वा तद्द्वारा स हन्तव्य इत्याशयः ॥ १० ॥ १९ ॥ ७ ॥ ३९ ॥

सूक्तम् - ४०

कण्वः घोरः ऋषिः। ब्रह्मणस्पत्यादयो देवताः।

प्रगाथः विषमा बृहत्यः छन्दांसि। समाः सतो बृहत्यः॥

(ऋ.म-४८२)

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ १ ॥

(ऋगर्थोद्धारः) - उत्तिष्ठेति ॥ अष्टर्चमिदं ब्रह्मणस्पत्यादिदेवताकं सूक्तम्। हे ब्रह्मणस्पते! ब्रह्मणश्चतुर्मुखस्य पते विष्णो! ब्रह्मणो वेदवाचो भारत्याः पते वायो वा, अस्मान् प्रत्यागन्तुमुत्तिष्ठ। यतो वयं देवयन्तः, अत्र दिव्धातुः स्तुत्यर्थः। दिवु क्रीडाविजिगीषाद्युतिस्तुतीत्यादिधातोः। अनेकार्थत्वाद् धातूनां पूजार्थश्च। तथा च स्तुतिपूजार्थाद् दिव्धातोर्घञ्प्रत्यये अकारमात्रं विहाय सर्वस्य लोपे गुणे च सति देवेति रूपम्। ततः स्तुतिपूजार्थाद् देवशब्दात् तत्करोतीत्यर्थे णिच्। तथा च देवं स्तुतिं पूजां वेति यावत्, कुर्वन्तीति देवयन्तीर्देवयन्त्यौ देवयन्त्यः। त्वदीयां स्तुतिं

पूजां वा कुर्वाणा वयं त्वा ईमहे 'इण् गतौ' शरणमिति शेषः। शरणं गताः स्मः। सुदानवः = सुष्ठु दानशीलाः मरुतश्चास्मान् उप प्रयन्तु अस्मत्समीपं प्रत्यायान्तु। हे इन्द्र त्वं च सचा= सुखेनैव प्राशूः अस्मद्यज्ञस्य इति शेषः। प्रकर्षेणातिशयेन अश्नातीति प्राशूर्भोक्ता भवेत्यर्थः॥ १॥

(ऋ.म-४८३)

त्वामिद्धि सहसस्पुत्र मर्त्यं उपब्रूते धने हिते।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥ २॥

(ऋगर्थोद्धारः) - त्वामिद्धीति॥ हे सहसस्पुत्र वायोः पुत्र 'यस्तद् वेद स पितुष्पिताऽसत्' इत्यादिश्रुतेर्वायुना व्यङ्ग्यत्वाद् विष्णुः सहसस्पुत्रः, इन्द्रस्तु वायूत्पन्नत्वात् साक्षात् सहसस्पुत्र एव। तथा च हे सहसस्पुत्र विष्णो इन्द्र वा। यो मर्त्यः क्षत्रियस्त्वामित् त्वामेव हे मरुतो वो युष्मांश्च हिते धने प्रसिद्धधनापेक्षया क्षत्रियाणां हितं धनं युद्धमेवातो हिते अभीष्टधने युद्धे युद्धाख्यधनविषये तदुद्देशेन युद्धे मम वैरिनिरसनसाधनीभूतवीर्यप्राप्तिर्भूयादित्याशयेनेति यावत्। उपब्रूते स्तौति आचके च। अनेकार्थत्वाद् धातूनां 'चक तृप्तौ' इत्ययं धातुर्दर्शनेऽपि वर्तते। अपश्यच्च। सः सुवीर्यं वैरिनिरसनसाधनीभूतं बलम् आ सम्यग् दधीत प्राप्तवान् हि।

तथा हे सहसस्पुत्र विष्णो इन्द्र वा, यो मर्त्यो मनुष्यः संसारे दारिद्र्येण खिन्नः सन् त्वामित् त्वामेव हे मरुतो वो युष्मांश्च हिते भूमौ निहिते धने निधिरूपे धने विषये तदुद्देशेन भूम्यन्तर्गतनिधिरूपं धनं ज्ञानं मे स्यात्। अनन्तरं तं निधिं वयं गृह्णीम इत्याशयेनेति यावत्। उपब्रूते आचके च। सः स्वश्व्यं शोभनाः अश्वाः इन्द्रियाणि स्वश्वाः **'इन्द्रियाणि हयान् आहुः'** इति श्रुतेः। तेषामिदं जन्यतया तत्सम्बन्धि स्वश्व्यं ज्ञानम्। तथा च भूम्यन्तर्गतनिधिरूपधनप्रदर्शनसाधनतया शोभनानि यानि इन्द्रियाणि

जन्यतया तत्सम्बन्धि यद् ज्ञानं अत्रायं निधिरस्तीति निधिविषयकं तद् आदधीत प्राप्तवान्। अनन्तरं निधिरूपं धनं च दधीत प्राप्तवान् हि।

तथा हे सहसस्पुत्र! विष्णो! इन्द्र वा, यो मर्त्यो नित्यानित्यवस्तुविवेकेन विरक्तः सन् त्वामित् त्वामेव हे मरुतो वो युष्मांश्च हिते धने हरिविषयकज्ञानभक्त्याख्यमहानिधिरूपधनविषये तदुद्देशेन तद्विषयकज्ञानादिकं मे स्यादित्याशयेनेति यावत्। उप ब्रूते आचके च। स्वश्व्यं शोभनानि विषयान् आकृष्टानि यानीन्द्रियाणि तज्जन्यतया तत्सम्बन्धि यद् ज्ञानादिकं तद् आदधीत प्राप्तवान् हीति।

अत्र ब्रह्मणस्पतिशब्देन विष्णुविवक्षापक्षे आचक [1]इत्युक्तापरोक्षज्ञाने न मुक्तिसाधनीभूतस्वयोग्यबिम्बविषयकं विवक्षितम्। अपि तु ऐहिकफलसाधनं काम्यरूपविषयकमेवेति सम्प्रदायः। यथोक्तं सूत्रकृता **'न सामान्यादप्युपलब्धेः मृत्युवन्न हि लोकापत्तिः'** (ब्र.सू. ३-३-५३) इति। उक्तं च भगवत्पादैः 'सामान्यदर्शनाल्लोकाः मुक्तिर्योग्यात्मदर्शनात्' इति॥ २॥

(ऋ.म-४८४)

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ३॥

(ऋगर्थोद्धारः) - प्रैतु ब्रह्मणस्पतिरिति॥ ब्रह्मणस्पतिर्विष्णुर्वायुश्च प्रैतु अस्मत्कार्येषु अग्रतो यातु। मुख्यसाधनो भवत्विति यावत्। एवं सूनृता सूनृतवागभिमानिनी देवी सरस्वती। यद्वा, देवी द्योतमाना सूनृतविष्णुसम्बन्धिनी वाग् इदं त्वया कार्यमित्याज्ञारूपा प्रैतु अस्मत्कार्येष्वग्रतो यातु। मुख्यसाधनभूता भवतु। अन्येऽपि सर्वदेवाः नोऽस्मदीयं यज्ञं वीरमारब्धान्तगामिनं, न रीयते क्षीयत इति नरः। नर एव नर्यः स्वार्थे

---

१. 'इत्युक्तापरोक्षज्ञानं' इति पाठेन भाव्यमिति भाति।

यप्रत्ययः । तं नर्यं पङ्क्तिराधसम् । पङ्क्तिशब्दः पञ्चपर्यायः । पङ्क्तिर्विंशतीति निपातनात् । तथा च पङ्क्तिः पञ्चविधान् जनान् देवगन्धर्व-नृपितृदैत्याभिधानान् जनान् राधयति वर्धयति सृजति पालयति संहरति चेति यावत् । अतः पङ्क्तिराधाः भगवान् । तं पङ्क्तिराधसं भगवन्तमच्छा प्रति नयन्तु प्रापयन्तु । अजान् ग्राममनयदितिवद् द्विकर्मकता । यद्यपि 'राध साध संसिद्धौ' इति पठ्यते । तथाऽपि धातूनामनेकार्थत्वाद् राधतिर्वर्धनेऽपि वर्तते । वर्धनं च सर्जनादिरूपं विवक्षितमिति भावः ॥३॥

(ऋ.म-४८५)

यो वाघते ददाति सूनरं वसु स धत्ते अक्षितिश्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥ ४ ॥

(ऋगर्थोद्धारः) - यो वाघत इति ॥ यो ब्रह्मणस्पतिर्विष्णुर्वाघते स्तुवते भक्ताय, स्तुतिकर्मसु पाठात् । सूनरं नरः सुष्ठु समीचीन इति यावत्, येन भवेत् तत् सूनरम् । एतादृशं वसु ज्ञानरूपं धत्ते ददाति । किञ्च, यः स विष्णुर्वाघते स्तुवते भक्ताय अक्षितिश्रवः अक्षयां कीर्तिं च धत्ते, दातुमिति शेषः । यद्वा, धातूनामनेकार्थत्वाद् धत्ते ददातीत्यर्थः । तस्मै विष्णवे इळां हविराख्यमन्नम् आयजामहे दद्मः । 'यज देवपूजासङ्गतिकरणदानेषु' इति धातोः। कथम्भूतम् अन्नम् ? सुवीरम् । अन्नवाचीळापदापेक्षया स्त्रीलिङ्गता। सु शोभनं, वीरं शारीरबलमिति यावत् । यस्मात् तत् सुवीरं, पुनः कीदृशम्? सुप्रतूर्तिशब्दो रूपपर्यायो वेगपर्यायश्च । सु शोभना प्रतूर्तिः रूपं, शरीरकान्तिरिति यावत्, वेगो वा यस्मात् तत् सुप्रतूर्ति ।

पुनः कीदृग्विधम् ? अनेहसम् अनानां प्राणानामिन्द्रियाणाम् ईहा चेष्टा, प्रवृत्तिरिति यावत् । यस्मात् तदनेहः एतादृशमिळाशब्दोक्तमन्नम् आयजामह इत्यर्थः । अन्नस्य शरीरबलकान्तिवेगप्राणचेष्टाहेतुत्वं प्रसिद्धमेवेति ज्ञातव्यम्।

अत्र अन ईहेत्यत्र गुणे अनेहेति जाते अनानामीहा यस्मात् तदनेहमिति भाव्यम् । तथाऽपीहाशब्दस्यानशब्देन समस्तत्वात् समासान्ताद् अनेहशब्दाद् असुप्रत्यये हकारस्थाकारलोपे अनेहस् इति सकारान्तप्रातिपदिकं सिद्ध-मिति । अत्र यद्यपि अन्नविशेषणस्य नपुंसकलिङ्गस्य अनेहस्शब्दस्य द्वितीया अनेह इति भवति । अतस्तथैव निर्देशः कार्यः । न त्वनेहसमिति पुल्लिङ्गप्रयोगः । इळाशब्दापेक्षया स्त्रीलिङ्गप्रयोगाभिप्राये त्वनेहसीति वक्त-व्यम् । तथाऽपि छान्दसत्वाददोष इति ज्ञातव्यम् ॥ ४ ॥

(ऋ.म-४८६)

प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ ५ ॥ २० ॥

(ऋगर्थोद्धारः) - प्रनूनमिति ॥ ब्रह्मणस्पतिर्भगवान् विष्णुरेव उक्थम् उत्थापकत्वेन, उत्पादकत्वेनेति यावत् । उक्थो विष्णुस्तद्विषयं तु उक्थं, स्वप्रतिपादकमिति यावत् । मन्त्रं नूनं निश्चितं प्रवदति प्रवदेत् । मन्मुखेन प्रवर्तयेदिति यावत् । कथम्भूतं मन्त्रम् ? इन्द्रो वरुणो मित्रो अर्यमा अन्ये च देवाः यस्मिन् मन्त्रे ओकांसि गृहाणि चक्रिरे । मन्त्रं गृहस्थानीयं कृत्वा तद्वाच्या जाता इति यावत् । ननु पूर्वार्धे उक्थमित्यनेन मन्त्रस्य भगवद्विषय-कत्वमुक्तम् । उत्तरार्धे तु, इन्द्रादीनां तत्र प्रतिपाद्यत्वमुच्यते । अतो विरोध इति चेत् न । परममुख्यया वृत्त्या इतरदेवताप्रतिपादकत्वस्य विरुद्ध-त्वात् । तथा च श्रुतिः -

'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम् ।
अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थस्ततोऽतः ॥' इति ।

उक्तं चानुव्याख्याने -

'देवतान्तरगाः सर्वे शब्दवृत्तिनिमित्ततः।
विष्णुमेव वदन्त्यद्धा तत्सङ्गादुपचारतः॥
अन्यदेवान् वदन्तीह विशेषगुणवाचकाः।
विष्णुमेव परं ब्रूयुरेवमन्येऽप्यशेषतः' इति।

तथा च यस्मिन् परममुख्यया वृत्त्या विष्णुवाचकेऽपि मन्त्रे इन्द्रादयो देवाः ओकांसि चक्रिरे अमुख्यया वृत्त्या वाच्या जाता इति व्याख्यानादविरोधः। सर्वदेवानां प्रवर्तको मुख्यवाच्यश्च भगवान् हरिरेवेति ऋक्तात्पर्यम् ॥ ५ ॥

(ऋ.म-४८७)

तमिद्वोचेमा विदथेषु शम्भुवं मन्त्रं देवा अनेहसम्।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥ ६ ॥

(ऋगर्थोद्धारः) - तमिद्वोचेमेति॥ विश्वेद्वामाव इत्यत्र विश्वा, इत्, वा मा, वः इति पदच्छेदः। हे देवाः वयम् इन्द्राद्या देवा मुख्यतो भगवद्विषयकस्य यस्य मन्त्रस्यामुख्यवृत्त्या वाच्या उक्ता तमित्। तमेव। 'शं सुखं सुखकारणमनेहसं, अनानां प्राणानाम् इन्द्रियाणामिति यावत्। ईहा चेष्टा, भगवद्विषये प्रवृत्तिरिति यावत्। यस्माद् भवति अनेहास्तमनेहसं, यस्मिन् मन्त्रे इन्द्रियाणां भगवद्विषयके ज्ञानमार्गे प्रवृत्तिर्भवति तादृशमिति यावत्। मन्त्रं विदथेषु, विदेर्भाविऽथक्प्रत्ययः। ज्ञानेषु, तादर्थ्ये सप्तमी। ज्ञानार्थं वोचेम जपामहे।

नरः, नृशब्दस्येदं बहुवचनम्। प्रधानपुरुषत्वाद् देवाः नृशब्देनोच्यन्ते।

१. अत्राऽदौ 'शम्भुवम्' इति पदेन भाव्यमिति भाति।

हे इन्द्राद्या देवाः ! युष्मत्प्रतिपादकमन्त्रजपारो वयमिति हेतोः इमां च वाचमस्माभिर्जप्यं युष्मत्प्रतिपादकमन्त्रमिति यावत्। प्रतिहर्यथ प्रतिहरत स्वीकुरुत, सत्यतयेति शेषः। अनेनायं मन्त्रः सत्यतयैव जप्यते न तु डम्भबुद्ध्येति स्वीकुरुतेत्यर्थः। किं सत्यतया स्वीकृतमन्त्रजपेन ? च[१] वो युष्माकं सकाशाद्, युष्मत्प्रसादादिति यावत्। अहं, विश्वा = विश्वानि = अखिलानि, वामा वामानि = भद्राणि = शुभानि, इत् = एव, अश्नवत् कण्वोऽहम् अश्नवानि, प्राप्नुवानीत्यर्थः। पूर्वं वोचेमेति बहुवचनं तु पुत्रमित्रादिसाहित्येन वा, एकस्मिन्नपि कण्वे 'गुरावात्मनि चैकेषाम्' इति नियामकसद्भावाद्वा युक्तमिति ज्ञातव्यम्॥ ६ ॥

(ऋ.म-४८८)

को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम्।
प्रप्र दाश्वान् पस्त्याभिरस्थिताऽन्तर्वावत् क्षयं दधे ॥ ७ ॥

(ऋगर्थोद्धारः) - को देवयन्तमिति॥ हे देवाः ! देवयन्तं, देवान् प्रति याति मनसा भजत इति देवयन्। तं देवयन्तं युष्मद्भक्तं जनं कोऽश्नवत्? अश्नुवीत, आप्नुयादिति यावत्। 'अशूङ् व्याप्तौ' इति धातोः। किञ्च, युष्मानुद्दिश्य वृक्तबर्हिषं ज्ञानभक्त्यादिपूर्वकं वृक्तं स्तृतं बर्हिर्येनासौ वृक्तबर्हिस्तं वृक्तबर्हिषं यजमानं वा को अश्नवत् अनुगच्छेत्। न च देवभक्तयजमानावप्राप्याविति वाच्यम्। यदि देवभक्तो वा ज्ञानभक्तिपूर्वकं यज्ञकारी वा इह लोके स्यातां, तदा तन्मार्गं कश्चिदन्योऽपि गच्छेत्। आप्नुयादिति यावत्। तावुभावपीह लोके न स्तः, दुलर्भत्वादित्यर्थः। विविधैहिकामुष्मिकस्वर्गसुखमोहितेषु जनेषु मध्ये निष्कामं ज्ञानभक्तिपूर्वं यज्ञं कुर्वाणो ह्यतिदुर्लभ इति भावः। ता उभावपीह लोके मूर्खजनागम्याविति

१. अत्र चशब्दोऽधिक इव भाति।

तात्पर्यम् । अत्र वस्तुगत्या देवभक्तो ज्ञानपूर्वं यजमान एक एव । तथाऽपि भक्तत्वयष्टृत्वमख्यावस्थाभेदौपाधिकभेदमादाय देवभक्तं वृक्तबर्हिषं यजमानं वेति पृथगुक्तमिति द्रष्टव्यम् । अत एवोत्तरत्र दाश्वानित्येकस्यैवोक्तेः[१] ।

न केवलमिह लोके दुर्लभः । किन्तु असौ दाश्वान् ज्ञानादिपूर्वकं यज्ञं कुर्वाणः पस्त्याभिः सुखैः, तन्नामसु पाठात् । युक्तः सन्निति शेषः । प्रप्र आस्थित प्रास्थित । अत्र प्रेत्युपसर्गद्वयसद्भावात् क्रियायाश्चैकस्या एव सत्त्वात् क्रियासम्बन्ध एव चोपसर्गत्वोपपत्तेस्तदर्थं क्रियायाः आवृत्तिः कार्या । प्रास्थित प्रास्थितेति द्विर्वचनं तु यो य एवं ज्ञानादिपूर्वं यजमानः सर्वोऽप्येव पस्त्याभिर्युक्तः सन् प्रास्थितेति वीप्साभिप्रायम् । तत्रतत्र स्वेष्टस्थानेष्वेव प्रकर्षेण स्थितो भवतीत्यर्थः । तथा च ज्ञानादिपूर्वं यजमान इह लोके दुर्लभ इत्येवं केवलं न भवति । किन्तु उक्तविधयज्ञानुष्ठानजनिता-परोक्षज्ञानद्वारा मुक्तः सन् स्वस्वरूपसुखं भुञ्जन्नेव स्वेष्टस्थानेषु कामत-श्चरति । अतस्तं कोऽनुगच्छेत् ? कः प्राप्नुयादिति यावत् ।

किञ्च, स दाश्वान् ज्ञानादिपूर्वं यजन् स्वेष्टस्थानेष्वेकस्मिन् प्रदेशविशेष एव स्थितो भवति । किन्तु, क्षयं दधे । 'क्षि निवासगत्योः' इति धातोः क्षीयतेऽत्रेति क्षयं स्थानं वैकुण्ठादिरूपं, दधे प्राप्नोति । कथं दधे इत्यत उक्तम् - **अन्तर्वावदिति** । अत्र वतिः सादृश्यार्थकः । अन्तर्वाति, 'वा गतिगन्धनयोः' इति धातोः । गच्छति स्थित इति यावत् । अन्तर्वा विष्णुः। सोमपाशब्दवद् आकारन्तपुल्लिङ्गोऽयम् । तद्वद् अन्तर्वावत् । इदं च धत्त इति क्रियाविशेषणम् । विष्णुवत्, यथा भवति तथा[२], विष्णुसादृश्येन = विष्णुर्यथा सर्वलोकव्यापी, तत्सञ्चारीति यावत् । तथाऽयं दाश्वानपि मुक्तः सन् सर्वलोकव्यापी तत्सञ्चारी भवति । 'यं यमन्तमभिकामो भवति' इत्यादिश्रुतेरित्यर्थः ।

१. 'उक्तिः' इति पाठः समीचीनः स्यात् । २. इदं पदत्रयमधिकमिति भाति ।

यद्वा, अयं वतिर्मतुबर्थः । तथा चायं दाश्वान्, क्षयं = स्थानं वैकुण्ठादिरूपं, दधे = प्राप्नोति । कथं ? अन्तर्वावत् । पूर्ववत् क्रियाविशेषणमेतत् । विष्णुवत्, भावप्रधानो निर्देशः । विष्णुवत्त्वेन विष्णुस्वामिकत्वेनेति यावत् । तत्रापि स्वस्य विष्णुर्यथा स्वामी स्यात् तथा आप्नोति । तत्रापि विष्णुरूपस्वामियुक्तः सन्नेव सर्वव्यापी भवतीति यावत् । **'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'** इति (तै. उ. ८-२-११) श्रुतेरित्यर्थः ॥ ७ ॥

(ऋ.म-४८९)

उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः

॥ ८ ॥ २१ ॥ ४० ॥

(ऋगर्थोद्धारः) - उपक्षत्रमिति ॥ स इन्द्रो जनार्दनः क्षत्रमुप पृञ्चीत क्षत्रियैर्मन्वादिभिरुपपृक्तो भवतीति । तेषु राजराजेश्वररूपेण विष्णुर्भवती-त्यर्थः । आविष्टश्चासाविन्द्रो जनार्दनः तैर्मन्वादिभिः राजभिः, तान् निमित्ती-कृत्येति यावत् । शत्रून् हन्ति । भक्तानां, भयेचित् = संसाररूपे भये च प्राप्ते, सुक्षितिं = शोभनं, भयनिवारकमिति यावत् । क्षितिमाश्रयं स्थानं, मोक्षमिति यावत् । दधे = दधाति । तत्प्रसादाद् भयाभावलक्षणं मोक्षं प्रतिपादयन्तीति टीकाकारैरुक्तत्वात् । किञ्च, महाधने प्रधानपर्यायो हि महाधनशब्दः । क्षत्रियाणां प्रसिद्धं धनं युद्धापेक्षयाऽल्पमेवेति युद्धं महाधनमित्युच्यते । तत्रास्य वज्रिणः, वज गतौ, रमु क्रिडायामिति धातोः ज्ञानानन्दत्वेन वज्रिशब्दवाच्यस्य जनार्दनस्य, वर्ता = य आभिमुख्येन वर्तते स वर्तेत्युच्यते । स नास्ति । तथा, तरुता = यस्तरति अतिक्रामति स तरुता, जेतैव च परमतिक्रामति । अतः स तरुतेत्युच्यते । स नास्ति । पुनः कस्मिन् पुत्रविषये वर्ता तरुता अस्य वज्रिणो नास्तीत्याशङ्कायामुच्यते -

अर्भे च नास्ति । अर्भशब्दोऽल्पवाची । तथा चार्भेऽल्पे प्रसिद्धधनविषयेऽप्यस्य वज्रिणो जनार्दनस्य वर्ता तदीयं धनमहं ग्रहीष्यामीत्याशयेनाभिगन्ता तरुता जेता नास्तीति स एव सर्वोत्तम इत्यर्थ इत्यशेषमतिमङ्गलम् ॥ ८ ॥ २१ ॥ ४० ॥

ऋगर्थो भाष्यटीकोक्तः सङ्गृह्याभ्युदितो मया ।
गुरुप्रसादमाश्रित्य व्यासस्तेनास्त्वभीष्टदः ॥ १ ॥

येभ्यः श्रीमध्वसिद्धान्तमहं सम्यगधीतवान् ।
तान् वन्दे यादवाचार्यान् वेदेशमुनिसेवकान् ॥ २ ॥

॥ इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते श्रीमद्दग्भाष्यटीकागतऋगर्थोद्धारे तृतीयोऽध्यायः ॥ ३ ॥[1]

॥ श्रीकृष्णार्पणमस्तु ॥

---

१. इतः परं लिपिकारस्य कानिचित् वाक्यानि सन्ति ।

'रक्ताक्षिवत्सरे चैत्रमासे ह्यधिकसञ्ज्ञके ।
शुक्लपक्षस्य सप्तम्यामगात् सम्पूर्णतामिदम् ॥

भग्नपृष्टकटिग्रीवस्तब्धदृष्टिरधोमुखः ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥

इदं पुस्तकं तु तुङ्गभद्रातीरे समाप्तम् । केशवेन लिखितम् ।' इति ॥